4

16

616
22

# अथ श्रीनारदस्मृत्यनुक्रमणिका ॥


| प्रकरणम् । | पृष्ठाङ्कः । |
|---|---|
| अथ व्यवहारमातृकायां प्रथमोऽध्यायः ... ... ... | १ |
| व्यवहारमातृकायां द्वितीयोऽध्यायः ... ... ... | १७ |
| सभाप्रकरणम् ... ... ... ... ... | ४० |
| ऋणादानं नाम प्रथमं व्यवहारपदम् ... ... ... | ४६ |
| उपनिधिर्नाम द्वितीयं व्यवहारपदम् ... ... ... | ११९ |
| संभूयसमुत्थानं नाम तृतीयं व्यवहारपदम् ... ... ... | १२३ |
| दत्ताप्रदानिकं नाम चतुर्थं व्यवहारपदम् ... ... ... | १२७ |
| अशुश्रूषाभ्युपेत्य नाम पञ्चमं व्यवहारपदम् ... ... ... | १४१ |
| वेतनस्यानपाकर्म नाम षष्ठं व्यवहारपदम् ... ... ... | १५१ |
| अस्वामिविक्रयो नाम सप्तमं व्यवहारपदम् ... ... ... | १५५ |
| विक्रीयासंप्रदानं नामाष्टमं व्यवहारपदम् ... ... ... | १५७ |
| क्रीतानुशयो नाम नवमं व्यवहारपदम् ... ... ... | १६० |
| समयस्यानपाकर्म नाम दशमं व्यवहारपदम् ... ... ... | १६२ |
| सीमाबन्धो नामैकादशं व्यवहारपदम् ... ... ... | १६५ |
| स्त्रीपुंसयोगो नाम द्वादशं व्यवहारपदम् ... ... ... | १७३ |
| दायभागो नाम त्रयोदशं व्यवहारपदम् ... ... ... | १८९ |
| साहसं नाम चतुर्दशं व्यवहारपदम् ... ... ... | २०४ |
| वाक्पारुष्यं दण्डपारुष्यं च नाम पञ्चदशं व्यवहारपदम् ... ... | २०९ |
| द्यूतसमाह्वयो नाम षोडशं व्यवहारपदम् ... ... ... | २१४ |
| प्रकीर्णकं नाम सप्तदशं व्यवहारपदम् ... ... ... | २१६ |
| परिशिष्टे चौरप्रतिषेधो नाम व्यवहारपदम् ... ... ... | २२२ |

वार्त्तां तु यां चाप्यथ दण्डनीतिम्
राजानुवर्त्तेन्सततामप्रमत्तः।
हन्यादुपायैर्निपुणैर्गृहीतान्
तथैव शास्त्रेव निगृह्य पापान् ॥ ६१ ॥

इति नारदप्रोक्तायां संहितायां चैारप्रतिषेधो नाम प्रकरणं समाप्तम् ॥ समाप्तं चेदं नारदीयं धर्मशास्त्रम् ॥

See Vîramitrodaya. ॥ ६० ॥ हन्यादुपायेन्निपुणे गृहीन्युरेव सास्त्रेव निगृह्य पापान् MS. ॥ ६१ ॥

ब्राह्मणस्य चतुःषष्टीत्येवं स्वायंभुवो ऽब्रवीत्।
विद्यापि च विशेषेण विद्वत्स्वभ्यधिकं भवेत् ॥ ५२ ॥
शारीरश्चार्थदण्डश्च दण्डस्तु द्विविधः स्मृतः।
शारीरं दशधा प्रोक्तमर्थदण्डस्त्वनेकधा ॥ ५३ ॥
काकण्यादिस्त्वर्थदण्डः सर्वस्वान्तस्तथैव च।
शारीरः संनिरोधादिर्जीवितान्तस्तथैव च ॥ ५४ ॥
काकण्यादिस्तु यो दण्डः स तु माषावरः स्मृतः।
माषावराद्यो ऽयं प्रोक्तः कार्षापणपरस्तु यः ॥ ५५ ॥
कार्षापणावराद्यस्तु चतुःकार्षापणावरः।
द्व्यवरो ऽष्टापरश्चान्यस्त्र्यवरो द्वादशोत्तरः ॥ ५६ ॥
कार्षापणो दक्षिणस्यां दिशि रौप्यः प्रवर्तते।*
पणैर्निबद्धः पूर्वस्यां विंशतिस्तु पणाः स तु ॥ ५७ ॥
माषो विंशतिभागस्तु ज्ञेयः कार्षापणस्य तु।
काकणी तु चतुर्भागो माषस्य च पलस्य च ॥ ५८ ॥*
पाञ्चनद्याः प्रदेशे तु संज्ञा या व्यावहारिकी।
कार्षापणप्रमाणं तु निबद्धमिह नैतया ॥ ५९ ॥
कार्षापणो ऽण्डिका ज्ञेया ताश्चतस्रस्तु धानकः।
तद्द्वादश सुवर्णस्तु दीनाराख्यः स एव च ॥ ६० ॥

---

॥ ५० ॥ व्रतापि MS. ॥ ५२ ॥ काकण्यादिस्त्वर्थदण्डः...शारीरः संनिधा-धादि॰ MS. ॥ ५४ ॥ रूप्या for रौप्यः MS. See Vîramitrodaya. पणैर्विबद्धः MS. ॥ ५७ ॥ संज्ञया MS. ॥ ५९ ॥ दीनारश्चितकस्य च MS.

ब्राह्मणस्यापराधेषु चतुःस्वङ्को विधीयते ।
गुरुतल्पे सुरापाने स्तेये ब्राह्मणहिंसने ॥ ४३ ॥
गुरुतल्पे भगः कार्यः सुरापाने ध्वजः स्मृतः ।
स्तेये तु श्वपदं कृत्वा ......................... ॥ ४४ ॥
अशिराः पुरुषः कार्यो ललाटे ब्रह्मघातिनः ।
असंभाष्यश्च कर्तव्यस्तन्मनोरनुशासनम् ॥ ४५ ॥
राजा स्तेनेन गन्तव्यो मुक्तकेशेन धावता ।
आचक्षाणेन तत्स्तेयमेवंकर्मास्मि शाधि माम् ॥ ४६ ॥
अनेना भवति तेन स्वकर्मप्रतिपादनात् ।
राजा ततः स्पृशेदेनमुत्सृजेत्तु ह्यकिल्बिषम् ॥ ४७ ॥
राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः ।
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ॥ ४८ ॥
शासनाद्वा विमोक्षाद्वा स्तेनो मुच्यति किल्बिषात् ।
अशासनात्तु तद्राजा स्तेनस्याप्नोति किल्बिषम् ॥ ४९ ॥
गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनाम् ।
अतः प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ॥ ५० ॥
अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्बिषम् ।
द्विरष्टापाद्यं वैश्यस्य द्वात्रिंशत्क्षत्रियस्य तु ॥ ५१ ॥

---

(?) MS. ॥ ४२॥ ब्राह्मणस्यापराधे तु MS. ॥ ४३॥ शिखिपित्तेन कुट्टयेत् ॥ (?) MS. ॥ ४४ ॥ शिशिराः पुरुषः MS. ॥ ४५॥ आचक्षाणेन स्तेस्तेयम् MS. ॥ ४६ ॥ सकिल्बिषम् । MS. ॥ ४७ ॥ गुरुरात्मवतां शास्ता राजा MS.

येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते।
तत्तदेवास्य च्छेत्तव्यं तन्मनोरनुशासनम् ॥ ३४ ॥
गरीयसि गरीयांसमगरीयसि वा पुनः।
स्तेने निपातयेद्दण्डं न यथा प्रथमे तथा ॥ ३५ ॥
दश स्थानानि दण्डस्य मनुः स्वायंभुवो ऽब्रवीत्।
त्रिषु वर्णेषु यानि स्युर्ब्राह्मण अक्षतः सदा ॥ ३६ ॥
उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च ॥ ३७ ॥
अपराधं परिज्ञाय देशकालौ च तत्त्वतः।
सारानुबन्धावालोक्य दण्डानेतान्प्रकल्पयेत् ॥ ३८ ॥
न मित्रकारणाद्राज्ञा विपुलाद्वा धनागमात्।
उत्स्रष्टव्यः साहसिकस्त्यक्तात्मा मनुरब्रवीत् ॥ ३९ ॥
यावानवध्यस्य वधे तावान्वध्यस्य मोक्षणे।
भवत्यधर्मो नृपतेर्धर्मस्तु विनियच्छतः ॥ ४० ॥
न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितम्।
निर्वास्यं कारयेत्काममिति धर्मो व्यवस्थितः ॥ ४१ ॥
सर्वस्वं वा हरेद्राजा चतुर्थं वावशेषयेत्।
एतेभ्यो ऽनुस्मरन्धर्मं प्राजापत्यमिति स्थितिः ॥ ४२ ॥

---

तद्देवास्य च्छेत्तव्यं MS. See Manu VIII. 334. ॥ ३४ ॥ स्तेनो MS. ॥ ३५ ॥ ब्राह्मण रक्षतः सदा ॥ MS. ॥ ३६ ॥ न तेभ्यो ऽनुस्मरन्धम

तुलाधरिममेयानां गणिमानां च सर्वतः ।
एभ्यस्तूत्कृष्टमूल्यानां मूल्यादष्टगुणो दमः ॥ २५ ॥
धान्यं दशभ्यः कुम्भेभ्यो हरतो ऽभ्यधिकं वधः ।
न्यूनं वैकादशगुणं दण्डं दाप्यो ऽब्रवीन्मनुः ॥ २६ ॥
सुवर्णरजतादीनामुत्तमानां च वाससाम् ।
रत्नानां चैव मुख्यानां शतादभ्यधिके वधः ॥ २७ ॥
पुरुषं हरतः पात्यो दण्ड उत्तमसाहसः ।
सर्वस्वं स्त्रीं तु हरतः कन्यां तु हरतो वधः ॥ २८ ॥
महापशूंस्तु नयतो दण्ड उत्तमसाहसः ।
मध्यमो मध्यमपशुं पूर्वः क्षुद्रपशुं हरन् ॥ २९ ॥
चतुर्विंशावरः पूर्वः परश्चर्णवति भवेत् ।
चतुःशतपरो यश्च मध्यमो द्विशतावरः ॥ ३० ॥
सहस्रं तूत्तमो ज्ञेयः परः पञ्चशतावरः ।
त्रिविधः साहसेष्वेव दण्डः प्रोक्तः स्वयंभुवा ॥ ३१ ॥
प्रथमे ग्रन्थिभेदानामङ्गुल्यङ्गुष्ठयोर्वधः ।
द्वितीये चैव तज्ज्ञेयं दण्डः पूर्वस्तु साहसः ॥ ३२ ॥
गोषु ब्राह्मणसंस्थासु स्थूरायाश्छेदनं भवेत् ।
दासीं तु हरतो नित्यमर्धपादविकर्तनम् ॥ ३३ ॥

---

॥ २४ ॥ वैकादशगुणो MS. ॥ २७ ॥ दण्डमुत्तमसाहसम् । MS. ॥ २८ ॥ परेषर्णवति भवेत् । शतानि यश्चतुरो MS. ॥ ३० ॥ स्थूरायाश्छेदनं भवेत् MS. । See Manu. VIII 325. ॥ ३३ ॥ येन येन विशेषेण स्तेनांसेन विचेष्टते ।

गोचरे यस्य मुष्येत तेन चौराः प्रयत्नतः।
मृग्या दाप्यो ऽन्यथा मोषं पदं यदि न निर्गतम्॥१६॥
निर्गते तु यदा यस्मिन्नष्टे ऽन्यत्र न पातयेत्।
सामन्तान्मार्गपालांश्च दिक्पालांश्चैव दापयेत्॥१७॥
गृहे वै मुषिते राजा चौरग्राहांस्तु दापयेत्।
आरक्षकान्राष्ट्रिकांश्च यदि चौरो न लभ्यते॥१८॥
यदि वा दोषकर्तैष तस्मिन्मोषे तु संशयः।
मुषितः शपथं शाप्यो मोषे वै शुद्धिकारणात्॥१९॥
अचौरो बोधितो मोषं चौरो वै शुद्ध्यकारणात्।
चौरे लब्धे लभेयुस्ते द्विगुणं प्रतिपादिताः॥२०॥
चौरहृतं प्रपद्यैव सरूपं प्रतिपादयेत्।
तदभावे तु मूल्यं स्याद्दण्डं दाप्यश्च तत्समम्॥२१॥
काष्ठकाण्डतृणादीनां मृन्मयानां तथैव च।
वेणुवैणवभाण्डानां वेतसस्यास्थिचर्मणोः॥२२॥
शाकहरितमूलानां हरणे तृणपुष्पयोः।
गोरसेक्षुविकाराणां तथा लवणतैलयोः॥२३॥
पक्वान्नानां कृतान्नानां मद्यानामामिषस्य च।
सर्वेषामल्पमूल्यानां मूल्यात्पञ्चगुणो दमः॥२४॥

---

तयेत्। सामन्ता मार्गपालाश्च दिक्पालाश्चैव दापयेत्॥१७॥ १ दि वा दाप्यक तेषां MS.॥१९॥ चौरे हृतं प्रपन्नेन MS.॥२१॥ वतस्याद्यस्थिचर्मणोः MS.॥२२॥ शाकं MS.॥२३॥ पक्वां नानाकृतान्नानां MS.॥ दयः MS.

स्वदेशघातिनो ये स्युस्तथा यत्नावरोधिनः।
तेषां सर्वस्वमादाय भूयो निन्दां प्रकल्पयेत्॥ ७॥
अहोढान्विमृशेच्चौरान्गृहीतान्यदि शङ्कया।
भयोपधाभिश्चिन्ताभिर्ब्रूयुस्तथा यथा कृतम्॥ ८॥
देशं कालं दिशं जातिं नाम वा संप्रतिश्रयम्।
कृत्यं कर्मकरा वा स्युः प्रष्टव्यास्ते विनिग्रहे॥ ९॥
वर्णस्वराकारभेदात्संसदि त्वनिवेदनात्।
अदेशकालदृष्टत्वाद्वासस्याप्यविशोधनात्॥ १०॥
असहायात्पूर्वचौर्यादसत्संसर्गकारणात्।
लेख्यैरप्यवगन्तव्या न होढेनैव केवलम्॥ ११॥
दस्युवृत्ते यदि नरे शङ्का स्यात्तस्करे ऽपि वा।
यदि स्पृशेत लेशेन कार्यः स्याच्छपथं ततः॥ १२॥
चौराणां भक्तदा ये स्युस्तथाग्न्युदकदायकाः।
आवासदा देशिकाश्च तथैवोत्तरदायकाः॥ १३॥
क्रेतारश्चैव भाण्डानां प्रतिग्राहिण एव च।
समदण्डाः स्मृतास्तु ते ये च प्रच्छादयन्ति तान्॥ १४॥
राष्ट्रेषु राष्ट्राधिकृताः सामन्ताश्चैव चोदिताः।
अभ्याघाते तु मध्यस्था यथा चौरास्तथैव ते॥ १५॥

---

मुष्यन्त्यक्रम चैव ते MS. ॥ ४॥ चित्ताभिर् MS. ॥ ८॥ ञसंसर्गश्च कारणात् MS. ॥ ११॥ दश्युवृत्ते MS. ॥ १२॥ ताः॥ MS. ॥ १४॥ नष्टे न्येतनिपा-

# अथ परिशिष्टम्।

द्विविधास्तस्करा ज्ञेयाः परद्रव्यापहारिणः।
प्रकाशाश्चाप्रकाशाश्च तान्विन्द्यादात्मवान्नृपः ॥ १ ॥
प्रकाशवञ्चकास्तु ते कूटमानतुलाश्रिताः।
उत्कोचकाः साहसिकाः कितवाः पण्ययोषितः ॥ २ ॥
प्रतिरूपकराश्चैव मङ्गलादेशवृत्तयः।
इत्येवमाद्यो ज्ञेयाः प्रकाशलोकतस्कराः ॥ ३ ॥
अप्रकाशाश्च विज्ञेया बहिरभ्यन्तराश्रिताः।
सुप्तां प्रसक्ताश्च नरा मुष्णन्त्याक्रम्य चैव ते ॥ ४ ॥
देशग्रामगृहघ्नाश्च यन्नघ्ना ग्रन्थिमोचकाः।
इत्येवमाद्यो ज्ञेया अप्रकाशाश्च तस्कराः ॥ ५ ॥
न त्वहोढान्विताश्चौरा वध्या राज्ञा अनागसः।
सहोढान्स्तेयकारणात्क्षिप्रं चोरान्प्रशासयेत् ॥ ६ ॥

---

1 This chapter, which forms a sort of Appendix to the main portion of the Nârada-smṛiti, is found in the Nepalese MS. only, but it is probably authentic. See Preface.

ता विन्द्यादा॰ MS. ॥ १ ॥ उत्काटाकाः साहसिकाः MS. ॥ २ ॥ नरा

शक्यं तत्पुनराहर्तुं यन्न ब्राह्मणसात्कृतम्।
ब्राह्मणेभ्यस्तु यद्दत्तं न तस्य हरणं पुनः ॥ ४९ ॥
दानमध्ययनं यज्ञः कर्मास्योक्तं त्रिलक्षणम्।
याजनाध्यापने वृत्तिस्तृतीयश्च प्रतिग्रहः ॥ ५० ॥
स्वधर्मे ब्राह्मणस्तिष्ठेद्वृत्तिमाहारयेन्नृपात्।
नासद्भ्यः परिगृह्णीयाद्वर्णेभ्यो नियमे सति ॥ ५१ ॥
अशुचिर्वचनाद्यस्य शुचिर्भवति मानवः।
शुचिश्चैवाशुचिः सद्यः कथं राजा न दैवतम् ॥ ५२ ॥
विदुर्य एव देवत्वं राज्ञो ह्यमिततेजसः।
तस्य ते प्रतिगृह्णन्तो न लिप्यन्ते कथञ्चन ॥ ५३ ॥
लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥ ५४ ॥
एतानि सततं पश्येन्नमस्येदर्चयेत्स्वयम्।
प्रदक्षिणं च कुर्वीत यथास्यायुः प्रवर्धते ॥ ५५ ॥

---

॥ ४८ ॥ कर्मं B. β. परिग्रहः b. y. ॥ ५० ॥ वचनाद्यस्तु b. C. y. ॥ ५२ ॥ वसतं for सततं β. ॥ ५५ ॥ अष्टादशं for सप्तदशं b. C. y.

---

इति श्रीनारदीये धर्मशास्त्रे प्रकीर्णकं नाम व्यवहारपदं सप्तदशम् ॥

समाप्तं चेदं नारदीयं धर्मशास्त्रम् ॥

नोपसन्नान्निर्निमित्तं दातारं न प्रपीड्य च ॥ ४० ॥
अर्थिनां भूरिभावाच्च देयत्वाच्च महात्मनाम्।
श्रेयान्परिग्रहो राज्ञां सर्वेषां ब्राह्मणादृते ॥ ४१ ॥
ब्राह्मणश्चैव राजा च द्वावप्येतौ धृतव्रतौ।
नानयोरन्तरं किंचित्प्रजा धर्मेण रक्षतोः ॥ ४२ ॥
धर्मज्ञस्य कृतज्ञस्य रक्षार्थं शासतोऽशुचीन्।
मेध्यमेव धनं प्राहुस्तीक्ष्णस्यापि महीपतेः ॥ ४३ ॥
यो राज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्तिनः।
स पर्यायेण यातीमान्नरकानेकविंशतिम् ॥ ४४ ॥
शुचीनामशुचीनां च संनिपातो यथाम्भसाम्।
समुद्रे समतां याति तद्वद्राज्ञो धनागमः ॥ ४५ ॥
यथा ह्यग्नौ स्थितं दीप्ते शुद्धिमायाति काञ्चनम्।
एवं धनागमा सर्वे शुद्धिमायान्ति राजसु ॥ ४६ ॥
य एव कश्चित्स्वद्रव्यं ब्राह्मणेभ्यः प्रयच्छति।
तद्राज्ञाप्यनुमन्तव्यमेष धर्मः सनातनः ॥ ४७ ॥
अन्यप्रकाराद्दुचिताद्भूमेः षड्भागसंचितात्।
बलिः स तस्य विहितः प्रजापालनवेतनम् ॥ ४८ ॥

---

॥ ३९ ॥ लोपसन्नान्न b. C.; गोपसन्नान्न B. β. ॥ ४० ॥ ब्राह्मनास्चैव b. y. ॥ ४२ ॥ महीयते ॥ β. ॥ ४३ ॥ नरकानेकविंशतिः b. y. ॥ ४४ ॥ स्थिते B. β. ॥ ४६ ॥ तत्राज्ञाप्यनु॰ b. C. y. ॥ ४७ ॥ भूम्या यद्भागसंचितम् b. β. C. y.

तस्मात्तं नावजानीयान्नाक्रोशेच्च विशेषतः ।
आज्ञायां चास्य तिष्ठेत मृत्युः स्यात्तद्व्यतिक्रमात् ॥ ३२ ॥
तस्य धर्मः प्रजारक्षा वृद्धप्राज्ञोपसेवनम् ।
दर्शनं व्यवहाराणामुत्थानं च स्वकर्मसु ॥ ३३ ॥
ब्राह्मणानुपसेवेत नित्यं राजा समाहितः ।
संयुक्तं ब्राह्मणैः क्षेत्रं मूलं लोकाभिवृद्धये ॥ ३४ ॥
ब्राह्मणस्यापरीहारो राजन्यासनमग्रतः ।
प्रथमं दर्शनं प्रातः सर्वेभ्यश्चाभिवादनम् ॥ ३५ ॥
अग्रं नवभ्यः सप्तभ्यो मार्गदानं च गच्छतः ।
भैक्षहेतोः परागारे प्रवेशस्त्वनिवारितः ॥ ३६ ॥
समित्पुष्पोदकादीनां ह्यस्तेयं सपरिग्रहम् ।
अनपेक्षः परेभ्यश्च संभाषश्च परस्त्रिया ॥ ३७ ॥
नदीष्ववेतनस्तारः पूर्वमुत्तारणं तथा ।
तरेष्वशुल्कदानं च वणिज्यायां भवेत्स्थितिः ॥ ३८ ॥
वर्तमानो ऽध्वनि श्रान्तो गृह्णन्ननशनः स्वयम् ।
ब्राह्मणो नापराधी स्याद् द्वाविक्षू द्वे च मूलके ॥ ३९ ॥
नाभिशस्तान्न पतितान्न द्विषो नापि नास्तिकात् ।

---

C. ॥ ३२ ॥ ३४ b and ३५ a om. b. L. C. ॥ ३५ ॥ नवभ्यः सप्तभ्य b. C. y.; नवभ्यः ससभ्य L. नवेभ्य सप्तेभ्य B. β. ॥ ३६ ॥ भवेष्वशुल्क° β. वरेशु शुल्क° B. β. ॥ ३८ ॥ दारिच्च त्वे b.; द्वाविच्चुत् द्वे β.; द्वाविच्च त्वे C. y.

राज्ञामाज्ञाभयाद्यस्मान्न च्यवेरन्पथः प्रजाः।
व्यवहारादतो ज्ञेयं संवृत्तं राजशासनम्॥ २३॥
स्थित्यर्थं पृथिवीपालैश्चरित्रविषयाः कृताः।
चरित्रेभ्यो ऽस्य तत्प्राहुर्गरीयो राजशासनम्॥ २४॥
तपःक्रीताः प्रजा राज्ञा प्रभुरासां ततो नृपः।
ततस्तद्वचसि स्थेयं वार्ता चासां तदाश्रया॥ २५॥
पञ्च रूपाणि राजानो धारयन्त्यमितौजसः।
अग्नेरिन्द्रस्य सोमस्य यमस्य धनदस्य च॥ २६॥
कारणादनिमित्तं वा यदा क्रोधवशं गतः।
प्रजा दहति भूपालस्तदाग्निरभिधीयते॥ २७॥
यदा तेजः समालम्ब्य विजिगीषुरुदायुधः।
अभियाति परान्राजा तदेन्द्रः स उदाहृतः॥ २८॥
विगतक्रोधसंतापो हृष्टरूपो यदा नृपः।
प्रजानां दर्शनं याति सोम इत्युच्यते तदा॥ २९॥
धर्मासनगतः श्रीमान्दण्डं धत्ते यदा नृपः।
समः सर्वेषु भूतेषु तदा वैवस्वतः स्मृतः॥ ३०॥
यदा त्वर्थिगुरुप्राज्ञभृत्यादीन्पृथिवीपतिः।
अनुगृह्णाति दानेन तदा स धनदः स्मृतः॥ ३१॥

---

तदाश्रयात् B. β. ॥ २५ ॥ राजानां b. y. ॥ २६ ॥ विगतः b. y. ॥ २९ ॥ त्वर्थं॰ b.॥ ३१॥ नाक्रोशेच्च विश्रयेत् B. β. L. b. y. नाक्रोशेच विषेषतः,

कुर्यात्पथो व्यपेतानां विनश्येयुरिमाः प्रजाः॥ १४॥
ब्राह्मण्यं ब्राह्मणो जह्यात्क्षत्रियः क्षात्रमुत्सृजेत्।
शूले मत्स्यानिवाश्नीयुर्दुर्बलान्बलवत्तराः॥ १५॥
स्वकर्म जह्याद्वैश्यस्तु शूद्रः सर्वं विशेषयेत्।
राजानश्चेन्नाकरिष्यन्प्रजानां दण्डधारणम्॥ १६॥
सतामनुग्रहो नित्यमसतां निग्रहस्तथा।
एष धर्मः स्मृतो राज्ञामर्थश्चामित्रपीडनात्॥ १७॥
न लिप्यते यथा वह्निर्दहन्द्रव्यस्वदपि प्रजाः।
न लिप्यते तथा राजा दण्डं दण्ड्येषु पातयन्॥ १८॥
प्रज्ञा तेजः पार्थिवानां सा च वाचि प्रतिष्ठिता।
ते यद्ब्रूयुरसत्सद्वा स धर्मो व्यवहारिणाम्॥ १९॥
राजेति संचरत्येष भूमौ साक्षात्सहस्रदृक्।
न तस्याज्ञामतिक्रम्य संतिष्ठेरन्प्रजाः क्वचित्॥ २०॥
रक्षाधिकारादीशत्वाद्भूतानुग्रहदर्शनात्।
यदेव कुरुते राजा तत्प्रमाणमिति स्थितिः॥ २१॥
निर्बलो ऽपि यथा स्त्रीणां पूज्य एव पतिः सदा।
प्रजानां विगुणो ऽप्येवं पूज्य एव प्रजापतिः॥ २२॥

---

०धारणाम् β. ॥ १४ ॥ जले मत्स्यानिवा० B. β. See Manu, VII. 20 ॥ १५ ॥ त्वामित्रपीडनात् B. β. ॥ १७ ॥ या ब्रुयुर० b. स्वधर्मो व्यवहारिणा b. C. y.; स धर्मो व्यवहारिणा L. ॥ १९ ॥ तपःक्रीता C. y.

अशास्त्रोक्तेषु चान्येषु पापयुक्तेषु कर्मसु।
प्रसमीक्ष्यात्मनो राजा दण्डं दण्ड्येषु पातयेत्॥ ७॥
श्रुतिस्मृतिविरुद्धं यद्भूतानामहितं च यत्।
न तत्प्रवर्तयेद्राजा प्रवृत्तं च निवर्तयेत्॥ ८॥
न्यायापेतं यदन्येन राज्ञाज्ञानकृतं भवेत्।
तदप्यन्यायविहितं पुनर्न्याये निवेशयेत्॥ ९॥*
आयुधान्यायुधीयानां शिल्पद्रव्याणि शिल्पिनाम्।
वेश्यास्त्रीणामलंकारं वाद्यातोद्यादि तद्विदाम्॥ १०॥*
यच्च यस्योपकरणं येन जीवन्ति कारवः।
सर्वस्वहरणेऽप्येतान्न राजा हर्तुमर्हति॥ ११॥*
अनिर्देश्यावनिन्द्यौ च राजा ब्राह्मण एव च।
दीप्तिमत्वाच्छुचित्वाच्च यदि न स्यात्पथश्च्युतः॥ १२॥
राज्ञा प्रवर्तितान्धर्मान्यो नरो नानुपालयेत्।
दण्ड्यः स पापो वध्यश्च लोपयन्राजशासनम्॥ १३॥
यदि राजा न सर्वेषां वर्णानां दण्डधारणम्।

---

Mitâksharâ ॥ ९ ॥ वैश्यास्त्रीणाम॰ β. वाद्यातोद्यानि Vulg.; वाद्यातोद्यादि Mitâksharâ. ॥ १० ॥ सर्वस्य हरणे b. C. y. ॥ ११ ॥ दीप्तिमत्वाच्छु॰ L. ॥ १२ ॥ राज्ञा च वर्जितान्धर्मान् Vulg. See ८ ॥ १३ ॥

---

सर्वस्वहरणमसाधारणं यद्यस्य जीवनोपकरणं तदतिरिक्तविषयम्॥ Vîramitrodaya, p. 724. ॥ १० ॥ ११ ॥

प्रकीर्णके पुनर्ज्ञेयो व्यवहारो नृपाश्रयः।
राज्ञामाज्ञाप्रतीघातस्तत्कर्मकरणं तथा ॥ १ ॥*
पुरप्रदानं संभेदः प्रकृतीनां तथैव च।
पाषण्डनैगमश्रेणीगणधर्मविपर्ययः ॥ २ ॥*
पितापुत्रविवादश्च प्रायश्चित्तव्यतिक्रमः।
प्रतिग्रहविलोपश्च कोप आश्रमिणामपि ॥ ३ ॥*
वर्णसंकरदोषश्च तद्वृत्तिनियमस्तथा।
न दृष्टं यच्च पूर्वेषु तत्सर्वं स्यात्प्रकीर्णके ॥ ४ ॥*
राजा त्ववहितः सर्वानाश्रमान्परिपालयेत्।
उपायैः शास्त्रविहितैश्चतुर्भिः प्रकृतीस्तथा ॥ ५ ॥
यो यो वर्णोऽपहीयेत यो य उद्रेकमाप्नुयात्।
तं तं दृष्ट्वा स्वतो मार्गात्प्रच्युतं स्थापयेत्पथि ॥ ६ ॥

---

प्रकीर्णकः Vulg. See Mitâksharâ, Vîramitrodaya. ॥ १ ॥ पाखण्ड° B. β. ॥ २ ॥ वर्णसंकरदासश्च b. प्रकीर्णकैः C. b. y. प्रकीर्णके L.; प्रकीर्णकम् B. β. ॥ ४ ॥ स्थापयेदपि C. ॥ ६ ॥ राज्ञादानं Vulg. See

---

प्रतिघातो भङ्गः। तत्कर्म सिंहासनारोहणादि राजकर्म। पाखण्डादयः पूर्वमेव व्याख्याताः। प्रकीर्णके विवादपदे ये विवादा राजाज्ञोल्लङ्घनं तदाज्ञाकरणं तत्कर्मरक्षणादि विषयास्ते नृपसमवायिन एव। तत्र स्मृत्याचारव्यपेतेन मार्गेण वर्तमानां प्रतिकूलतामासाद्य नृप एव व्यवहारनिर्णयं कुर्यात्। एवं वदता यो नृपाश्रयो व्यवहारस्तं प्रकीर्णकमित्युक्तं भवति ॥ Vîramitrodaya, p. 723. ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

अनिर्दिष्टस्तु यो राज्ञा द्यूतं कुर्वीत मानवः।
न स तं प्राप्नुयात्कामं विनयं चैव सो ऽर्हति ॥ ७ ॥*
अथवा कितवा राज्ञे दत्त्वा भागं यथोदितम्।
प्रकाशं देवनं कुर्युरेवं दोषो न विद्यते ॥ ८ ॥*

---

C. y. दापयेत्स्वमिष्टतः b. C. y. ॥ ५ ॥ अनिर्दिष्टतया राज्ञो Vulg. See Vîramitrodaya, Vivâdachintâmaṇi ॥ ७ ॥

---

अनियुक्तद्यूतकारिणो दण्डमाह नारदः ॥ Vîramitrodaya, ibid. ॥ ७ ॥

इति नारदीये धर्मशास्त्रे द्यूतसमाह्वयो नाम षोडशं व्यवहारपदम् ॥

अक्षब्रध्नशलाकाद्यैर्देवनं जिह्मकारितम्।
पणक्रीडा वयोभिश्च पदं द्यूतसमाह्वयम्॥ १ ॥*
सभिकः कारयेद् द्यूतं देयं दद्याच्च तत्कृतम्।
दशकं च शतं वृद्धिस्तस्य स्याद् द्यूतकारिणः॥ २ ॥*
द्विरभ्यस्ताः पतन्त्यक्षा ग्लहे यद्यक्षवेदिनः।
जयं तस्यापरस्याहुः कितवस्य पराजयम्॥ ३॥
कितवेष्वेव तिष्ठेरन्कितवाः संशयं प्रति।
त एव तस्य द्रष्टारस्त एव स्युस्तु साक्षिणः॥ ४ ॥
अशुद्धः कितवो नान्यदाश्रयेद् द्यूतमण्डलम्।
प्रतिहन्यान्न सभिकं दापयेत्तत्स्वमिष्टतः॥ ५ ॥
कूटाक्षदेविनः पापान्निर्हरेद् द्यूतमण्डलात्।
कण्ठे ऽक्षमालामासज्य स ह्येषु विनयः स्मृतः॥ ६ ॥*

---

जिह्वकारितं b.; जिम्भकारितं C. ॥ १ ॥ द्यूतं यं दद्याच्च b. C. y. ॥ २ ॥ द्विरभ्यस्ता B. L. β. C. y. तस्यापरस्याह b. C; तस्यापिरस्याह y. ॥ ३ ॥ एस्युस्यसाक्षिणः b.; तत्र वा स्युस्तु साक्षिणः C. ॥ ४ ॥ सभिके b. L.

---

अक्षाः पाशाः। ब्रध्नाश्चर्मपट्टिकाः दन्तक्षताः। आद्यपदाच्चतुरङ्गसतुरङ्गादि। तैर्देवनं पणपूर्वा क्रीड़ा। वयोभिः पक्षिभिः कुक्कुट पारावतादिभिः चशब्दान्मल्लामेषादिभिश्च पणपूर्विका क्रीड़ा च क्रमेण द्यूतसमाह्वयं चेत्येकवद्भावः॥ Vivâdatâṇḍava. ॥ तदुभयं यथाक्रमं द्यूतसमाह्वयाख्यं व्यवहारपदमित्यर्थः। द्यूतं च समाह्वयं च द्यूतसमाह्वयम्॥ Vîramitrodaya, p. 718. ॥ १ ॥

निर्वासने विशेषमाह नारदः॥ Vîramitrodaya, p. 721. ॥ ६ ॥

कव्यां कृताङ्को निर्वास्यः स्फिचौ वास्यावकर्तयेत्॥ २६॥
अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः।
अवमूत्रयतः शिश्नमवशर्धयतो गुदम्॥ २७॥
केशेषु गृह्णतो हस्तौ छेदयेदविचारयन्।
पादयोर्दाढिकायां तु ग्रीवायां वृषणेषु च॥ २८॥
त्वक्छेदकः शतं दण्ड्यो लोहितस्य च दर्शकः।
मांसभेत्ता तु षण्निष्कान्प्रवास्यस्त्वस्थिभेदकः॥ २९॥
उपक्रुश्य तु राजानं कर्मणि स्वे व्यवस्थितम्।
जिह्वाछेदाद्भवेच्छुद्धः सर्वस्वहरणेन वा॥ ३०॥*
राजनि प्रहरेद्यस्तु कृतागस्यपि दुर्मतिः।
शूले तमग्नौ विपचेद्ब्रह्महत्याशताधिकम्॥ ३१॥
पुत्रापराधे न पिता नाश्वे न शुनि दण्डभाक्।
न मर्कटे च तत्स्वामी तेनैव प्रहितो न चेत्॥ ३२॥*

β. कुटाङ्क b. कुटाङ्को y. ॥२६॥ मवसर्धयते b.; ॰मवशर्धयते C. y. ॥२७॥ छेदयेदवधारयन् B. β. ॥ २८ ॥ उपाक्रुष्य B. b. β. C. y.; उपाक्रुय L. व्यवक्रुश्य Vîramitrodaya. ॥ ३० ॥

सापराधे ऽपि राजनि कृतप्रहारं शूलमारोप्याग्नौ पाचयेदित्यर्थः। ब्राह्मणेतरविषयमेतत्॥ Vivâdachintâmaṇi, p. 75. कृतागसि कृतापराधे। शूलमारोपयेत्संश्रयेत तच्छूल्यम्। Vîramitrodaya, 6, p. 47. ॥ ३१ ॥

इति नारदीये धर्मशास्त्रे वाक्पारुष्यं दण्डपारुष्यं च पञ्चदशं व्यवहारपदम्॥

तथ्येनापि ब्रुवन्दण्ड्यो राज्ञा कार्षापणावरम् ॥ १८ ॥
न किल्बिषेणापवदेच्छास्त्रतः कृतपावनम्।
न राज्ञा धृतदण्डं च दण्डभाक्तद्व्यतिक्रमात् ॥ १९ ॥
लोके ऽस्मिन्द्वाववक्तव्यावबध्यौ च प्रकीर्तितौ।
ब्राह्मणश्चैव राजा च तौ हीदं बिभृतो जगत् ॥ २० ॥
पतितं पतितेत्युक्त्वा चौरं चौरेति वा पुनः।
वचनात्तुल्यदोषः स्यान्मिथ्या द्विर्दोषतां व्रजेत् ॥ २१ ॥*
एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन्।
जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः ॥ २२ ॥
नामजातिग्रहं त्वेषामभिद्रोहेण कुर्वतः।
निखेयो ऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः ॥ २३ ॥
धर्मोपदेशं दर्पेण द्विजानामस्य कुर्वतः।
तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥ २४ ॥
येनाङ्गेनावरवर्णो ब्राह्मणस्यापराध्नुयात्।
तदङ्गं तस्य छेत्तव्यमेवं शुद्धिमवाप्नुयात् ॥ २५ ॥*
सहासनमभिप्रेप्सुरुत्कृष्टस्यावकृष्टजः।

---

॥ २२ ॥ नामजातिग्रहांस्त्वेषामतिद्रोहेण Vulg. See Manu VIII. 271. लिखेयो b. C. y.; निषार्यो B.; निषोत्यो β. ॥ २३ ॥ धर्मेण B. β. ॥ २४ ॥ येनाङ्गेनावरो वर्णो Vulg. ॥ २५ ॥ महासनम॰ β. अभिप्रेप्सुष

---

सत्यदोषाभिधाने ऽपि वाक्पारुष्यदण्डो ऽस्त्येव। तथा च नारदः। पतितं...॥ Vîramitrodaya, p. 488. ॥ २१ ॥

मर्यादातिक्रमे सद्यो घात एवानुशासनम्।
न च तद्दण्डपारुष्ये स्तेयमाहुर्मनीषिणः ॥ १२ ॥*
यमेव ह्यतिवर्तेत नीचः संतज्जनं नृषु।
स एव विनयं कुर्यान्न तद्विनयभाङ् नृपः ॥ १३ ॥*
मला ह्येते मनुष्येषु धनमेषां मलात्मकम्।
अपि तान्घातयेद्राजा नार्थदण्डेन दण्डयेत् ॥ १४ ॥*
शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति।
वैश्यो ऽध्यर्धं शतं द्वे वा शूद्रस्तु वधमर्हति ॥ १५ ॥
पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने।
वैश्ये स्यादर्धपञ्चाशच्छूद्रे द्वादशको दमः ॥१६॥
समवर्णैर्द्विजातीनां द्वादशैव व्यतिक्रमे।
वादेष्ववचनीयेषु तदेव द्विगुणं भवेत् ॥ १७ ॥
काणमप्यथवा खञ्जमन्यं वापि तथाविधम्।

---

B. β. त्रिषु Vulg. See Vîramitrodaya, and other Commentaries. ॥ १३ ॥ मलाखेते L. ॥ १४ ॥ क्षत्रियो ऽध्यर्धमर्हति B. β. द्वेया B. β. ॥ ११ ॥ कालामप्यथवाभ्यञ्जम° b. ; कालामप्यथवा खञ्जम°

---

ज्ञातः। वधकवृत्तिर्लुब्धको धीवरादिः। हस्तिपो हस्तारोहकः। व्रात्यः प्रसिद्धः। दासश्चेटकः। घातस्ताडनं तच्च यथापराधम् ॥ Vivâda-chintâmaṇi, p. 78. तथा श्वपचादिभिरार्याणामपराधे कृते सज्जना एव दण्डदाने अधिकारिणस्तेषामशक्यत्वे तान्राजा घातयेदेव नार्थं गृह्णीयादिति ॥ Vîramitrodaya, p. 472. ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ y ॥ १८ ॥ २२ om. B. β. See, however, Manu VIII. 270.

हीनमध्योत्तमानां तु द्रव्याणामपकर्षणात् ।
त्रीण्येव साहसान्याहुस्तत्र कण्टकशोधनम् ॥ ६ ॥*
विधिः पञ्चविधस्तूक्त एतयोरुभयोरपि ।
विशुद्धिर्दण्डभाक्त्वं च तत्र संबध्यते यथा ॥ ७ ॥*
पारुष्यदोषावृतयोर्युगपत्संप्रवृत्तयोः ।
विशेषश्चेन्न दृश्येत विनयः स्यात्समस्तयोः ॥ ८ ॥*
पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स दोषभाक् ।
पश्चाद्यः सो ऽप्यसत्कारी पूर्वे तु विनयो गुरुः ॥ ९ ॥*
द्वयोरापन्नयोस्तुल्यमनुबध्नाति यः पुनः ।
स तयोर्दण्डमाप्नोति पूर्वो वा यदि वोत्तरः ॥ १० ॥*
श्वपाकमेदचण्डालव्यङ्गेषु वधवृत्तिषु ।
हस्तिपव्रात्यदासेषु गुर्वाचार्यातिगेषु च ॥ ११ ॥*

---

See the Commentaries ॥ ७ ॥ पूर्वं तु विनयेद्गुरुम् B. β.; पूर्वे तु विनयो गुरुः b. C. L. y., and the Commentaries ॥ ९ ॥ सारेषु वधवृत्तेषु y.; सारेषु or श्ववेषु वधवृत्तिषु B. C. L. B. See the Commentaries. ॥ ११ ॥ मर्यादा० C. y.; मार्यादा० b. ॥ १२ ॥ यामेव

---

तथा पूर्वं कलहे प्रवृत्तस्य दण्डगुरुत्वम् । कलहे च वृद्धे वैरानुसंधातुरेव दण्डभाक्त्वम् । तथा तयोर्द्वयोरपराधविशेषापरिज्ञाने सम एव दण्डः ॥ Vîramitrodaya, p. 472. ॥ ८ ॥ ९ ॥ १० ॥

श्वपाक इति शूद्रायां क्षत्रियाज्जातः उग्राउग्रात्क्षत्रियायां जातः क्षत्ता क्षत्तुरुग्रायां जातः श्वपाकः । षण्डः क्लीबः । चाण्डालो ब्राह्मण्यां शूद्रा-

देशजातिकुलादीनामाक्रोशन्यङ्गसंयुतम्।
यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते ॥ १ ॥*
निष्ठुराश्लीलतीव्रत्वात्तदपि त्रिविधं स्मृतम्।
गौरवानुक्रमात्तस्य दण्डो ऽप्यत्र क्रमाद्गुरुः ॥ २ ॥*
साक्षेपं निष्ठुरं ज्ञेयमश्लीलं न्यङ्गसंयुतम्।
पातनीयैरुपक्रोशैस्तीव्रमाहुर्मनीषिणः ॥ ३ ॥*
परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः।
भस्मादीनामुपक्षेपैर्दण्डपारुष्यमुच्यते ॥ ४ ॥
तस्यापि दृष्टं त्रैविध्यं मृदुमध्योत्तमं क्रमात्।
अवगोरणनिःशङ्कपातनक्षतदर्शनैः ॥ ५ ॥*

---

आक्रोशं B. β. ॥ १ ॥ अवगूरण॰ Vulg. See Mitâksharâ, Vîrmitrodaya निःशङ्क॰ b. L. C. y. निःसङ्ग॰ B. β. See the Commentaries. ॰दर्शनैः B.; देशनैः β. ॥ ५ ॥ विशुद्धि Vulg.

---

आक्रोश आक्षेपो भर्त्सनम्। न्यङ्गं निन्दा। कलहप्रिया गौडा इति देशाक्रोशः। अत्यन्तलोलुपा विप्रा इति जातेः। क्रूरा गर्गा इति कुलस्य ॥ Vivâdatâṇḍava. न्यङ्गमवद्यं तदुभययुक्तं यदुद्वेगजननार्थं वाक्यं तत्पारुष्यमित्यर्थः ॥ Vîramitrodaya, p. 482. ॥ १ ॥

धिङ्मूर्ख जाल्म इत्यादि साक्षेपं भाषणं निष्ठुरम्। न्यङ्गसंयुतमवद्यं भगिन्यादिगमनसंयुतम्। अश्लीलं पतनीयैः सुरापानादिभिरुपाक्रोशैस्तीव्रं वाक्पारुष्यमित्यर्थः ॥ Vîramitrodaya, p. 482. ॥ ३ ॥

अवगोरणं ताडनाद्युद्योगः। निःशङ्कपातनं निःशङ्कप्रहरणम्। त्रीण्येव साहसानि त्रिप्रकाराण्येव साहसकृतानि दण्डपारुष्याणीत्यर्थः ॥ Vîramitrodaya, p. 471. ॥ ५ ॥

ग्रामेष्वन्वेषणं कुर्युश्चण्डालवधकादयः।
रात्रिसंचारिणो ये च बहिः कुर्युर्बहिश्चराः ॥ २६ ॥
स्तेनेष्वलभ्यमानेषु राजा दद्यात्स्वकाद्गृहात्।
उपेक्षमाणो ह्येनस्वी धर्मादर्थाच्च हीयते ॥ २७ ॥

---

॥ २० ॥ यत्र वोढास्त्रिषु b. y. ॥ २१ ॥ संश्रियते पदम् b.; संनियते पदम् C. y. ॥ २३ ॥ प्रयो L. ॥ २५ ॥

इति नारदीये धर्मशास्त्रे साहसं नाम चतुर्दशं व्यवहारपदम् ॥

भक्तावकाशदातारः स्तेनानां ये प्रसर्पताम् ।
शक्ताश्च य उपेक्षन्ते ते ऽपि तद्दोषभागिनः ॥ १९ ॥*
उत्क्रोशतां जनानां च ह्रियमाणे धने तथा ।
श्रुत्वा ये नाभिधावन्ति ते ऽपि तद्दोषभागिनः ॥ २० ॥*
साहसेषु य एवोक्तस्त्रिषु दण्डो मनीषिभिः ।
स एव दण्डः स्तेये ऽपि द्रव्येषु त्रिष्वनुक्रमात् ॥ २१ ॥*
गवादिषु प्रणष्टेषु द्रव्येष्वपहृतेषु वा ।
पदस्यान्वेषणं कुर्युरा मूलात्तद्विदो जनाः ॥ २२ ॥
ग्रामे व्रजे विविक्ते वा यत्र संनिपतेत्पदम् ।
वोढव्यं तद्भवेत्तेन न चेत्सो ऽन्यत्र तन्नयेत् ॥ २३ ॥
पदे प्रमूढे भग्ने वा विषमत्वाज्जनान्तिके ।
यस्त्वासन्नतरो ग्रामो व्रजो वा तत्र पातयेत् ॥ २४ ॥
समे ऽध्वनि द्वयोर्यत्र तेन प्रायो ऽशुचिर्जनः ।
पूर्वापवादैर्दुष्टो वा संसृष्टो वा दुरात्मभिः ॥ २५ ॥

---

b. y. प्रसर्पप्रसर्प b. शक्तौ वधमुपेक्षन्ते b. L. C. y. ; शक्तौ वधउ° B. β. See Mitâksharâ, Vivâdachintâmaṇi, etc. ॥ १९ ॥ श्रुत्वौ b. y.

---

ये भक्ताद्यन्यतमं चौराय ददति ये वा धारणक्षमा अपि चौरं जहति ते ऽपि तद्दोषभागिनः ॥ Vivâdachintâmaṇi, p. 93. ॥ १९ ॥

अनुक्तविशेषेषूत्तममध्यमाधमेषु वस्तुषु इयं व्यवस्था ॥ Vivâdachintâmaṇi, p. 90. ॥ २१ ॥

आधिः साहसमाक्रम्य स्तेयमाधिश्छलेन तु ॥ १२ ॥*
तदपि त्रिविधं प्रोक्तं द्रव्यापेक्षं मनीषिभिः।
क्षुद्रमध्योत्तमानां तु द्रव्याणामपकर्षणात् ॥ १३ ॥*
मृद्भाण्डासनखट्वास्थिदारुचर्मतृणादि यत्।
शमी धान्यं कृतान्नं च क्षुद्रद्रव्यमुदाहृतम् ॥ १४ ॥*
वासः कौशेयवर्जं च गोवर्जं पशवस्तथा।
हिरण्यवर्जं लोहं च मध्यं व्रीहियवा अपि ॥ १५ ॥*
हिरण्यरत्नकौशेयस्त्रीपुंगोगजवाजिनः।
देवब्राह्मणराज्ञां च विज्ञेयं द्रव्यमुत्तमम् ॥ १६ ॥*
उपायैर्विविधैः सर्वैः कल्पयित्वापकर्षणम्।
सुप्तप्रमत्तमत्तेभ्यः स्तेयमाहुर्मनीषिणः ॥ १७ ॥
सहोढग्रहणात्स्तेयं होढमत्युपभोगतः।
शङ्का त्वसज्जनैकत्वादन्यायव्ययतस्तथा ॥ १८ ॥

---

B. β.; आधि छलेन b. C. y. ॥ १२ ॥ ०कर्षणं b. B. β. C. y.; L. The latter reading is supported by the Commentaries. ॥ १३ ॥ कृतान्यं b. ॥ १४ ॥ ०वस्त्रं च राज्ञां (राज्ञो) च द्रव्यमुत्तमम् Vulg. See Mitâksharâ, Vîramitrodaya, Mayûkha. ॥ १६ ॥ कल्पयित्वा b.; कालयित्वा B. β. ॥ १७ ॥ होढमप्युतभोगतः b. y. ॥ १८ ॥ दातार

---

p. 90. आधिः पीडा धनापहरणादिद्वारा आक्रम्य प्रसह्य परस्य क्रियमाणः क्लेशः साहसरूपं स्तेयम्। छलेन क्रियमाण आधिः केवलस्तेयमित्यर्थः ॥ Vîramitrodaya, p. 490. ॥ १२ ॥

उत्तमे साहसे दण्डः सहस्रावर इष्यते।
वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने।
तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसे ॥ ८ ॥*
अविशेषेण सर्वेषामेष दण्डविधिः स्मृतः।
वधादृते ब्राह्मणस्य न वधं ब्राह्मणोऽर्हति ॥ ९ ॥*
शिरसो मुण्डनं दण्डस्तस्य निर्वासनं पुरात्।
ललाटे चाभिशस्ताङ्कः प्रयाणं गर्दभेन च ॥ १० ॥*
स्यातां संव्यवहार्यौ तौ धृतदण्डौ तु पूर्वयोः।
धृतदण्डोऽप्यसंभाष्यो ज्ञेय उत्तमसाहसे ॥ ११ ॥*
तस्यैव भेदः स्तेयं स्याद्विशेषस्तत्र दृश्यते।

---

C. y. The genuineness of this hemistich seems doubtful, though it is quoted in the Mitâksharâ and other Commentaries. ॥ ८ ॥ °संभाव्यो, °साहसः B. β. ॥ ११ ॥ चदिकुलेम

---

ब्राह्मणस्य तु महत्यपराधे शरीरदण्डाभावमाह स एव ॥ Vîramitrodaya, p. 499. ॥ ९ ॥

तदयं संक्षेपः। अल्पस्य धनस्यापहरणे विनाशने वा शताद्यो दमः। क्षेत्रसेत्वादेश्चौर्येण साहसेन वा विनाशने विनाशितधनं चौरः साहसी वा धनस्वामिनि दाप्यः। हीनपुरुषस्तु द्विगुणं दण्ड्यः। उत्तमसाहसी तु दण्डेन विशोधितोऽपि व्यवहारादिरूपान्संबन्धान्याकार्य इति ॥ Vivâdachintâmaṇi, p. 97. ॥ ७ ॥ ८ ॥ ११ ॥

रक्षितुर्ज्ञाने सत्येव बलेन व्याधि पीड़नं यत्तत्साहसं छलेन तज्ज्ञाना-वरणेन य व्याधियंत्पीडनं तत्स्तेयमित्यर्थः ॥ Vivâdachintâmaṇi,

सहसा क्रियते कर्म यत्किंचिद्बलदर्पितैः।
तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते ॥ १ ॥*
मनुष्यमारणं स्तेयं परदाराभिमर्शनम्।
पारुष्यं द्विविधं ज्ञेयं साहसं च चतुर्विधम् ॥ २ ॥*
तत्पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमं तथा।
उत्तमं चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक् ॥ ३ ॥*
फलमूलोदकादीनां क्षेत्रोपकरणस्य च।
भङ्गाक्षेपोपमर्दाद्यैः प्रथमं साहसं स्मृतम् ॥ ४ ॥*
वासःपश्वन्नपानानां गृहोपकरणस्य च।
एतेनैव प्रकारेण मध्यमं साहसं स्मृतम् ॥ ५ ॥*
व्यापादो विषशस्त्राद्यैः परदाराभिमर्शनम्।
प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसम् ॥ ६ ॥*
तस्य दण्डः क्रियापेक्षः प्रथमस्य शतावरः।
मध्यमस्य तु शास्त्रज्ञैर्दृष्टः पञ्चशतावरः ॥ ७ ॥*

---

सह्गो ह्दि बलमुच्यते B. β. L.; सह्गो बलमिह्गोच्यते b. C. y. The latter reading is supported by the Commentaries ॥ १ ॥ गृहोपस्करणस्य B. β. ॥ ५ ॥ प्राणौ॰ L. ॥ ६ ॥ ८ a om. b. L.

---

भङ्गः फलादिस्वरूपनाशनम्। आक्षेप आक्रोशः। वाक्तिरस्करणमिति यावत्। उपमर्दः स्वरूपावशेषेण पीडनम् ॥ Vîramitrodaya, p. 499. ॥ ४ ॥

अन्यत्र ब्राह्मणेभ्यः स्याद्राजा धर्मपरायणः।
तत्स्त्रीभ्यो जीवनं दद्यादेष दायविधिः स्मृतः॥५२॥*

---

॥ ४८ ॥ ज्यायसोर्लाभे. y. ॥ ४९ ॥ सजाति b. y. ॥ ५१ ॥ ब्राह्मणेभ्य b. y. C. ॥ ५२ ॥

---

तदवरुद्धस्त्रीपरम्। पत्नीपदाश्रवणात्॥ Vyavahâramayûkha, p. 52 (IV. 8, 5, Borrodaile). ॥ ५२ ॥

इति नारदीये धर्मशास्त्रे दायभागो नाम त्रयोदशं व्यवहारपदम्॥

---

औरसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च।
कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च ॥ ४५ ॥*
पौनर्भवो ऽपविद्धश्च लब्धः क्रीतः कृतस्तथा।
स्वयं चोपगतः पुत्रा द्वादशैत उदाहृताः ॥ ४६ ॥*
एषां षड् बन्धुदायादाः षडदायादबान्धवाः।
पूर्वः पूर्वः स्मृतः श्रेयाञ्जघन्यो यो य उत्तरः ॥ ४७ ॥*
[छिन्नभोगे गृहे क्षेत्रे संदेहो यत्र जायते।
लेख्येन भोगविद्भिर्वा साक्षिभिर्वा समाहरेत् ॥ ४८ ॥]
क्रमाद्ध्येते प्रपद्येरन्मृते पितरि वा धनम्।
ज्यायसो ज्यायसो ऽभावे कनीयान्रिक्थमर्हति ॥ ४९ ॥*
पुत्राभावे तु दुहिता तुल्यसंतानकारणात्।
पुत्रश्च दुहिता चोभौ पितुः संतानकारकौ ॥ ५० ॥*
अभावे तु दुहितॄणां सकुल्या बान्धवास्ततः।
ततः सजातिः सर्वेषामभावे राजगामि तत् ॥ ५१ ॥*

---

b. y. C. ‖ ४३ ‖ विभजेत स तैस्सह ‖ ४४ ‖ पुत्रिकापुत्रमेव b. y. C. गूढोत्पन्नस्तथैव β. ‖ ४५ ‖ लब्ध y. ‖ ४६ ‖ उत्तमः b. ‖ ४७ ‖ गृहक्षेत्रे C. y. The genuineness of para. 48 is quite doubtful.

---

न तु बन्ध्याविधवादुहित्रोः स्वसत्तया स्वजन्यसत्तया च पार्वणपिण्डदानाभावात्। अत एव नारदः। पुत्राभावे तु दुहिता तुल्यसंतानदर्शनात् ‖ Dâyabhâga, p. 130. (Colebrooke, IV. 2, 10). ‖ ५० ‖

वसेयुर्ये दशाब्दानि पृथग्धर्माः पृथक्क्रियाः।
विभक्ता भ्रातरस्ते तु विज्ञेया इति निश्चयः॥ ४१॥*
यद्येकजाता बहवः पृथग्धर्माः पृथक्क्रियाः।
पृथक्कर्मगुणोपेता न ते कृत्येषु संमताः॥ ४२॥*
स्वान्भागान्यदि दद्युस्ते विक्रीणीरन्नथापि वा।
कुर्युर्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य तु॥ ४३॥*
ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम्।
संसृष्टास्तेन वा ये स्युर्विभजेरन्निति स्थितिः॥४४॥*

---

a om. C. यद्येकजातो b. ०धर्मा y.; धर्मः B β. ॥ ४२॥ विक्रीणीयुरथापि

---

अनेन द्रव्याभाव अत्यन्तनिःस्वानां धर्मविभागः कर्तव्यः। विभागे धर्मवृद्धिः स्यादित्यादि स्मृतिभ्यः। अतश्च पितृद्रव्यविरोधेन दशवर्षपर्यन्तं ये पृथग्धर्माः पृथक्क्रियाः विभक्ता एव। धर्मविभागस्य इतराभ्यनुज्ञामन्तरेणापि एकेनैव स्वीकर्तुं शक्यत्वादित्युक्तं भारुचिना॥ Sarasvatîvilâsa, para. 843, 844. ॥ ४१॥

धर्मा वैधाः पञ्चमहायज्ञाद्याः। क्रिया वाणिज्याद्या लौकिक्यः। कर्मगुणाः कर्मसाधनानि गृहोपस्करादीनि। एतेषां पार्थक्येन विभागो लक्ष्यते। ते विभक्ताः परस्परानुमतिं विनापि दानविक्रयादि कुर्युरित्यर्थः॥ Vyavahâramayûkha, p. 51 (IV. 7, 36 Borrodaile). ॥ ४२॥ ४३॥

यदि पिता पुत्रान्विभज्य स्वयं च यथाशास्त्रं भागं गृहीत्वा पुत्रैरसंसृष्ट एव मृतः तदा विभागानन्तरं जातः पितृधनमेव गृह्णीयात्स एव तस्य भागः। अथ कैश्चित्पुत्रैः सह संसृष्टः पिता मृतः तदा संसृष्टेभ्यो भागं गृह्णीयात्॥ Dâyabhâga, p. 203 (Colebrooke, VII. 1). ॥ ४४॥

विभागधर्मसंदेहे दायादानां विनिर्णयः ।
ज्ञातिभिर्भागलेख्यैश्च पृथक्कार्यप्रवर्तनात् ॥ ३६ ॥*
भ्रातॄणामविभक्तानामेको धर्मः प्रवर्तते ।
विभागे सति धर्मो हि तेषां भवेत्पृथक् पृथक् ॥ ३७ ॥*
दानग्रहणपश्वन्नगृहक्षेत्रपरिग्रहाः ।
विभक्तानां पृथग् ज्ञेयाः पाकधर्मागमव्ययाः ॥ ३८ ॥*
साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परम् ॥ ३९ ॥*
येषामेताः क्रिया लोके प्रवर्तन्ते स्वरिक्थिनाम् ।
विभक्तानवगच्छेयुर्लेख्यमप्यन्तरेण तान् ॥ ४० ॥*

---

॥ ३५॥ दायादाने y. कार्यैं C. प्रवर्तते β. ॥३६॥ ३७ a om. y. एता क्रियाः सक्रक्थनां y. b. ॥ ४० ॥ वासयुर्यैं y. पृथक्क्रिया b. C. y. ॥ ४१ ॥ ४१ b, ४२

---

ज्ञातीनां कीर्तनं तेषु सत्सु नान्यसाक्षिग्रहणमित्येतदर्थम् ॥ Dâyabhâga, p. 359 (Colebrooke, XIV. 1). ॥ ३६ ॥

पृथक्कृष्यादिकार्यप्रवर्तनं पृथक्पञ्चमहायज्ञादिधर्मानुष्ठानं च नारदेन विभागलिङ्गमुक्तम् ॥ Mitâksharâ, p. 233 (Colebrooke, II. 12. 3) ॥ ३७ ॥

दानग्रहणे ऋणविषये। ते एव दानग्रहणे द्वितीयश्लोके ऽनूद्येते स्पष्टार्थम्। पश्वादिप्रतिग्रहा विभक्तानां पृथक्पृथगनुष्ठिता एव स्वत्वोत्पादकाः। अविभक्तानां त्वेकेन कृताः परस्यापि स्वत्वजनका इत्यर्थः। दानधर्मो लेख्यादिः। आगमो मूलकलाप्रवेशादिः ॥ Vyavahâramayûkha, p. 51 (IV. 1, 34. Borrodaile). ॥ ३८ ॥ ३९ ॥ ४० ॥

अवश्यकार्याः संस्कारा भ्रातॄणां पूर्वसंस्कृतैः ॥ ३४ ॥*
कुटुम्बार्थेषु यश्चोक्तस्तत्कार्यं कुरुते च यः।
भ्रातृभिर्भरणीयोऽसौ ग्रासाच्छादनवाहनैः ॥ ३५ ॥*

---

येषां तु न कृताः... ॥ इति येषां तेषामिति पुंलिङ्गपदघटितवचनेन भ्रातृसंस्कारस्यावश्यकत्वमुक्त्वा पैतृकधनाभावे भ्रातृसंस्कारनिर्वाहार्थमुपायकथनं नारदस्य। तथा च भ्रातृसंस्कारोपक्रमत्वात् उपसंहारेऽपि भ्रातृसंस्कार एव विषयः। न तु भगिनीसंस्कारः। इति नारदीयवचनयोर्भावः ॥ Jagannâtha V. 3, 127. ॥ ३४ ॥

तेषामयमाशयः। यदि कश्चिद्विभागकाले आग्रहं कृत्वा भागं नागृह्णाति उत्तरकालं च भागमाकांक्षते तदर्थं पुनर्विभागं सर्वं मिश्रयित्वा न कुर्यात्किंतु तद्भागपूरणानुसारेण स्वस्वभागांशमुद्धृत्य तद्भागं पूरयेदिति। तथा च तेनैव प्रकारेण सर्व एव वचनार्था आदरणीयाः। तत्र प्रकाशमिश्रयोरयं भावः। पुत्रत्वादिसंबन्धस्यैतन्माहात्म्यं विभागकालेऽंशाग्रहणे उत्तरकालं स्वयमेव पुत्रेण वा इच्छतावश्यं भागप्राप्तिरिति रत्नाकराशयस्तु वक्ष्यतेऽनुपदम्। कुटुम्बेष्वित्यादि तदर्थमुपयुक्तः सन्तत्कार्यं कुटुम्बभरणोपयुक्तं कार्यं कुर्वते न तु पित्र्यधनं गृह्णाति स उत्तरकालं भागमाकांक्षमाणः ग्रासाच्छादनवाहनैरुपलक्षणीभूतैश्च अन्येनापि धान्यरूप्यसुवर्णालंकारादिना बृंहणीयः वर्धनीयः पूर्णभागः कर्तव्य इत्यर्थः इति मिश्रादयः। रत्नाकरकारस्तु। कुटुम्बार्थेषु चोद्युक्त इत्यादि गुणवद्भ्रातृविषयमाह। यथा भ्रातॄणां स्वस्य च कुटुम्बभरणार्थमुद्युक्तः सन्तत्कार्यं कुरुते कृष्यादिकं द्रव्यक्रयविक्रयादिकं कुरुते सोऽन्यैः तादृशकर्माकुर्वद्भिर्भ्रातृभिर्बृंहणीयः संवर्धनीयः। तथा च कुटुम्बभरणोद्योगरूपगुणवत्तया उत्कृष्टोऽन्नवस्त्रवाहनादिदानमिति भावः। जीमूतवाहनादयोऽप्येवम् ॥ Jagannâtha V. 3, 108. ॥ ३५ ॥

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रास्तु स्थविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥ ३१ ॥*
यच्छिष्टं पितृदायेभ्यो दत्त्वर्णं पैतृकं च यत् ।
भ्रातृभिस्तद्विभक्तव्यमृणी न स्याद्यथा पिता ॥ ३२ ॥*
येषां तु न कृताः पित्रा संस्कारविधयः क्रमात् ।
कर्तव्या भ्रातृभिस्तेषां पैतृकादेव ते धनात् ॥ ३३ ॥*
अविद्यमाने पित्र्ये ऽर्थे स्वांशादुद्धृत्य वा पुनः ।

---

b. C.; ऋणी न स्याद्यथा B. β. L. y. The latter reading is supported by the commentaries ॥ ३२ ॥ तैर्धनात् b. y. L. ॥ ३३ ॥ पित्रर्थैर्स्वांशद् C.; पित्र्यर्थे स्वांशद् b.; ॥ ३४ ॥ भवनीयो y.

---

यत्तु पारतन्त्र्यवचनं न स्त्री पारतन्त्र्यमर्हतीत्यादि । तदस्तु पारतन्त्र्यं धनस्वीकारे तु को विरोधः ॥ Mitâkshara, p. 212 (Colebrooke, II. 1, 25). ॥ ३१ ॥

पितृदायः पित्रा प्रतिश्रुतम् । Vyavaharâmayûkha, p. 47. (Borrodaile IV. 6, 2). ॥ ३२ ॥

अपरे तु सांदृष्टिकन्यायेनागत्या भगिनीसंस्कारो ऽपि स्वार्जितेनैव संपादनीयः । अन्यथा कन्यासंस्काराभावेन पितुर्महान्दोषः स्यात् । सांदृष्टिकन्यायस्य दायभागप्रकरणे जीमूतवाहनेनैवादृतः ॥ Jagannâtha V. 3, 128. ॥ ३३ ॥

पित्र्यधनाभावे स्वार्जितेन भिक्षादिलब्धेन च अवश्यं संस्कारं कुर्यदिति न वाच्यम् । जीमूतवाहनेन तथा नाङ्गीकारात् । तथा हि तस्याशयः ।

मृते भर्तर्यपुत्रायाः पतिपक्षः प्रभुः स्त्रियाः।
विनियोगात्मरक्षासु भरणे च स ईश्वरः॥ २८॥*
परिक्षीणे पतिकुले निर्मनुष्ये निराश्रये।
तत्सपिण्डेषु वासत्सु पितृपक्षः प्रभुः स्त्रियाः॥ २९॥*
स्वातन्त्र्याद्विप्रणश्यन्ति कुले जाता अपि स्त्रियः।
अस्वातन्त्र्यमतस्तासां प्रजापतिरकल्पयत्॥ ३०॥*

---

॥२७॥ प्रभु b. C.; प्रभ्र y.॥२८॥ प्रधु स्त्रिया C. y.; प्रभु स्त्रियाः b.॥२९॥ 30 a is omitted in all MSS. It has been supplied from Jagannâtha and Vîramitrodaya ॥ ३०॥ मृली न स्याद्यथा

---

पतिपक्षः प्रभुः पितृवंशमातृवंशौ आसत्तिक्रमेण विनियोगो द्रव्यदानादिः। आत्मरक्षा कुप्रसङ्गनिवारणम्। भरणं जीवनोपायकारणम्। तथा च तदनुमतिं विना न कस्मैचित् किंचिद्दद्यात्। न रूपरसगन्धादौ प्रसज्येत। भोजनोपायाभावे स एव निर्वृतिं कुर्यात्। निर्मनुष्ये सदसत्प्रसङ्गविवेचनादियोग्यमनुष्यहीने। निराश्रये प्राणधारणोपायादिसाधनपुरुषाभावे तत्सपिण्डेष्वसत्सु कथंचित्स्वबुद्ध्यैव धर्मप्राणरक्षां विधाय अमुकस्य पितृव्यपत्नी अहमिति ख्यापनेन स्वं बान्धवत्वं प्रकाश्य स्थित्यसंभवे पितृपक्षमेवाश्रयेत॥ Jagannâtha, IV. 1, 13. ॥२८॥२९॥

कुले सत्कुले इति रत्नाकरः। प्रणश्यन्ति स्वधर्मात् भ्राम्यन्ति व्यभिचारादिदोषयुक्ता भवन्तीत्यर्थः। तथा हि शास्त्राध्ययनानधिकारित्वाच्छास्त्रमात्रोपजीविधर्माधर्मज्ञानाभावात् स्वातन्त्र्यवर्तमानत्वेन पुरुषपारतन्त्र्याभावात्तेनोपदेशासंभवाच्च। दृष्टसुखजनके परपुरुषसंभोगादौ स्ववर्णधर्मादिकमपहाय पुनः पुनश्चित्रदर्शनादौ च प्रवर्तेत इति भावः। एवं च भर्तृपारतन्त्र्यमसंमन्यमाना यदि स्वातन्त्र्यमिच्छति तदा ज्ञात्वा राज्ञा स्वयं धर्मे स्थापनीया इति मन्तव्यम्॥ Jagannâtha IV. 1, 4. ॥३०॥

द्विरामुष्यायणा दद्युर्द्वाभ्यां पिण्डोदके पृथक्।
रिक्थादर्धं समादद्युर्बीजिक्षेत्रिकयोस्तथा ॥ २३ ॥*
संसृष्टानां तु यो भागस्तेषामेव स इष्यते।
अनपत्योऽंशभाग्यो ऽपि निर्बीजेष्वितरानियात् ॥ २४ ॥*
भ्रातॄणामप्रजाः प्रेयात्कश्चिच्चेत्प्रव्रजेत्तु वा।
विभजेरन्धनं तस्य शेषास्तु स्त्रीधनं विना ॥ २५ ॥*
भरणं चास्य कुर्वीरन्स्त्रीणामा जीवितक्षयात्।
रक्षन्ति शय्यां भर्तुश्चेदाच्छिन्द्युरितरासु च ॥ २६ ॥*
या तस्य दुहिता तस्याः पित्र्यों ऽशो भरणे मतः।
आ संस्कारं भजेरंस्तां परतो बिभृयात्पतिः ॥ २७ ॥*

---

ऋक्थादूर्ध्वं b. C. y. ॥ २३ ॥ अनपत्योंशतारयो ऽपि b. y. ॥ २४ ॥ प्रव्रजेत वा C. y. ॥ २५ ॥ जातस्य b. C. y. तस्या b. C. y. पित्रंशो L. मरणे b. C. y.

---

त्राणामपि तादृशत्वे तत्पौत्राणां प्रपौत्रविषयांशग्राहित्वं तेषामपि तादृशत्वे तत्पुत्राणां न लभ्यते। अत्र च पतितस्य पुत्रो नांशं प्राप्नुयादित्याह ॥ Jagannâtha V. 4. 320. ॥ २१ ॥ २२ ॥

पृथगिति लिखनात्पिण्डद्वयदानं द्वाभ्यां पितृभ्यां तत्र क्रमस्यानुक्तत्वादिच्छाविकल्पः। रत्नाकरः। यत्र बीजिन औरसो ऽस्ति क्षेत्रिणो ऽपि कथंचिदौरसो जातस्तद्विषयमिदम्। अपुत्रयोस्तु द्वयोरपि कृत्स्नमंशं गृह्णीयादिति ॥ Jagannâtha V. 4, 242. ॥ २३ ॥

पत्नीसद्भावे ऽपि भ्रातॄणां धनग्रहणं पत्नीनां च भरणमात्रं नारदेनोक्तम् ॥ Mitâksharâ, p. 208 (Colebrooke, II. 1, 7). ॥ २५ ॥ २६ ॥

अशुल्कोपगतायां तु पिण्डदा वोढुरेव ते ॥ २० ॥*
पितृद्विट् पतितः षण्ढो यश्च स्यादौपपातिकः।
औरसा अपि नैते ऽंशं लभेरन्क्षेत्रजाः कुतः ॥ २१ ॥*
दीर्घतीव्रामयग्रस्ता जडोन्मत्तान्धपङ्गवः।
भर्तव्याः स्युः कुले चैते तत्पुत्रास्त्वंशभागिनः ॥ २२ ॥*

---

b. L. C. y. घटितः षाण्डो B. ॥ २१ ॥ °तीव्रमय° b. y. C. ॥ २२ ॥

---

धनग्रहणम्। न केवलं पिण्डदानमपीत्याह दद्युरिति। यदि शुल्कं मूल्यं क्षेत्रिणे दत्त्वा अपत्योत्पादनार्थं माता क्रीता तदा एव क्रयाभावे मातृविवाहकर्तुरेव पिण्डदा इति रत्नाकराशयः॥ Jagannâtha V. 4, 342. ॥ १९ ॥ २० ॥

पितरं यो द्वेष्टि स पितृद्विट्। द्वेषश्च पितरि मारणादिभवः। मृते तु तदुद्देशेन उदकादिदानाभावरूपः। अपपात्रितः राजवधादिदोषेण कृतघटापवर्जनः। दीर्घं राजयक्ष्मादि तीव्रं कुष्ठादि भर्तव्याः पोषणीयाः कुलस्य भ्रात्रादेरिति रत्नाकरः। प्रकाशकृता तु उपपातकीति पठित्वा उपपातकैर्युक्त इति कृतम्। जीमूतवाहनरघुनन्दनाभ्याम् औपपातिक इति पठितम्। उपपातकैर्युक्त इति तदर्थः। कल्पतरौ तु अपपात्रित इति पाठः। तत्रापपात्रितस्य भागानर्हत्वं शङ्खलिखितवचनेन व्यक्तम्। उपपातकिनो भागानर्हत्वमभ्यास एव। उपपातकैरिति बहुवचनमुपन्यस्तम्। पातित्यं चानुपातकादावेव इति ज्ञेयम्। पितृद्विडित्यनेन श्राद्धादिपराङ्मुखस्यानंशित्वकथनात्। बृहस्पतिनैकवाक्यत्वम्। अत्र दानादिनानागुणवतो ऽपि श्राद्धादिपराङ्मुखत्वे भागानर्हत्वमित्यवधेयम्।… विवादचिन्तामणौ तु जडोन्मत्तान्धपङ्गव इति पाठः। जडो निर्विवेक इति व्याख्यातं च। तत्पुत्रास्त्वंशभागिन इति तथा चैतेषां पुत्राः पौत्रविषया भागं गृह्णीय। अत्र तत्पु-

व्याधितः कुपितश्चैव विषयासक्तमानसः ।
अन्यथाशास्त्रकारी च न विभागे पिता प्रभुः ॥ १६ ॥*
कानीनश्च सहोढश्च गूढायां यश्च जायते ।
तेषां वोढा पिता ज्ञेयस्ते च भागहराः स्मृताः ॥ १७ ॥*
अज्ञातपितृको यश्च कानीनो ऽनूढमातृकः ।
मातामहाय दद्यात्स पिण्डं रिक्थं हरेत च ॥ १८ ॥*
जाता ये त्वनियुक्तायामेकेन बहुभिस्तथा ।
अरिक्थभाजः सर्वे स्युर्बीजिनामेव ते सुताः ॥ १९ ॥*
दद्युस्ते बीजिने पिण्डं माता चेच्छुल्कतो हृता ।

---

Vîramitrodaya ॰नूढमातृकः B. β. पितामहाय for मातामहाय B. β. ॥ १५ ॥ वीजिनो b. y. C. हृताः b. y. C. ॥ २० ॥ घटितः पाण्डुर्य॰

---

तथा च वातादिरूपव्याधिजन्यमोहक्रोधजन्यमोहकामादिरूपविषयसेवावशीकृतचित्ततादिवशात् अयथाशास्त्रकारी पिता विभागे प्रभुर्न इति । तथा चैतदेवास्याप्रभुत्वम् । यत्तत्कृतविभागस्यासिद्धिः अनधिकारिकृतत्वात् शूद्रकृतसंध्यावन्दनवदिति भावः । अत एव पितामहचरणाः । व्याधित इत्यादि नारदवचनेन प्रभुरित्यतिदेशादस्वामिकृत इव स्वार्जितधने ऽपि व्याध्यादिहेतोः पित्रादिस्वामिकृतो ऽपि विषमविभागादिर्न सिध्यति । अत्रायथाशास्त्रकारी ज्येष्ठभागादिबोधकशास्त्रमतिक्रम्य न्यूनाधिकविभागकारी ॥ Jagannâtha V. 1, 28. ॥ १६ ॥

अनियुक्तायां स्वैरिण्याम् । अरिक्थभाजः क्षेत्रिरिक्थं न भजन्त इति रत्नाकरः । मातृक्षेत्रिकमातामहानां न रिक्थं भजन्त इति प्रकाशः । बीजिनामेवेत्येवकारेण मातृमातामहादेरेव व्यावृत्तिरित्याशयः । बीजिनो

**क्षेत्रजेष्वपि पुत्रेषु तद्वज्जातेषु धर्मतः ।**
**वर्णावरेष्वंशहानिरूढाजातेष्वनुक्रमात् ॥ १४ ॥***
**पित्रैव तु विभक्ता ये हीनाधिकसमैर्धनैः ।**
**तेषां स एव धर्मः स्यात्सर्वस्य हि पिता प्रभुः ॥ १५ ॥***

---

हानिरूढाजातेष्व°, like the rest of the MSS. ॥ १४ ॥ स एष b.; स ए y. ॥ १५ ॥ °भ्रक्तमानसं y. ॥ १३ ॥ गूढमातृकः b. C. y. L.; मूढमातृकः

---

समांशभागिनी तस्याः समांशित्वनिषेधस्य वक्ष्यमाणत्वात् । यद्वा समांश-भागिनी आधिक्यरहितभागस्वामिनी यथा । समस्तत्र विभागः स्यादिति स चांशो वक्ष्यमाणश्चतुर्थभागः । प्रकाशकारेण तु कनिष्ठायावर इति स्थाने श्रेष्ठाय च वर इति पठितं व्याख्यातं च प्रथमोत्पन्नस्यांशद्वयं श्रेष्ठः कुटुम्बकर्मण्युपयुक्तः तस्य वरं श्रेष्ठं किंचिद्देयमिति । औरसेषु यदुक्तं क्षेत्रजेष्वपि एष व्यवहारः अतिदेश्य इत्याह । क्षेत्रजेष्विति । धर्मतो जातेषु क्षेत्रजेषु तद्वदौरसपुत्रवत् । तथा च या या व्यवस्था औरसपुत्रे उक्ता ज्येष्ठाद्यंशविषयेषु क्षेत्रजेष्वपि सति संभवे तास्ता ग्राह्या इति भावः ॥ Jagannâtha V. 1, 71. ॥ १३ ॥ १४ ॥

बृहस्पतिः । समन्यूनाधिकभागाः पित्रा येषां प्रकल्पिताः । तथैव ते पालनीया विनेयास्ते स्युरन्यथा ॥ एवं चैतद्वचनं च पुत्रविनिर्मोकेण पित्र-र्जितपरं भ्रातॄणामिति मनुवचनं च सर्वपुत्रसहकारेण पित्रर्जितधनविष-यकमतो न विरोध इति चण्डेश्वरादीनां मतम् । पुत्राणां विभागप्रार्थनस्थले एव मनुवचनं नेयं पितुः स्वेच्छास्थल एव बृहस्पतिवचनमिति जीमूतवा-हनादीनां मतम् । नारदः । पित्रैव तु... ॥ इति नारदवचनम् । न्यूना-धिकविभक्तानां धर्मः पितृकृतः स्मृत इति याज्ञवल्क्यवचनं च बृहस्पति-वचनसमानविषयकमेव मन्तव्यम् ॥ Jagannâtha, V. 1, 31-33. ॥ १५ ॥

वैद्यो ऽवैद्याय नाकामो दद्यादंशं स्वतो धनात्।
पित्र्यं द्रव्यं समाश्रित्य न चेत्तेन तदाहृतम् ॥ ११ ॥*
द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता।
समांशभागिनी माता पुत्राणां स्यान्मृते पतौ ॥ १२ ॥*
ज्येष्ठायांशो ऽधिको ज्ञेयः कनिष्ठायावरः स्मृतः।
समांशभाजः शेषाः स्युरप्रत्ता भगिनी तथा ॥ १३ ॥*

---

पित्र्यपदं साधारणधनपरम्। तदनाश्रित्यार्जितम्। वैद्यो ऽविद्यायानिच्छन्न दद्यात्। वैद्याय विदुषे पुनः साधारणमन्तरेणाप्यर्जितं दद्यादेव ॥ Dâyabhâga, pp. 170 171 (Colebrooke, VI. 1, 16.) ॥ ११ ॥

तथा द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पितेत्येतदपि स्वार्जितविषयम् ॥ Mitâksharâ, p. 187 (Colebrooke I. 6, 7). विभजन्पिता आत्मनः आत्मसंबन्धिनौ द्वावंशौ कुर्यादित्यर्थः। एतद्वचनं पितुः स्वार्जिते धने भूयिष्ठमादाय वसेदिति वचनेन केवलीकृते ऽवलम्बनमलभ्यमानं पैतामहधनमेवालम्बयतीति ॥ Jagannâtha, V. 2, 96. ॥ १२ ॥

अत्र केचित्तु परस्परतुल्यगुणयोगि किंचिन्न्यूनगुणकनिष्ठभ्रातृसमुदायस्यात्यल्पधनविभागविषयकमिदमेकद्रव्यरूपोद्धारदानासामर्थ्यात्। उत्कृष्टभागदानेनैव तत्संबन्धनं निर्गुणत्वेन न्यूनत्वाच्च निकृष्टभागदानं कनिष्ठायेत्याहुः। चण्डेश्वरस्तु अधिको ऽंशः विभागे यो ऽंशो लभ्यते तस्मादन्यः ज्येष्ठत्वनिबन्धनं देयः। कनिष्ठायावर इति तन्न्यूनः तत्पादोनस्तदर्धं तत्पादो वा। इदं च कनिष्ठस्य गुणवत्त्वे गुणं विविच्यैव देयमित्यभिप्रैति। शेषा मध्यमा निर्गुणाः समांशभागाः समांशं गुणादिनिबन्धनाधिक्यरहिते ऽंशे भागः भजनं स्वामित्वं येषाम्। अप्रदत्ता भगिनी अंशभागिनी न तु

मात्रा च स्वधनं दत्तं यस्मै स्यात्प्रीतिपूर्वकम् ।
तस्याप्येष विधिर्दृष्टो मातापि हि यथा पिता ॥ ७ ॥*
अध्यग्न्यध्यावहनिकं भर्तृदायस्तथैव च ।
भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ॥ ८ ॥*
स्त्रीधनं तदपत्यानां भर्तृगाम्यप्रजासु तु ।
ब्राह्मादिषु चतुर्ष्वाहुः पितृगामीतरेषु च ॥ ९ ॥*
कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः ।
भागं विद्याधनात्तस्मात्स लभेताश्रुतो ऽपि सन् ॥ १० ॥*

---

The following clause is added in B. β. दत्तं च प्रीतिकर्मणि पितृमातृसुतभ्रातृप्राप्तमिति पाठान्तरम् See Manu IX. 194. ॥ ८ ॥ इतरासु च y. ॥ ९ ॥ वैद्ये वैद्याय b. C. y.; वैद्यो वैद्याय B. β.; वैद्यो ऽवैद्याय L. The last reading is supported by the Commentaries. ॥ १० ॥ °ह्यानिरूढं जावेष्व° b. C. y. Jagannâtha has

---

षड्विधत्वमपि न्यूनत्वाभिभवार्थम् । तेषां स्वरूपमाह कात्यायनः । विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसंनिधौ । तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्तितम् इदमेव यौतुकं नाम । यत्पुनर्लभते नारी नीयमाना पितुर्गृहात् । अध्यावहनिकं नाम स्त्रीधनं तदुदाहृतम् ॥ प्रीत्या दत्तं तु यत्किंचिच्छ्वश्र्वा वा श्वशुरेण वा । पादवन्दनिकं चैव प्रीतिदत्तं तदुच्यते ॥ ऊढया कन्यया वापि पत्युः पितृगृहे ऽपि वा । भ्रातुः सकाशात्पित्रोर्वा लब्धं सौदायिकं मतम् ॥ Vivâdatâṇḍava. ॥ ८ ॥

बिभृयादित्येकवचननिर्देशाद्यदि विद्यामभ्यस्यतो भ्रातुः कुटुम्बमपरो भ्राता स्वधनव्ययशरीरायासाभ्यां संवर्धयति । तदा तद्विद्योपार्जितधने तस्याप्यधिकारः ॥ Dâyabhâga, p. 170 (Colebrooke, VI. 1, 14, 15) ॥ १० ॥

पितैव वा स्वयं पुत्रान्विभजेद्वयसि स्थितः ।
ज्येष्ठं वा श्रेष्ठभागेन यथा वास्य मतिर्भवेत् ॥ ४ ॥*
विभ्रृयाद्वेच्छतः सर्वाञ्ज्येष्ठो भ्राता यथा पिता ।
भ्राता शक्तः कनिष्ठो वा शक्त्यपेक्षाः कुले श्रियः ॥ ५ ॥*
शौर्यभार्याधने चोभे यच्च विद्याधनं भवेत् ।
त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः ॥ ६ ॥*

---

y. See Vîramitrodaya, Jagannâtha. ॥ ४ ॥ पिता यथा B. β. ॥ ५ ॥ शौर्यभार्याधनं b. C. y. चविभज्यानि b. y. ॥ ६ ॥ तस्यापोष y. ॥ ७ ॥

---

रित्यनुषज्यते ॥ Mitâksharâ, p. 175, 176 (Colebrooke, I. 2, 7). ॥ ३ ॥

तथा नारदः । पितैव वा... ॥ ज्येष्ठस्य श्रेष्ठभागमभिधाय पुनर्यथा वास्य मतिर्भवेदित्यनेन यादृशे न्यूनाधिकविभागे पितुः पूर्वोक्तकारणात्कर्तव्यमतिर्भवेदिति पृथगभिधानात् श्रेष्ठभागादन्य एवायं न्यूनाधिकविभागः प्रतीयते ॥ Dâyabhâga, p. 94. (Colebrooke, II. 81, 82). ॥ ४ ॥

यदि तु ज्येष्ठपुत्रो ऽयोग्यः मध्यमो ऽन्यो वा योग्यः तत्र स एव सर्वाधिकारी प्रतिपालनक्षमत्वात् । यथाह शक्त्यपेक्षा कुले स्थितिः । शक्तिं परिजनप्रतिपालनक्षमतामपेक्ष्य ते शक्त्यपेक्षा इति । तथा च वयो ज्येष्ठत्वं नावश्यकमिति भावः ॥ Jagannâtha, V. 1, 16. ॥ ५ ॥

भार्याप्राप्तिकाले लब्धं भार्याधनम् । औद्वाहिकमित्यर्थः । एतानि वर्जयित्वा अन्यद्विभजेदित्यनुवर्तते वाक्यान्तरीयम् ॥ Dâyabhâga, p. 169 (Colebrooke, VI. 1. 12, 13). ॥ ६ ॥

विभागो ऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते।
दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ॥ १ ॥*
पितर्यूर्ध्वं गते पुत्रा विभजेरन्धनं क्रमात्।
मातुर्दुहितरो ऽभावे दूहितॄणां तदन्वयः ॥ २ ॥*
मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च।
निवृत्ते वापि रमणे पितर्युपरतस्पृहे ॥ ३ ॥*

---

निवृत्त L. रमणो b. y. ॥ ३ ॥ वयसि स्थिते B. b. L. β.; वयसंस्थिते

---

पित्रोरिदं पैत्र्यम्। इदं स्वत्वनिमित्तसंबन्धिपरम्। पुत्रपदं पौत्र-भ्रातृपुत्रादिपरम्। दायो विभागार्हं द्रव्यम्। अन्यदीयं द्रव्यं स्वामिसंबन्धि गामीत्यर्थः। विभागार्हं पितृद्रव्यं दायमाहुर्मनीषिण इति निघण्टुः ॥ Vivâdatâṇḍava. ॥ १ ॥

यत्तु दुहितृमात्राधिकारार्थं गौतमवचनम्। स्त्रीधन दुहितॄणामप्रत्ता-नामप्रतिष्ठितानां च। यच्च नारदस्य मातुर्दुहितरो ऽभावे दुहितॄणां तद-न्वयः।...तानि पूर्वोक्तदेवलवचनविरोधेन यौतकद्रव्यविषयाणि। अत एव मनुः। मातुस्तु यौतकं यत्स्यात्कुमारीभाग एव सः ॥ Dâyabhâga, pp. 131, 132. (Colebrooke, IV. 2, 13) दौहित्रीणामप्यभावे दौहित्रा धनहारिणः। यथाह नारदः। मातुर्दुहितरो ऽभावे दुहितॄणां तदन्वयः। इति तच्छब्देन संनिहितदुहितृपरामर्शात् ॥ Mitâksharâ, p. 229 (Colebrooke, I. 11, 18). ॥ २ ॥

विभागं चेत्पिता कुर्यादिति यदा पितुर्विभागेच्छा स तावदेकः कालः। अपरो ऽपि जीवत्येव पितरि द्रव्यनिस्पृहे निवृत्तरमणे मातरि च निवृत्त-रजस्कायां पितुरनिच्छायामपि पुत्रेच्छयैव विभागो भवति। यथोक्तं नार-देन। अत ऊर्ध्वं... ॥ इति दर्शितः। अत्र पुत्रा धनं समं विभजेयु-

सूतश्च मागधश्चैव पुत्रावायोगवस्तथा ॥ १०९ ॥
प्रातिलोम्येन वर्णानां क्षत्तृवैदेहकावपि ।
अनन्तरः स्मृतः सूतो ब्राह्मण्यां क्षत्रियात्सुतः ॥ ११० ॥
मागधायोगवौ तद्वद्वौ पुत्रौ वैश्यशूद्रयोः ।
ब्राह्मण्येकान्तरं वैश्यात्सूते वैदेहकं सुतम् ॥ १११ ॥
क्षत्तारं क्षत्रिया शूद्रात्पुत्रमेकान्तरं तथा ।
द्यन्तरः प्रातिलोम्येन पापिष्ठः संकरे सति ॥ ११२ ॥
चण्डालो जायते शूद्राद्ब्राह्मणी यत्र मुह्यति ।
तस्माद्राज्ञा विशेषेण स्त्रियो रक्ष्यास्तु संकरात् ॥११३॥

---

सप्तकोणतः B. β. कोष्ठतः L. b. C. y. चोषन्तो B. β. ॥ १०७ ॥ क्षत्रियोदेहकावपि B. β. ॥ ११० ॥ द्यन्तरं Vulg. ॥ ११२ ॥ रक्षास्तु b. C. y. ॥ ११३ ॥

---

इति नारदीये धर्मशास्त्रे स्त्रीपुंसयोगो नाम द्वादशं व्यवहारपदं समाप्तम् ॥

अप्रवृत्तौ तु भूतानां दृष्टिरेषा प्रजापतेः ।
अतो ऽन्यगमने स्त्रीणामेष दोषो न विद्यते ॥ १०१ ॥
आनुलोम्येन वर्णानां यज्जन्म स विधिः स्मृतः ।
प्रातिलोम्येन यज्जन्म स ज्ञेयो वर्णसंकरः ॥ १०२ ॥
अनन्तरः स्मृतः पुत्रः पुत्र एकान्तरस्तथा ।
द्व्यन्तरश्चानुलोम्येन तथैव प्रतिलोमतः ॥ १०३ ॥
उग्रः पारशवश्चैव निषादश्चानुलोमतः ।
अम्बष्ठो मागधश्चैव क्षत्ता च क्षत्रियात्मजः ॥ १०४ ॥
आनुलोम्येन तत्रैको द्वौ ज्ञेयौ प्रतिलोमतः ।
क्षत्ताद्याः प्रतिलोमाः स्युरनुलोमास्त्विमे स्मृताः ॥१०५॥
संस्काराश्चरुपाकाद्यास्तेषां त्रिः सप्त वै मताः ।
सवर्णो ब्राह्मणीपुत्रः क्षत्रियायामनन्तरः ॥ १०६ ॥
अम्बष्ठोग्रौ तथा पुत्रावेवं क्षत्रियवैश्ययोः ।
एकान्तरस्तु चाम्बष्ठो वैश्यायां ब्राह्मणात्सुतः ॥ १०७ ॥
शूद्रायां क्षत्रियात्तद्वन्निषादो नाम जायते ।
शूद्रा पारशवं सूते ब्राह्मणादुत्तरं सुतम् ॥ १०८ ॥
आनुलोम्येन वर्णानां पुत्रा ह्येते प्रकीर्तिताः ।

---

पतेः B. β. ॥१०१॥ सज्जन्म b. y.; यज्जन्म L.; सजन्म C. ॥१०२॥ पुत्रः om. b. y. ॥१०३॥ परसरश्चैव b.; पाराशरश्चैव B. β. C. पारशश्चैव y. ॥ १०४ ॥ तत्रैको B. β. ॥ १०५ ॥ ससंस्काराश्च पाकाद्यास्तेषां त्रिः

बन्ध्यां स्त्रीजननीं निन्द्यां प्रतिकूलां च सर्वदा ।
कामतो नाभिनन्देत कुर्वन्नेवं स दोषभाक् ॥ ९४ ॥*
अनुकूलामवाग्दुष्टां दक्षां साध्वीं प्रजावतीम् ।
त्यजन्भार्यामवस्थाप्यो राज्ञा दण्डेन भूयसा ॥ ९५ ॥*
अज्ञातदोषेणोढा या निर्दोषा नान्यमाश्रिता ।
बन्धुभिः साभियोक्तव्या निर्बन्धुः स्वयमाश्रयेत् ॥ ९६ ॥
नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥ ९७ ॥
अष्टौ वर्षाण्युदीक्षेत ब्राह्मणी प्रोषितं पतिम् ।
अप्रसूता तु चत्वारि परतो ऽन्यं समाश्रयेत् ॥ ९८ ॥
क्षत्रिया षट् समास्तिष्ठेदप्रसूता समात्रयम् ।
वैश्या प्रसूता चत्वारि द्वे वर्षे त्वितरा वसेत् ॥ ९९ ॥
न शूद्रायाः स्मृतः काल एष प्रोषितयोषिताम् ।
जीवति श्रूयमाणे तु स्यादेष द्विगुणो विधिः ॥ १०० ॥

---

॥ ९४ ॥ उपेक्षेत b. L. y. ॥ ९८ ॥ वर्षं b. y. ॥ ९९ ॥ प्रजापते for प्रजा

---

स्त्रिया रत्यर्थं व्यभिचारे जाते मुण्डनमधःशयनं च साधयेत् । कदन्नं कुवासश्च भरणार्थं दद्यात् । अमेध्यशोधनरूपं कर्म कारयेदित्यर्थः ॥ Vîramitrodaya, p. 520. ॥ ९१ ॥

गुणान्वितां पत्नीमन्यस्त्रीवशतापन्नत्वादिना त्यजन्पतिर्भूयांसं दण्डमर्हतीत्यर्थः । भूयान्दण्डश्चौरदण्डः ॥ Jagannâtha, IV. 4, 59. ॥ ९५ ॥

अतो ऽन्यथा वर्तमानः पुमान्स्त्री वापि कामतः ।
निर्नेयौ सुभृशं राज्ञा विप्लवः स्यादतो ऽन्यथा ॥ ८८ ॥*
ईर्ष्यासूयसमुत्थे तु संबन्धे रागहेतुके ।
दम्पती विवदीयतां न ज्ञातिषु न राजनि ॥ ८९ ॥*
अन्योन्यं त्यजतोरागः स्यादन्योन्यविरुद्धयोः ।
स्त्रीपुंसयोर्निगूढाया व्यभिचाराद्दते स्त्रियाः ॥ ९० ॥*
व्यभिचारे स्त्रिया मौण्ड्यमधःशयनमेव च ।
कदन्नं वा कुवासश्च कर्म चावस्करोज्झनम् ॥ ९१ ॥*
स्त्रीधनभ्रष्टसर्वस्वां गर्भविस्रंसिनीं तथा ।
भर्तुश्च वधमिच्छन्तीं स्त्रियं निर्वासयेत्पुरात् ॥ ९२ ॥*
अनर्थशीलां सततं तथैवाप्रियवादिनीम् ।
पूर्वाशिनीं च या भर्तुः क्षिप्रं निर्वासयेद्गृहात् ॥ ९३ ॥*

---

Jagannâtha. ॥ ९० ॥ वध्यां b. न दोषभा b. L.; न दोषभाक् y.

---

आगः पापमिति रत्नाकरः। तथा च स्त्रिया निगूढाया यत्नेन गोपिताया व्यभिचारं विना परस्परं त्यजतोः स्त्रीपुंसयोः पापं भवति। व्यभिचारिणीत्यागे तु न पापमित्यर्थः। इति केचित्। स्त्रीधनत्वेन भ्रष्टं सर्वस्वं यस्याः सा तथेति रत्नाकरः। यस्याः स्त्रीधनत्वेनेत्यर्थो बोद्धव्यः। स्त्रीधनत्वेन भ्रंशितं सर्वस्वं ययेत्यर्थः। इति कल्पद्रूमः। गृहान्निर्वासयेदिति प्रधानगृहान्निर्वास्य स्वकुटीमध्ये एव स्थापयेदिति केचित्॥ Jagannâtha, IV. 1, 63. ॥ ९० ॥ ९२ ॥

घृतेनाभ्यज्य गात्राणि तैलेनाविकृतेन वा ।
मुखान्मुखं परिहरन्गात्रैर्गात्राण्यसंस्पृशन् ॥ ८२ ॥*
कुले तदवशेषे हि संतानार्थं न कामतः ।
स्त्रियं पुत्रवतीं वन्ध्यां नीरजस्कामनिच्छन्तीम् ॥ ८३ ॥*
न गच्छेद्गर्भिणीं निन्द्यामनियुक्तां च बन्धुभिः ।
अनियुक्ता तु या नारी देवराज्जनयेत्सुतम् ॥ ८४ ॥*
जारजातमरिक्थीयं तमाहुर्ब्रह्मवादिनः ।
तथानियुक्तो यो भार्यां यवीयाञ्ज्यायसो व्रजेत् ॥८५॥*
यवीयसो वा यो ज्यायानुभौ तौ गुरुतल्पगौ ।
नियुक्तो गुरुभिर्गच्छेदनुशिष्यात्स्त्रियं च सः ॥ ८६ ॥*
पूर्वोक्तेन विधानेन स्नुषां पुंसवने शुचिः ।
सकृदा गर्भाधानाद्वा कृते गर्भे तथैव सा ॥ ८७ ॥*

---

गात्राण्यसंस्पृशेत् B. β. ॥ ८२ ॥ B. β. omit. ८३ a and insert it after ८६ a. They read कुले तदवशिष्टे तु. Kullûka, Jagannâtha and the other Commentators agree with L. b. C. y. वन्ध्यां Vulg. ॥ ८३ ॥ स्नातां or स्नाता for स्नुषां Vulg. See Jagannâtha. ॥ ८७ ॥ राजहेतुके B. β. ॥ ८६ ॥ अतोऽन्यं Vulg. See

---

नियोगावश्यं भावार्थौ नियुक्तेत्यादि । विप्लवः धर्मलोपः । यवीयानित्युपलक्षणं ज्येष्ठस्यापि । अनुशिष्यात्परपुरुषगमनेऽधर्मं नियोगे धर्मं च शिक्षेदित्यर्थः । स्नुषां स्नुषानुगां भ्रातृभार्यामित्यर्थः ॥ Jagannâtha, IV. 4, 147. ॥ ८० ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥ ८६ ॥ ८७ ॥ ८८ ॥

मध्यमं साहसं गोषु तद्देवान्त्यावसायिषु ॥ ७६ ॥*
अगम्यागामिनश्चास्ति दण्डो राज्ञा प्रचोदितः ।
प्रायश्चित्तविधानं तु पापानां स्याद्विशोधनम् ॥ ७७ ॥*
स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी च या ।
गम्याः स्युरानुलोम्येन स्त्रियो न प्रतिलोमतः ॥ ७८ ॥*
आस्वेव तु भुजिष्यासु दोषः स्यात्परदारवत् ।
गम्या अपि हि नोपेया यत्ताः परपरिग्रहाः ॥ ७९ ॥*
अनुत्पन्नप्रजायास्तु पतिः प्रेयाद्यदि स्त्रियाः ।
नियुक्ता गुरुभिर्गच्छेद्देवरं पुत्रकाम्यया ॥ ८० ॥*
स च तां प्रतिपद्येत तथैवा पुत्रजन्मतः ।
पुत्रे जाते निवर्तेत संकरः स्यादतो ऽन्यथा ॥ ८१ ॥*

---

chintâmaṇi. ॥ ७६ ॥ निस्वामिनी B. L. b. β. y.; निस्वामिनां C. See Mitâksharâ, Vîramitrodaya ॥ ७८ ॥ यतस्तास्तु परिग्रहो b. y.; यतस्ताः स्यु परिग्रहाः C.; यतस्ताः सपरिग्रहाः B. β.; यतस्तास्य परिग्रहाः L. See Mitâksharâ, Vîramitrodaya. ॥ ७९ ॥

---

निष्कासिनी स्वाम्यनवरुद्धा दासी। ननु च स्वैरिण्यादीनां साधारणतया गम्यत्वाभिधानमयुक्तम्। न हि जातितः शास्त्रतो वा काश्चन लोके साधारणाः स्त्रिय उपलभ्यन्ते। तथा हि। स्वैरिण्यो दास्यश्च तावद्वर्णस्त्रिय एव। स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत्। वर्णानामानुलोम्येन दास्यं न प्रतिलोमत इति स्मरणात्। न च वर्णस्त्रीणां पत्यौ जीवति मृते वा पुरुषान्तरोपभोगो घटते ॥ Mitâksharâ, p. 346. ॥ ७८ ॥ ७९ ॥

दर्पाद्वा यदि वा मोहाच्छ्लाघया वा स्वयं वदेत् ।
ममेयं भुक्तपूर्वेति तच्च संग्रहणं स्मृतम् ॥ ६९ ॥*
सजात्यतिशये पुंसां दण्ड उत्तमसाहसः ।
मध्यमस्त्वानुलोम्येन प्रातिलोम्ये प्रमापणम् ॥ ७० ॥
कन्यायामसकामायां द्व्यङ्गुलस्यावकर्तनम् ।
उत्तमायां वधस्त्वेव सर्वसंग्रहणं तथा ॥ ७१ ॥
सकामायां तु कन्यायां संगमे नास्त्यतिक्रमः ।
किंत्वलंकृत्य सत्कृत्य स एवैनां समुद्वहेत् ॥ ७२ ॥*
माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा ।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा ॥ ७३ ॥*
दुहिताचार्यभार्या च सगोत्रा शरणागता ।
राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या ॥ ७४ ॥*
आसामन्यतमां गत्वा गुरुतल्पग उच्यते ।
शिश्नस्योत्कर्तनं तस्य नान्यो दण्डो विधीयते ॥ ७५ ॥*
पशुयोनावतिक्रामन्विनेयः स दमं शतम् ।

---

357. त्वेव L. C. ॥ ७१ ॥ प्रवृत्तः स Vulg. अतिक्रामन् Vivâda-

---

माताच जननीव्यतिरिक्ता पितृपत्नी । आसां विंशतेरन्यतमागमने शिश्नच्छेदः । गुप्तविषयमेतत् ॥ Vivâdachintâmaṇi, p. 118. ॥ ७३ ॥ ७४ ॥ ॥ ७५ ॥

अतिक्रामन्मैथुनं कुर्वन्पणशतं दण्ड्यः ॥ Vivâdachintâmaṇi, p. 121. ॥ ७६ ॥

परस्त्रिया सहाकाले ऽदेशे वा भवतो मिथः ।
स्थानसंभाषणामोदास्त्रयः संग्रहणक्रमाः ॥ ६२ ॥*
नदीनां संगमे तीर्थेष्वारामेषु वनेषु च ।
स्त्रीपुंसौ यत्समीयातां तच्च संग्रहणं स्मृतम् ॥ ६३ ॥*
दूतीप्रस्थापनैर्वापि लेखसंप्रेषणैरपि ।
अन्यैश्च विविधैर्दोषैर्ग्राह्यं संग्रहणं बुधैः ॥ ६४ ॥
स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तथा ।
परस्परस्यानुमतं सर्वं संग्रहणं स्मृतम् ॥ ६५ ॥*
उपकारक्रिया केलिः स्पर्शो भूषणवाससाम् ।
सहखट्वासनं चैव सर्वं संग्रहणं स्मृतम् ॥ ६६ ॥*
पाणौ यच्च निगृह्णीयाद्वेण्यां वस्त्राञ्चले ऽपि वा ।
तिष्ठ तिष्ठेति वा ब्रूयात्सर्वं संग्रहणं स्मृतम् ॥ ६७ ॥*
वस्त्रैराभरणैर्माल्यैः पानैर्भक्ष्यैस्तथैव च ।
संप्रेष्यमाणैर्गन्धैश्च वेद्यं संग्रहणं बुधैः ॥ ६८ ॥*

---

b. y.; स्पृष्टा L. C. ॥ ६५ ॥ ६६ om. b. L. C. y. See Manu VIII.

---

संग्रहणं सम्यग्गृह्यते तदनुरक्ततया प्रसीयते आश्रयो येन तत्संग्रहणम् ।... अदेशेत्यादि अदेशे निर्जनादौ । अकाले रात्र्यादौ । स्थानमवस्थितिः । आमोदः परीहासः ॥ Vivâdachintâmaṇi, p. 109. ॥ ६२ ॥

उपकारक्रिया हिताचरणक्रिया । उपचार इति क्वचित्पाठः । तत्र ताम्बूलादिप्रेषणमर्थः । केलिः नर्म । संग्रहणमुक्तमितिशेषः । अदेशे स्तनादौ ॥ Vivâdachintâmaṇi, p. 110 ॥ ६५ ॥ ६६ ॥

महोक्षो जनयेद्वत्सान्यस्य गोषु व्रजे चरन् ।
तस्य ते यस्य ता गावो मोघं स्कन्दितमार्षभम् ॥ ५७ ॥
क्षेत्रिकानुमते बीजं यस्य क्षेत्रे समर्प्यते ।
तदपत्यं द्वयोरेव बीजिक्षेत्रिकयोर्मतम् ॥ ५८ ॥
न स्यात्क्षेत्रं विना सस्यं न वा बीजं विनास्ति तत् ।
अतो ऽपत्यं द्वयोरिष्टं पितुर्मातुश्च धर्मतः ॥ ५९ ॥*
नाप्यपत्यं परगृहे संयुक्तस्य स्त्रिया सह ।
इष्टं संग्रहणं तज्ज्ञैर्नागतायाः स्वयं गृहे ॥ ६० ॥*
अदुष्टत्यक्तदारस्य क्लीबस्य क्षयिकस्य च ।
स्वेच्छानुपेयुषो दारान्न दोषः साहसे भवेत् ॥ ६१ ॥*

---

मोघः B. L.; मोघ b. C. y, See Manu IX. 50 ॥ ५७ ॥ क्षत्रियानुमतो b. C. y.; क्षेत्रियानुमतो B. L. β. ॥ ५८ ॥ दृष्टं च संग्रहं तज्ज्ञैर्ना॰ Vulg. See Vivâdachintâmaṇi. ॥ ६० ॥ प्रदुष्ट॰ Vulg. स्वेच्छयोपेयुषो b. L. y. C.; स्वेच्छानुपेयुषो B. β. See a text of Vishṇu, as quoted in the Vivâdachintâmaṇi, p. 112. ॥ ६१ ॥ स्पृष्ट्वा

---

पितुर्बीजिन इत्यर्थः। ततश्च मातृसंबन्धादेव मातृस्वामिनः संबन्धः। तत्र च रतिपुत्रफलदारा इति कालिकापुराणात्पुत्रविषये दुहित्रपेक्षया भार्याया बलवत्त्वादादौ गूढोत्पन्नो ऽधिकारी ततः कानीन इति याज्ञवल्क्यमतम् ॥ Jagannâtha, IV. ५, 256. ॥ ५९ ॥

पतित्यक्तान्वा क्लीवपतिकान्वा अक्षमपतिकान्वा परदारान्स्वेच्छान्तर्गृहे ऽपि संगच्छतो ऽभिगच्छतो वा न दण्ड इत्यर्थः ॥ Vivâdachintâmaṇi, p. 112. ॥ ६१ ॥

स्त्री प्रसूताप्रसूता वा पत्यावेव तु जीवति।
कामाद्या संश्रयेदन्यं प्रथमा स्वैरिणी तु सा ॥ ४९ ॥*
मृते भर्तरि संप्राप्तान्देवरादीनपास्य या।
उपगच्छेत्परं कामात्सा द्वितीया प्रकीर्तिता ॥ ५० ॥*
प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा च या।
तवाहमित्युपगता सा तृतीया प्रकीर्तिता ॥ ५१ ॥*
देशधर्मानपेक्ष्य स्त्री गुरुभिर्या प्रदीयते।
उत्पन्नसाहसान्यस्मै अन्त्या सा स्वैरिणी स्मृता ॥ ५२ ॥*
पुनर्भुवां विधिस्त्वेष स्वैरिणीनां प्रकीर्तितः।
पूर्वा पूर्वा जघन्यासां श्रेयसी तूत्तरोत्तरा ॥ ५३ ॥*
अपत्यमुत्पादयितुस्तासां या शुल्कतो हृता।
अशुल्कोपहृतायां तु क्षेत्रिकस्यैव तत्फलम् ॥ ५४ ॥*
क्षेत्रिकस्य यदज्ञातं क्षेत्रे बीजं प्रदीयते।
न तत्र बीजिनो भागः क्षेत्रिकस्यैव तत्फलम् ॥ ५५ ॥
ओघवाताहृतं बीजं क्षेत्रे यस्य प्ररोहति।
फलभुक्तस्य तत्क्षेत्री न बीजी फलभाग् भवेत् ॥ ५६ ॥

---

ksharâ, p. 77 (चतुर्थी) ॥ ५२ ॥ क्षत्रियस्यैव b. क्षत्रिकस्यैव y. ॥ ५५ ॥
घोघवाताहृतं b. L. y. See Manu IX. 54. तत्क्षेत्रं β. B. ॥५६॥

---

उत्पन्नसाहसा उत्पन्नव्यभिचारा ॥ Mitâksharâ, p. 77. ॥ ५२ ॥

सत्कृत्याहूय कन्यां तु दद्याद्ब्राह्मे त्वलंकृताम् ।
सह धर्मं चरेत्युक्त्वा प्राजापत्यो विधिः स्मृतः ॥ ४० ॥
वस्त्रगोमिथुनाभ्यां तु विवाहस्त्वार्ष उच्यते ।
अन्तर्वेद्यां तु दैवः स्यादृत्विजे कर्म कुर्वते ॥ ४१ ॥
इच्छन्तीमिच्छतः प्राहुर्गान्धर्वं नाम पञ्चमम् ।
विवाहस्त्वासुरो ज्ञेयः शुल्कसंव्यवहारतः ॥ ४२ ॥
प्रसह्य हरणादुक्तो विवाहो राक्षसस्तथा ।
सुप्तप्रमत्तोपगमात्पैशाचस्त्वष्टमोऽधमः ॥ ४३ ॥
एषां तु धर्म्याश्चत्वारो ब्राह्माद्याः समुदाहृताः ।
साधारणः स्याद्गान्धर्वस्त्रयोऽधर्म्यास्ततः परे ॥ ४४ ॥
परपूर्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम् ।
पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा ॥ ४५ ॥ *
कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता ।
पुनर्भूः प्रथमा प्रोक्ता पुनः संस्कारमर्हति ॥ ४६ ॥ *
कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता ।
पुनः पत्युर्गृहमियात्सा द्वितीया प्रकीर्तिता ॥ ४७ ॥ *
असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते ।
सवर्णाय सपिण्डाय सा तृतीया प्रकीर्तिता ॥ ४८ ॥ *

---

राक्षसोनवरस्यात् L. ॥ ३६ ॥ धर्मा B. C. b. β. ॥ ४४ ॥ अन्या सा Vulg. See, however, ३, २४ (अन्तिमा स्वैरिणीनाम्) and Mitâ-

नादुष्टां दूषयेत्कन्यां नादुष्टं दूषयेद्वरम् ।
दोषे तु सति नागः स्यादन्योन्यं त्यजतोस्तयोः ॥ ३१ ॥
दत्त्वा न्यायेन यः कन्यां वराय न ददाति ताम् ।
अदुष्टश्चेद्वरो राज्ञा स दण्ड्यस्तत्र चौरवत् ॥ ३२ ॥
यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ।
तस्य कुर्यान्नृपो दण्डं पूर्वसाहसचोदितम् ॥ ३३ ॥
अकन्येति तु यः कन्यां ब्रूयाद्द्वेषेण मानवः ।
स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन् ॥ ३४ ॥
प्रतिगृह्य तु यः कन्यामदुष्टामुत्सृजेन्नरः ।
स विनेयस्त्वकामो ऽपि कन्यां तामेव चोद्वहेत् ॥ ३५ ॥*
दीर्घकुत्सितरोगार्ता व्यङ्गा संस्पृष्टमैथुना ।
दुष्टान्यगतभावा च कन्यादोषाः प्रकीर्तिताः ॥ ३६ ॥
उन्मत्तः पतितः क्लीबो दुर्भगस्त्यक्तबान्धवः ।
कन्यादोषौ च यौ पूर्वौ एष दोषगणो वरे ॥ ३७ ॥
अष्टौ विवाहा वर्णानां संस्कारार्थं प्रकीर्तिताः ।
ब्राह्मस्तु प्रथमस्तेषां प्राजापत्यस्तथापरः ॥ ३८ ॥
आर्षश्चैव हि दैवश्च गान्धर्वश्चासुरस्तथा ।
राक्षसो ऽनवरस्तस्मात्पैशाचस्त्वष्टमः स्मृतः ॥ ३९ ॥

---

C. y. ॥ ३० ॥ कन्यामदृष्टाम् β. ॥ ३५ ॥ संस्पृष्टमैथूना b. β. L. y. दृष्टान्यगतभावा C.; दृष्टान्य° b. ॥ ३६ ॥ राक्षसोनवरोत्तस्मात् b. y. ;

यदा तु नैव कश्चित्स्यात्कन्या राजानमाश्रयेत् ।
अनुज्ञया तस्य वरं प्रतीत्य वरयेत्स्वयम् ॥ २२ ॥
सवर्णमनुरूपं च कुलशीलवयःश्रुतैः ।
सह धर्मं चरेत्तेन प्रजां चोत्पादयेत्ततः ॥ २३ ॥
प्रतिगृह्य च यः कन्यां वरो देशान्तरं व्रजेत् ।
त्रीनृतून्समतिक्रम्य कन्यान्यं वरयेद्वरम् ॥ २४ ॥
कन्या नर्तुमुपेक्षेत बान्धवेभ्यो निवेदयेत् ।
ते चेन्न दद्युस्तां भर्त्रे ते स्युर्भ्रूणहभिः समाः ॥ २५ ॥
यावन्तश्चर्तवस्तस्याः समतीयुः पतिं विना ।
तावत्यो भ्रूणहत्याः स्युस्तस्य यो न ददाति ताम् ॥ २६ ॥
अतः प्रवृत्ते रजसि कन्यां दद्यात्पिता सकृत् ।
महदेनः स्पृशेदेनमन्यथैवं विधिः सताम् ॥ २७ ॥
सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सतां सकृत् ॥ २८ ॥
ब्राह्मादिषु विवाहेषु पञ्चस्वेष विधिः स्मृतः ।
गुणापेक्षं भवेद्दानमासुरादिषु च त्रिषु ॥ २९ ॥
कन्यायां दत्तशुल्कायां ज्यायांश्चेद्वर आव्रजेत् ।
धर्मार्थकामसंयुक्तो वाक्यं तत्रानृतं भवेत् ॥ ३० ॥

---

L. C.; ०वत० b. y. ॥ २३ ॥ अथो प्रवृते L. b.; अथो प्रवृत्ते ॥ २७ ॥ पञ्चस्वेषु Vulg. ॥ २९ ॥ श्रेयांश्चेद्वर B. ०संयुक्तं B.; ०संयुक्ते L. b. β.

तत्राद्यावप्रतीकारौ पक्षाख्यो माससमाचरेत् ।
अनुक्रमात्तु यस्यास्य कालः संवत्सरः स्मृतः ॥ १४ ॥*
ईर्ष्याषण्ढादयो ये ऽन्ये चत्वारः समुदाहृताः ।
त्यक्तव्यास्ते पतितवत्क्षतयोन्या अपि स्त्रिया ॥ १५ ॥*
आक्षिप्तमोघबीजाभ्यां कृते ऽपि पतिकर्मणि ।
पतिरन्यः स्मृतो नार्या वत्सरार्धं प्रतीक्ष्य तु ॥ १६ ॥*
शालीनस्यापि हृष्टस्त्रीसंयोगाद्भ्रश्यते ध्वजः ।
तं हीनवेगमन्यस्त्रीबालाद्याभिरुपाचरेत् ॥ १७ ॥*
अन्यस्यां यो मनुष्यः स्यादमनुष्यः स्वयोषिति ।
लभेत सान्यं भर्तारमेतत्कार्यं प्रजापतेः ॥ १८ ॥*
अपत्यार्थं स्त्रियः सृष्टाः स्त्री क्षेत्रं बीजिनो नराः ।
क्षेत्रं बीजवते देयं नाबीजी क्षेत्रमर्हति ॥ १९ ॥
पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः ।
पितामहो मातुलश्च सकुल्या बान्धवास्तथा ॥ २० ॥
माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते ।
तस्यामप्रकृतिस्थायां दद्युः कन्यां सनामयः ॥ २१ ॥

---

॥१३॥ ईर्षाषण्डादयो ऽन्ये B. b. β. y. ॥ १५॥ भार्या for नार्या B β. प्रतीक्षतु b. C. y.; प्रतीक्षेत B. β. ॥ १६ ॥ तं हीनविषमं तु स्त्री वर्षं क्षिप्तान्यमाश्रयेत् Aparârka ॥ १७ ॥ स वीजि b. C. y.; सवीजी L. न वीजे Aparârka. ॥ १९ ॥ मातुलाश्च b. C. y. ॥ २० ॥ ०वयश्रुतैः

---

माससमाचरेत्प्रतीक्षेतेति ॥ Aparârka. ॥ १४ ॥

सुबद्धजत्रुजान्वस्थिः सुबद्धांशशिरोरुहः ।
स्थूलघाटस्तनूरुत्वगविलम्बगतिस्वरः ॥ ९ ॥*
रेतो ऽस्योत्प्लवते नाप्सु ह्लादि मूत्रं च फेनिलम् ।
पुमान्स्याल्लक्षणैरेतैर्विपरीतैस्तु षण्ढकः ॥ १० ॥*
चतुर्दशविधः शास्त्रे षण्ढो दृष्टो मनीषिभिः ।
चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात् ॥११॥*
निसर्गषण्ढो वध्रिश्च पक्षषण्ढस्तथैव च ।
अभिशापाद्गुरो रोगाद्देवक्रोधात्तथैव च ॥ १२ ॥*
ईर्ष्याषण्ढश्च सेव्यश्च वातरेता मुखेभगः ।
आक्षिप्तो मोघबीजश्च शालीनो ऽन्यापतिस्तथा ॥१३॥*

---

Vulg. See Aparârka's Commentary. स्थूलघातोतनूजश्च B. β.; स्थूलघतोतनूजश्च L.; स्थूलघ्रयातनूयश्च b.; स्थूलघ्राटोतनूयश्च C. y. ॥ ९ ॥ रतोस्योत्प्लवते नासु y.; रेतस्योत्प्लवते नाप्सु C.; रेतस्योत्प्लवते नासु b.; रेतसोत्प्लवनेनाप्सु B. β.; रेयस्याप्सु प्लवते L.; रेतो ऽप्सु प्लवते नास्य Aparârka. विपरीतस्तु b. C. Aparârka. ॥ १० ॥ वभ्रश्च L. y. b.; बध्नश्च B. β.; वद्रश्च C.; वव्रश्च Aparârka. ॥१२॥ ईर्षाषण्ढश्च b. C. y.

---

निसर्गषण्ढो लिङ्गवृषहीनस्त्वेवोत्पन्नः। वध्रिर्गलिताण्डः। पक्षषण्ढः पक्षान्तरिता यस्य रतिशक्तिः। गुरोरभिशापादेव देवक्रोधान्निन्दादेव जनितक्रोधात्॥ Aparârka. ॥ १२ ॥

ईर्ष्याषण्ढः तत्स्त्रीविषये भगकार्यं करोति (?)। आक्षिप्तरेता विसर्गसमये यस्य रेतः प्रत्यक् स्रवते। मोघबीजो यस्य गर्भाधानसमर्थरेतो न भवति। शालीनो यस्य स्त्रीसंनिपाताल्लिङ्गसंनिपातः। अन्यापतिर्यस्य भार्याव्यतिरिक्तायामेव योषिति पुंस्त्वम्॥ Aparârka. ॥ १३ ॥

विवाहादिविधिः स्त्रीणां यत्र पुंसां च कीर्त्यते।
स्त्रीपुंसयोगनामैतद्विवादपदमुच्यते ॥ १ ॥*
स्त्रीपुंसयोस्तु संबन्धे वरणं प्राग्विधीयते।
वरणाद्ग्रहणं पाणेः संस्कारो ऽथ द्विलक्षणः ॥ २ ॥
तयोरनियतं प्रोक्तं वरणं दोषदर्शनात्।
पाणिग्रहणमन्त्रश्च नियतं दारलक्षणम् ॥ ३ ॥
ब्राह्मणक्षत्रियविशां शूद्राणां च परिग्रहे।
सजातिः श्रेयसी भार्या सजातिश्च पतिः स्त्रियाः ॥ ४ ॥
ब्राह्मणस्यानुलोम्येन स्त्रियो ऽन्यास्तिस्र एव तु।
शूद्रायाः प्रातिलोम्येन तथान्ये पतयस्त्रयः ॥ ५ ॥
द्वे भार्ये क्षत्रियस्यान्ये वैश्यस्यैका प्रकीर्तिता।
वैश्याया द्वौ पती ज्ञेयावेको ऽन्यः क्षत्रियापतिः ॥ ६ ॥
आ सप्तमात्पञ्चमाद्वा बन्धुभ्यः पितृमातृतः।
अविवाह्याः सगोत्राः स्युः समानप्रवरास्तथा ॥ ७ ॥
परीक्ष्यः पुरुषः पुंस्त्वे निजैरेवाङ्गलक्षणैः।
पुमांश्चेदविकल्पेन स कन्यां लब्धुमर्हति ॥ ८ ॥*

---

यथा for यत्र Vulg. See Mitâksharâ. ॥ १ ॥ संस्कारो ऽयं L. b. ॥ २ ॥ प्रतिलोमेन B. β.; प्रतिलोम्येन c. y. ॥ ५ ॥ सुबद्धजघनजान्वस्थि

---

सुबद्धं सुश्लिष्टं। जत्रु ग्रीवास्कन्धयोः संधिः। घाटो ग्रीवायाः पश्चाद्भागः ॥ Aparârka. ॥ ८ ॥

पथि क्षेत्रे वृतिः कार्या यामुष्ट्रो नावलोकयेत्।
न लङ्घयेत्पशुर्वाश्वो न भिन्द्याद्यां च सूकरः ॥ ४१ ॥*
गृहक्षेत्रे च दृष्टे द्वे वासहेतू कुटुम्बिनाम्।
तस्मात्ते नोत्क्षिपेद्राजा तद्धि मूलं कुटुम्बिनाम् ॥ ४२ ॥
वृद्धे जनपदे राज्ञो धर्मः कोशश्च वर्धते।
हीयते हीयमाने च वृद्धिहेतुमतः श्रयेत् ॥ ४३ ॥

---

रितिः C. यावद्गौर्नावलोकयेत् b. C. y.; यामुष्ट्रो नावलोकयेत् B. β. and the commentation. वृद्धिर्जनपदे राज्ञो b. वृद्धिर्जनपदे राज्ञो B. β. ॥ ४३ ॥

इति नारदीये धर्मशास्त्रे सीमाबन्धो नामैकादशं व्यवहारपदम् ॥

राजग्राहगृहीतो वा वज्राशनिहतो ऽपि वा।
अथ सर्पेण दष्टो वा वृक्षाद्वा पतितो भवेत् ॥ ३६ ॥*
व्याघ्रादिभिर्हतो वापि व्याधिभिर्वाप्युपद्रुतः।
न तत्र दोषः पालस्य न च दोषो ऽस्ति गोमिनाम्॥ ३७॥*
गोभिस्तु भक्षितं धान्यं यो नरः प्रतियाचते।
सामन्तानुमते देयं धान्यं यत्तत्र भक्षितम् ॥ ३८ ॥*
गावस्तु गोमिना देया धान्यं तत्कर्षिकस्य तु।
एवं हि विनयः प्रोक्तो गोपैः सस्यावपातनात् ॥ ३९ ॥*
ग्रामोपान्ते च यत्क्षेत्रं विवीतान्ते महापथे।
अनावृते चेत्तन्नाशे न पालस्य व्यतिक्रमः ॥ ४० ॥*

---

शयेद्गौस्त्वेन्न दण्डः कल्पितो यतः. This is an interpolation. See Vîramitrodaya, Vivâdachintamaṇi, Jagannâtha. सट्-शस्तस्य समो देयं C.; सट्स्तस्य समो देयं b. y. शादस्तस्य समो देयं. B. β. See Vivâdachintâmaṇi, Vîramitrodaya. ॥ ३८ ॥ गावस्तु गोमिनां देया B. b. C. y. B. गवलं गोभिना देयं L. and Jagannâtha, गोपैः सस्यार्धपातनात् B. β. c. b. y. ॥ See ibid. ॥ ३९ ॥ चेत् om. b. ॥ ४० ॥ विवितः b. y.; वृत्तिः B. β.

---

पालो यदि राज्ञा कर्मकरणार्थं गृहीतः कुम्भीरेण वा गृहीतः। तदा तत्पाल्यपशुभिः सस्यभक्षणे पालस्य न दोषः। वज्राशनीति तयोर्विशेषः कथंचित्प्रकारभेदादिनाङ्गीकर्तव्यः। वज्राशनिताडितस्यापि कदाचिज्जीवनं भवति ॥ Jagannâtha III. 4, 52. ॥ ३६ ॥ ३७ ॥

माषं गां दापयेद्दण्डं द्वौ माषौ महिषीं तथा।
अजाविके सवत्से तु दण्डः स्यादर्धमाषकः॥ ३१॥*
अदण्ड्या हस्तिनोऽश्वाश्च प्रजापाला हि ते मताः।
अदण्ड्यागन्तुकी गौश्च सूतिका वाभिसारिणी॥ ३२॥
नष्टा भग्ना च लग्ना च वृषभः कृतलक्षणः।
प्रोक्तं तु छिन्ननासायां वसन्त्यां तु चतुर्गुणम्॥ ३३॥
सन्नानां द्विगुणः प्रोक्तो वसतां तु चतुर्गुणः।
प्रत्यक्षचारकाणां तु चौरदण्डः स्मृतो नृणाम्॥ ३४॥*
या नष्टाः पालदोषेण गावः क्षेत्रं यदाप्नुयुः।
न तत्र गोमिनां दण्डः पालस्तं दण्डमर्हति॥ ३५॥*

---

छिन्नभाषायां B. c. ॥ ३३॥ सन्नायां Vulg.; सत्वानां Jagannâtha, Vivâdachintâmaṇi. प्रत्यक्षं Vulg. ॥ ३४॥ पराप्नुयुः B. β. ॥ ३५॥ Vulg. inserts the following in ३७, सस्यं विना-

---

सत्वानां (sic) सस्यभक्षणभ्रान्तानाम्। वसतां तत्रैव चरित्वा नीतरात्रिकानाम्। तदेतदप्रत्यक्षचारकाभिप्रायकम्। प्रत्यक्षचारके त्वाह। प्रत्यक्षचारकाणां तु चौरदण्डः स्मृतो बुधैः। प्रत्यक्षचारकाः क्षेत्रिणां समक्षमेव बलेन चारका इत्याह। चिन्तामणिरप्येवम्। तत्रैव सस्यं भक्षयित्वा उपविशति। तदुत्तरं क्षुधावृद्धौ पुनर्भक्षयति एवं रीत्या कालयाने इत्यर्थः। क्षेत्रिणां समक्षमेवेति किमर्थमुक्तमिति न निश्चिनुमः। पालस्य पशुसस्यभक्षणमनुगम्यमानस्य समक्षमित्युक्तो क्षतिविरहात्॥ Jagannâtha III. 4, 46. ॥ ३४॥

तदष्टभागापचयाद्यावत्सप्त गताः समाः ।
संप्राप्ते त्वष्टमे वर्षे भुक्तं क्षेत्रं लभेत सः ॥ २५ ॥*
संवत्सरेणार्धखिलं खिलं तद्वत्सरैस्त्रिभिः ।
पञ्चवर्षावसन्नं तु स्यात्क्षेत्रमटवीसमम् ॥ २६ ॥*
क्षेत्रं त्रिपुरुषं यत्स्याद्गृहं वा स्यात्क्रमागतम् ।
राजप्रसादादन्यत्र न तद्भोगः परं नयेत् ॥ २७ ॥
उत्क्रम्य तु वृतिं यत्र सस्यघातो गवादिभिः ।
पालः शास्यो भवेत्तत्र न चेच्छक्त्या निवारयेत् ॥ २८ ॥*
समूलसस्यघाते तु तत्स्वामी सममाप्नुयात् ।
वधेन पालो मुच्येत दण्डं स्वामिनि पातयेत् ॥ २९ ॥*
गौः प्रसूता दशाहं च महोक्षो वाजिकुञ्जरौ ।
निवार्याः स्युः प्रयत्नेन तेषां स्वामी न दण्डभाक् ॥ ३० ॥*

---

एकवर्षपतितमर्धखिलं त्रिवर्षपतितं खिलं पञ्चवर्षपतितमरण्यसमं भवतीत्यर्थः ॥ Vivâdachintâmaṇi, p. 65. ॥ २६ ॥

वृतिरावरणमिति चण्डेश्वरः ।... पालः शास्य इति मन्वेकवाक्यत्वात् शतदण्डः । न चेन्निवारयेत् । तथा च वृतिभङ्गं पश्यन्यदि तूष्णीं निवारयति तदा तु न दोषः । शक्त इति स्वरसात् महोक्षस्य संसर्गकामुकस्य तदानीं निवारणाशक्त्यभावे न दोषः । एवमन्यत्रापीति वदन्त्यपरे ॥ Jagannâtha, III. 4,30. ॥ २८ ॥

वधेनापराधानुरूपेण हननेन । समूलसस्यनाशस्तु यस्मिन्नाशे पुनः परोहो न भवति स ज्ञेयः इति चण्डेश्वरः । Jagannâtha III. 4, 49. ॥२९॥

वाजिकुञ्जरौ प्रजापालनोपयुक्ताविति रत्नाकरः ॥ Jagannâtha III. 4,55. ॥ ३० ॥

पूर्वप्रवृत्तमुत्सन्नमपृष्ट्वा स्वामिनं तु यः ।
सेतुं प्रवर्तयेत्कश्चिन्न स तत्फलभाग्भवेत् ॥ २० ॥*
मृते तु स्वामिनि पुनस्तद्वंश्ये वापि मानवे ।
राजानमामन्त्र्य ततः प्रकुर्यात्सेतुकर्म तत् ॥ २१ ॥*
अतो ऽन्यथा क्लेशभाक् स्यान्मृगव्याधानुदर्शनात् ।
इषवस्तस्य नश्यन्ति यो विद्धमनुविध्यति ॥ २२ ॥*
अशक्तप्रेतनष्टेषु क्षेत्रिकेष्वनिवारितः ।
क्षेत्रं चेद्विकृषेत्कश्चिदश्नुवीत स तत्फलम् ॥ २३ ॥*
विकृष्यमाणे क्षेत्रे चेत्क्षेत्रिकः पुनराव्रजेत् ।
खिलोपचारं तत्सर्वं दत्त्वा स्वक्षेत्रमाप्नुयात् ॥ २४ ॥*

---

पूर्वं B. β. ॥ २० ॥ क्षेत्रे b. C. L. y. त्यतत्फलं b. C. y. ॥ २३ ॥ स क्षेत्रम् B. C. y. ॥ २४ ॥ वृत L. पाणि B. y. ; पालि C. ॥ २८ ॥ समूह० b. ॥ २९ ॥

---

जीर्णानामन्यदीयसेत्वादीनामुद्धारो ऽपि तत्स्वाम्याद्यनुज्ञां गृहीत्वा कार्य इत्याह नारदः ॥ Vîramitrodaya, p. 468. ॥ २० ॥

यस्तु क्षेत्रस्वामिनः सामर्थ्यवैकल्यादिनाधोलाघवावस्थां प्राप्ते क्षेत्रे स्वाम्यनिवारितः सन्स्वयमेव तत्कर्षणादिकं करोति तदा स क्षेत्रस्वामिने फलं न दापनीयः । किंतु तस्य फलं स्वयमेव गृह्णीयादित्याह नारदः प्रेता मृताः । नष्टाः कुत्रगता इति चिरमपरिचिताः । क्षेत्रिकेषु क्षेत्रस्वामिषु । तेन क्षेत्रस्वामिना तत्पुत्रादिना वा समागतेनैवं विधाय कर्षादिखिलभञ्जनार्थं व्ययं दत्त्वैव स्वीयं क्षेत्रं ग्राह्यमिति ॥ Vîramitrodaya, pp. 469, 470. ॥ २३ ॥ २४ ॥

चतुष्पथसुरस्थानरथ्यामार्गान्न रोधयेत् ॥ १५ ॥*
रोधयन्ति तु ये मोहाद्बलाद्वापि कथंचन।
दण्डयेत्तादृशान्राजा साहसेनोत्तमेन च ॥ १६ ॥
परक्षेत्रस्य मध्ये तु सेतुर्न प्रतिषिध्यते।
महागुणो ऽल्पबाधश्च वृद्धिरिष्टा क्षये सति ॥ १७ ॥*
सेतुस्तु द्विविधः प्रोक्तः खेयो बन्ध्यस्तथैव च।
तोयप्रवर्तनात्खेयो बन्ध्यः स्यात्तन्निवर्तनात् ॥ १८ ॥*
नान्तरेणोदकं सस्यं नश्येदभ्युदकेन तु।
य एवानुदके दोषः स एवाभ्युदके स्मृतः ॥ १९ ॥*

---

L.; स्यन्दनकादिभिः B. C. See Vîramitrodaya. ॥ १५ ॥ बोधयन्ति C. y. ॥ १६ ॥ बन्धः L. y. C. ॥ १८ ॥ यच्च वानुदके B. C. y. ॥ १९ ॥

---

अवस्करः पुरीषम्। गृहादिशोधनार्थं पांशुसमूह इति हरिहरादयः। स्थलं वेदिका। श्वभ्रं गर्तः। भ्रमो जलनिर्गममार्गः। स्यन्दनिका पटलप्रान्तः। अन्यदपि आदिशब्देन तादृशं ग्राह्यम्। रथ्यामार्गो राजमार्गः। न तु चतुष्पथ इति कल्पतरुः। न चतुष्पथराजमार्गयोरभेद इति शङ्कनीयं तयोर्भेदात् ॥ Vîramitrodaya, p. 464. ॥ १५ ॥

क्षये भूमिनाशे ऽपि यदि वृद्धिरिष्टा तदा न प्रतिषिध्यते महागुणो ऽत इत्यर्थः ॥ Vivâdatâṇḍava ॥ क्षये अल्पक्षेत्रक्षये सत्यपि वृद्धिर्यत इष्टा अतो महागुणः स्वक्षेत्रे ऽपि उपकारको ऽल्पदोषश्चेत्तदा न प्रतिषेद्धव्य इत्यर्थः ॥ Vîramitrodaya, p. 467. ॥ १७ ॥

क्षेत्रे बहुजलनिर्गमार्थं खननम्। आगतोदकनिरोधार्थस्तदा बन्ध्य इत्यर्थः ॥ Vivâdatâṇḍava. ॥ १८ ॥ १९ ॥

गणवृन्दादयस्त्वन्ये दण्डं दाप्याः पृथक् पृथक् ।
विनेयाः प्रथमेन स्युः साहसेनानृते स्थिताः ॥ ८ ॥*
नैकः समुन्नयेत्सीमां नरः प्रत्ययवानपि ।
गुरुत्वादस्य कार्यस्य क्रियैषा बहुषु स्थिता ॥ ९ ॥*
एकश्चेदुन्नयेत्सीमां सोपवासः समाहितः ।
रक्तमाल्याम्बरधरः क्षितिमारोप्य मूर्धनि ॥ १० ॥*
यदि च न स्युर्ज्ञातारः सीमायाश्च न लक्षणम् ।
तदा राजा द्वयोः सीमामुन्नयेदिष्टतः स्वयम् ॥ ११ ॥*
एतेनैव गृहोद्यानानिपानायतनादिषु ।
विवादविधिराख्यातस्तथा ग्रामान्तरेषु च ॥ १२ ॥
सीमामध्ये तु जातानां वृक्षाणां क्षेत्रयोर्द्वयोः ।
फलपुष्पं च सामान्यं क्षेत्रस्वामिषु निर्दिशेत् ॥ १३ ॥
अन्यक्षेत्रोपजातानां शाखास्त्वन्यत्र संस्थिताः ।
स्वामिनस्ता विजानीयादन्यक्षेत्रविनिर्गताः ॥ १४ ॥*
अवस्करस्थलश्वभ्रभ्रमस्यन्दनिकादिभिः ।

---

L. ॥ ८ ॥ ९ om. C. धर्मस्य B. y. ॥ ६ ॥ सीमायां च न B. β. and Vivâdachintâmaṇi ॥११॥ स्यन्दवाजिभिः B. C. y. ; स्यन्दनवाजिभिः

---

स उभयानुमतधर्मविद्यतिरिक्तः ॥ Vîramitrodaya, p. 458. ॥ ९ ॥ इष्टतः इच्छया सार्वविभक्तिकस्तसिः ॥ Vîramitrodaya, p. 460. ॥ ११ ॥

सेतुकेदारमर्यादाविकृष्टाकृष्टनिश्चये।
क्षेत्राधिकारो यस्तु स्याद्विवादः क्षेत्रजस्तु सः ॥ १ ॥*
क्षेत्रसीमाविवादेषु सामन्तेभ्यो विनिश्चयः।
नगरग्रामगणिनो ये च वृद्धतमा नराः ॥ २ ॥
ग्रामसीमासु च बहिर्ये स्युस्तत्कृषिजीविनः।
गोपशाकुनिकव्याधा ये चान्ये वनजीविनः ॥ ३ ॥*
समुन्नयेयुस्ते सीमां लक्षणैरुपलक्षिताम्।
तुषाङ्गारकपालैश्च कूपैरायतनैर्द्रुमैः ॥ ४ ॥
अभिज्ञातैश्च वल्मीकस्थलनिम्नोन्नतादिभिः।
केदारारामर्गैश्च पुराणैः सेतुभिस्तथा ॥ ५ ॥
निम्नगापहृतोत्सृष्टनष्टचिह्नासु भूमिषु।
तत्प्रदेशानुमानाच्च प्रमाणैर्भोगदर्शनैः ॥ ६ ॥*
अथ चेदनृतं ब्रूयुः सामन्तास्तद्विनिश्चये।
सर्वे पृथक् पृथग्दण्ड्या राज्ञा मध्यमसाहसम् ॥ ७ ॥*

---

निम्नगापहृतैर्दृष्ट° y. C. See Vîramitrodaya, etc. पुराणैर्भोगदर्शनैः Vulg. See Vîramitrodaya ॥ ६ ॥ गुण° b. साहसं नान्टत

---

अस्यार्थः सेतुर्जलप्रवाहनबन्धः। केदारः क्षेत्रम्। मर्यादा सीमा। विकृष्टो लाङ्गलप्रहतो देशः। अकृष्टस्तद्रहितः। एतेषां निश्चयो यत्र विवादे स्यात्स क्षेत्राधिकारः क्षेत्रविषयको विवादः क्षेत्र उच्यत इति ॥ Vîramitrodaya, p. 451. ॥ ५ ॥

पृथग्गणांश्च ये भिंद्युस्ते विनेया विशेषतः।
आवहेयुर्भयं घोरं व्याधिवत्ते ह्युपेक्षिताः॥ ६॥*
दोषवत्करणं यत्स्यादनाम्नायप्रकल्पितम्।
प्रवृत्तमपि तद्राजा श्रेयस्कामो निवर्तयेत्॥ ७॥*

---

y.; व्याधिं यत्ते ह्युपेक्षिताः B. β. See Vîramitrodaya, Jagannâtha.॥ ६॥

---

प्रकृत्यवमतं स्वभावतो गर्हितम्। अर्थानां बाधकं द्यूतादि। दोषवत्करणं निष्फला क्रिया। अनाम्नायप्रकल्पितमागमाप्रसिद्धम्। तेभ्यः पाषण्डादिभ्य इति रत्नाकरः। अत्रेदं निर्वाच्यम्। पाषण्डादिभिर्या या संवित् मिलित्वा कृता सा सा एव चेद्रक्षणीया तदतिक्रमे तु ते राज्ञा दण्ड्यास्तदा वयं सर्वे राज्ञे प्रजानां करदानं वारयाम इति अस्माभिः सर्वदा नग्नैर्भाव्यमिति द्यूतं चरिष्याम इति वेश्यां रमयिष्याम इति राजपथे सवेगं धावाम इति प्राखेटकस्थलं पूजयामेत्येवमादि प्रतिज्ञा अपि अवश्यं रक्ष्यन्तामिति तन्निरासाय वचनमिदमिति॥ Jagannâtha III. 3, 28.॥ ४ and ७॥

इति नारदीये धर्मशास्त्रे समयस्यानपाकर्म दशमं विवादपदम्॥

---

पाषण्डिनगमादीनां स्थितिः समय उच्यते।
समयस्यानपाकर्म तद्विवादपदं स्मृतम्॥ १॥*
पाषण्डिनैगमश्रेणीपूगव्रातगणादिषु।
संरक्षेत्समयं राजा दुर्गे जनपदे तथा॥ २॥*
यो धर्मः कर्म यच्चैषामुपस्थानविधिश्च यः।
यच्चैषां वृत्त्युपादानमनुमन्येत तत्तथा॥ ३॥*
नानुकूलं च यद्राजा प्रकृत्यवमतं च यत्।
बाधकं च यदर्थानां तत्तेभ्यो विनिवर्तयेत्॥ ४॥*
मिथः संघातकरणमहितं शस्त्रधारणम्।
परस्परोपघातं च तेषां राजा न मर्षयेत्॥ ५॥*

---

पाखण्डि॰ B. β.॥ १॥ ॰पुगा॰ b. y. C.॥ २॥ प्रकृत्यवमदं च यत् C. b. y.॥ ५॥ व्याधिं ह्येते ह्युपेक्षिताः b; व्याधिं ये ते ह्युपेक्षिताः L. C.

---

पाषण्डास्त्रयीबाह्याः। नैगमाः पौराः। आदिशब्दो गणसंघादिसमूहविवक्षया। स्थितिः पारिभाषिकैर्धर्मैर्व्यवहारः। अनपाकर्म उल्लङ्घनमिति रत्नाकरः। तथा च अस्माभिर्मिलित्वा चौरनिग्रहः कर्तव्य इत्यादिरूपसंकेतोल्लङ्घनं संविद्व्यतिक्रम इति॥ Jagannâtha, III. 3, 3.॥ १॥

मिथः संघातकरणं प्रकृतिसंघातप्रतिकूलावान्तरामलककरणम्। अहेतोर्भयादिहेतुमन्तरेण शस्त्रधरणम्। परस्परोपघातं परस्परानिष्टकरणम्। तेषां नारदपूर्वोक्तपाषण्डादीनामिति रत्नाकरः॥ Jagannâtha, III. 3, 25.॥ ५॥

स्थूलसूत्रवतां तेषां मध्यानां पञ्चकं शतम् ।
त्रिपलं तु सूक्ष्माणामेषा वृद्धिरुदाहृता ॥ १४ ॥
त्रिंशांशो रोमबद्धस्य क्षयः कर्मकृतस्य तु ।
कौशेयवल्कलानां तु नैव वृद्धिर्न च क्षयः ॥ १५ ॥
क्रीत्वा नानुशयं कुर्याद्वणिक् पण्यविचक्षणः ।
वृद्धिक्षयौ तु जानीयात्पण्यानामागमं तथा ॥१६॥*

---

क्रीत्वानुशयं न कुर्यादित्यर्थः । ननु तर्हि समार्घसमये महार्घं क्रीत्वा जीर्णमूल्येन जीर्णादि क्रीत्वा साधु मन्येत । इत्यत आह । क्षयमित्यादि । तथा च मूल्यज्ञानं द्रव्यपरीक्षणं च क्रयात्पूर्वमेव कर्तव्यमिति भावः ॥ Jagannâtha, III. 3, 10. ॥ १६ ॥

इति नारदीये धर्मशास्त्रे क्रीतानुशयो नाम नवमं व्यवहारपदम् ॥

दशाहः सर्वबीजानामेकाहो लोहवाससाम् ॥ ६ ॥*
परिभुक्तं च यद्वासः क्लिष्टरूपं मलीमसम् ।
सदोषमपि तत्क्रीतं विक्रेतुर्न भवेत्पुनः ॥ ७ ॥*
मूल्याष्टभागो हीयेत सकृद्धौतस्य वाससः ।
द्विः पादस्त्रिस्त्रिभागस्तु चतुःकृत्वोऽर्धमेव च ॥ ८ ॥*
अर्धक्षयात्तु परतः पादांशापचयः क्रमात् ।
यावत्क्षीणदशं जीर्णं जीर्णस्यानियमः क्षये ॥ ९ ॥*
लोहानामपि सर्वेषां हेतुरग्निक्रिया विधौ ।
क्षयः संस्क्रियमाणानां तेषां दृष्टोऽग्निसंगमात् ॥ १० ॥
सुवर्णस्य क्षयो नास्ति राजते द्विपलं शतम् ।
शतमष्टपलं ज्ञेयं क्षयस्तु त्रपुसीसयोः ॥ ११ ॥
ताम्रे पञ्चपलं विद्याद्विकारा ये च तन्मयाः ।
तद्धातूनामनेकत्वादायसोऽनियमः क्षये ॥ १२ ॥
तान्तवस्य च संस्कारे क्षयवृद्धी उदाहृते ।
सूत्रकार्पासिकोर्णानां वृद्धिर्दशपलं शतम् ॥ १३ ॥

---

See Vîramitrodaya, etc. दशाहात्सर्वबीजानामेकाहाल्लोहवाससाम् Vulg. See Vîramitrodaya, etc. ॥ ६ ॥ हीयते b. L. ॥ ८ ॥ ऽर्धक्रयात्तु Vulg. See Vîramitrodaya. पादशो यः क्रमात् ह्रसेत् b. L. C. y. ॥ ९ ॥

क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते।
क्रीतानुशय इत्येतद्विवादपदमुच्यते॥ १॥*
क्रीत्वा मुल्येन यत्पण्यं दुष्क्रीतं मन्यते क्रयी।
विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाह्न्यविक्षतम्॥ २॥*
द्वितीये ऽह्नि ददत्क्रेता मूल्यात्त्रिंशांशमाहरेत्।
द्विगुणं तु तृतीये ऽह्नि परतः क्रेतुरेव तत्॥ ३॥*
क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः।
परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत्पुनः॥ ४॥*
त्र्यहाद्दोह्यं परीक्षेत पञ्चाहाद्वाह्यमेव तु।
मणिमुक्ताप्रबालानां सप्ताहः स्यात्परीक्षणम्॥ ५॥*
द्विपदामर्धमासः स्यात्पुंसां तद्द्विगुणं स्त्रियाः।

---

॥ १॥ om. B. See Mitâksharâ, Vîramitrodaya, etc. ॥ २॥ क्रीत्वा पण्यं b. L. C. y. प्रक्षतं b. y. C.; प्राक्षतं B. β.; प्राक् चय L. See Mitâkshara, etc. परीच्याभिमतं B. β. ॥ ४॥ सप्ता-हात् Vulg. See Vîramitrodaya, etc. ॥ ५॥ तद्द्विगुणात् Vulg.

---

मूल्यात्त्रिंशांशं मूल्यादधिकं त्रिंशत्तमभागमित्यर्थः। एतच्च बीजान्यभोग-विनश्वरवस्त्रादिविषयमिति रत्नाकरः। अपरे तु क्रेता यदि द्वितीये ऽह्नि ददद्भवति तदा विक्रेता मूल्यात् मूल्यमध्यतः त्रिंशांशमाप्नुयादित्याहुः। द्विगुणमिति त्रिंशत्तमभागस्य द्विगुणं पञ्चदशभागमित्यपरेषां मतम्॥ Jagannâtha III. 3, 5. ॥ २॥ ॥ ३॥

तथान्यहस्तविक्रीतं यो ऽन्यस्मै संप्रयच्छति।
सो ऽपि तद्द्विगुणं दाप्यो विनयं चैव राजनि ॥ ८ ॥*
दीयमानं न गृह्णाति क्रीतं पण्यं च यः क्रयी।
विक्रीणानस्तदन्यत्र विक्रेता नापराध्नुयात् ॥ ९ ॥*
दत्तमूल्यस्य पण्यस्य विधिरेवं प्रकीर्तितः।
अदत्ते ऽन्यत्र समयान्न विक्रेतुरतिक्रमः ॥ १० ॥*
लाभार्थे वणिजां सर्वपण्येषु क्रयविक्रयः।
स च लाभो ऽर्घमासाद्य महान्भवति वा न वा ॥ ११ ॥*
तस्माद्देशे च काले च वणिगर्घं समाश्रयेत्।
न जिह्मं च प्रवर्तेत श्रेयानेवं वणिक्पथः ॥ १२ ॥* ॥८॥

---

trodaya. ॥ ७॥ न प्रयच्छति B. β. ॥ ८ ॥ समयं L. C. y. ; समये B. β.; समयान् Vivâdachintâmaṇi, Vîramitrodaya. ॥१०॥ सदा लाभा- र्घमासाद्य Vulg. See Vivâdachintâmaṇi, Jagannâtha. ॥११॥ वणिगर्थं b. L. C. y. जिह्मे L. b. C. y.; जैह्म्ये Jagannâtha. ॥१२॥

---

अन्यत्र मूल्यसंवादं कृत्वा तद्वस्तुनस्ततो ऽन्यस्मै यस्तद्वस्तु त्यजति सो ऽपि तद्द्विगुणं वस्तु विनयं च तावन्तं दाप्य इत्यर्थः। इति रत्नाकरः। अत्र पूर्वक्रयो बलवान्। आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा। इति याज्ञवल्क्यात्। अत्र कस्मै द्विगुणं देयमित्याश्रयेण क्रीतं वस्तु न लभ्यते तस्मै इत्येवार्थो बोद्धव्यः। Jagannâtha, III. 3, 39. ॥ ८॥

मूल्यमव्यवस्थाप्य क्रीते देशकालानुसारेण व्यवस्थापको वणिक् प्रक्रमेत अनुरूपं मूल्यं प्रकल्पयेत। न जैह्म्येन कुटिलतया प्रवर्तेत। उचितमूल्यं न खण्डयेदित्यर्थ इति चण्डेश्वरः॥ Jagannâtha, III. 3, 38. ॥ १० ॥ ११॥

इति नारदीये धर्मशास्त्रे विक्रीयासंप्रदानं नामाष्टमं व्यवहारपदम्॥

स्थावरस्योदयं दाप्यो जङ्गमस्य क्रियाफलम् ॥ ४ ॥*
अर्घश्चेदपचीयेत सोदयं पण्यमावहेत् ।
स्थायिनामेष नियमो दिग्लाभो दिग्विचारिणाम् ॥ ५ ॥*
उपहन्येत वा द्रव्यं दह्येतापह्रियेत वा ।
विक्रेतुरेव सो ऽनर्थो विक्रीयासंप्रयच्छतः ॥ ६ ॥*
निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति ।
मूल्यं तु द्विगुणं दाप्यो विनयं तावदेव च ॥ ७ ॥*

---

रस्य देयं b. y. C. ॥ ४ ॥ युक्तश्चेदुपचीयेत C. y.; युक्तश्चेदपचीयेत B. b. β. L; अर्वाक् चेदपचीयेत Kalpataru; अर्घाच्चेदवहीयेत Vivâda-chintâmaṇi, Jagannâtha; अर्घश्चेदवहीयेत Vîramitrodaya. स्थानिनामेष B. b. β. y. C.; स्थायिनामेष L. and Vîramitrodaya, etc. ॥ ५ ॥ उपहार्यं यदा b.; उपहार्यें यदा y. C.; उपहार्यं न वा B. β. ॥ ६ ॥
पण्यं तु Vulg; मूल्यं तु Jagannâtha; स मूल्याद्विगुणं Vîrami-

---

...क्रिया भारवाहनादिः॥ फलं क्षीरादीति रत्नाकरः॥ Jagannâtha, III. 3, 18. ॥ ४ ॥

क्रीतं रत्नादि चेत्तेनादत्तमर्घादवहीयते न्यूनमूल्यं क्रमेण स्यात्॥ तदा मूल्यहानिसहितं क्रेत्रे देयम्। दिग्विचारिणां देशान्तरगमनशालिनां देशान्तरगमने यो लाभः स्यात्तमेव दद्यादिति वाचस्पतिमिश्रः। रत्नाकरो ऽप्येवम्॥ Jagannâtha III. 3, 19 ॥ ५ ॥

असंप्रयच्छतः अप्रार्थने ऽपि अनुशयं विना विक्रेत्रे ऽसंप्रयच्छतः राजदैवोपघातं विना उपहतं पण्यं किं वाप्रार्थने ऽसंप्रयच्छतः राजदैवाभ्यामुपहतमपि विक्रेतुरेवानर्थमुपपादयति विक्रेत्रैव देयमित्यर्थः॥ Jagannâtha, III. 3, 27. ॥ ६ ॥

विक्रीय पण्यं मूल्येन क्रेत्रे यन्न प्रदीयते।
विक्रीयासंप्रदानं तद्विवादपदमुच्यते ॥ १ ॥*
लोके ऽस्मिन्द्विविधं द्रव्यं जङ्गमं स्थावरं तथा।
क्रयविक्रयधर्मेषु सर्वं तत्पण्यमुच्यते ॥ २ ॥*
षड्विधस्तस्य तु बुधैर्दानादानविधिः स्मृतः।
गणिमं तुलिमं मेयं क्रियया रूपतः श्रिया ॥ ३ ॥*
विक्रीय पण्यं मूल्येन क्रेत्रे यो न प्रयच्छति।

विक्रेय b. C. y. मत्या for पण्यं B. β. ॥ १ ॥ स्थावरे L. ॥ २ ॥ गणितं तुलितं Vulg. See Vîramitrodaya, Jagannâtha. ॥ ३ ॥ स्थाव-

यद् द्रव्यं न दीयत इत्यन्वयः। अथवा यदिति क्रियाविशेषणमिति विक्रीयासंप्रदानं विवादपदमुच्यत इत्यर्थः। विक्रीयासंप्रदानं यस्य अथवा विक्रीयेत्यसमस्तम्। एतदेव मनुना विक्रयानुशयत्वेनाभिमतम्। Jagannâtha, III. 3, 17. ॥ १ ॥

तथा च मूल्यक्रीतमपि गवादिकं दायभागप्रकरणादौ दायादिशब्देनोल्लिख्यते क्रयविक्रयविवादे तु पण्यशब्देन। एवं च एतत्प्रकरणे यत्पण्यशब्द उल्लिख्यते तेन शब्देन यद् द्रव्ये क्रयविषयकविवाद उपस्थितस्तद् द्रव्यमेव बोधनीयमिति संकेतः कृतः ॥ Jagannâtha, III. 3, 1. ॥ २ ॥

गणिमं पूगादीति रत्नाकरः। एतच्च पूगादेर्गणनायैव क्रयविक्रयव्यवहार इत्यनुसारेण। आदिशब्देन कर्पदकचुन्दकाष्ठादेः संग्रहः। तुलिमं सुवर्णादि मेयं धान्यादीति रत्नाकरः। एतदपि धान्यादेः पाथ्यादिमानेन क्रयविक्रयव्यवहार इत्यनुसारेण। क्वचिद्धान्यमपि तुलिमं भवति। मेयं तु हस्तादिना वस्त्रादिकमित्यपरे। क्रिययेति भारवहनादिः क्रिया क्रियमाणं वृषभादीति रत्नाकरः। अङ्गनास्त्री रूपतः। वर्णविशेषात्। प्रस्तरादीत्यपरे। श्रिया दीप्त्या क्रियमाणं मुक्तादीति रत्नाकरः ॥ Jagannâtha, III. 3, 3. ॥ ३ ॥

ब्राह्मणो ऽपि निधिं लब्ध्वा क्षिप्रं राज्ञे निवेदयेत् ।
तेन दत्तं च भुञ्जीत स्तेनः स्यादनिवेदयन् ॥ ७ ॥
स्वमप्यर्थं तथा नष्टं लब्ध्वा राज्ञे निवेदयेत् ।
गृह्णीयात्तच्च तं शुद्धमशुद्धं स्यात्ततो ऽन्यथा ॥ ८ ॥

इति नारदीये धर्मशास्त्रे ऽस्वामिविक्रयो नाम सप्तमं व्यवहारपदम् ॥

---

Jagannâtha. ॥ ३ ॥ न गृहेनागमं B. b. C. तेस्य L. ॥ ४ ॥ स्वामिनो B. β. y. ॥ ५ ॥ निहृतं L. y. सर्वं b. ॥ ६ ॥

निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वापहृत्य वा।
विक्रीयते ऽसमक्षं यद्विज्ञेयो ऽस्वामिविक्रयः॥ १ ॥*
द्रव्यमस्वामिविक्रीतं प्राप्य स्वामी समाप्नुयात्।
प्रकाशविक्रये शुद्धिः क्रेतुः स्तेयं रहः क्रमात्॥ २ ॥*
अस्वाम्यनुमताद्दासादसतश्च जनाद्रहः।
हीनमूल्यमवेलायां क्रीणंस्तद्दोषभाग्भवेत्॥ ३ ॥*
न गूहेतागमं क्रेता शुद्धिस्तस्य तदागमात्।
विपर्यये तुल्यदोषः स्तेयदण्डं च सो ऽर्हति॥ ४ ॥*
विक्रेता स्वामिने ऽर्थं स्वं क्रेत्रे मूल्यं च तत्समम्।
दद्याद्दण्डं तथा राज्ञे विधिरस्वामिविक्रये॥ ५ ॥*
परेण निहितं लब्ध्वा राजन्युपहरेन्निधिम्।
राजगामी निधिः सर्वः सर्वेषां ब्राह्मणादृते॥ ६ ॥

---

विक्रीयेता° b. L. y. C. ॥१॥ तलाद्रहः b. y. C.; बलाद्रहः L.; जनाद्रहः B. β. and Vîramitrodaya, Vivâdachintâmaṇi,

---

निक्षिप्तग्रहणं याचितार्थानामुपलक्षणार्थम्। असमक्षं स्वामिन इति शेषः॥ Vîramitrodaya, p. 304. ॥ १ ॥

स्वामिना अस्वामिविक्रीतं स्वकीयं वस्तु यत्समीपे दृष्टं तस्माद् ग्राह्यम्॥ Vîramitrodaya, p. 375. ॥ २ ॥

अस्वाम्यनुमतात्स्वाम्यनुमतिहीनात्। दासग्रहणं समानन्यायत्वादस्वतन्त्राणां बालादीनामुपलक्षणार्थम्॥ Vîramitrodaya, p. 376. ॥ ३ ॥

स्तोमं विना वसित्वा तु परभूमावनिच्छतः ।
निर्गच्छंस्तृणकाष्ठानि न गृह्णीयात्कदाचन ॥२१॥*
स्तोमवाहीनि भाण्डानि पूर्णकालान्युपानयेत् ।
गृहीतुरा भवेद्भग्नं नष्टं चान्यत्र संप्लवात् ॥२२॥*

---

॥ २१ ॥ गृहीतुना b. L. C. y; गृहीतुर्न B. β. See Vîramitrodaya. ॥ २२ ॥

---

वान्तदा तृणकाष्ठादिकमपि गृह्वाङ्गं न प्राप्नोति । इत्यर्थः । गृहभाटकं च राजनगरादौ प्रसिद्धमन्यत्रापि कस्यचिद्ब्राह्मणादेर्भूमौ वसतः प्रजालोकस्य करस्वरूपं यद्यवक्रियते तदपि भाटकमेव तस्य फलतः करत्वाभावात् । षष्ठांशादेरेव करत्वादिति विभावनीयम् ॥ Jagannâtha, III. 1, 99. ॥ २० ॥ २१ ॥

स्तोमो वेतनं संप्लवो राजदैविकम् । तेन राजदैवतमन्तरेण घटितं शकटादि गृहीतुरेव समाधेयं स्यादिति ॥ Jagannâtha, III. 1, 104. ॥ २२ ॥

इति नारदीये धर्मशास्त्रे वेतनस्यानपाकर्मेति षष्ठं व्यवहारपदम् ॥

विघुष्यापहृतं चौरैर्न पालो दातुमर्हति।
यदि देशे च काले च स्वामिनश्चापि शंसति॥१६॥*
अनेन सर्वपालानां विवादः समुदाहृतः।
मृतेषु च विशुद्धिः स्याद्वालशृङ्गादिदर्शनात्॥१७॥*
शुल्कं गृहीत्वा पण्यस्त्री नेच्छन्ती द्विस्तदाप्नुयात्।
अप्रयच्छंस्तदा शुल्कमनुभूय पुमांस्त्रियम्॥१८॥*
अयोनौ वा समाक्रामेद्वहुभिर्वापि वासयेत्।
शुल्कं सोऽष्टगुणं दाप्यो विनयं तावदेव तु॥१९॥*
पराजिरे गृहं कृत्वा स्तोमं दत्त्वा वसेत्तु यः।
स तद्गृहीत्वा निर्गच्छेत्तृणकाष्ठेष्टकादिकम्॥२०॥*

---

See Vivâdachintâmaṇi, Jagannâtha. ॥ १७ ॥ त्यक्ता सर्वमघोषितम्॥ B. β. ॥२०॥ स्तोमं विना यो निवसेत्परभूमावनिश्चितम्। B. β.

---

अयोनौ मुखादौ। समाक्रामेत् मैथुनं कुर्यादात्मार्थं भाटयित्वा बहुभिः पुरुषैर्योजयेदित्यर्थः। इति चण्डेश्वरः। वेश्या शुल्कमष्टगुणमिति राजदण्डं च तथा दद्यादिति च मिश्रः। शुल्कमप्रयच्छन्नददस्वीकुर्वन् स्वीकारमप्रतिपालयन्नपि स्त्रियमनुभूय भुक्ता इत्यर्थः छलादिनेत्यर्थः। अष्टगुणमन्यपुरुषेण तादृशस्त्रियै दीयमानस्याष्टगुणमित्यर्थः॥ Jagannâtha, III, 1, 95—97. ॥ १८ ॥ १९ ॥

स्तोमं वासमूल्यमिति रत्नाकरः। भाटकमिति यावत्। परभूमौ वास्तुभूतायां स्वायासेन स्वधनव्ययेन गृहं कृत्वा यो वसति स यदि भाटकं ददाति तदा ततः प्रयाणकाले स्वकीयकाष्ठभित्तिशून्येष्टकादिकं प्राप्नोति। भित्तिमपि युक्तत्वाद्विक्रेतुं शक्नोति। यदि तु स्तोमं कथंचिदपि न दत्त-

भाण्डं व्यसनमागच्छेद्यदि वाहकदोषतः।
स दाप्यो यत्प्रणष्टं स्याद्दैवराजकृताहते ॥ ९ ॥*
गवां शताद्वत्सतरी धेनुः स्याद्द्विशताद्भृतिः।
प्रति संवत्सरं गोपे संदोहश्चाष्टमे ऽहनि ॥१०॥*
उपानयति या गोपः प्रत्यहं रजनीक्षये।
चीर्णाः पीताश्च ता गोपः सायाह्ने प्रत्युपानयेत् ॥११॥*
सा चेद्गौर्व्यसनं गच्छेद्व्यायच्छेत्तत्र शक्तितः।
अशक्तस्तूर्णमागम्य स्वामिने तन्निवेदयेत् ॥१२॥*
अव्यायच्छन्नविक्रोशन्स्वामिने चानिवेदयन्।
वोढुमर्हति गोपस्तां विनयं चापि राजनि ॥१३॥*
नष्टविनष्टं कृमिभिः श्वहतं विषमे मृतम्।
हीनं पुरुषकारेण पालयैव निपातयेत् ॥१४॥*
अजाविके तथारुद्धे वृकैः पाले त्वनायति।
यां प्रसह्य वृको हन्यात्पाले तत्किल्बिषं भवेत् ॥१५॥*

---

Vîramitrodaya, etc. ॥ १० ॥ अप्रज्ञां प्रतिपन्नां तु Vulg. See Vîramitrodaya, etc. ॥ १२ ॥ हन्यान्न पालस्तत्र किल्बिषी॥ Vulg. See Manu VIII. 231. ॥ १५ ॥ स्यात्पालस्य स्वामिदर्शनात्॥ Vulg.

---

भाण्डं भृतकव्यापार्यमाणं द्रव्यम्। व्यसनं विघटनं वाहकदोषतः भृतकजनदोषतः। इति रत्नाकरः। तथा चेदं वचनं न केवलं वाहकपरं किंतु सर्वभृतकपरमिति भावः ॥ Jagannâtha III. 1, 82. ॥ ९ ॥

भृतानां वेतनस्योक्तो दानादानविधिक्रमः।
वेतनस्यानपाकर्म तद्विवादपदं स्मृतम् ॥ १ ॥*
भृताय वेतनं दद्यात्कर्मस्वामी यथाक्रमम्।
आदौ मध्ये ऽवसाने वा कर्मणो यद्विनिश्चितम् ॥ २ ॥*
भृतावनिश्चितायां तु दशभागं समाप्नुयुः।
लाभगोबीजसस्यानां वणिग्गोपकृषीबलाः ॥ ३ ॥*
क्रियोपकरणं चैषां क्रियां यत्प्रत्युदाहृतम्।
तत्स्वभावेन कुर्वीत न जिह्मेन समाचरेत् ॥ ४ ॥*
कर्माकुर्वन्प्रतिश्रुत्य कार्यो दत्त्वा भृतिं बलात्।
भृतिं गृहीत्वाकुर्वाणो द्विगुणां भृतिमावहेत् ॥ ५ ॥*
भृतिषड्भागमादद्यात्पण्यं युग्यकृतं त्यजन्।
अददत्कारयित्वा तु सोदयां भृतिमावहेत् ॥ ६ ॥*
अनयन्भाटयित्वा तु भाण्डवान्यानवाहने।
दाप्यो भृतिचतुर्भागं सममर्धपथे त्यजन् ॥ ७ ॥*
अनयन्वाहको ऽप्येवं भृतिहानिमवाप्नुयात्।
द्विगुणां तु भृतिं दाप्यः प्रस्थाने विघ्नमाचरन् ॥ ८ ॥*

---

वणिग्भोगः Vulg. See Vîramitrodaya, etc. ॥ ३ ॥ गृहीत्वाकर्माणो C. ॥ ५ ॥ अनयंश्चापि तद्देशं भृतिहानिमवाप्नुयात् ॥ Vulg. See Jagannâtha. ॥ ६ ॥ अददत्कारयित्वा तु दण्डधान्यादिकं धनम्। Vulg. See Jagannâtha. ॥ ७ ॥ द्विगुणा (विंशता) भृतिः। Vulg. See

---

भाटयित्वा भाटकेन गृहीत्वा। भाण्डवाग्स्वामी। यानवाहने अश्वादिवृषादिरूपे भाटको भाटकगृहीता इति चण्डेश्वरः ॥ Jagannâtha, III, 1, 89. ॥ ७ ॥ ८ ॥

स्वदासमिच्छेद्यः कर्तुमदासं प्रीतमानसः ।
स्कन्धादादाय तस्यासौ भिंद्यात्कुम्भं सहाम्भसा ॥४२॥*
साक्षताभिः सपुष्पाभिर्मूर्धन्यद्भिरवाकिरेत् ।
अदास इति चोक्त्वा त्रिः प्राङ्मुखं तमथोत्सृजेत् ॥४३॥*

---

सर्वदासकर्मनिवृत्तिः शब्दबलादवगीयते । पुष्पाक्षतयुक्तजलपातनं च मङ्गलं दास्यमोक्षणाङ्गं शाब्दीयम् । अयमदास इति त्रिरुक्तिरपि दार्ढ्यार्था । एवं प्राङ्मुखत्वेन विसर्जनमपि मङ्गलं शास्त्रीयमङ्गलम् । ततः प्रभृति स स्वाम्यनुग्रहपालित इति वक्तव्य इति रत्नाकरः ॥ Jagannâtha, III. 1, 50, ॥ ४२ ॥ ४३ ॥

इति नारदीये धर्मशास्त्रे टीकासहिते ऽशुश्रूषाभ्युपेत्य नाम पञ्चमं व्यवहारपदं समाप्तम् ॥

विक्रीणीते य आत्मानं स्वतन्त्रः सन्नराधमः।
स जघन्यतरस्तेषां नैव दास्यात्प्रमुच्यते ॥३७॥*
चौरापहृतविक्रीता ये च दासीकृता बलात्।
राज्ञा मोक्षयितव्यास्ते दासत्वं तेषु नेष्यते ॥३८॥*
वर्णानां प्रातिलोम्येन दासत्वं न विधीयते।
स्वधर्मत्यागिनो ऽन्यत्र दारवद्दासता मता ॥३९॥*
तवाहमिति चात्मानं यो ऽस्वतन्त्रः प्रयच्छति।
न स तं प्राप्नुयात्कामं पूर्वस्वामी लभेत तम् ॥४०॥*
अधनास्त्रय एवोक्ता भार्या दासस्तथा सुतः।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम् ॥४१॥*

---

Vulg. See २८ ॥ ३६ ॥ तेषां यत्किंचन द्रव्यं तत्स्वद्रव्यं प्रकीर्तितम् ॥
b. L. C. y. See Manu VIII, 416. ॥ ४१ ॥

---

स्यागः। तदनन्तरं स्वामिकर्मकरत्वं निवर्तेत इत्यर्थः। इति विवादचिन्तामणिः ॥ Jagannâtha, III. 1, 48. ॥ ३६ ॥

एतच्च स्वामिप्रसादं विना दासस्य स्वयं गमने बोध्यम्। अस्वतन्त्रः दासः प्रयच्छति अन्यं पुरुषं दास्याय गच्छति। तत्र तं दासं पूर्वस्वामी एव लभेत परस्वामी तु तं परिगृह्णन्नपि न प्राप्नोति। स्वामिप्रसादे तु विसृष्टस्य दास्यमोक्षो भवतीति वक्तव्यम् ॥ Jagannâtha, III. 1, 39. ॥ ४० ॥

प्रीतमानसः संतुष्टः। एतदुपलक्षणम्। स्वामिप्राणप्रदादेर्दास्यमोक्षणोद्यतस्य तत्रान्यप्रकारदास्यमोक्षणाकथनात्। अथवा स्वामिप्राणप्रदादेर्दास्यमोक्षणमपि प्रीतमानसेनैव स्वामिना कर्तव्यमिति भावः। स्कन्धादादायेति एतेन तस्य जनवहननिवृत्तिः सूचिता। जनवहननिवृत्त्यैव

आहितो ऽपि धनं दत्त्वा स्वामी यद्येनमुद्धरेत् ।
अथोपगमयेदेनं स विक्रीतादनन्तरः ॥३२॥*
ऋणं तु सोदयं दत्त्वा ऋणी दास्यात्प्रमुच्यते ।
कृतकालव्यपगमात्कृतको ऽपि विमुच्यते ॥३३॥*
तवाहमित्युपगतो ध्वजप्राप्तः पणार्जितः ।
प्रतिशीर्षप्रदानेन मुच्यते तुल्यकर्मणा ॥३४॥*
राज्ञामेव तु दासः स्यात्प्रव्रज्यावसितो नरः ।
न तस्य विप्रमोक्षो ऽस्ति न विशुद्धिः कथंचन ॥*॥३५॥
भक्तस्योपेक्षणात्सद्यो भक्तदासः प्रमुच्यते ।
निग्रहाद्वडवानां तु मुच्यते वडवाहृतः ॥३६॥*

---

See Mitâksharâ, etc. ॥ ३१ ॥ यदोपगमयेदेनं b. L. C. y. See Vivâdachintâmaṇi, etc. ॥३२॥ पणाञ्जितः b. C. ॥ ३४ ॥ वडवाभृतः

---

स्वामी यस्य दासः स पिता वा स्वयमेव वा यद्येनं दासमुद्धरते तदा आहितो ऽपि दासो मुच्यत इत्यर्थः। अत्र अथेत्यादि यस्मिन्नाहितो दासत्वमेव यदि ग्राहयेत्तदा क्रीतादनन्तरः क्रीतादविशिष्टो भवतीति रत्नाकरः। धनरूपमूल्येन स्वामिना विक्रीतत्वात्क्रीत एव भवतीति। आत्मविक्रेता च तत्त्वतः क्रीत एवेति ततश्च अनयोः स्वामिप्रसादतत्प्राणरक्षाभ्यां विना न दास्यमोक्ष इति भावः ॥ Jagannâtha, III. 1, 45. ॥ ३२ ॥

भक्तार्थं यः कर्मकरः सो ऽपि तत्त्यागान्मुच्यत इत्यर्थः। इति मिश्राः। ...निग्रहात् आच्छेदात् वडवा दासी इति रत्नाकरः। दासेन सह संभोगनिरोधादित्यर्थः। इति मिताक्षरा। वडवा दासी तस्या निग्रह-

गृहे जातस्तथा क्रीतो लब्धो दायादुपागतः।
अनाकालभृतो लोके आहितः स्वामिना च यः॥२६॥*
मोक्षितो महतश्चर्णात्प्राप्तो युद्धात्पणे जितः।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः॥२७॥*
भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः।
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः॥२८॥*
तत्र पूर्वश्चतुर्वर्गो दासत्वान्न विमुच्यते।
प्रसादात्स्वामिनोऽन्यत्र दास्यमेषां क्रमागतम्॥२९॥*
यश्चैषां स्वामिनं कश्चिन्मोक्षयेत्प्राणसंशयात्।
दासत्वात्स विमुच्येत पुत्रभागं लभेत च॥३०॥*
अनाकालभृतो दास्यान्मुच्यते गोयुगं ददत्।
संभक्षितं यद्दुर्भिक्षे न तच्छुध्येत कर्मणा॥३१॥*

---

See Mitâksharâ, etc. ॥ ३० ॥ संभक्षितं तु यद्भैक्षं B. β. b. C. y.

---

पणे जितः यद्यस्मिन्विवादे पराजितो भवामिं तदा तव दासो भवामीति प्रतिज्ञावशात्पराजितः। तवाहमित्युपगतः तवाहं दास इति कृताभ्युपगमः धनादिलोभात्। प्रव्रज्याच्युतः। कृतः कृतकालः। एतावन्तं तवाहं दास इति कृतसमयः। इति यावत्। विक्रेता चात्मन इति। यस्त्वात्मानं विक्रीणीते। इति पञ्चदशप्रकारा दासा नारदेनोक्ताः। इति विज्ञानेश्वरचण्डेश्वर-वाचस्पतिभवदेवानुसारेण व्याख्यातम्॥ Jagannâtha, III. 1, 29. ॥ २६ ॥ २७ ॥ २८ ॥

अर्थेष्वधिकृतो यः स्यात्कुटुम्बस्य तथोपरि।
सोऽपि कर्मकरो ज्ञेयः स च कौटुम्बिकः स्मृतः ॥२४॥*
शुभकर्मकरास्त्वेते चत्वारः समुदाहृताः।
जघन्यकर्मभाजस्तु शेषा दासास्त्रिपञ्चकाः ॥२५॥*

---

स्यादेषां C. y. and Vivâdachintâmaṇi, etc. कर्मश्रिया b. β. y. ॥ २२ ॥ वडवाभृतः B. β; च उदाहृतः C. y. ॥ २८ ॥ ये वैषां Vulg.

---

अर्थेषु कार्येषु अनयोर्द्वयोरप्यधिकर्मकरकौटुम्बिकसंज्ञं व्यवहाराय। इति रत्नाकरः। तथा च राजादेः प्रजापालनादिरूपेषु तत्करग्रहणादिकार्येषु युद्धोपयुक्तसेनारक्षाप्रतिपालनादिरूपेषु वा इतरेषामपि भूमिगतसस्यानयनादिक्रीतद्रव्यसंग्रहादिष्वपि अधिकृत इत्यर्थः। एवं वादे नियुक्तो ऽपि बोध्यः। कुटुम्बस्योपरि। अधिकृतस्तु सुगम इति तेन नोक्तः। कुटुम्बभक्तवसनसमवधानादिषु यो ऽधिकृतः। सो ऽपि कर्मकरो ज्ञेयः॥ Jagannâtha, III. 1,25 ॥ २४ ॥

चत्वारः शिष्यान्तेवासिभृताधिकर्मकृतः। कर्मकृतः शिष्यादिचतुष्टयस्येति रत्नाकरः। तथा च शिष्यादिना गृहशोधनादिकं न कारयितव्यमितिभावः। भृतको ऽपि गृहशोधनादिकं न कुर्यादिति शब्दतो ऽवगम्यते ॥ Jagannâtha, III. 1,26. ॥ २५ ॥

गृहे दास्यां जातो गृहजातः। क्रीतो मूल्येन। लब्धः प्रतिग्रहादिना। दायादुपागतः पित्रादिदासः। क्रमेण पुत्रादिप्राप्तः। अनाकालभृतः आ सम्यक् कालः सुभिक्षकालः। तद्विपरीतो ऽनाकालः दुर्भिक्षकालः तदानीं भृतः अन्नं दत्त्वा यो रक्षितप्राणः। आहितः स्वामिनाधानग्रहणार्थं धनिके आधीकृतः स्वदासः तद्दिनावधि धनिकस्य दासः। मोक्षितो महतस्त्वर्णात् महतो धनात् धनिकसकाशे मोक्षितो दासत्वमभ्युपगतः। युद्धप्राप्तः समरे प्राणसंशये आसन्नः दासस्वीकारेण रक्षितप्राणः विजेत्रा प्राप्तः।

वेतनं वा यदि कृतं ज्ञात्वा शिष्यस्य कौशलम्।
अन्तेवासी समादद्यान्न चान्यस्य गृहे वसेत् ॥२१॥

---

भृतकस्त्रिविधो ज्ञेय उत्तमो मध्यमो ऽधमः।
शक्तिभक्त्यनुरूपा स्यादेषां कर्माश्रया भृतिः ॥२२॥*
उत्तमस्त्वायुधीयो ऽत्र मध्यमस्तु कृषीवलः।
अधमो भारवाहः स्यादित्येष त्रिविधो भृतः ॥२३॥*

---

तस्यानुमत्यैनम° A. ॥ २० ॥ २१ om. Vulg. स्यादेषा B. b. β. L;

---

अथ शिष्यस्य विज्ञानकौशलं दृष्ट्वा गुरुणा तस्य किंचिद्वेतनं जल्पितं भवति। ततः शिष्यस्तदादद्यात्। न चान्यगृहे वसेदिति। इत्यन्तेवासिवृत्तम्। इति नारदीयधर्मशास्त्रे कल्याणभट्टकृतभाष्ये अन्तेवासिप्रकरणं समाप्तम्॥ २१ ॥

---

भक्तिरुपचारः। कर्माश्रया कर्मनिबन्धना। इति रत्नाकरः। तथा च यस्य भृतकस्य यादृशं वेतनं तदनुरूपेण कर्मणो निष्पत्त्यनुसारेण। इति यावद्भृतिर्दातव्या। यथा को ऽपि स्वपराक्रमेण शतं परसेना वारयति। कोऽपि एकां परसेना वारयति। तत्र तयोः शक्त्यनुरूपा भृतिः। उपचारः कर्मगतविशेषः। स च स्वयमेवोक्तः। उत्तमस्त्वायुधीयो ऽत्र। इति यद्वा आयुधीयानामपि प्रधानाप्रधानकर्मविवेचनया इति यथाग्रेयोधी पश्चाद्योधीत्यादि। एवं गृहप्रच्छादनकर्त्ता वृणादिसमवधानकर्त्ता च इत्यादि। एषां कर्मानुरूपेण भृतिदानम्॥ Jagannâtha's Vivâdabhangârṇava, III. 1, 23 ॥ २२ ॥ २३ ॥

स्वशिल्पमिच्छन्नाहर्तुं बान्धवानामनुज्ञया।
आचार्यस्य वसेदन्ते कालं कृत्वा सुनिश्चितम्॥१६॥*
आचार्यः शिक्षयेदेनं स्वगृहे दत्तभोजनम्।
न चान्यत्कारयेत्कर्म पुत्रवच्चैनमाचरेत् ॥१७॥*
शिक्षयन्तमदुष्टं य आचार्यं संपरित्यजेत्।
बलाद्वासयितव्यः स्याद्वधबन्धौ च सो ऽर्हति॥१८॥*
शिक्षितो ऽपि कृतं कालमन्तेवासी समाप्नुयात्।
तत्र कर्म च यत्कुर्यादाचार्यस्यैव तत्फलम् ॥१९॥*
गृहीतशिल्पः समये कृत्वाचार्यप्रदक्षिणाम्।
शक्तितश्चानुमान्यैनमन्तेवासी निवर्तते ॥ २० ॥*

---

A. inserts a number of spurious verses treating of persons unfit to be instructed. गृहीतशिल्पसमये...शिक्षि-

---

यश्च शिल्पादिविज्ञानविद्यार्थी भवति स कालं निश्चितमवधिं कृत्वा... गुरुगृहे वसेदिति ॥ १६ ॥

आचार्यश्च तेन अन्तेवासिना तदेव शिल्पकर्म कारयेन्नान्यत्स्वगृहे दत्तभोजनं शिक्षयेत्। पुत्रवत्पश्येन्न कर्मकरवत् ॥ १७ ॥

यस्तु शिष्यो महापातकाद्यदुष्टं गुरुं शिक्षयन्तं परित्यजेदसौ तेन गुरुणा बलाद्वासयितव्यः। वधबन्धौ च सो ऽर्हति ॥ १८ ॥

...गुरोरेव फलं न शिष्यस्य किंचित्॥१९॥

शिक्षितश्च शिष्यः संपूरितशिल्पकालसमयस्तं गुरुमनुज्ञां वाच्य प्रदक्षिणीकृत्य च गुरुगृहान्निवर्तते स्वगृहं प्रेयादिति ॥ २० ॥

स्रोतोवहेव सर्वत्र विद्या निम्नानुसारिणी ।
निम्नवर्ती भवेत्तस्मात्तदर्थी सर्वदा गुरोः ॥ १२ ॥
अनुशास्यश्च गुरुणा न चेदनुविधीयते ।
अविधिनाथवा बद्धा रज्ज्वा वेणुदलेन वा ॥१३॥*॥
भृशं न ताडयेदेनं नोत्तमाङ्गे न वक्षसि ।
अनुशास्याथ विश्वास्यः शास्यो राज्ञान्यथा गुरुः॥१४॥
समावृत्तश्च गुरवे प्रदाय गुरुदक्षिणाम् ।
प्रतीयात्स्वगृहानेषा शिष्यवृत्तिरुदाहृता ॥१५॥*

---

Vulg. कलके A. ॥११॥ १२ om. Vulg. अध्ययनार्थं शास्यः (शास्त्रं y) स्याद्रज्ज्वा Vulg. ॥१३॥ अनुशास्य च विश्वास्य Vulg. ॥१४॥ वृत्वा A. ॥१६॥ हि य आचार्यं परित्यजेत् Vulg. ॥१८॥ In the gloss on १८,

---

स्रोतोवहा नदी यथा सा निम्नानुसारिणी तथा विद्यापि । तस्माद्यो विद्यार्थी तेन सर्वदा प्रणतेन भवितव्यमिति ॥ १२ ॥

यदि गुरोरादेशकारी न भवति । ततो गुरुणानुशास्यः तिरस्करणीयः । बद्धा रज्ज्वा वंशावयवेन शासनीयः । अविधिनेति निष्ठुरमित्यर्थः ॥ १३ ॥

कुपितेनापि गुरुणा न भृशं ताड्यः शिष्यः । नोत्तमाङ्गे ताड्यो न वक्षसि । ताडितोऽप्यनन्तरमुच्छ्रासनीयः । यदा पुनरतिक्रोधादधिकं ताडनं गुरुः करोति । तदा स गुरुः शिष्येण विदितो राज्ञा शास्यो दण्डनीय इत्यर्थः ॥ १४ ॥

यदा च शिष्यः समावृत्तो भवति समाप्तविद्यः । तदा गुरवे दक्षिणां दत्त्वा गृहं प्रतीयादिति ॥ १५ ॥

गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम्।
गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् ॥ ६ ॥*
इष्टतः स्वामिनश्चाङ्गैरुपस्थानमथो ऽन्ततः।
अशुभं कर्म विज्ञेयं शुभमन्यदतः परम् ॥ ७॥*
आ विद्याग्रहणाच्छिष्यः शुश्रूषेत्प्रयतो गुरुम्।
तद्वृत्तिर्गुरुदारेषु गुरुपुत्रे तथैव च ॥ ८ ॥*
ब्रह्मचारी चरेद्भैक्षमधःशाय्यनलंकृतः।
जघन्यशायी सर्वेषां पूर्वोत्थायी गुरोर्गृहे ॥ ९ ॥*
नासंदिष्टः प्रतिष्ठेत तिष्ठेद्वा गुरुणा क्वचित्।
संदिष्टः प्रतिकुर्वीत शक्तश्चेदविचारयन् ॥ १० ॥*
यथाकालमधीयीत यावन्न विमना गुरुः।
आसीनो ऽधो गुरोः पार्श्वे फलके वा समाहितः॥ ११॥

---

क्षतः। C; अधःशाय्यनहंकृतः। B. β. C. L. y. ॥ ९ ॥ नासंदिग्धः B. β. C. A. कर्म कुर्वीत Vulg. ॥ १० ॥ आसीताधो गुरोः कूर्चे

---

निगदव्याख्यातौ श्लोकौ। अशुभकर्मभेदः ॥ ६ ॥ ७ ॥

यावद्विद्याग्रहणसमाप्तिस्तावच्छिष्यो गुरुं शुश्रूषयेत्। गुरुपत्नीं गुरुपुत्रं च तद्वदेवेति ॥ ८ ॥

जघन्यशायी पश्चाच्छायी। शेषं प्रसिद्धम् ॥ ९ ॥

अनादिष्टो न गच्छेन्न तिष्ठेत्। यत्रादिष्टस्तदविचारयन्। यदि शक्तः। नो चेत्स्वरूपं निवेदयेत् ॥ १० ॥

स्पष्टार्थो ऽध्ययनविधिः ॥ ११ ॥

अभ्युपेत्य च शुश्रूषां यस्तां न प्रतिपद्यते।
अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यते॥ १ ॥*
शुश्रूषकः पञ्चविधः शास्त्रे दृष्टो मनीषिभिः।
चतुर्विधः कर्मकरस्तेषां दासास्त्रिपञ्चकाः॥ २ ॥*
शिष्यान्तेवासिभृतकाश्चतुर्थस्त्वधिकर्मकृत्।
एते कर्मकरा ज्ञेया दासास्तु गृहजादयः॥ ३ ॥*
सामान्यमस्वतन्त्रत्वमेषामाहुर्मनीषिणः।
जातिकर्मकृतश्चोक्तो विशेषो वृत्तिरेव च॥ ४ ॥*
कर्मापि द्विविधं ज्ञेयमशुभं शुभमेव च।
अशुभं दासकर्मोक्तं शुभं कर्मकृतां स्मृतम्॥ ५ ॥*

---

शिष्यकृतं स्मृतम्॥ Vulg. ॥ ५ ॥ अथोन्नति। A. ॥ ७ ॥ अधःपाल्यनर्हं-

---

अत्राशुश्रूषाभ्युपेत्य व्यवहारपदस्य नाम लक्षणामात्रमिदमुद्दिष्टमधिकारश्लोके ऽस्मिन्निति॥ १ ॥

अत्र शुश्रूषकः पञ्चप्रकारो दृष्टः। चतुःप्रकारः कर्मकरः। पञ्चदशप्रकारो दास इति॥ २ ॥

अत्र शिष्यश्चान्तेवासी च भृतकश्चाधिकर्मकृच्चैते चत्वारो ऽपि कर्मकरा उक्ताः। ये पुनः पञ्चदश दासास्तान्गृहदासीजातमग्रे कृत्वायतः सविस्तरं वक्ष्यति॥ ३ ॥

येषां च शुश्रूषककर्मकरदासानां सर्वेषामपि अस्वतन्त्रत्वं सामान्यं यस्तु विशेषः स जातिवशादेषां वृत्तिश्च कर्मानुसारिणी। इति शुश्रूषकभेदः॥४॥

कर्म शुभाशुभतया द्विविधं दृष्टा तत्र शुभं कर्मकराणामशुभं दासानामिति॥ ५ ॥

गृह्णात्यदत्तं यो लोभाद्यश्चादेयं प्रयच्छति ।
अदेयदायको दंड्यस्तथादत्तप्रतीच्छकः ॥ १२ ॥*

---

ह्यधर्मेण तद्विनाशितुमुद्यतः । ईदृशे कार्ये वा धर्मसंहिते दत्तमदत्तं षोड़शम् ६ ॥ १० ॥ ११ ॥

अत्रैवमेतत्षोड़शप्रकारमपि दत्तमदत्तमुक्तम् । तद्यो लोभात्प्रतिगृह्णाति । यश्चाष्टप्रकारमप्यदेयं प्रच्छयति । एतौ द्वावपि अदेयदायको अदत्तप्रतीच्छको राज्ञा दण्डगाविति । इति नारदीयसंहितायाः कल्याणविवरणे दत्ताप्रदानिकं नाम व्यवहारपदं चतुर्थं चतुर्भेदम् । इदानीं शुश्रूषाभ्युपगमो नवभेद उच्यते ॥ १२ ॥

**अपात्रे पात्रमित्युक्ते कार्ये वा धर्मसंहिते।**
**यद्दत्तं स्यादविज्ञानाददत्तं तदपि स्मृतम्॥ ११॥***

---

Vulg. ॥ ९ ॥ ममेदं Vulg. ॥ १० ॥ स्यादवज्ञानाद् Vulg. ॥ ११ ॥

---

इत्युक्ते ऽपि क्रोधद्वेषदत्तमदत्तमिति विज्ञेयम्। एतद्द्वितीयम्। तथा अत्यन्तोत्कमरणाच्छोकार्तो वदति। अहं वनं यास्याम्यद्यैव स्वगृहं तु मया ब्राह्मणेभ्यो दत्तमिति। एवत्तृतीयं ज्ञेयम्। तथा रुजान्वितः संनिपाततो वदति। ब्राह्मण मया तव सुवर्णशतं दत्तम्। एतद्रुजान्वितदत्तमदत्तं चतुर्थम्। तथा व्यवहारको यः सभ्यं वदति। यदि मम जयं ददासि ततो ऽहं पणशतं दास्यामीत्येतदुत्कोचप्रतिश्रुतं दत्तमप्यदत्तं पञ्चमम्। तथा हास्येन यद्दत्तं तत्परिहासदत्तमपि अदत्तं षष्ठम्। तथा यस्य कामुकस्य चूतमञ्जरी नाम वेश्या प्राणप्रियतरा...त्रिंशद्योजनस्थितठक्कुरस्य समर्पिता। तं च विरहाग्निदीप्तं कश्चिदागत्य वदति। यद्यहं तव चूतमञ्जरीं दर्शयामि ततः किं ममाङ्गुलीयकं ददासि। स च वदति। अवश्यं प्रयच्छामि। अयं च तव प्रतिभूः। इति प्रच्छन्नां प्रकटीकृत्य चूतवृक्षसत्का मञ्जरी दर्शिता। इति व्यत्यासच्छलयोगतो दत्तमदत्तं सप्तमम्। व्यत्यासः व्यपदेशः। तत्सहितं छलं व्यत्यासच्छलमिति। तथा बालेन दत्तमदत्तम्। तथा मूढेन दत्तं नवमम्। तथा अस्वतन्त्रेण दत्तं दशममदत्तम्। तथा देशको नदीपूरणीयमान आर्तो यद्वदति। यो मां म्रियमाणं रक्षयति तस्याहं सुवर्णशतं दास्यामीति प्रतिश्रुते ऽपि तेनार्तेन दत्तमदत्तमेकादशम्। सुरामत्तेनापवर्जितं दत्तं परित्यक्तमदत्तं द्वादशम्। उन्मत्तेन सग्रहेण अपवर्जितं दत्तमदत्तं त्रयोदशम्। तथा कर्ता ममायं कर्मेति किंचिदनागतमेव समर्पितम्... एतदपि प्रतिलाभेच्छया दत्तं चतुर्दशम्। तथा शूद्रस्य यज्ञोपवीतं दृष्ट्वा अज्ञानाद् ब्राह्मणबुद्ध्या दानं दत्तमेतदपात्रमित्युक्ते दत्तमदत्तं पञ्चदशम्। तथा देवार्चकसुवर्णमुखकोशदेशोपशोभार्थं द्रव्यं यद्दत्तम्। यावता द्यूतवेश्या-

यस्य त्रैवार्षिकं वित्तं पर्याप्तं भृत्यवृत्तये ।
अधिकं वापि विद्येत स सोमं पातुमर्हति ॥ ७ ॥
पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात्प्रत्युपकारतः ।
स्त्रीभक्त्यनुग्रहार्थं च दत्तं सप्तविधं स्मृतम् ॥ ८ ॥*
अदत्तं तु भयक्रोधद्वेषशोकरुगन्वितैः ।
तथोत्कोचपरिहासव्यत्यासच्छलयोगतः ॥ ९ ॥*
बालमूढास्वतन्त्रार्तमत्तोन्मत्तापवर्जितम् ।
कर्ता ममायं कर्मेति प्रतिलाभेच्छया च यत् ॥१०॥*

---

तद्देयमविहिंस्यान्यन्यान्यथ न्यायं समाप्नुयात् ॥ Vulg.; तद्देयं सुहृदन्यस्मात्कुटुम्बी दोषमाप्नुयात् ॥ A. See Vîramitr. ॥ ६ ॥ ७ om. Vulg. See Manu XI. 7. स्त्रीशुल्का॰ Vulg. ॥ ८ ॥ ॰क्रोधशोकावेग॰

---

दातव्यम्। एकविधमेव दृष्टम्। यत्पुनर्दीयमानं कुटुम्बपीडाकारि तद्दत्त्वा दोषमाप्नुयान्न पुण्यमिति ॥ ६ ॥

एतन्न कुटुम्बभरणवित्तप्रमाणमुक्तम्। यस्याधिकमस्ति स सोमपानं यज्ञत्वं स्वयं कर्तुमर्हति विप्र इति ॥ ७ ॥

एतेषु सप्तस्वप्यविरुद्धस्थानेषु यद्दत्तं तदेव दत्तमित्युच्यते। शेषं पुनः षोडशविधमदत्तं विज्ञेयम्। तदुच्यते ॥ ८ ॥

दुष्टेन साधुरटव्यां प्राप्तो ऽभिहितः। द्रम्माणां शतं ददासि ततो जीवसि अन्यथा म्रियसे। सो ऽपि भयाद्ददाति। दास्यामीत्येतद्भयप्रतिश्रुतमदत्तमिति विज्ञेयम्। एतदेकम्। तथा गृहस्थो दूरदेशागतः सहसैव पत्या आसने प्रतिपादिते क्रोधाद् गृहोपरि द्वेषे च समुत्पन्ने वदति। ब्राह्मण अस्मदीयगृहे किंचिदासनशयनीयादिकं च पश्यसि तत्सर्वं मया तव दत्तम्।

दत्त्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति ।
दत्ताप्रदानिकं नाम तद्विवादपदं स्मृतम् ॥ १ ॥*
अदेयमथ देयं च दत्तं चादत्तमेव च ।
व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्विधः ॥ २ ॥*
तत्रेहाष्टावदेयानि देयमेकविधं स्मृतम् ।
दत्तं सप्तविधं ज्ञेयमदत्तं षोडशात्मकम् ॥ ३ ॥*
अन्वाहितं याचितकमाधिः साधारणं च यत् ।
निक्षेपः पुत्रदारं च सर्वस्वं चान्वये सति ॥ ४ ॥*
आपत्स्वपि हि कष्टासु वर्तमानेन देहिना ।
अदेयान्याहुराचार्या यच्चान्यस्मै प्रतिश्रुतम् ॥ ५ ॥*
कुटुम्बभरणाद् द्रव्यं यत्किंचिदतिरिच्यते ।
तद्देयमपहृत्यान्यत्कुटुम्बी दोषमाप्नुयात् ॥ ६ ॥*

---

सुबोधाधिकारः श्लोको ऽयम् ॥ १ ॥

देयं ज्ञेयं दानविषये अदेयं च दत्तं ज्ञेयं कीदृशमदत्तं चेत्ययं दानमार्गश्चतुर्विधो ऽपि व्यवहारे विज्ञेयः ॥ २ ॥

तत्राष्टप्रकारमदेयम् । देयमेकप्रकारमेव । सप्तप्रकारं दत्तम् । अदत्तं षोडशप्रकारम् । एतानि प्रति पदमुच्यन्ते ॥ ३ ॥

अत्र परस्य सामान्यकार्यकरणमात्रं किंचिद्वस्तु समर्प्य अतिसविशेषकार्यकरणाद्धमवस्तु ततः समानीयते । अनु पश्चात् । अन्वाहितमेतदादौ कृत्वा । अन्यत्सुबोधं सर्वम् । एतान्यष्टावदेयानि दत्तान्यपि चलन्ति ॥ ४ ॥

कुटुम्बे कुटुम्बिनावश्यमेव भरणीयं तस्माद् व्ययाद्यत्किंचिदतिरिच्यते तदेव

सदा श्रोत्रियवर्ज्याणि शुल्कान्याहुः प्रजानता।
गृहोपयोगि यच्चैषां न तु वाणिज्यकर्मणि ॥१४॥
प्रतिग्रहो द्विजातीनां धनं रङ्गोपजीविनाम्।
स्कन्धवाह्यं च यद् द्रव्यं न तच्छुल्कं प्रदापयेत् ॥१५॥
कश्चिच्चेत्संचरन्देशान्प्रेयादाभ्यागतो वणिक्।
राजास्य भाण्डं रक्षेत यावद्दायाददर्शनम् ॥१६॥*
दायादे ऽसति बन्धुभ्यो ज्ञातिभ्यो वा समर्पयेत्।
तदभावे सुगुप्तं तद्धारयेद्दशतीः समाः ॥१७॥*
अस्वामिकमदायादं दशवर्षस्थितं ततः।
राजा तदात्मसात्कुर्यादेवं धर्मो न हीयते ॥१८॥*

---

क्रयविक्रये कुर्वतः। तृतीयं भाण्डपरिमाणं मिथ्या जनस्य कथयतः। एतेष्वपराधेषु पतितो वणिक् शुल्काष्टगुणमत्ययं दण्डं दद्यादिति ॥ १३ ॥

अत्र श्रोत्रियशब्देन ब्राह्मणः परिगृहीतः ब्राह्मणस्य यत्किमपि गृहोपयोगि द्रव्यं भवति तद्वर्जं राज्ञां शुल्कम्। अथ सो ऽपि वाणिज्यं कुर्वन्किंनयत्यानयति वा ततः शुल्कं ददाति ॥ १४ ॥

ब्राह्मणस्य प्रभूतमपि यत् प्रतिग्रहधनं। तथा रङ्गोपजीविनामपि नटगायतादीनाम्। तथा च सर्वजनसामान्यमपि स्कन्धवाह्यं यत्किमपि वाहनारूढमेतत्त्रिविधमपि द्रव्यं राजा शुल्कं न दापयेत् ॥ १५ ॥

इति संभूयसमुत्थाने शौल्किकभेदस्तृतीयः। समाप्तं चैतत्संभूयसमुत्थानं तृतीयं व्यवहारपदम्। इदानीं चतुर्भेदं दत्तस्यादानं नाम चतुर्थं व्यवहारपदं भविष्यति ॥ १६ ॥ १७ ॥ १८ ॥

ऋत्विक् तु त्रिविधो दृष्टः पूर्वजुष्टः स्वयं वृतः।
यदृच्छया च यः कुर्यादार्त्विज्यं प्रीतिपूर्वकम् ॥१०॥*
क्रमागतेष्वेष धर्मो वृतेष्वृत्विक्षु च स्वयम्।
यादृच्छिकेषु याज्यस्य तत्त्यागे नास्ति किल्बिषम् ॥११॥*
शुल्कस्थानं वणिक् प्राप्तः शुल्कं दद्याद्यथोदितम्।
न तद्व्यतिहरेद्राज्ञो बलिरेष प्रकीर्तितः ॥१२॥*
शुल्कस्थानं परिहरन्नकाले क्रयविक्रयी।
मिथ्योक्त्वा च परिमाणं दाप्यो ऽष्टगुणमत्ययम् ॥१३॥*

---

पूर्वैर्जुष्टः Vulg. ॥ १० ॥ प्राप्य Vulg. तज्जातु हरेत्प्राज्ञो Vulg. ॥ १२ ॥ मिथ्यावादी च संख्याने Vulg. षड्गुणमन्वयः y. ॥ १३ ॥ १४-१५ om. Vulg.

---

एतच्च त्रिविधत्वमेतदर्थं दर्शितं यत् ॥ १० ॥

ये ऋत्विजः पूर्वसेविताः क्रमागताः। तथा ये स्वयं वृता भवन्ति। तेषां त्यागे ऽयं युक्तपरित्यागविनयविचारो दृष्टः। यस्तु न पूर्वदृष्टो न च स्वयं वृतः। यदृच्छयागतः प्रीतिपूर्वकमार्त्विज्यं करोति। तस्य तत्कुर्वत अन्यः कश्चिद्गुणातिरिक्तः स्नेहातिरिक्तो वा समागतो भवति। तदा तं यदृच्छया गतं परित्यजतस्तं स्नेहातिरिक्तं तदीयकर्माधिकारयतो दक्षिणाभागं च तस्य प्रयच्छतो याज्यस्य छद्मावकाशो नास्तीति।...अथ शौल्किको भेदो भवतीति ॥ ११ ॥

यच्छुल्कं नाम एष राज्ञो बलिः प्रवर्तनभागः। तं व्यतिक्रम्य। वणिग्न व्यतिहरेत् ॥ १२ ॥

अत्राष्टगुणस्य शुल्कस्य विनयस्य स्थानत्रयमुद्दिष्टम्। एकं शुल्कस्थानं परिहृत्यादत्तशुल्कस्यैव वणिजो गच्छतः। द्वितीयमदत्तशुल्कभाण्डस्य अकाले

दैवतस्कर राजभ्यो व्यसने समुपस्थिते।
यस्तत्स्वशक्त्या रक्षेत तस्यांशो दशमः स्मृतः ॥६॥*
एकस्य चेत्स्याद्व्यसनं दायादो ऽस्य तदाप्नुयात्।
अन्यो वासति दायादे शक्ताश्चेत्सर्व एव वा ॥७॥*
ऋत्विजां व्यसने ऽप्येवमन्यस्तत्कर्म निस्तरेत्।
लभेत दक्षिणाभागं स तस्मात्संप्रकल्पितम् ॥८॥*
ऋत्विग्याज्यमदुष्टं यस्त्यजेदनपकारिणम्।
अदुष्टं वर्त्विजं याज्यो विनेयौ तावुभावपि ॥९॥*

---

कुर्यात् Vulg. ॥ ५ ॥ यस्तत्स्वशक्त्या रक्षेत A ॥ ६ ॥ सक्ताश्चेत् y ॥ ७ ॥

---

दैवात्प्रदीपने दह्यमानं यः कश्चिदेक एव रक्षति। तथा तस्करवृन्दात्। तथोन्मार्गीभूतग्रहणोद्यतराज्ञः पार्श्वाद्यः स्वकीयेन प्राणव्यायामेन तत्सामान्यभाण्डं रक्षति। तस्य दशमांशः क्लेशफले भवति ॥ ६ ॥

तेषां संभूयकारिणां मध्ये यद्येकस्य कस्यापि मृत्युः स्यात्। तदा तदीयांशं पुत्रादिदायादा अधिकारिणस्तदाप्नुयुः। असति दायादे तेषामेकतमो वा यस्तन्निर्वर्तुं शक्तः। अथवा यदि शक्तास्तदा तदीयांशं सर्व एव ते गृह्णीयुरिति। इति संभूयसमुत्थाने सामवायिकभेदः प्रथमः॥ ७॥

ऋत्विजामपि एकयज्ञे संश्रये प्रचरतां यद्येकस्य कस्यापि व्यसनं भवति। तदा तदीयकर्मधुरमन्यः कश्चिन्निर्वाहयेत्। दक्षिणाभागमपि तत्प्रकल्पित निर्वाहक एव लभेत् ॥ ८ ॥

अदुष्टमपि अनपकारिणमपि याज्यं यदि ऋत्विक् कर्मारूढो ऽपि क्रोधलोभादिना अवान्तर एव त्यजति। अथवा एवमृत्विजं याज्य एव त्यजति। ततः प्राप्तव्यवहारयोर्द्वयोरपि तयोर्दोषवान्स एव राज्ञा विनयं ग्राह्यः ॥९॥

वणिक्प्रभृतयो यत्र कर्म संभूय कुर्वते।
तत्संभूयसमुत्थानं व्यवहारपदं स्मृतम् ॥ १ ॥*
फलहेतोरुपायेन कर्म संभूय कुर्वताम्।
आधारभूतः प्रक्षेपस्तेनोत्तिष्ठेयुरंशतः ॥२॥*
समो ऽतिरिक्तो हीनो वा तत्रांशो यस्य यादृशः।
क्षयव्ययौ तथा वृद्धिस्तत्र तस्य तथाविधाः ॥३॥*
भाण्डपिण्डव्ययोद्धारभारसारान्ववेक्षणम्।
कुर्युस्ते ऽव्यभिचारेण समये स्वे व्यवस्थिताः ॥४॥*
प्रमादान्नाशितं दाप्यः प्रतिषिद्धकृतं च यत्।
असंदिष्टश्च यत्कुर्यात्सर्वसंभूयकारिभिः ॥५॥*

---

संभूय एकत्र मिलित्वा संव्यवहारं प्रति यत्तदुत्थानं नाम व्यवहारपदमुच्यते ॥ १ ॥

यद्वणिग्भिर्मिलित्वा द्रम्मसहस्रं पिण्डे वाणिज्यं प्रारब्धम्। तत्रैकेनार्धं पञ्च शतानि निक्षिप्तानि। अन्येन पञ्चमांशे शतद्वयम्। अन्यनापि शतद्वयमेव। अपरेण दशमांशे शतमेकम्। एतेषां स्वांशप्रक्षेपो लाभव्यययोराधारभूतः ॥ २ ॥

तत्रायव्ययौ स्वकीयस्वकीयांशावतारेण संबध्येते ॥ ३ ॥

यः प्रथमारम्भे समयः कृतः। तत्राव्यभिचारेण अविलोपनेन भाण्डपिण्डव्ययोद्धारभारसारान्ववेक्षणानि स्वांशानुसारेण कर्तव्यानीति ॥ ४ ॥

एतैश्च सर्वैरपि सामदायिकैः समर्पितं प्रमादाद्यो नाशयति। स तन्नाशितं दाप्यः। प्रतिषिद्धे च। असंमतकृतं च यत्किमपि हानिकारि भवति। तदपि दाप्य एवेति ॥ ५ ॥

यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते।
तावुभौ चौरवच्छास्यौ दण्डं दाप्यौ च तत्समम्॥१३॥*
एष एव विधिर्दृष्टो याचितान्वाहितादिषु।
शिल्पे चोपनिधौ न्यासे प्रतिन्यासे तथैव च॥१४॥*
प्रतिगृह्णाति पोगण्डं यश्च सप्रधनं नरः।
तस्याप्येष भवेद्धर्मः षडेते विधयः समाः॥१५॥*

---

१०-१३ om. Vulg. शिल्पिषूपनिधौ Vulg. ॥ १४ ॥ यो गण्डं Vulg. यो दण्डं Jagannâtha. निधयः स्मृताः Vulg. ॥ १५ ॥ अनिर्दिष्टं च यः

---

अत्र यो ऽयं विधिर्न्यासोपनिधिव्यवहारपदकयोरपि सविस्तारो ऽभिहितः। एष एव याचितान्वाहितशिल्प्युपनिधिष्विति। अत्र याचितं कार्यार्थं प्रार्थयित्वा यदानीतम्।...अनु आहितमन्वाहितमिति। शिल्पे शिल्पिहस्तसंस्कारणमुक्तो न्यासो व्याचक्षते। प्रतिन्यासस्तु कस्यापि हस्ते निक्षिपति द्रव्यम्। सो ऽपि कार्यकालापेक्षया यदन्यस्य हस्ते निक्षिपति स प्रतिन्यासः।...॥ १४ ॥

य अनाथं बालं सप्रधनं नायाबुद्ध्या प्रतिगृह्णाति यस्यापि पूर्वोक्तस्यैव विधिर्द्रष्टव्यः। षडेते विधयः। षडेते विधयः समा इति। याचितविधिः। अन्वाहितविधिः। शिल्पिहस्तगविधिः। न्यासप्रतिन्यासविधिः। पोगण्डविधिश्चेति। षडेते विधयस्तुल्या द्रष्टव्याः। इति नारदीयकल्याणभाष्ये षड्व्यवहारपदभेदसहितमुपनिधिर्नाम द्वितीयं व्यवहारपदं समाप्तम्। इदानीं त्रिभेदं संभूयसमुत्थानमुच्यते॥ १५॥

तत्रापि दण्ड्यः स भवेद्दाप्यस्तच्चापि सोदयम् ॥८॥*
ग्रहीतुः सह यो ऽर्थेन नष्टो नष्टः स दायिनः।
दैवराजकृते तद्वन्न चेत्तज्जिह्मकारितम् ॥९॥*
स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे।
न स राज्ञाभियोक्तव्यो न निक्षेप्तुश्च बन्धुभिः ॥१०॥
अच्छलेनैव चान्विच्छेत्तमर्थं प्रीतिपूर्वकम्।
विचार्य तस्य वा वृत्तं साम्नैव परिशोधयेत् ॥११॥
चौरैर्हृतं जले मग्नमग्निना दग्धमेव च।
न दद्याद्यदि तस्मात्स न संहरति किंचन ॥१२॥

---

Vulg. ॥ ८ ॥ Vulg. inserts the following after ८ ॥ अनेकार्थाभियुक्तेन सर्वार्थव्यपलापिना। विभावितैकदेशेन देयं यदभियुज्यते ॥*

---

रननुज्ञया असंमतेन तदा दण्ड्यः स भवेत्। तं च साधितमर्थं सोदयं सोपाश्रयं दाप्य इति ॥ ८ ॥

...जिह्मकारिते निश्चितज्ञाने शिरोपस्थानेन सह साधनमर्थस्येति ॥९॥

निक्षेपदातुर्मृतस्य यः प्रत्यनन्तरस्तदीयद्रव्याधिकारी तस्य स्वयमेव गत्वा ग्राहको ऽयाचित एवाज्ञातो वा साधुत्वान्न्यासं समर्पयति। स तेन साधनेन तदीयबन्धुभिः शेषोपनिधितस्योपरि जल्पयित्वा नाभियोक्तव्यो न राज्ञेति ॥१०॥

यदि तस्मात्पुनर्निक्षेपात्किंचिद् गृहीत्वा को ऽपि नियोगः कृतः स प्रत्ययः संभाव्यते। तदा भाविनि चौरजलाग्न्युपद्रवे तद्दद्यादसाविति ॥ १२ ॥

...तयोर्व्यवहारे यो मिथ्यावादी दिव्यावसन्नो भवति। स राज्ञा चौरवच्छास्यः। द्रव्यसमं च दण्डं दाप्य इति ॥ १३ ॥

अन्यद्रव्यव्यवहितं द्रव्यमव्याहृतं च यत्।
निक्षिप्यते परगृहे तदौपनिधिकं स्मृतम्॥ ५ ॥*
स पुनर्द्विविधः प्रोक्तः साक्षिमानितरस्तथा।
प्रतिदानं तथैवास्य प्रत्ययः स्याद्विपर्यये॥ ६ ॥*
याच्यमानस्तु यो दात्रा निक्षेपं न प्रयच्छति।
दंड्यः स राज्ञा दुष्टात्मा नष्टे दाप्यश्च तत्समम्॥७॥*
यं चार्थं साधयेत्तेन निक्षेप्तुरननुज्ञया।

---

तस्मै दाप्यश्च तत्समम्॥ Vulg.; दण्ड्यः स तु भवेत्तं च द्रव्यं सोदयमावहेत् y, instead of ७, b and ८॥ तं च सोदयमावहेत्

---

निक्षेपलक्षणमभिहितम्। इदानीमौपनिधिकलक्षणमुच्यते। अन्यद्रव्यव्यवहितमिति मञ्जिष्ठापाटलमध्ये विंशतिगद्याणकग्रन्थिवद्धा। अथवा ग्रन्थिमुद्रितं यथा वस्त्रमध्ये मौक्तिकहारः। तद्वाभ्यन्तरसारद्रव्यं तदवस्थं तस्यापि न कथितम्। तथा हस्ते निक्षिप्तमेवं स्थितं द्रव्यं यन्निक्षिप्यते। तदौपनिधिकमित्युच्यते। तदपि यथा स्थितं ग्रन्थिमुद्रितमेव प्रदेयम्। ग्रन्थिभेदे ग्रहीतुर्दोषो भवतीति॥५॥

यो निक्षेपः साक्षिप्रत्यक्षो मुक्तः। असाववश्यं साक्षिप्रत्यक्षमेव समर्पणीयः। यः पुनरसाक्षिमान्स विनैव साक्षिभिरर्पणीयः। इत्यस्य द्विविधस्य निर्गमः। अथ विपर्ययो निक्षेपस्योपनिधेर्वा हानिर्मिथ्या भवति। तदानीं तदनुसारेण प्रत्ययो दिव्यशपथादिको भवतीति॥ ६॥

प्रकटार्थ एव श्लोकः। विशेषो ऽयं याचिते ऽनर्पिते। राजदैविकं ग्रहीतुर्न निक्षेप्तुरिति॥ ७॥

यदि ग्राहको निक्षेपद्रव्येण तेन कंचित्स्वार्थं स्वेच्छया साधयति। निक्षेप्तु-

स्वं द्रव्यं यत्र विस्रम्भान्निक्षिपत्यविशङ्कितः ।
निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैः ॥ १ ॥*
कुलजे वृत्तसंपन्ने धर्मज्ञे सत्यवादिनि ।
महापक्षे धनिन्यार्ये निक्षेपं निक्षिपेद्बुधः ॥ २ ॥*
यो यथा निक्षिपेद्धस्ते यमर्थं यस्य मानवः ।
स तथैव ग्रहीतव्यो यथा दायस्तथा ग्रहः ॥ ३ ॥*
न चेद्दद्यात्तु निक्षेप्तुस्तद् द्रव्यं तु यथाविधि ।
उपसंगृह्य दाप्यो ऽसौ दिव्यादिभिर्व्यवस्थितः ॥ ४ ॥ *

---

२-४ om. Vulg. See Manu VIII. 279-284. राज्ञो भवति

---

स्वमिति स्वकीयं द्रव्यं यो निक्षिपति तस्य निक्षेपः संबध्यते ।...यत्राविश्वासाच्छङ्का भवति तत्र साक्षिलिखितग्रहणविरहितं को ऽपि वराटकमपि न ददाति । यत्र पुनर्विश्वासान्निःशङ्कः पुरुषो भवति । तत्र साक्षिलिखितग्रहणकवर्जितमेव सुवर्णसहस्रादिकमपि निक्षिपति ।...॥ १ ॥

एभिः सप्तभिरपि गुणैः संपन्ने पुरुषे निक्षेपं निक्षिपेद्बुधः । स कालान्तरेष्वपि विप्रतिपत्तिं न गच्छतीति ॥ २ ॥

यः पुरुषो यस्य हस्ते यमर्थं येन प्रकारेण निक्षिपेत् । तेनैव पुरुषेण तस्यैव हस्तात्स एवार्थः तेनैव प्रकारेण ग्रहीतव्यः । यथा दायस्तथा ग्रह इति वचनात् ॥ ३ ॥

अथ निक्षेपग्राही लोभं गच्छति निक्षेप्तुस्तद् द्रव्यं न प्रयच्छति तदावेदितो राज्ञा उपसंगृह्य दिव्यादिप्रमाणसाधितो द्विगुणदण्डाकोटितः सतो दाप्यः ॥ ४ ॥

प्रदेशिन्यक्षता यस्य संस्पृष्टायां परीक्षणे।
यदि विस्फोटका न स्युः शुद्धो ऽसावन्यथा न हि॥३४८॥*

---

इति तप्तमाषकविधिः स्पष्ट एव। इति नारदीयमहाभाष्ये कल्याणभट्टशोधिते ऋणादानं नाम व्यवहारपदं प्रथमं पञ्चविंशतिसहितं समाप्तम्। अथोपनिधिः षड्भेदो भवति॥ ३४८॥

---

स्नाताय सोपवासाय दद्याद्देवार्चकः स्वयम्।
स्वयं कार्यं समुद्दिश्य सत्यासत्यपरीक्षणे ॥३४०॥
तण्डुलान्भक्षयित्वा तु पत्रे निष्ठीवयेत्ततः।
अश्वत्थपत्त्राभावे तु भूर्जपत्त्रे ततः स्मृतम् ॥३४१॥*
दृश्यते शोणितं यस्य दन्तजालं च सीदति।
गात्रं च कम्पते यस्य तमशुद्धं विनिर्दिशेत् ॥३४२॥*
अतः परं प्रवक्ष्यामि तप्तमाषकलक्षणम्।
शुभाशुभपरीक्षार्थं ब्रह्मणाभिहितं स्वयम् ॥३४३॥
सौवर्णे राजते पात्रे आयसे मृन्मये ऽपि वा।
क्षिप्रं घृतमुपादाय तदग्नौ स्थापयेच्छुचिः ॥३४४॥*
सौवर्णीं राजसीं ताम्रीमायसीं वा सुशोभिताम्।
सलिलेनासकृद्धौतां निक्षिपेत्तत्र मुद्रिकाम् ॥३४५॥*
भ्रमत्यतितायामन्तः स नः स्पर्शसुभीषणः।
ततस्त्वनेन मन्त्रेण घृतं तदभिमन्त्रयेत् ॥३४६॥*
परं पवित्रममृतं घृतं त्वं यज्ञकर्मसु।
दहाग्ने यद्ययं पापो हिमशीतं शुचौ भव ॥३४७॥*

---

See Vîram. ॥ ३४१ ॥

---

इति तण्डुलविधिः प्रकटार्थ एव ॥ ३४२ ॥

दत्त्वा राजाभिशस्तानां प्रेत्य चेह च नन्दति ॥३३३॥
ग्रीष्मे तु सलिलं प्रोक्तं विषं काले सुशीतले।
ब्राह्मणस्य धटो देयः क्षत्रियस्याग्निरुच्यते ॥३३४॥*
वैश्ये तु सलिलं देयं विषं शूद्रे प्रदापयेत्।
न ब्राह्मणे विषं दद्यान्न लोहं क्षत्रियो हरेत् ॥३३५॥*
कोशान्तानि तुलादीनि गुरुष्वर्थेषु दापयेत्।
शतार्धं दापयेच्छुद्धावशुद्धो दण्डभाग्भवेत् ॥३३६॥
तण्डुलानां प्रवक्ष्यामि विधिं भक्षणचोदितम्।
चौर्ये तु तण्डुला देया नान्यत्रेति विनिश्चयः ॥३३७॥*
तण्डुलान्कारयेच्छुक्लाञ्छालेर्नान्यस्य कस्यचित्।
मृन्मये भाजने कृत्वा भास्करस्याग्रतः शुचिः ३३८॥*
स्नानोदकेन संपृक्तान्रात्रौ तत्रैव वासयेत्।
प्रभातायां रजन्यां तु त्रिः कृत्वा प्राङ्मुखाय च ॥३३९॥

---

Vîram. ॥ ३२६ ॥ ३३४ aud ३३५ a om. A. This portion has been supplied from Vulg. अशुद्धो om. A. ॥ ३३६ ॥ पात्रे A

---

भिरवतारितानि।...प्रेत्य चेह च नन्दति। इहलोके परलोके चार्थसमृद्धिसंपन्नो भवतीति। इति नारदीयकल्याणभट्टकृतभाष्ये पञ्चदिव्यविवरणम् ॥ ३३३ ॥

यच्छतार्धमुक्तं तत्पणानां प्रायः पञ्चाशत्संज्ञम्। यस्तु पराजये दण्डः स तीव्र उक्त एव इति कोशपानविधिः ॥ ३३६ ॥

इति तण्डुलदिव्याधिकारः श्लोकः ॥ ३३७ ॥

पूर्वाह्णे सोपवासस्य स्नातस्यार्द्रपटस्य च ।
सशूकस्याव्यसनिनः कोशपानं विधीयते ॥३२८॥*
यद्भक्तः सोऽभियुक्तः स्यात्तद्दैवत्यं तु पाययेत् ।
अभ्यर्च्य देवतां स्नाप्य जलस्य प्रसृतित्रयम् ॥३२९॥*
सप्ताहाभ्यन्तरे यस्य द्विसप्ताहेन वाशुभम् ।
प्रत्यात्मकं तु दृश्येत सैव तस्य विभावना ॥३३०॥*
ऊर्ध्वं यस्य द्विसप्ताहान्महदप्यशुभं भवेत् ।
नाभियोज्यः स केनापि कृतकालव्यतिक्रमात् ॥३३१॥*
महापराधे निर्धर्मे कृतघ्ने क्लीबकुत्सिते ।
नास्तिकव्रात्यदासेषु कोशपानं विवर्जयेत् ॥३३२॥*
यथोक्तेन विधानेन पञ्च दिव्यानि धर्मवित् ।

---

अत्र यावेतौ पुरुषौ वर्जितौ तौ द्वावपि सर्वावस्थत्वाद्देवताभिः पूर्वपरिहृतौ । तेन निर्दैवत्यौ तौ कोशदिव्ये वर्जिताविति । शेषं सुबोधम ॥ ३२८॥

अथ पानविधिः ॥ ३२९ ॥

चतुर्दशदिवसमध्ये यस्य राजकदैविकं किंचिदशुभं दृश्यते । तस्याशुद्धस्य सैव भावना उपलक्षणमित्यर्थः ॥ ३३० ॥

कृतकालमध्ये दैवरक्षितत्वादिति ॥ ३३१ ॥

महापराधो महापातकी । इत्यादयो दासपर्यन्ताः सर्वावस्थनिर्दैवत्याः कोशयोग्या न भवन्ति ॥ ३३२ ॥

...ये पुनः प्रच्छन्नपापकारिणः पुरुषा अथवा शुद्धमाचारा एव शङ्का मात्रदोषाभिशापदुःखिताः । तेषां सत्यासत्यपरीक्षार्थमेतानि दिव्यानि मुनि-

शाङ्गं हैमवतं शस्तं वर्णगन्धरसान्वितम्।
अभिन्नं तत्प्रदातव्यं क्षत्रविट्शूद्रयोनिषु ॥३२२॥*
विषस्य पलषड्भागाद्भागो विंशतिमस्तु यः।
तमष्टभागहीनं तु शोध्ये दद्याद् घृतप्लुतम् ॥३२३॥*
वर्षासु षड् यवा मात्रा ग्रीष्मे पञ्च यवाः स्मृताः।
हेमन्ते सप्त वाष्टौ वा शरद्यस्यापि नेष्यते ॥३२४॥*
त्वं विषं ब्रह्मणः पुत्रः सत्यधर्मव्यवस्थितः।
शोधयैनं नरं पापात्सत्येनास्यामृतीभव ॥३२५॥*
छायानिवेशितो रक्ष्यो दिनशेषमभोजनः।
विषवेगक्रमातीतः शुद्धो ऽसौ मनुरब्रवीत् ॥३२६॥*
अतः परं प्रवक्ष्यामि कोशस्य विधिमुत्तमम्।
शास्त्रविद्भिर्यथा प्रोक्तं सर्वकालाविरोधि यत् ॥३२७॥*

See Vîramitrodaya. ॥ ३२२ ॥ पलषड्भागे भागो विंशतिमस्तथा। A. See Vîramitrodaya. ॥ ३२३ ॥ यानिवेशितो रक्षो A. See

विषदिव्ये शाङ्गं विषमुक्तं नान्यत् तच्च ब्राह्मणवर्जक्षत्रियादिवर्णत्रयस्य कार्यमिति ॥ ३२२ ॥

अनया भागपरिकल्पनया भागमात्रो भवति। स विषविषये दृष्टो यवो न स्थूलयवः। तं च विषं घृतप्लुतं दद्यान्न रुक्षमिति ॥ ३२३ ॥

अत्र यवमात्रप्रमाणबलापेक्षया वर्षग्रीष्महेमन्तास्त्रयो ऽप्येते ऋतवो गृहीता इति ॥ ३२४ ॥

विषदेवतासत्त्वाधिश्रावणा ॥ ३२५ ॥

इति ऋणादाने विषविधिभेदः ॥ ३२६ ॥

कोशविधिदिव्याधिकारः श्लोको ऽयम् ॥ ३२७ ॥

सत्यानृतविभागस्य तोयाग्नी स्पष्टकृत्तमौ।
अद्भ्यश्चाग्निरभूद्यस्मात्तस्मात्तोये विशेषतः ॥३१६॥*
क्रियते धर्मतत्त्वज्ञैर्दूषितानां विशोधनम्।
तस्मात्सत्येन भगवञ्जलेश त्रातुमर्हसि ॥३१७॥*
अतः परं प्रवक्ष्यामि विषस्य विधिमुत्तमम्।
यस्मिन्काले यथा प्रोक्तं यादृशं परिकीर्तितम् ॥३१८॥*
यावन्मात्रं समुद्दिष्टं धर्मतत्त्वार्थदर्शिभिः।
तुलयित्वा शरत्काले देयमेतद्विभागमे ॥३१९॥*
नापराह्णे न संध्यायां न मध्याह्ने तु धर्मवित्।
शरद्ग्रीष्मवसन्तेषु वर्षासु च विवर्जयेत् ॥३२०॥
भग्नं च चारितं चैव धूपितं मिश्रितं तथा।
कालकूटमलाबुं च विषं यत्नेन वर्जयेत् ॥३२१॥*

---

अलंबुं A. See Vîramitrodaya. ॥ ३२१ ॥ शार्ङ्गीं हैमवतं शत्रे A.

---

अनेन श्लोकद्वयेन जलदेवताधिवासनमुक्तम् ॥ ३१६ ॥ ३१७ ॥

इति ऋणादाने उदकदिव्यविधिभेदः।

विषदिव्याधिकारमात्रार्थो ऽयं श्लोकः ॥ ३१८ ॥

अभिशस्तपुरुषस्य सत्यासत्यपरीक्षार्थं यवप्रमाणं विषं देयम्। तच्च शरत्काले अश्वयुक्कार्त्तिकमासयोः। तथा हि माघमार्गशीर्षयोरिति ॥३१९॥

अत्र पूर्वगृहीतो ऽपि शरत्कालः पुनरपवाददर्शनाद्विवर्जितः। शरद्ग्रीष्मवर्षाभिधानवसन्तविवर्जनाच्चैत्रादिकं कार्त्तिकपर्यन्तं मासाष्टकमपि विषस्य वर्जितमिति ॥ ३२० ॥

अत्र चारितभग्नधूपितमिश्रितानि ज्ञानकारणाद्वर्जितानि। कालकूटालाबुविषे च अतिरौद्रजातिवशाद्वर्जिते ॥ ३२१ ॥

नाभिमात्रे जले स्थाप्यः पुरुषः स्तम्भवद्बली।
तस्योरू संप्रगृह्याथ निमज्जेदभिशस्तवान् ॥३०८॥*
शरप्रक्षेपणस्थानाद्युवा जवसमन्वितः।
गच्छेत्परमया शक्त्या यत्र स्यान्मध्यमः शरः ॥३०९॥*
मध्यमं तु शरं गृह्य पुरुषो ऽन्यस्तथाविधः।
प्रत्यागच्छेत वेगेन यतः स पुरुषो गतः ॥३१०॥*
आगतश्च शरग्राही न पश्यति यदा जले।
अन्तर्जलं यदा सम्यक् तदा शुद्धिं विनिर्दिशेत् ॥३११॥*
अन्यथा न विशुद्धः स्यादेकाङ्गस्यापि दर्शनात्।
स्थानाद्वान्यत्र गमनाद्यस्मिन्पूर्वं निवेशितः ॥३१२॥*
न मज्जनीयं स्त्रीबालं धर्मशास्त्रविशारदैः।
रोगिणश्चापि वृद्धाश्च पुमांसो ये च दुर्बलाः ॥३१३॥*
निरुत्साहान्रुजाक्लिष्टानार्तांश्च न निमज्जयेत्।
सद्यो म्रियन्ते मज्जन्तः स्वल्पप्राणा हि ते स्मृताः ॥३१४॥*
साहसेनागतानेतान्नैव तोये निमज्जयेत्।
न चापि साधयेदग्निं न विषेण विशोधयेत् ॥३१५॥ *

---

supplied from Vulg. तस्यौरसं प्रगृह्याथ A. See Vîramitrodaya. ॥ ३०८ ॥ यवमात्रं A. See Vîramitrodaya. ॥ ३१९ ॥

---

अत्र षड्भिः श्लोकैर्जलदिव्यविधिरभिहितः। स्पष्टत्वान्न किंचिद्व्याख्यानसापेक्षम् ॥ ३०६ ॥ ३०८ ॥ ३०९ ॥ ३१० ॥ ३११ ॥ ३१२ ॥

अनेन श्लोकत्रयेण स्त्रीबालादीनां सद्धेतुको निषेधः कृतस्पष्टार्थ एव। अतो धर्मदेवताधर्मश्रावणा भवति ॥ ३१३ ॥ ३१४ ॥ ३१५ ॥

मण्डलस्य प्रमाणं तु कुर्यात्तत्पदसम्मितम् ।
न मण्डलमतिक्रामेन्नाप्यर्वाक् स्थापयेत्पदम् ॥२९९॥*

अनेन विधिना कार्यो हुताशः समयः सदा ।
ऋते ग्रीष्मात्सदा युक्तः काले ऽन्यत्र सुशीतले ॥३००॥

हस्तक्षतेषु सर्वेषु कुर्यात्काकपदानि च ।
तान्येव पुनरवेक्षेद्धस्तौ बिन्दुविचिचितौ ॥३०१॥*

यत्पुनर्न विभाव्येते दग्धावेतौ करौ तदा ।
व्रीहीन्प्रगृह्य यत्नेन सप्त वारांस्तु मर्दयेत् ॥३०२॥*

मर्दितैर्यदि नो दग्धः सभ्यैरेवं विनिश्चितः ।
मोच्यः स शुद्धः सत्कृत्य दग्धो दण्ड्यो यथाक्रमम् ॥३०३॥*

अतः परं प्रवक्ष्यामि पानीयविधिमुत्तमम् ।
हैमन्तकालादन्यत्र शिशिराच्च यथाक्रमम् ॥३०४॥

नदीषु नातिवेगासु सागरेषु वहेषु च ।
ह्रदेषु देवखातेषु तडागेषु सरःसु च ॥३०५॥*

नातिक्रूरेण धनुषा प्रेषयित्वा शरत्रयम् ।
पानीयमज्जनं कार्यं कियत्तच्च विपश्चितः ॥३०६॥

क्रूरं धनुः सप्तशतं मध्यमं षट्शतं स्मृतम् ।
मन्दं पञ्चशतं ज्ञेयमेष ज्ञेयो धनुर्विधिः ॥३०७॥*

---

विपश्चितैः ॥ A. ॥ ३०६ ॥ ३०७ om. A. This para. has been

---

...तत्र हेमन्तर्तुमार्गपौषौ शिशिरर्तुर्माघफाल्गुनौ ।...तन्मासचतुष्टये जलादिव्यस्य वर्जनमिति ॥ ३०४ ॥

एष धारयते च त्वां सत्येनानेन मानवः ।
तदस्य सत्यवाक्यस्य शीतो भव हुताशन ॥
मृषावाक्यस्य पापस्य दह हस्तौ तु शापितः ॥२९४॥*
अमुमर्थं च पत्रस्थमभिलिख्य यथार्थतः ।
श्रावितस्यैव तन्मूर्ध्नि तस्य देयं यथाक्रमम् ॥२९५॥*
स्नातश्च मण्डलस्थश्च ततः संगृह्य पावकम् ।
स्थित्वैकस्मिन्ततो ऽन्यानि व्रजेत्सप्त शनैः शनैः ॥२९६॥*
पातयेन्न तमप्राप्य या भूमिः परिकल्पिता ।
अष्टमं मण्डलं गत्वा ततो ऽग्निं विसृजेन्नरः ॥२९७॥*
यस्तु पातयते त्रासाद्दग्धो वा न विभाव्यते ।
पुनस्तं धारयेदग्निं स्थितिरेव दृढी कृता ॥२९८॥*

---

यत्त्रासात्ततः समुपजायते ॥ A. ॥ २९३ ॥ तन्मूर्ध्नि A. ॥ २९६ ॥ क्रियन्तश्च

---

इति सार्धश्लोकचतुष्टयेन धर्मसत्यश्रावणात्तस्य देय इत्युक्तो हस्तयोरयं पिण्डपावकः ॥ २९१ ॥ २९२ ॥ २९३ ॥ २९४ ॥

यथाक्रमशब्देन प्रथमं पत्त्रपट्टकं मूर्ध्नि दद्यात्पश्चादयःपिण्डं करयेरिति ॥ २९५ ॥

अत्र भूमिक्रमणाग्निक्षेपविधिः स्पष्ट एवाभिहितः ॥ २९६ ॥ २९७ ॥

अत्र त्रासात्पातितपिण्डे दिव्ये दग्धादग्धसंशयेन न जयो नापराधो न पराजय इत्यर्थः । अतस्तं नरं पुनर्दिव्यं धारयेन्निःसंशयार्थमिति ॥२९८॥

अत्र श्लोकपञ्चके ऽपि यो विधिरुक्तः श्लिष्टः स एव ।...इति ऋणादाने अग्निविधिभेदः ॥ २९९ ॥ ३०० ॥ ३०१ ॥ ३०२ ॥ ३०३ ॥

सप्ताश्वत्थस्य पत्त्राणि अभियुक्तस्य हस्तयोः।
कृत्वा न्यस्येत्तु पत्त्राणि सप्तभिः सूत्रतन्तुभिः ॥२८७॥*
जात्यैव लोहकारो यः कुशलश्चाग्निकर्मणि।
दृष्टयोगश्चान्यत्रापि तेनायोऽग्नौ प्रतापयेत् ॥२८८॥*
अग्निवर्णमयःपिण्डं सस्फुलिङ्गं सुरक्तिकम्।
पञ्चाशत्पलिकं भूयः कृत्वैवं तं शुचिर्द्विजः ॥२८९॥*
तृतीयतापतप्तं तं ब्रूयात्सत्यपुरस्कृतः।
श्रूयतां मानवो धर्मो लोकपालैरधिष्ठितः ॥२९०॥*
त्वमग्ने सर्वदेवानां पवित्रं परमं मुखम्।
त्वमेतत्सर्वभूतानां हृदिस्थो वेत्सि चेष्टितम् ॥२९१॥*
सत्यानृते च जिह्वायास्त्वत्तः समुपजायते।
वेदादिभिरिदं प्रोक्तं नान्यथा कर्तुमर्हसि ॥२९२॥*
अनेनायमिदं प्रोक्तो मिथ्या चेदमथाब्रवीत्।
सर्वथा च यथा मिथ्या तथाग्निं धारयाम्यहम् ॥२९३॥*

कृत्वा न्यस्यातियत्नेन A. ॥ २८७ ॥ भूलोके A. ॥ २९० ॥ सत्यानृते च

स्पष्टार्थमिदमुक्तम् ॥ २८७ ॥

यो लोहकारः पुरुषः पारंपर्यकुशलो जातः। लोहकर्मणि संततकृताभ्यासः। अन्यत्रापि दिव्यदानदृष्टकर्मा। तेनाग्नौ प्रतापयेत्। न पुनरवान्तरशिक्षितः कर्मणैव इति ॥ २८८ ॥

अत्र श्लोकद्वये विधिरयम्। अमुं पिण्डं पञ्चाशत्पलिकमग्निवर्णं वारत्रयतापितं सस्फुलिङ्गं भूयो भूयः सुरक्तिकं कृत्वा शुचिर्द्विज एवं ब्रूयात् ॥ २८९ ॥ २९० ॥

तदेनं संशयारूढं धर्मतस्त्रातुमर्हसि ॥२८१॥*
इत्यादि कृतश्रावणं लोकपालैः सुरैश्च वै ।
पुरुषं पुनरारूढं समुद्धृत्य निरीक्षयेत् ॥२८२॥
तुलितो यदि वर्धेत स शुद्धः स्यान्न संशयः ।
समो वा हीयमानो वा अविशुद्धो भवेन्नरः ॥२८३॥*
कक्षाछेदे तुलाभङ्गे धटकर्कटयोस्तथा ।
रज्जुच्छेदे ऽक्षभङ्गे च मूर्तितः शुद्धिमादिशेत् ॥२८४॥*
अतः परं प्रवक्ष्यामि विधिमग्नेस्तथोत्तमम् ।
द्वात्रिंशदङ्गुलं प्राहुर्मण्डलान्मण्डलान्तरम् ॥२८५॥*
अष्टभिर्मण्डलैरेवमङ्गुलानां शतद्वयम् ।
षट्पञ्चाशत्समधिकं भूमेस्तु परिकल्पना ॥२८६॥*

---

seems to be an interpolation, from the Smriti of Yâjñavalkya. इत्यादि सुलोकपालांकानकष्टतश्रावणं । A. ॥ २८२ ॥ द्वात्रिंशन्मण्डलान्याहुर्मण्डलं A. ॥ २८५ ॥ षट्पञ्चाशतमाख्यातं A. ॥ २८६ ॥

---

प्रकटार्थो ऽपि श्लोकः ।... एवं विमलपुरुषस्योर्ध्वयमनादिशुद्धिरिति सिद्धम् ।... अधो गच्छमानस्त्वविशुद्धो भवेन्नरः ॥ २८३ ॥

अत्र वाचनिका शुद्धिः । इति ऋणादाने धटविधिः ॥ २८४ ॥

अत्र श्लोकद्वयेन अग्निदिव्यविधानमधिकृत्य गृहीतदिव्यः पुरुषो यावन्मात्रं गच्छति तदुक्तम् । एकं मण्डलकं द्वात्रिंशदङ्गुलप्रमाणं भवति । तेन प्रमाणेनाष्टौ मण्डलानि भवन्ति । तेष्वष्टसु मण्डलेष्वपि एकत्राङ्के अङ्गुलानां शतद्वयं षट्पञ्चाशदधिकं भवति । एतत्क्रमेण भूमिप्रमाणमभिहितम् ॥ २८५ ॥ २८६ ॥

तुलयित्वा नरं पूर्वं चिह्नं कृत्वा घटस्य च ।*
कक्षास्थाने यदा तुल्यमवतार्य ततो घटात् ॥२७५॥
समयैः परिगृह्याथ पुनरारोपयेन्नरम् ।
निर्वाते वृष्टिरहिते शिरस्यारोप्य पत्त्रकम् ॥२७६॥*
तस्मिन्नेव समारूढे धृत्वा कक्षां द्विजो वदेत् ।
धर्मपर्यायवचनैर्धट इत्यभिधीयसे ॥२७७॥
त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च ।
व्यवहाराभिशस्तो ऽयं मानवस्तुल्यते त्वया ॥२७८॥*
देवासुरमनुष्याणां सत्ये त्वमतिरिच्यसे ।
[त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता ॥२७९॥*
तत्सत्यं वद कल्याणि संशयान्मां विमोचय ।
यद्यहं पापकर्मास्मि तदा त्वं मामधो नय ॥२८०॥*
शुद्धं चैव विजानासि तत ऊर्ध्वं गृहाण माम् ।]

---

च । A.; चिह्नं कृत्वा घटस्य च । Vulg. ॥ २७५ ॥ रहिते स्त्निरवारोपितपत्त्रकम् A. ॥ २७६ ॥ घटद्वन्यभिधीयते A. ॥ २७७ ॥ २७९ b—२८१

---

एवमनेन प्रयत्नेन नरं प्रथमं तुलायां पिटिकया समं समानतुलितमुपलक्षयेत् । यदा कक्षास्थाने सलिलप्रक्षेपसमत्वं प्रसिद्धं भवति । तदा घटात्पुरुषमवतार्य ॥ २७५ ॥

ततस्तं पुरुषं गृहीतसमयं सुकृतसत्यश्रावणं कृतदेवताह्वानं शिखारोपितयथावृत्तान्ताभियोगसत्यानृतविचारपत्त्रकं पुनरपि तुलामारोपयेत् । वातवृष्ट्युपपातवर्जिते काले ॥ २७६ ॥

दिव्यप्रदानं विहितमन्यत्र नृपहिंसनात् ॥२६९॥
अशिरांस्यपि दिव्यानि राजा भृत्येषु दापयेत् ।
अभियोगाभियुक्तानामन्येषां तु यथाक्रमम् ॥२७०॥*
शिक्यद्वयं समासज्य धटकर्कटयोर्दृढम् ।
एकत्र शिक्ये पुरुषमन्यत्र तुलयेच्छिलाम् ॥२७१॥*
धारयेदुत्तरे पार्श्वे पुरुषं दक्षिणे शिलाम् ।
पिटिकां पूरयेत्तस्मिन्निष्टकालोष्टपांशुभिः ॥२७२॥*
प्रथमारोपणे ग्राह्यं प्रमाणं निपुणैः सह ।
तुलाशिलाभ्यां तुल्यं च तोरणं न्यस्तलक्षणम् ॥२७३॥
सुवर्णकारा वणिजः कुशलाः कांस्यकारकाः ।
अवेक्षेरन्धटतुलां तुलाधारणकोविदाः ॥२७४॥*

---

A. ॥ २६८ ॥ तत्र वृश्चिकालोष्टपांसुभिः ॥ A. ॥ २७२ ॥ कक्षां कृत्वा धटस्य

---

तम् । अन्यत्र नृपहिंसनात् । यदा पुनः नृपगृहे काचिद्धिंसा कृता भवति तदा शिरोपस्थानं विनापि दिव्यं दातव्यम् ॥ २६९ ॥

राजाभियोगेनाभियुक्तानामशिरांस्यपि दिव्यानि दापयेत् । अन्येषां तु यथा क्रमो विहितस्तथा दापयेदिति ॥ २७० ॥

अत्रानेन श्लोकचतुष्टयेन प्रथमं पुरुषपाषाणपिटिकयोस्तोलनसमानधारणाधारणार्थं विधिर्दृष्टः । तत्र च... पुनरिदमुक्तम् । सुवर्णकारा वणिजः कांस्यकारादयस्तुलाधारणसमानप्रमाणज्ञा उभयशिक्ययोः समानत्वमन्वेच्छेरन्निति ॥ २७१ ॥ २७२ ॥ २७३ ॥ २७४ ॥

खादिरं कारयेत्तं च निर्व्रणं शुष्कवर्जितम् ।
शांशपं तदभावे तु शालं वा कोटरैर्विना ॥२६४॥*
एवंविधानि काष्ठानि धटार्थे परिकल्पयेत् ।
सभाराजकुलद्वारे सुरायतनचत्वरे ॥२६५॥*
निखेयो निश्चलः कार्यो गन्धमाल्यानुलेपनः ।
दध्यक्षतहविर्गन्धकृतपावनमङ्गलः ॥२६६॥
रक्षार्थमाहूतैर्लोके लोकपालैरधिष्ठितः ।
सर्वदा स तु देयः स्यात्सर्वलोकस्य पश्यतः ॥२६७॥
अहोरात्रोषिते स्नाते आर्द्रवाससि मानवे ।
पूर्वाह्णे सर्वदिव्यानां प्रदानमनुकीर्तितम् ॥२६८॥*
शिरोपस्थायिनि नरे अभियोक्तर्युपस्थिते ।

---

Digests and Commentaries. सर्वदा समुदेयः A. ॥२६७॥ मानवो

---

धटस्यैतानि दारूणि परं मुख्यः प्रधानः खदिरः। ततस्तिन्दुकः ।..तद-भावे शिंशपः । तदभावे शालवृक्षदारु । एतान्यपि शुष्ककोटरवर्जितानि कार्याणि ।..२६४ ॥

एते प्रदेशा धर्मदेवतावतारयोग्या भवन्तीति ॥ २६५ ॥

अयं च यदा प्रथमं निखेयः । तदा अतिशोभनदिनलग्नकृताग्निकार्य-द्विजवेदमङ्गलनिर्घोषशब्देन दध्यक्षतहविर्गन्धधूपाक्षतपावनैश्चेति ॥ २६६ ॥

स च यदा शुद्ध्यर्थं कस्यापि देयस्तदा धर्मरक्षणार्थं लोकपालैराहूतैरधि-ष्ठितः सर्वदा सर्वकालं देयः । सर्वलोकस्य पश्यतः । न पुनरेकान्त इत्यर्थः ॥ २६७ ॥

यो ऽसौ अभियोक्ता नरः । तस्मिञ्छिरोपस्थानस्थिते दिव्यप्रदानं विहि-

हस्तद्वयं तु निखेयमुक्तं मुण्डकयोः सदा ।
षड्हस्तं तु तयोर्दृष्टं प्रमाणं परिणाहतः ॥२६१॥*
चतुर्हस्ता धटतुला पादौ चापि प्रकीर्तितौ ।
पादयोरन्तरं हस्तो भवेदध्यर्धमेव च ॥२६२॥*
रज्वी धटतुला कार्या खादिरी तैन्दुकापि वा ।
चतुरस्रा त्रिभिः स्थानैर्धटकर्कटकादिभिः ॥२६३॥*

---

proved by internal evidence and by its specially close agreement with the verses from Nárada in the Commentaries and Digests. Of the Section on Ordeals by Balance, Fire, etc., Vulg. has an entirely different version, which however is evidently less complete and authentic than the version preserved in A. In some cases, the copyist's mistakes, which occur in A, have been corrected from the quotations in the

---

अनेन श्लोकत्रयेण धटन्यासस्वरूपमुक्तम्। षड्हस्ता मुण्डका..भवन्ति। तेषां भूमिनिवेशक्षेत्रं पूर्वापरतो हस्तचतुष्टयं दक्षिणोत्तरतः सार्धहस्तं तस्मिन्क्षेत्रे..द्वयोरप्यन्तयोस्तोरणद्वयम्। तेषां च मुण्डकानां च निखेयं नैश्चल्यार्थं हस्तद्वयमुक्तम्। ततो मध्यमतस्तोरणयोश्चतुर्हस्ता धटतुला। अन्तयोर्लोहमयशिक्यद्वयाधारभूतमुण्डकद्वयसहिता मध्ये च अर्धहस्तविलम्बितलोहपट्टकुलकच्छ्सहितशौलिका भवतीति धटप्रमाणनिवेशः ॥ २६१ ॥ २६२ ॥ २६३ ॥

शिरोवर्ती यदा न स्यात्तदा दिव्यं न दीयते ।
कारणैः सहितं प्रोक्तं न दिव्यं चार्थिनान्नृणाम् ॥२५७॥
तत्प्रज्ञेन विनीतेन धार्मिकेन विजानता ।
उभयानुमते देयं दिव्यं सर्वं प्रयत्नतः ॥२५८॥
न शीते तोयशुद्धिः स्यान्नोष्णकाले ऽग्निशोधनम् ।
न प्रावृषि विषं दद्यात्प्रवाते न तुलां नृणाम् ॥२५९॥*
विचार्य धर्मनिपुणैः सर्वधर्मविशारदैः ।
इदं सर्वर्तुकं प्रोक्तं पण्डितैर्घटधारणम् ॥२६०॥*

---

दद्यान्न धटं चातिमारुते ॥ कुष्ठिनां वर्जयेदग्निं सलिलं श्वासकासिनाम् । पित्तश्लेष्मवतां चैव विषं तु परिवर्जयेत् ॥ One of these verses is found in A. as well, but in a different place, at the end of the Section on Ordeals. As for the remainder, the superior authenticity of the version preserved in A is

---

यदेतद्दिव्यं नाम एतदभिशापादिकारणं विना न भवति । अतो ऽभिशापाभियोगस्य यो दाता शिरउपस्थायी यावन्न भूतः । तावद्दिव्यं न दीयत इति ॥ २५७ ॥

अतः कारणात् । एवंविधेन राज्ञा प्राड्विवाकेन वा उभयानुमते यदि वादिप्रतिवादिनोः प्रत्यक्षसंमते दिव्यं देयं नान्यथेति ॥ २५८ ॥

एतेषां तोयादिदिव्यानामेते काला निरुद्धत्वान्निषिद्धाः ॥ २५९ ॥

एतेषामग्न्यम्बुविषाणां दिव्यानां देशकालयोश्चादीनां बहुविरोधान्दृष्ट्वा सर्वधर्मविशारदैः पण्डितैरिदमेव सर्वर्तुकालाविरुद्धं घटधारणादिव्यं दृष्टमिति ॥ २६० ॥

संदिग्धे ऽर्थे ऽभियुक्तानां विशुद्ध्यर्थं दुरात्मनाम्।
प्रोक्तानि नारदेनेह सत्यानृतविशुद्धये ॥२५३॥*
वर्षासु वह्निरित्युक्तः शिशिरे तु धटः स्मृतः।
ग्रीष्मे सलिलमित्युक्तं विषं काले तु शीतले ॥२५४॥*
नार्तानां तोयशुद्धिः स्यान्न विषं पित्तरोगिणाम्।
श्वित्र्यन्धकुनखीनां च नाग्निशुद्धिर्विधीयते ॥२५५॥*
सव्रतानां भृशार्तानां व्याधितानां तपस्विनाम्।
स्त्रीणां च न भवेद्दिव्यं यदि धर्मस्त्ववेक्ष्यते ॥२५६॥*

---

द्धार्थं महात्मनाम्। नारदेन पुरा प्रोक्ता सत्यासत्यविभवना ॥ Vulg. ॥ २५३ ॥ Vulg. has the following instead of २५४—२५६: धटादयो ये मुनिभिः समयाः परिकीर्तिताः। वादिनो ऽनुमते चैतान्कारयेन्नान्यथा नृपः ॥ अन्यथा क्रियमाणेषु प्राप्तः स्याच्चौरकिल्बिषम्। वर्षासु शपथे वह्निः शिशिरे तु धटः स्मृतः ॥ ग्रीष्मे तु सलिलं प्रोक्तं विषं काले सुशीतले। ब्राह्मणस्य धटो देयः क्षत्रियस्याग्निरुच्यते ॥ वैश्ये तु सलिलं देयं विषं शूद्रे प्रदापयेत्। न ब्राह्मणे विषं दद्यान्न लोहं क्षत्रियो हरेत्॥ अग्नौ तोये विषे चैव परीक्षेतोर्जितान्नरान्। बालवृद्धातुरांश्चैव परीक्षेत धटे सदा ॥ न शीते जलशुद्धिः स्यान्नोष्णकाले ऽग्निशोधनम्। न प्रावृषि विषं

---

दुरात्मत्वाद्विशुद्ध्यर्थं सत्यानृतपरीक्षया। तान्येतानि पञ्चापि दिव्यानि नारदमहर्षिणा प्रोक्तानीति ॥२५३॥

एतानि दिव्यानि एतेष्वेव कालेषु प्रयोक्तव्यानि। न त्वपरेष्विति ॥ २५४ ॥

एतेषामेतानि दिव्यान्यपथ्यरूपत्वादसामर्थ्याच्च निषिद्धानि ॥ २५५ ॥

यद्यपि दिव्यशब्देन सर्वदिव्यमुच्यते। तथाप्यत्रानन्तरोक्तविधिप्रतिषेध इति। सव्रता दीक्षितास्तेषामग्निदिव्यमेव निषिद्धम्॥ २५६ ॥

सभ्यास्तस्य न तुष्यन्ति तीव्रो दण्डश्च पात्यते ॥२४६॥
यदा साक्षी न विद्येत विवादे वदतां नृणाम्।
तदा दिव्यैः परीक्षेत शपथैश्च पृथग्विधैः ॥२४७॥*
सत्यं वाहनशस्त्राणि गोबीजकनकादि च।
देवतापितृपादांश्च दत्तानि सुकृतानि च ॥२४८॥*
महापराधे दिव्यानि दापयेत्तु महीपतिः।
अल्पेषु तु नृपश्रेष्ठः शपथैः श्रावयेन्नरम् ॥२४९॥
इत्येते शपथाः प्रोक्ता मनुना स्वल्पकारणे।*
पातकेष्टाभियोगे च विधिर्दिव्यः प्रकीर्तितः ॥२५०॥
संदिग्धे ऽर्थे ऽभियुक्तानां प्रच्छन्नेषु विशेषतः।
दैवं पञ्चविधं ज्ञेयमित्याह भगवान्मनुः ॥२५१॥
धटो ऽग्निरुदकं चैव विषं कोशश्च पञ्चमः।
उक्तान्येतानि दिव्यानि विशुद्ध्यर्थं महात्मनाम् ॥२५२॥*

---

before २५२. दूषितानां विशोधने ॥ Vulg. ॥२५२॥ ऽभिशस्तानां परी-

---

तीव्रो दण्डश्च तस्य द्विगुणादिक इति। इति ऋणादाने लेख्यसाक्ष्याभावविधिभेदः ॥ २४६ ॥

प्रकटार्थश्लोकः ॥ २४७ ॥

एते वर्णानुसारेण पुरुषानुसारेण च शपथप्रकारा दर्शिताः ॥ २४८ ॥

एवमस्मिञ्श्लोकद्वये ऽपि शपथदिव्ययोर्विषयविभागो दर्शितः ॥ २४९-२५०॥

येषां महति संदेहार्थे ऽभियोगो भवति। विशेषतः प्रच्छन्ने ऽर्थे। तेषां पञ्चप्रकारं दैवमिति दिव्यं विशोधनं ज्ञेयमिति। भगवान्मनुराहेति ॥२५१॥

यदुक्तं पञ्चविधं दैवं तान्येतानि पञ्च दिव्यानि नामतः कीर्तितानीति॥२५२॥

शपथा ह्यपि देवानामृषीणामपि च स्मृताः।
वसिष्ठः शपथं शेपे यातुधानेन शङ्कितः ॥२४३॥*
सप्तर्षयस्तथेन्द्रेण पुष्करार्थेन शङ्किताः।
शेपुः शपथमव्यग्राः परस्परविशुद्धये ॥२४४॥
अयुक्तं साहसं कृत्वा प्रत्यापत्तिं भजेत यः।
ब्रूयात्स्वयं वा सदिति तस्यार्धविनयः स्मृतः ॥२४५॥
गूहमानस्तु वैचित्र्याद्यदि पापः स जीयते।

विधि। चतुर्णां तु विशेषेण मनुना परिकीर्तितम् ॥ … च महात्मनाम्।… यातुधाने तु कीर्तितः ॥ Vulg. ॥ २४३ ॥ तथेन्द्राय पुष्करार्थे तपोधनाः। Vulg. ॥ २४४ ॥ Vulg. omits २४५—२५१ and places २५३

यातुधानेन रक्षसाभिशङ्कितो महर्षिर्वसिष्ठः शपथं कृत्वा विशुद्ध इति ॥ २४३ ॥

महदिदं पुराणोपाख्यानं किं तेन। अत्रायं समुदायार्थः। यद्येव महर्षीणामपि ईदृशानि शङ्काप्रयोजनानि शपथप्रत्ययशुद्धिप्रयोजनानि वृत्तपूर्वाणि किं पुनर्मनुष्याणामिति ॥ २४४ ॥

अत्रायुक्तं वियुक्तं विरुद्धं किमपि कस्यापि कृत्वा अथवापि चौर्यादिकं साहसमपि कस्यापि कृत्वा तेनावेदितः सन्धर्माधिकरणस्याग्रे यः प्रत्यापत्तिं करोति मिथ्यां न करोति। तस्याधममध्यमोत्तमानुसारेण यः शास्त्रे विहितो दण्डः। तस्य विनयस्यार्धमेव विनयो ऽस्य भवतीति। अनावेदितो ऽपि यः स्वयमेव प्रतिपत्तिं करोति। तस्यायमेव क्रम इति ॥ २४५ ॥

यदि पुनरयुक्तसाहसादिकं कृत्वावेदितो ऽपि मिथ्यां करोति। पश्चात्स दिव्यादिक्रियाभिः पराजीयते च। तदा यस्य तस्य सभ्याः कुपिता भवन्ति,

देशकालबलापेक्षमग्न्यम्बुसुकृतादिभिः ॥२३६॥*
यमन्तर्धारयन्त्यापो दीप्तो ऽग्निर्न दहत्येव।
शापयत्यभिशापं तं किल्बिषी स्यादतो ऽन्यथा ॥२४०॥
अरण्ये निर्जने रात्रावन्तर्वेश्मनि साहसे।
न्यासस्यापह्नवे चैव दिव्या संभवति क्रिया ॥२४१॥*
स्त्रीणां शीलाभियोगेषु स्तेयसाहसयोरपि।
एष एव विधिर्दृष्टः सर्वार्थापह्नवेषु च ॥२४२॥*

---

॥ २३८ ॥ A. inserts three verses, relative to the wording of an oath, after २३६. Unfortunately, these verses are not given correctly, nor are they explained in the Commentary or quoted in the modern compilations. For २४०, Vulg. has another verse, = Manu VIII. 115. However, Vulg. inserts the following after १४१ तारयत्यभिशापान्तं किल्बिषी स्याद्विपर्यये। २४१ om. A. Vulg. inserts the following after २४२ उपरिष्टात्तु वक्ष्यामि दिव्यानां तु यथा-

---

स्तयान्वियात्। अथ कैस्तैर्देशकालार्थसंबन्धपरिमाणक्रियाभिर्यथाक्रमं स्वयं स्मृतैस्तस्य स्मारितैरिति ॥ २३८ ॥

ये पुरुषमुदकदिव्यविधिनिक्षिप्तमाप अन्तर्धारयन्ति मग्नमेव धारयन्ति पश्चद्दिव्याधि आवणाय। हस्तगृहीतो दीप्तो ऽग्निर्न दहेत्। शापयत्यभिशापं तमन्यथा किल्बिषी पापी भवति ॥ २४० ॥

यदा स्त्रीणां शीले चारित्रे ऽभियोगो भवति। तथा स्तेयसाहसाभियोगो भवति। तथा ये केचिदर्थास्तेषामपह्नवेषु मिथ्यासु एवंविधेषु महाभियोगेषु एष महा दिव्यविधिर्दृष्टः शपथादिरिति ॥ २४२ ॥

ऊनं वाप्यधिकं वार्थं प्रब्रूयुर्यत्र साक्षिणः ।
तदप्यनुक्तं विज्ञेयमेष साक्ष्यविधिः स्मृतः ॥२३४॥*
प्रमादाद्धनिनो यत्र न स्याल्लेख्यं न साक्षिणः ।
अर्थं चापह्नुते वादी तत्रोक्तस्त्रिविधो विधिः ॥२३५॥*
चोदना प्रतिकालं च युक्तिलेशस्तथैव च ।
तृतीयः शपथः प्रोक्तस्तैरेनं साधयेत्क्रमात् ॥२३६॥*
अभीक्ष्णं चोद्यमानो यः प्रतिहन्यान्न तद्वचः ।
त्रिश्चतुः पञ्चकृत्वो वा परतो ऽर्थं स दापयेत् ॥२३७॥*
चोदनाप्रतिघाते तु युक्तिलेशैस्तमन्वियात् ।
देशकालार्थसंबन्धपरिमाणक्रियादिभिः ॥२३८॥
युक्तिष्वप्यसमर्थासु शपथैरेनमर्दयेत् ।

---

om. A. प्रतिपद्येत A.; प्रतिहन्यान्न Vulg. and Vîramitrodaya. ॥ २३७ ॥ तमन्वियात् । Vulg. and Vîramitr.; तथान्वियात् A.

---

तत्र चोदना साक्षिप्रयुक्ते प्रयोजने साक्षिणामृणिकस्य प्रतिकालं संस्मरणम् । युक्तिलेशः पूर्वदत्तस्य द्रव्यस्य पूर्वसंप्रतिपत्तिर्यस्य वा युक्त्युद्देशः । तृतीयः शपथः । दत्तशुद्धकृतनाशतण्डुलकोशादिकैरुपायैरेनमर्थापह्नविनं साधयेदिति ॥ २३५ ॥ २३६ ॥

अत्राभीक्ष्णं वचनं बहुशः पृच्छ्यमानो ऽपि ऋणी यदा तदीयं वचः कथमपि न प्रपद्यते । तदा चोदनायाः परत अन्यमुपाचरेत् । युक्तिलेशादिकं तथा च वक्ष्यति ॥ २३७ ॥

अत्र चोदनाप्रतिघाते सामान्यवचनपृच्छाया असंप्रतिपत्तौ युक्तिलेशै-

वाच्यर्था नियताः सर्वे वाङ्मूला वाग्विनिःसृताः ।
यो हितां स्तेनयेद्वाचं स सर्वस्तेयकृन्नरः ॥ २२८ ॥
साक्षिविप्रतिपत्तौ तु प्रमाणं बहवो यतः ।
तत्साम्ये शुचयो ग्राह्यास्तत्साम्ये स्मृतिमत्तराः ॥२२९॥
स्मृतिमत्साक्षिसाम्यं तु विवादे यत्र दृश्यते ।
सूक्ष्मत्वात्साक्षिधर्मस्य साक्ष्यं व्यावर्तते ततः ॥ २३० ॥
स्वसाक्षिवर्जितो यस्तु दैवाद्वादी कथंचन ।
उद्धारं तस्य नेच्छन्ति दिव्येनापि मनीषिणः ॥ २३१ ॥
निर्दिष्टेष्वर्थजातेषु साक्षी चेत्साक्ष्य आगते ।
न ब्रूयादक्षरसमं न तन्निगदितं भवेत् ॥ २३२ ॥*
देशकालवयोद्रव्यप्रमाणाकृतिजातिषु ।
यत्र विप्रतिपत्तिः स्यात्साक्ष्यं तदपि चान्यथा ॥२३३॥*

२३० ॥ २३१ om. A. साक्ष्यम् L. b. आगतः Vulg. ॥ २३२ ॥ २३३

अमी श्लोकाः शपथसत्यमाहात्म्यानृतनिन्दाया निगदसुबोधा इति न व्याख्याताः ॥ २०५—२२८ ॥

तस्मात्स्मृतिमत्साक्षिसाम्याद्व्यावर्तते साक्ष्यमनुस्मरणसक्तं न भवति ।... ततश्च तन्निमित्तोत्पन्नस्य साक्ष्यस्याभाव एवेति । साक्ष्यं व्यावर्तते साक्षिण एव ते न भवन्तीति । एवं च कृत्वा प्राक्प्रतिज्ञातभेदादसाक्षिण इति समर्थितं भवतीति ॥ २२९ ॥ २३० ॥

यदि च साक्षी यथाप्रश्नं निविष्टाक्षरसममेव मे तदहं जाने इति नापि विवादे देशकालादीनां साक्षिवचनात्साम्यं तदपि साक्ष्यं विश्रांसेदित्यपरः पाठः । विश्रांसो विश्रमार्थे । असाक्ष्यमेव तदिति ॥ २३१ ॥

न बान्धवा न सुहृदो न धनानि महान्त्यपि।
अलं धारयितुं शक्तास्तमस्युग्रे निमज्जतः॥ २२१॥
पितरस्त्ववलम्बन्ते त्वयि साक्षित्वमागते।
तारयिष्यति किंत्वस्मान् किं चायं पातयिष्यति॥ २२२॥
सत्यमात्मा मनुष्यस्य सत्ये सर्वं प्रतिष्ठितम्।
सत्यमुक्त्वात्मनात्मानं श्रेयसा संनियोजय॥ २२३॥
यस्यां रात्रावजनिष्ठा यस्यां रात्रौ मरिष्यसि।
वृथा तदन्तरं तुभ्यं साक्ष्यं चेदन्यथा कृथाः॥ २२४॥
ब्रह्मघ्नस्य तु ये लोका ये च स्त्रीबालघातिनाम्।
ये च लोकाः कृतघ्नस्य ते ते स्युर्ब्रुवतो वृथा॥ २२५॥
नास्ति सत्यात्परो धर्मो नानृतात्पातकं परम्।
साक्षिधर्मे विशेषेण सत्यमेव तदेत्ततः॥ २२६॥
पुराणोक्तौ द्वौ श्लोकौ भवतः।
यः परार्थे प्रहिणुयात्स्वां वाचं पुरुषाधमः।
आत्मार्थे किं न कुर्यात्स पापो नरकनिर्भयः॥ २२७॥*

२२१॥ उताहो पातयिष्यति Vulg.॥ २२२॥ २२३ b. om. A. यां रात्रिमजनिष्ठात्वं यां रात्रिं च मरिष्यसि। वृथा तदन्तरं ते स्यात्साक्ष्यं चेदन्यथा कृतम्॥ Vulg.॥ २२४॥ २२५॥ om. Vulg. पुराणोक्तौ तथैवात्र श्लोकौ द्वौ भवतः शुभौ Vulg. प्रहरति L. b. ऽपहरति C. B. β. y. पापं Vulg.॥ २२७॥ अर्थे चैव विनियता त्वम्मूला A.॥ २२८॥ A. शुचिमत्तराः Vulg.॥२२९॥ शुद्धिमत् Vulg. मूल्यत्वात् A.॥

भूर्धारयति सत्येन सत्येनोदेति भास्करः ।
सत्येन वायुः स्रवते सत्येनापः स्रवन्ति च ॥ २१३ ॥
सत्यमेव परं दानं सत्यमेव परं तपः ।
सत्यमेव परो धर्मो लोकानामिति नः श्रुतम् ॥ २१४ ॥
सत्यं देवाः समासेन मनुष्यास्त्वनृतं स्मृतम् ।
इहैव तस्य देवत्वं यस्य सत्ये स्थिता मतिः ॥ २१५ ॥
सत्यं ब्रूह्यनृतं त्यक्त्वा सत्येन स्वर्गमेष्यसि ।
उत्क्रान्तं महाघोरं नरकं प्रतिपत्स्यसे ॥ २१६ ॥
नरकेषु च ते शश्वज्जिह्वामुत्कृत्य दारुणाः ।
असिभिः शातयिष्यन्ति बलिनो यमकिंकराः ॥ २१७ ॥
शूलैर्भेत्स्यन्ति चाक्रम्य क्रोशन्तमपरायणम् ।
अवस्थितं समुत्कृत्य क्षेप्स्यन्ति त्वां हुताशने ॥ २१८ ॥
अनुभूय च तास्तीव्राश्चिरं नरकवेदनाः ।
इह यास्यसि पापासु गृध्रकाकादियोनिषु ॥ २१९ ॥
ज्ञात्वैतानन्ते दोषाञ्ज्ञात्वा सत्ये च सद्गुणान् ।
सत्यं वदोद्धरात्मानं नात्मानं पातय स्वयम् ॥ २२० ॥

---

C L. २१४ a om. L. b. They insert २१५ b and ११६ a after २१३ a. त्यक्त्वा सत्यं महाघोरं Vulg.॥२१६॥अवस्थितं समुत्क्षात्य क्षिप्स्यन्ते ग्रहदेषु च A. ॥ २१८ ॥ अनुभूय चिरं दुःखं तास्ता नरकवेदनाः ।... काकगृध्रादि° Vulg. ॥ २१९ ॥ तान्गुणान् । Vulg. सत्यं वदेत्सदोद्युक्तो नात्मानं पातयेत् L. C. पातयिष्यति ॥ A. ॥२२०॥ धारयितुं हस्तं Vulg. ॥

तस्य वर्षशते पूर्णे पाश एव प्रमुच्यते।
तदा पाशाद्विनिर्मुक्तः स्त्री संभवति मानवः ॥ २०५ ॥
एवं संबधनात्तस्मान्मुच्यते नियताच्च सः।
पशुगोऽश्वपुरुषाणां हिरण्यं भूर्यथाक्रमम् ॥ २०६ ॥
यावतो बान्धवांस्तस्मिन्हन्ति साक्ष्ये ऽनृतं वदन्।
तावतः संप्रवक्ष्यामि शृणु सौम्यानुपूर्वशः ॥ २०७ ॥
पञ्च पश्वनृते हन्ति दश हन्ति गवानृते।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥ २०८ ॥
हन्ति जातानजातांश्च हिरण्यार्थे ऽनृतं वदन्।
सर्वं भूम्यनृते हन्ति मास्म भूम्यनृतं वदीः ॥ २०९ ॥
एकमेवाद्वितीयं तत्प्राहुः पावनमात्मनः।
सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव ॥ २१० ॥
अश्वमेधसहस्रं च सत्यं च तुलया धृतम्।
अश्वमेधसहस्रात्तु सत्यमेव विशिष्यते ॥ २११ ॥
वरं कूपशताद्वापी वरं वापीशतात्क्रतुः।
वरं क्रतुशतात्पुत्रः सत्यं पुत्रशताद्वरम् ॥ २१२ ॥

---

तु गच्छति ॥ Vulg. ॥ २०५ ॥ नियताः समाः। Vulg. ॥ २०६ ॥ तावतः संख्यया तस्य प्रवक्ष्याम्यनुपूर्वशः ॥ Vulg. ॥ २०७ ॥ Vulg. inserts the following verse after २०७ अन्नानृते जन्म हन्ति द्वे वा सस्यानृते तथा। त्रीणि यानानृते हन्ति चतुर्थं वाहनानृते ॥ मास्म भूयो ऽनृतं वदेत् ॥ B. C. b. ॥ २०९ ॥ २११ a om

सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः॥ १९९॥
पुराणैर्धर्मवचनैः सत्यमाहात्म्यकीर्तनैः।
अनृतस्यापवादैश्च भृशमुत्त्रासयेदिमान्॥ २००॥*
नग्नो मुण्डः कपालेन भिक्षार्थी क्षुत्पिपासितः।
अन्धः शत्रुगृहं गच्छेद्यः साक्ष्यमनृतं वदेत्॥ २०१॥
नग्नो मुण्डः कपालेन परद्वारे बुभुक्षितः।
अमित्रान्भूयशः पश्येद्यः साक्ष्यमनृतं वदेत्॥ २०२॥
यां रात्रिमधिविन्ना स्त्री यां चैवाक्षपराजितः।
यां च भाराभितप्ताङ्गो दुर्विवक्ता स तां वसेत्॥ २०३॥
साक्षी साक्ष्ये समुद्दिशन्गोकर्णशिथिलं वचः।
सहस्रं वारुणान्पाशान्मुक्ते स बन्धनाद्ध्रुवम्॥ २०४॥

---

श्रावयेद्विप्रं A. ॥ १९९॥ उत्त्रासयेदपि Vulg. ॥ २००॥ after 200, Vulg. inserts the following स्वभावशीलादन्यत्र दुस्त्यजा प्रकृतिर्नृणाम्। and another verse = Manu VIII. 81. कपाली च Vulg. ॥ २०१॥ After २०१, Vulg. inserts two verses = Manu VIII. 82, 89. नगरे प्रतिरुद्धः सन् बहिर्द्वारी बुभुक्षितः। Vulg. ॥ २०२॥ साक्ष्यं समुद्देशे A. साक्षिसमुद्देशे ... आत्मनि प्रतिमुञ्चति ॥ Vulg. ॥ २०४॥ पाश एकः ... स यदा पापनिर्मुक्तस्तदा स्त्रीत्वं

---

शपथनिर्देशार्थं श्लोकः॥ १९९॥
प्रश्ने विध्युपन्यासार्थं श्लोकः॥ २००॥

क्षामत्यनिभृतोऽकस्मादभीक्ष्णं निश्वसत्यपि।
भूमिं लिखति पादाभ्यां बाहु वासो धुनोति च॥ १९४॥*
भिद्यते मुखवर्णो ऽस्य ललाटं स्विद्यते तथा।
शोषमागच्छतश्चोष्ठावूर्ध्वं तिर्यक् च वीक्षते॥ १९५॥*
त्वरमाण इवाकस्मादपृष्टो बहु भाषते।
कूटसाक्षी स विज्ञेयस्तं पापं विनयेन्नृपः॥ १९६॥*
श्रावयित्वा तथान्येभ्यः साक्षित्वं यो विनिह्नुते।
स विनेयो भृशतरं कूटसाक्ष्यधिको हि सः॥ १९७॥*
आहूय साक्षिणः पृच्छेन्नियम्य शपथैर्भृशम्।
समस्तान्विदिताचारान्विज्ञातार्थान्पृथक् पृथक्॥१९८॥*

---

itrodaya. ॥ १९५॥ विनयेद्भृशम् Vulg. ॥ १९६॥ After १९७ Vulg. inserts three or four defective verses, which are in the main identical with Manu VIII. 118—121.

---

अत्र प्राड्विवाकस्य व्यवहारदर्शनमुपदिश्यते। साक्षिप्रश्नकाल उपस्थित इङ्गिताकारादि परीक्षेत न केवलमुक्तदोषदूषित एव प्रश्नार्हः। एवंक्रियो ऽपि न प्रष्टव्यः कूटसाक्षी स इति... ॥ १९३॥ १९४॥ १९५॥ १९६॥

यस्मान्येभ्यो ऽपि तत्साक्ष्यं श्रावयित्वा प्रपद्य च। पुनः साक्ष्यप्रदानकाले ऽन्यथा ब्रूयात्तस्य महा दण्डः कर्तव्यः।...कूटसाक्षिभ्यो ऽधिको यस्मात्स इति॥ १९७॥

सादरमाहूय साक्षिणः समस्तान्पृच्छेत्पूर्वश्रुतार्थानेकैकशो विज्ञाताचारानथवा समस्तान्विदिताचारान्पृच्छेदविज्ञाताचारांस्त्वेकैकशः। अप्रतिदूषिता ह्यविज्ञाताचारा अपि।...प्रश्नस्योभयथापि युक्तः। नियम्य शपथैर्भृशं सुतरामिति॥ १९८॥

च्युतः स्वधर्मात्कुलिकः स्तावको हीनसेवकः ।
पित्रा विवदमानश्च भेदकृच्चेत्यसाक्षिणः ॥ १८७ ॥*
असाक्षिणो ये निर्दिष्टा दासनैकृतिकादयः ।
कार्यगौरवमासाद्य भवेयुस्ते ऽपि साक्षिणः ॥ १८८ ॥
साहसेषु च सर्वेषु स्तेयसंग्रहणेषु च ।
पारुष्ययोश्चाप्युभयोर्न परीक्षेत साक्षिणः ॥ १८९ ॥*
तेषामपि न बालः स्यान्न स्त्री नैको न कूटकृत् ।
न बान्धवो न चारातिर्ब्रूयुस्ते साक्ष्यमन्यथा ॥ १९० ॥
बालो ऽज्ञानादसत्यात्स्त्री पापाभ्यासाच्च कूटकृत् ।
विब्रूयाद्बान्धवः स्नेहाद्वैरनिर्यातनादरिः ॥ १९१ *
उभयानुमतो यः स्याद्द्वयोर्विवदमानयोः ।
असाक्षिको ऽपि साक्षित्वे प्रष्टव्यः स्यात्स संसदि ॥ १९२ ॥*
यस्त्वात्मदोषभिन्नत्वादस्वस्थ इव लक्ष्यते ।
स्थानात्स्थानान्तरं गच्छेदेकैकं चानुधावति ॥ १९३ ॥*

---

after १९२. असाक्ष्येको ऽपि Vulg. ॥ १९२ ॥ ०दुष्टत्वाद० Vulg. and Vîramitrodaya. १९३ b. om. A. कासत्य० L and Vîram-

---

श्लोकावेतौ निगदव्याख्यातौ दासनैकृतिकादिषु प्रतिषेधोत्सर्गस्य गौरवाद्यपेक्षया विवक्षितार्थाविति ॥ १९० ॥ १९१ ॥

यत्रैकस्योभयानुमतस्य विशिष्टविषयसंसदि जनप्रत्यक्षं प्रष्टव्यमनुज्ञातम् ॥ १९२ ॥

भिन्नवृत्तासमावृत्तजडतैलिकमूलिकाः ॥ १८२ ॥*
भूताविष्टनृपद्विष्टवर्षनक्षत्रसूचकाः ।
अघशंस्यात्मविक्रेतृहीनाङ्गभगवृत्तयः ॥ १८३ ॥*
कुनखी श्यामदन्तश्च मित्रध्रुक्शठशौण्डिकाः ।
ऐन्द्रजालिकलुब्धोग्रश्रेणीगणविरोधिनः ॥ १८४ ॥*
वधकश्चर्मकृत्पङ्गुः पतितः कूटकारकः ।
कुहकः प्रत्यवसितस्तस्करो राजपुरुषः ॥ १८५ ॥*
मनुष्यपशुमांसास्थिमधुक्षीराम्बुसर्पिषाम् ।
विक्रेता ब्राह्मणश्चैव द्विजो वार्धुषिकश्च यः ॥ १८६ ॥*

°शौण्डिकाः॥ Vulg. ॥१८२॥ L. y. C. b. insert १८४ b. before १८३, b. श्यावदश्चित्रि° Vulg. ॥ १८४ ॥ Vulg. places १८८ and १८९

तैलिकः चक्रादितैलिकचाक्रिकः। मूलिको मूलद्रव्यविक्रयजीवन इति ॥ १८२ ॥

तत्र भूताविष्टः सग्रहः। नृपद्विष्टो राजद्विषः। वर्षनक्षत्रसूचकः सांवत्सरसूचकः। अघशंसी पापस्तेनो हिंस्रो वा। आत्मविक्रेता धनेन दासत्वमुपगतः। हीनाङ्गो बाहुपादहीनः। भगवृत्तिः स्त्रीजीवनः। मुखभगो वा ॥ १८३ ॥

उग्रः क्रूरः। क्षत्रियाद्वा शूद्रायां जातः। वधकः सौनिकः। चित्रकृल्लेख्यक्रियोपजीवी।...पतितः पातकी। कूटकारकः कूटलेख्यककार्षापणादिकर्ता। कुहको मन्त्रौषध्याद्युपाश्रयाद्वशीकरणादिकर्ता। प्रत्यवसितः प्रव्रज्याप्रत्यावृत्तः। तस्करश्चौरः। राजपुरुषः सेवक इति ॥ १८४ ॥ १८५ ॥

निगदव्याख्याव्याख्यातौ श्लोकौ। स्तावकस्तु नग्नाचार्यजातीयः।... ॥ १८६ ॥ १८७ ॥

नास्तिकव्रात्यदाराग्नित्यागिनो ऽयाज्ययाजकाः।
एकस्थालीसहायारिचरज्ञातिसनाभयः ॥ १८० ॥*
प्राग्दृष्टदोषशैलूषविषजीव्यहितुण्डिकाः।
गरदाग्निदकीनाशशूद्रापुत्रौपपातिकाः ॥ १८१ ॥*
क्लान्तसाहसिकश्रान्तनिर्धनान्त्यावसायिनः।

---

सहायाश्च वरज्ञातिसनाभयः C. y. L. b. β; ॰जाति॰ B. ॥ १८० ॥ प्राग्दृष्ट-दोषः Vulg. शूद्रापुत्रोपनायिनः B. b. β. C. y; ॰पातिताः L; शूद्री-पुत्रोपयाजिकाः A. See, however, the Comm. ॥ १८१ ॥ निर्धनन्त्या॰ B. β. y; निर्धूतान्त्या॰ L. b; निर्धान्तान्त्या॰ A. See the Comm.

---

तत्र नास्तिको मिथ्यादृष्टिः। व्रात्यो ऽकृतसंस्कारः। दाराग्नित्यागिनो धर्मभार्यावैतानाग्नित्यागिनः। अयाज्ययाजको निन्दितयाजकः। एकस्थाली-सहभोजनः सहायः। अरिः शत्रुः। चरो राजनियुक्तः। ज्ञातिर्बन्धुः। सनाभिः सोदर्य इति ॥ १८० ॥

तत्र प्राग्दोषो यस्य स प्राग्दृष्टदोषः। प्राग्जन्माशुभदोषकर्मपरिणाम-प्राप्तरोगचिह्नः।...स्तेनादिदृष्टदोषो ऽपीति। शैलूषो नट इति। विषजीवी विषक्रेता विक्रेता वा। आहितुण्डिकः सर्पादिदन्दशूकग्राही। गरदो द्वेषसंबन्धाद्विषस्य दाता। अग्निदो गृहादिदाहकः। कीनाशः शूद्रः कदर्यो वा। शूद्रापुत्रः शूद्रीपुत्रः। औपपातिकः उपपातकसंयोगात् ॥ १८१ ॥

तत्र क्लान्तः खिन्नः। साहसिकः प्रसह्यायुक्तकारी। श्रान्तो निःसङ्गः। निर्धनो द्यूतादिव्यसनदोषाद्धृतसर्वस्वः। अन्त्यावसायी चाण्डालः। भिन्नवृत्तो मिथ्यादृष्टिः। असमावृत्तो ब्रह्मचारी प्राक् स्नानात्। जडो निरिन्द्रियः।

न दृष्टदोषाः प्रष्टव्याः साक्षिणः प्रतिदूषिताः ॥ १७७ ॥
दासनैकृतिकाश्राद्धवृद्धस्त्रीबालचाक्रिकाः ।
मत्तोन्मत्तप्रमत्तार्तकितवग्रामयाजकाः ॥ १७८ ॥*
महापथिकसामुद्रवणिक्प्रव्रजितातुराः ।
व्यङ्गैकश्रोत्रियाचारहीनक्लीबकुशीलवाः ॥ १७९ ॥*

---

दूषिताः ॥ Vulg. The same reading is found, Manu VIII. 64. ॥ १७७ ॥ Vulg. inserts the following after १७७ न साक्षी नृपतिः कार्यो न कारुककुशीलवौ । See Manu VIII. 65. दासनैकृतिकश्रान्त° Vulg. The Vîramitrodaya (p. 157) has °काश्रान्त, like A. प्रव्रजितान्त्यगाः । Vulg. ॥ १७९ ॥ एकस्थानी-

---

किंतु यत्र यत्र साक्षिप्रमाणावतारः । तत्रापि यथोच्यमाना अर्थसंबन्धिप्रभृतयः साक्षिणो न भवन्ति ।...आप्तः...स्वकुल्यस्त्वोच्यते । तथा सहाया इति एकार्थसंभूयकारिणः । वैरी शत्रुः । दृष्टदोषस्तु अन्यकार्येषु कूटसाक्षित्वादिनापि ज्ञायते ।...॥ १७७ ॥

तत्र दासो गृहजातः । नैकृतिकः छलव्यवहारी । अश्राद्धो न श्राद्धमर्हतीति । दुर्बलादिर्वृद्धः । संव्यवहारायोग्यो लुप्तस्मृत्यादिकरणत्वात् । उन्मत्तो वायुदोषात् । प्रमत्तः प्रमादशीलः । आर्तः व्यसनार्तः । कितवो द्यूतकारः । ग्रामयाजकः ग्रामर्त्विक् । महापथिकः दीर्घाध्वगः । सामुद्रो वणिक् समुद्रयात्रानिरतः । प्रव्रजितो भिक्षुः । आतुरो रोगी । व्यङ्गः अङ्गहीनः । एकः एक एव । श्रोत्रियः छान्दसः । आचारहीनः प्रच्युतः स्वधर्मात् । क्लीबः षण्ढः । प्रजननासमर्थः । कुशीलवश्चारण इति ॥ १७८ ॥ १७९ ॥

असाक्षिप्रत्ययास्त्वन्ये षड्विवादाः प्रकीर्तिताः।
लक्षणान्येव साक्षित्वे येषामाहुर्मनीषिणः॥१७२॥*
उल्काहस्तो ऽग्निदो ज्ञेयः शस्त्रपाणिस्तु घातकः।
केशाकेशीगृहीतश्च युगपत्पारदारिकः॥ १७३ ॥*
कुद्दालपाणिर्विज्ञेयः सेतुभेत्ता समीपगः।
तथा कुठारपाणिश्च वनच्छेत्ता प्रकीर्तितः॥१७४॥*
प्रत्यक्षचिह्नो विज्ञेयो दण्डपारुष्यकृन्नरः।
असाक्षिप्रत्यया ह्येते पारुष्ये तु परीक्षणम्॥१७५॥*
कश्चित्कृत्वात्मनश्चिह्नं द्वेषात्परमुपद्रवेत्।
हेत्वर्थगतिसामर्थ्यैस्तत्र युक्तं परीक्षणम्॥ १७६॥
नार्थसंबन्धिनो नाप्ता न सहाया न वैरिणः।

पारजायिकः Vulg. ॥ १७३ ॥ समीयतः। A. समीपगः। Vulg. and Vîramitrodaya 223, Raghunandana 54. ॥ १७४ ॥ अत्युग्रचिह्नो Vulg. ॥ १७५॥ हेतूपगति॰ A. ॥ १७६ ॥ कर्तव्या न व्याध्याता न

अत्र विनैव साक्षिभिर्लिङ्गादिषु वक्ष्यमाणेषु षट्सु विवादेषु विनयो भवति॥१७२॥

...प्रत्यक्षचिह्नत्वाच्च विनैव साक्षिभिः प्रत्यये ऽत्र दोष इति। अप्रत्यक्षे त्वत्र चिह्ने ऽपि पारुष्यपरीक्षणमेव न्याय्यं ततः॥ १७२ ॥ १७४ ॥ १७५॥

निगदव्याख्यानश्लोकः हेतुः कारणं तत्सामर्थ्येन परीक्षा कर्तव्या॥१७६॥

...न च वाक्पारुष्यविषयैव केवलमपि साक्षिणां साधुता विवक्षिता।

सुदीर्घेणापि कालेन लिखितः सिद्धिमाप्नुयात् ।
आत्मनैव लिखेज्जानन्न चेदन्येन लेखयेत् ॥ १६७ ॥*
आष्टमाद्वत्सरात्सिद्धिः स्मारितस्येह साक्षिणः ।
आ पञ्चमात्तथा सिद्धिर्यदृच्छोपगतस्य च ॥ १६८ ॥*
आ तृतीयात्तथा वर्षात्सिद्धिर्गूढस्य साक्षिणः ।
आ संवत्सरतः सिद्धिर्वदन्त्युत्तरसाक्षिणः ॥ १६९ ॥*
अथवा कालनियमो न दृष्टः साक्षिणं प्रति ।
स्मृत्यपेक्षं हि साक्षित्वमाहुः शास्त्रविदो जनाः ॥१७०॥*
यस्य नोपहता बुद्धिः स्मृतिः श्रोत्रं च साक्षिणः ।
सुदीर्घेणापि कालेन स साक्षी साक्ष्यमर्हति ॥ १७१ ॥*

---

येत् ॥ L. b. β. y; अजानंस्तु न लेखयेत् ॥ B. C. ॥१६७॥ Instead of १६८, १६९, A has आष्टमाद्वत्सरात्सिद्धिः स्मारितस्येह साक्षिणः । आ पञ्चमात्तथा सिद्धिर्वदन्त्युत्तरसाक्षिणः ॥ १६८-१७० om. B पुंसः स्मृतिः श्रोत्रं च साक्षिणः । A ; बुद्धिः स्मृतिः श्रोत्रं च नित्यशः । Vulg. ॥१७१॥

---

तत्रासौ पञ्चविधः प्रागुक्तसाक्षी तस्य भेदफलविवक्षायेदमुच्यते। सुदीर्घेणापि कालेन लिखितस्य साक्षित्वं तेन च लिपिसमये तेनात्मनैव स्वनाम लेख्यम् । यथा कस्मिंश्चिद्देशे साक्षिणः स्वहस्तेन मतमारोपयिष्यन्ति । इति । लेखकेन विलिखिते आत्मनैव लिखेदयाहं साक्षी देवदत्त इति । न चेल्लिपिज्ञस्तदान्येन लेखयेत् । तस्य कालान्तरं निरूपयतश्चिह्नाय भवतीति ॥ १६७ ॥

इति कालो नियम्यते । एतावतोऽवधेः प्रश्नकालनियमो न दृष्टः साक्षिणं प्रति ॥ १६८ ॥ १६९ ॥ १७० ॥

आभ्यामपि कालनियमप्रतिषेधः साक्षित्वस्यानुस्मरणत्वकालेन क्रियते ।
...॥ १७१ ॥

पूर्वपक्षो भवेद्यस्य भवेयुस्तस्य साक्षिणः ॥ १६३ ॥*
आधर्यं पूर्वपक्षस्य यस्मिन्नर्थे वशाद्भवेत् ।
विवादे साक्षिणस्तत्र प्रष्टव्याः प्रतिवादिनः ॥ १६४ ॥*
न परेण समुद्दिष्टमुपेयात्साक्षिणं रहः ।
भेदयेत्तं न चान्येन हीयेतैवं समाचरन् ॥ १६५ ॥
साक्ष्युद्दिष्टो यदि प्रेयाद्गच्छेद्वापि दिगन्तरम् ।
तच्छ्रोतारः प्रमाणं स्युः प्रमाणं ह्युत्तरा क्रिया ॥१६६॥

---

हते ॥ अधर्मं L. b. C. y; अधर्म्यं B. β. अर्थं Vulg. प्रति वादिता ॥१६४॥ Vulg. inserts the following after १६४ अर्थ्युक्तं हि यदा वाक्यं प्रत्यर्थी प्रतिपद्यते। अन्टतस्यापदेशेन तदाधर्यं प्रचक्षते ॥ जानन्नन्यैर्न लेख-

---

जिह्वाहस्तपादादिकानि तानि परस्त्रीष्वपि दृष्ट्वा कस्मात्स्वगृहं न प्रवेश-यामि। तदेष वृषभो गृहजातो वर्धितो यस्मिन्ग्रामे स्थितस्तस्माद्ग्रामादह-मपि साक्षिचतुष्टयमानीय स्वकीयं संभावयामीति। इत्यत्र पूर्वकालः पक्षो यस्य भवति तस्य साक्षिणः प्रमाणानि भवन्ति।…॥ १६३ ॥

अत्राधरभावो लाघवमसाध्यमानत्वं पूर्वपक्षस्य यस्मिन्भवति विवादे उत्तर-पक्षो गरीयान् साध्यास्तदा साक्षिणः। प्रतिवादिना प्रष्टव्याः।…॥१६४ ॥

तत्र यः परोद्दिष्टं साक्षिणं रहसि संभाषेतासौ हीयेत भेदयंश्च तर्जुन-भर्त्सनादिना लौकिकभेदेन अर्थसंप्रदानेनेति ॥ १६५ ॥

अत्र यदि साक्ष्युद्दिष्टो म्रियते देशान्तरं वा गच्छेत्। तस्य मुमूर्षोर्यियासोर्वा तदर्थं पृष्टस्यार्थिना उद्देशश्रुतार्थस्य वा स्वयं विश्रावयतो वचनं श्रुतं यैस्ते उत्तरसाक्षिणः प्रष्टव्या इति। अयं च प्राक्सूत्रस्थानोक्त उत्तर-साक्षी प्रष्टव्यः ॥ १६६ ॥

स्तेनाः साहसिकाश्चण्डाः कितवा वधकाश्च ये।
असाक्षिणस्ते दुष्टत्वात्तेषु सत्यं न विद्यते॥ १५९॥*
राज्ञा परिगृहीतेषु साक्षिष्वेकार्थनिश्चये।
वचनं यत्र भिद्येत ते स्युर्भेदादसाक्षिणः॥ १६०॥
अनिर्दिष्टस्तु साक्षित्वे स्वयमेवैत्य यो वदेत्।
सूचीत्युक्तः स शास्त्रेषु न स साक्षित्वमर्हति॥ १६१॥*
यो ऽर्थः श्रावयितव्यः स्यात्तस्मिन्न सति चार्थिनि।
क तद्वदतु साक्षित्वमित्यसाक्षी मृतान्तरः॥ १६२॥*
द्वयोर्विवदतोरर्थे द्वयोः सत्सु च साक्षिषु।

---

न्तरसाक्षी एव विस्फुटीकरणार्थमुदाहरणमाचक्ष्यते।...यो ऽर्थः श्रावयितव्यः साक्षिणो भवति। एवं यथा त्वया प्रत्यक्षेण मम प्रत्यक्षमेते द्रम्मा गृहीताः। एतदीदृशं साक्षित्वमसौ साक्षी तस्मिन्नसति चार्थिनि मृते कस्याग्रे वदतु। तदा तस्मिन्नसति तं कूटसाक्ष्यदातारं को दण्डयतु। अस्मादनवस्थाभयान्मृतान्तरसाक्षी अप्रमाण उक्तो मुनिना। ... ॥ १५८॥ १५९॥ १६०॥ १६१॥ १६२॥

...यदा कश्चित्समागत्यैवं वदति। यथा यो ऽयं वृषभस्त्वत्पार्श्वे तिष्ठति। स मदीयं तृतीयं वर्तते। मत्सकाशाच्चौरैर्हृतस्तस्यानेन सह सप्त गोरूपाणि गतानि। तानि यदि तव पार्श्वे लभ्यानि। तथा च रक्तवर्णपुण्ड्रकचमरपुच्छशुक्लपादाद्यभिज्ञानस्पष्टीकृतं चतुर्भिः साक्षिभिरात्मीयमहं संभावयामि। तच्छ्रुत्वा द्वितीयेनाभिहितम्। इह प्रजापतेः सृष्टिं कुर्वत अनेकानि द्विपदचतुष्पदानि समानाभिज्ञानानि भवन्ति। यदि सदृशाभिज्ञानमात्रेण लभ्यते ततः स्वकीयमलगः...यान्यभिज्ञानानि भूकर्णनासिकाक्षिदन्त-

श्रेणीषु श्रेणिपुरुषाः स्वेषु वर्गेषु वर्गिणः।
बहिर्वासिषु बाह्याः स्युः स्त्रियः स्त्रीषु च साक्षिणः॥१५५॥*
श्रेण्यादिषु च सर्वेषु कश्चिचेद्द्वेष्यतामियात्।
तेभ्य एव न साक्ष्यं स्याद्द्वेष्टारः सर्व एव ते॥१५६॥*
असाक्ष्यपि हि शास्त्रे ऽस्मिन्दृष्टः पञ्चविधो बुधैः।
वचनाद्दोषतो भेदात्स्वयमुक्तिर्मृतान्तरः॥१५७॥*
श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजिता नराः।
असाक्षिणस्ते वचनान्नात्र हेतुरुदाहृतः॥१५८॥*

---

द्वेष्टृताम् L; द्विष्यताम् B. b. β. C. y. ॥१५६॥ शास्त्रेषु Vulg. ॥१५७॥ Vulg. inserts the following after १५७ श्रोत्रियाद्या वचनतः स्तेनाद्या दोषदर्शनात्। भेदाद्विप्रतिपत्तिः स्याद्विवादे साक्षिणां यतः॥ स्वयमुक्तिरनिर्दिष्टः स्वयमेवेत्य यो वदेत्। मृतान्तरो ऽर्थिनि प्रेते मुमूर्षुश्राविता-

---

श्रेणीषु अष्टादशप्रकृतिनिबद्धासु ये श्रेणिपुरुषास्ते तन्मध्यपतितत्वात्तादृशा एव साक्षिणः। प्रमाणं स्वेषु वर्गेषु भाटवर्गेषु भाटिका इत्यादयः। बहिर्वासिषु अन्यजातिषु बाह्या एव। स्त्रीषु च व्यवहारोत्पत्तौ स्त्रिय एव साक्षित्वमर्हन्ति। एतेषु साक्षिपरीक्षा नास्ति॥ १५५॥

अत्र श्रेण्यादिषु वर्गेषु यदि कश्चिद्राजगामित्वात्। वाक्पारुष्यदण्डपारुष्यदोषाद्वा। द्वेष्यतां गच्छेत्। ते बहवो ऽपि द्वेष्टृत्वात्तस्य साक्षित्वं नार्हन्ति। यतो द्वेष्टारः सर्व एव ते तस्येति। इति ऋणादाने साक्षिभेदो दशमः॥ १५६॥

स्वयमुक्तिर्मृतान्तर इत्यादि ते प्रत्येकं व्याख्यास्यन्ते॥ १५७॥

इत्यत्र व्याख्यानं कुर्वता मुनिनैव परिस्फुटं व्याख्या कृता। केवलं मृता-

षडेते पुनरुद्दिष्टाः साक्षिणस्त्वकृताः स्वयम्।
ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणाम्॥१५१॥*
कार्येष्वभ्यन्तरो यः स्यादर्थिना प्रहितश्च यः।
कुल्याः कुलविवादेषु भवेयुस्ते ऽपि साक्षिणः॥१५२॥*
कुलीना ऋजवः शुद्धा जन्मतः कर्मतो ऽर्थतः।
त्र्यवराः साक्षिणो ऽनिन्द्याः शुचयः शुद्धबुद्धयः॥१५३॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये चाप्यनिन्दिताः।
प्रतिवर्णं भवेयुस्ते सर्वे सर्वेषु वा स्मृताः॥ १५४॥

---

साक्षिणः समुदाहृताः॥ ग्रामश्च etc. Vulg. ॥१५१॥ सर्वेषु Vulg.

---

षडेते पुनरकृता अपि साक्षिणो भवन्ति। तद्यथा ग्राममध्ये वृत्तप्रयोजनस्य ग्राम एव साक्षी। धर्माधिकरणवृत्तस्य प्राड्विवाक आसनस्थः। राज्ञः पुरतो वृत्तस्य राजा। तथा यः कार्यस्याभ्यन्तरः। तथा कार्यार्थमर्थिना यः प्रहितः। तथा कुलविवादेषु कुलहरकमेव (?) साक्षी। एते षडपि साक्षिण अकृता अपि भवन्ति। एवं कृताकृतभेदेनैकादशविधः साक्ष्युक्तः॥ १५१॥

कुलीनाः कुलोत्पन्नाः। ऋजव आर्जवस्वभावाः। तथा जन्मतः कर्मत अर्थतश्च शुद्धा ये भवन्ति। शुचयो ये त्वलुब्धाः। शुद्धबुद्धयः प्रतिष्ठितशास्त्रबुद्धयः। अनिन्द्या लोकप्रसिद्धाः। एवंविधाः साक्षिणो भवन्ति। त्रयाणामधो द्वावेको वा उभयानुमतः। अधिकास्तु भूवादे। अन्यत्र कार्यविस्तरानुसारेण॥ १५२॥ १५३॥

एते चत्वारो ऽपि वर्णाः स्वकीयवर्णसाक्षिणो भवन्ति। अथवा सर्ववर्णेषु सर्वे वर्णा भवन्ति॥१५४॥

संदिग्धेषु च कार्येषु द्वयोर्विवदमानयोः ।
श्रुतदृष्टानुभूतार्थात्साक्षिभ्यो व्यक्तिदर्शनम् ॥ १४७ ॥*
समक्षदर्शनात्साक्षी विज्ञेयः श्रोत्रचक्षुषोः ।
श्रोत्रस्य यत्परो ब्रूते चक्षुषोर्दर्शनं स्वयम् ॥ १४८ ॥
एकादशविधः साक्षी शास्त्रदृष्टो मनीषिभिः ।
कृतः पञ्चविधस्तेषां षड्विधो ऽकृत उच्यते ॥ १४९ ॥*
लिखितः स्मारितश्चैव यदृच्छाभिज्ञ एव च ।
गूढश्चोत्तरसाक्षी च साक्षी पञ्चविधः कृतः ॥ १५० ॥

---

कर्मकृत् ॥ b. L. y. C; कार्यकर्मवत् । B. β, ॥ १४८ ॥ शास्त्रे Vulg. ॥ १४९ ॥ अकृतः षड्विधस्त्वेषां सूरिभिः परिकीर्तितः । त्रयः पुनरनिर्दिष्टाः

---

यानि कानिचित्संदिग्धानि कार्याणि तेषु द्वयोर्वादिप्रतिवादिनोरपि विवदतोरिति...विवादं कुर्वतोः साक्षिभ्यः सकाशात्कार्यव्यक्ति दर्शनं स्फुटीभवति । यतस्ते उदासीनाः श्रुतार्थत्वादनुभूतार्थत्वाद्वा यत्साक्षिकाले किमपि ब्रुवते । तस्माद्व्यक्तिदर्शनं कार्यनिर्णयो भयतीत्यर्थः ॥ १४७ ॥

प्रत्यक्षदर्शनात्साक्षीत्युच्यते । तत्राक्ष्णोर्यत्तेषां प्रतिपत्तिसानुभवं प्रयोजनं तत्प्रत्यक्षम् । तेषां च श्रोत्रस्य यच्छब्दश्रवणं तत्परत अर्थसानुभवम् । यत्तु चक्षुःसानुभवं तत्स्वयमेवार्थदर्शनसानुभवमिति ॥ १४८ ॥

अत्रैकादशविधाः साक्षिणो दृष्टाः । तेषां च पञ्च साक्षिणः कृता भवन्ति । ते च प्रत्येकमुच्यन्ते ॥ १४९ ॥

लिखितः पत्रारूढः । स्मारितः कर्णकथितः । यदृच्छाभिज्ञो ऽनुरोधितागतः कृतः । गूढो कुट्यन्तरितश्रोता । उत्तरसाक्षी साक्षिजल्पितश्रोता । एवं पञ्चविधः साक्षी कृतो भवति ॥ १५० ॥

विप्रत्यये परीक्ष्यं तत्संबन्धागमहेतुभिः ॥१४४॥
लिखितं लिखितेनैव साक्षिमत्साक्षिभिर्हरेत्।
साक्षिभ्यो लिखितं श्रेयो लिखितान्न तु साक्षिणः॥१४५॥
छिन्नभिन्नहृतोन्मृष्टनष्टदुर्लिखितेषु च।
कर्तव्यमन्यल्लेख्यं स्यादेष लेख्यविधिः स्मृतः ॥१४६॥*

Vulg. ॥ १४६ ॥ श्रुतदृष्टानुभूतत्वात् Vulg. ॥ १४७ ॥ चक्षुषः कार्य-

तत्र संबन्धः। अन्वयजातिवैवाह्या मैत्र्यैकव्यवहारतः। युज्यते द्रव्यसंबन्धो निःसंबन्धो न युज्यते ॥ अथागमः। अन्वयक्रीतमाधत्तं लब्धिप्रीत्याप्तिलक्षणैः। सागमं षड्भिरेतैः स्याद्विनात्वेर्निरागमम्॥ अथ हेतुः। वितर्के च निमित्ते च हेतुशब्दः प्रयुज्यते। प्रमाणं संशयोत्तीर्णं सनिमित्तं न चान्यथा ...॥१४४॥

...धनिकस्य प्रवेशिते धने तेनैव हस्तीकृतेन ऋणी तत्पत्रसंबन्धं निर्हरेत्। यदि पुनर्धनी तस्य लिखितस्य हृतनष्टदग्धादि कारणमुपन्यस्यति। ततस्तदीयं प्रणष्टविशुद्धिपत्रं ग्राह्यम्। अत इदमुक्तं लिखितं लिखितेनैव हरेदिति। तत्र पुनः प्रथमसंव्यवहारकरणं साक्षिमत्संजातम्। अत्र ऋणे विशोध्यमाने तैरेव साक्षिभिः प्रत्यक्षीकृतैस्तद्दणं निर्हरेत्।...॥ १४५ ॥

...तेषु दग्धभिन्नहृतच्छिन्ननष्टदुर्लिखितदोषैरवसन्नभूतेषु पुनरपि कालान्तरे कालदायकग्राहकद्रव्यफलप्रमाणादीनामविस्मरणार्थं कर्तव्यमन्यल्लेख्यं स्यादित्युक्तं महर्षिणा। तच्च तेन निश्चितं कर्तव्यमिति धनिकर्णिकयोर्विशेषनामोच्चारणं न कृतं यत्। यथासंभवकृतलेख्यप्रमाणार्थं यदि ऋणी प्रत्यक्ष एव तिष्ठति। तदासौ धनिनान्यलेख्यकरणाय विधारणीयः। तेनाप्यवश्यमेव करणीयमन्यल्लेख्यं स्यादिति।...यद्यसौ ऋणी समागतस्तत्सुतो वा वदति न मयैतत्कृतं लेख्यं कूटमन्येन कारितम्। तदास्यैव श्लोकस्योत्तरार्धमाश्रयेत्। इति ऋणादाने लेख्यभेदो नवमः॥ १४६ ॥

यत्र स्यात्संशयो लेख्ये भूताभूतकृते क्वचित्।
तत्स्वहस्तक्रियाचिह्नयुक्तिप्राप्तिभिरुद्धरेत् ॥१४३॥
लेख्यं यत्रान्यनामाङ्कं हेत्वन्तरकृतं भवेत्।

---

यथा सत्यमिदमस्ति। मया तत्पत्रं लिखितमासीत्। किंतु...मया द्रव्यं न गृहीतम्। पत्त्रं च प्रमादात्पार्श्वे स्थित्वा मया न पाटितम्। तावत्कतिपयदिवसागमेनैवास्य पित्रा उक्तो ऽहं यथा तत्त्वदीयमगृहीतार्थं पत्त्रं मया तस्मिन्नेव दिने अनादरेण बहिरेव मुक्तम्। किल निरर्थकत्वात्। अतिप्रयत्नेनान्वेषयतापि मया तत्क्वचिन्न दृष्टम्।...अतो ऽहमेव विशुद्धिपत्त्रं प्रयच्छामि। एवमुक्त्वा तेनास्य पित्रा तत्काल एव मम प्रणष्टिविशुद्धिपत्त्रं दत्तं तच्च मयातिप्रयत्नेन तत्काले ऽमुकायतने वसता तत्रैवामुकपार्श्वे धवलगृहमञ्जूषायां स्थापितम्। इत्येवं प्रतिवादिनोत्तरे दत्ते तदा...तद्दानार्थं तस्य सतस्तत्कालहरणं देयम्। असतस्तद्द्रष्टृदर्शनं प्रमाणमित्यादिकं प्रतिवादिनो ऽपि सोपयोगार्थमिति ॥ १४२ ॥

यत्र लेख्ये भूताभूतकृते ऽर्थे विप्रत्ययो भ्रान्तिर्भवेदिति। तत्परीक्ष्यं स्वहस्तक्रियाचिह्नयुक्तिप्राप्तिभिरिति। स्वहस्तप्रतिविश्वासकेन क्रियाया तदारूढसाक्षिभिश्चिह्नेन लेखकलिपिचिह्ननिरूपणेन। युक्त्या चानया युज्यमानतार्थता युक्तिरयुक्तिस्तद्विपर्यये। पुरुषस्य दारिद्रे द्रम्मलक्षधनिकत्वात्। प्राप्तिर्द्विधा। एका कथमनेन पत्त्रमिदं प्राप्तम्। द्वितीया नष्टतः साक्षोभ्यमाक्षोभ्यं वा। कीदृशास्य प्राप्तिरित्यादि भूताभूतलेख्यसंशयमुद्धरेदिति ॥ १४३ ॥

अत्र अन्यनामरूप अङ्को यस्य लेख्यस्य तदन्यनामाङ्कमुच्यते।...यस्य सत्कं द्रव्यं भवति तस्यैव नाम्ना लिखितं किंतु तस्य पार्श्वादन्येन किमपि क्रीतं लब्धं वा। तस्य तद् द्रव्यं प्रार्थयतः। तत्पत्त्रमन्यनामाङ्कं भवति।...अत्र च संबन्धागमहेतूनां त्रयाणां परीक्षापदकानां कल्याणकृतं श्लोकत्रयमिदमस्ति।

अदृष्टार्थमश्रुतार्थं व्यवहारार्थमागतम्।
न लेख्यं सिद्धिमाप्नोति जीवत्स्वपि हि साक्षिषु॥१४१॥
लेख्ये देशान्तरन्यस्ते दग्धे दुर्लिखिते हृते।
सतस्तत्कालहरणमसतो द्रष्टृदर्शनम्॥ १४२ ॥

रितं तथा। Vulg. ॥ १४० ॥ अश्रुतार्थमविज्ञातं Vulg. ॥ १४१ ॥ हृते B β C ॥ १४२ ॥ हृतेऽन्मिष्ट (न्मष्ट) नष्टेष्वलिखिते च।

गृहीतम्। अथवा श्रावितमेव भूयो भूयः कथितम्। तदेवम्टणिकसंततेः संतानारूढप्रत्ययमेव मृतेष्वपि हि साक्ष्यादिषु सर्वेष्वपि प्रमाणमेवेति॥१४०॥

यत्पुनर्लेख्यमृणिकसंततेः स्वयमदृष्टार्थं स्वकीयपूर्वजेभ्यः सकाशादश्रुतार्थम्। केवलमाचारव्यवहारार्थमेवागतं दृष्टम्। एवंविधं न लेख्यं सिद्धिमाप्नोति। जीवत्स्वपि हि साक्षिषु॥ १४१ ॥

अस्य श्लोकस्यार्थो द्वयोरपि वादिप्रतिवादिनोः सोपयोगः। वादिनस्तावत्। यदा वादिना प्रतिवादी लिखितद्रव्यसंबन्धे पृष्टः। न च तत्पत्त्रं तस्य हस्ते। ऋणी च वदति। दर्शयतु ममायं पत्त्रम्। यदि विद्यमानं स्यात्...तदानयनाय धर्माधिकरणेनावधिर्देयो वा कालहरणं देयम्। अथवेदं पत्त्रं दग्धं हृतं वा। तदा असत अविद्यमानस्य तद्द्रष्टृदर्शितमधि साधुजनसाक्ष्यपेक्षया प्रमाणम्। ते च ते द्रष्टारः साक्षिलेखकाः साधवो यदि जीवन्ति। अथवा केचिदुदासीना आगता यैस्तल्लिख्यमानं दृष्टम्। अविद्यमानं पत्त्रमानीतं च। वादिना किंतु यावद्वाच्यते। तावदङ्कनष्टत्वादक्षरभ्रष्टत्वाद्वा असत्पत्त्रसंदेहमागतं तदा तस्याशोभनस्य ये तत्काललिख्यमानस्य साक्षिलेखकउदासीनादयो द्रष्टारः केचित्। ते ऽङ्कभ्रान्त्यपनोदने नाम वर्णभ्रान्त्यपनोदने वा प्रमाणं भवन्ति। एवमयं वादिसंबध्यमानः श्लोको ऽभिहितः। इदानीं प्रतिवादिसंबध्यमानो ऽयमेवोच्यते। यदा... पत्त्रारूढपितृनामजातिद्रव्यप्रमाणर्णिमतसाक्षिलेखाद्यङ्गपरिपूर्णलिखितबलात् कश्चिदृणी धर्माधिकरणमानीतः। तेन चोत्तरकाले ऽभिहितम्।

मत्ताभियुक्तस्त्रीबालबलात्कारकृतं च यत्।
तदप्रमाणं लिखितं भीतोपधिकृतं तथा॥१३७॥*
मृताः स्युः साक्षिणो यत्र धनिकर्णिकलेखकाः।
तदप्यपार्थं लिखितं न चेदाधिः स्थिराश्रयः॥१३८॥
आधिस्तु द्विविधः प्रोक्तो जङ्गमः स्थावरस्तथा।
सिद्धिरस्योभयस्यास्य भोगो यद्यस्ति नान्यथा॥१३९॥*
दर्शितं प्रतिकालं यत्प्रार्थितं श्रावितं तथा।
लेख्यं सिध्यति सर्वत्र मृतेष्वपि हि साक्षिषु॥१४०॥*

---

A. See, however, the Comm. Vulg. inserts the following after १३८ यदि लब्धं भवेत्किंचित्प्रज्ञप्तिर्वा कृता भवेत्। प्रमाणमेव लिखितं मृता यद्यपि साक्षिणः॥ यच्छ्रावितं स्या-

---

अत्र मत्तेन लिखितं तथा ब्रह्महत्याद्यभिशस्तेन यत्। स्त्रिया यत्। बालेन च कृतं यत्। तथा ह्यर्थसंबन्धेन विनैव बलात्कारेण कारितं यत्। तथैव भीतोपधिकृतं यत्कारणमिति।...तत्कारणमप्रमाणमिति॥१३७॥

यत्र पत्रे धनिकर्णिकसाक्षिलेखकाः सर्वे ऽपि मृताः। तदप्यप्रमाणं किलान्यथा तादृशैः पत्रैर्जनस्य कूटप्रपञ्चकृतैर्विश्वासः संभवति। एतदर्थमुक्तम्। यत्र तु लेख्ये आधिर्भुक्तिसहितः स्थिरीकरणचिह्नभूतस्तिष्ठति। तत्तेषु सर्वेष्वपि मृतेष्वपि प्रमाणमेवेति॥१३८॥

यस्मिन्नत्र जङ्गमः स्थावरो वा प्रकारद्वयमध्ये आरूढ एवाधिर्न तु भुक्तः। ततो भोगेन विना तयोर्लिखितमात्राधिचिह्नयोरपि सिद्धिरपि नास्तीति॥१३९॥

अत्र धनिकसंतत्या ऋणिकसंततेर्यत्प्रतिकालं दर्शितम्। यदा यदा किंचित्फलं प्रार्थ्यते। यथा यत्प्रतिकालं श्रावितं कालान्तरे स्वान्धकं वा

जातिसंज्ञाधिवासानामागमो लेख्यतः स्मृतः ॥१३४॥
लेख्यं तु द्विविधं ज्ञेयं स्वहस्तान्यकृतं तथा।
असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोः ॥१३५॥*
देशाचाराविरुद्धं यद्व्यक्ताधिविलक्षणम्।
तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरम् ॥१३६॥*

---

Vulg. ॥ १३४ ॥ व्यक्ताविकृतिलक्षणम्। Vulg.; व्यक्ताधिविधिलक्षणम्। Vulg. व्यक्तावाधि Mitâksharâ, Vîramitrodaya. १३७ om.

---

तत्पञ्चारूढपत्त्रम्। नवाङ्गसंपूर्णमागमशब्देन सूचितम्। यथोक्तं त्रिषष्टिलेख्यप्रकरणकारककल्याणभट्टेन। तत्कालिकराजधनिकर्णिकसाक्षिलेखकैरङ्गैः पञ्चभिरेतैः पत्त्रं पञ्चारूढं भवति। तथा च कालप्रदेशधनिकर्णिकवित्तसंख्यासोपाश्रयर्णिकमतसाक्षिसलेखकान्तैरङ्गैरेभिरप्यचलक्रमस्थैः कल्याणभट्टगदितं भवतीह पत्त्रम्। इति ऋणादाने व्याधिभेदो ऽष्टमः। अथ लेख्यभेदो भवति ॥ १३४ ॥

अत एकं स्वहस्तकृतं द्वितीयमन्यहस्तलिखितम्। एवं तावद्द्विविधमेवोक्तम्। एतयोस्तु यत्स्वहस्तलिखितं तत्साक्षिभिर्विनापि प्रमाणम्। यत्त्वन्यहस्तलिखितं तत्साक्षिसहितं प्रमाणम्। स्वहस्तलिखितस्यैतन्माहात्म्यं यद्विनापि साक्षिभिस्तत्प्रमाणमेवेति। यथोक्तम्। सिद्धिर्देशस्थितेस्तयोस्तद्देशाचारमाहात्म्यं दर्शितम्। यस्मिन्देशे या देशस्थितिरालेख्यसिद्धिरिति ॥१३५॥

अत्र लेख्यप्रमाणमुक्तम्। तदिह यल्लेख्यमदेयदानलेखनेन। अस्थानोपरि लिखितादिना च। देशाचारविरोधेन वर्जितं यत्तद्देशाचाराविरुद्धम्। यत्र लेख्ये व्यक्तमाधिप्रतिभूसुस्थलक्षणं यत्र च पत्त्रलिखितक्रमः। अविलुप्त अविनष्टः। यत्राक्षराण्यपि अविलुप्तानि। लेख्यं प्रमाणमिति। तथा चाह कल्याणो ऽपि। लिखितं लक्षणज्ञेन युक्तिन्यायैकवर्त्मना। अर्थतो ग्रन्थतश्चैव मन्तव्यमव्यभिचारात् ॥ १३६ ॥

कृतकालोपनेयश्च यावद्देयोद्यतस्तथा ॥१२४॥
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च ।
उपचारस्तथैवास्य लाभहानिर्विपर्यये ॥१२५॥*
प्रमादाद्धनिनस्तद्वदाधौ विकृतिमागते ।

---

एको दीयमाने धने प्राप्तकालावधौ आधिपालैः समर्पणीयः । द्वितीयस्तु अतिपुष्यमाणो धनिना एवं विचार्य गृह्यते । यथा पञ्च वर्षाणि दश वा इयन्तं कालं...न मोचनीयः । तत्परतो ऋणिके । अयमपि कृतकालोपनेय उच्यते । एष द्विविधो ऽपि व्याख्यातः । यावद्देयोद्यत उच्यते । अस्मिन्दिवसे गृहीतं द्रव्यम् । तस्मिन्नेव वृद्धिफलभोग्यन्यायेन समर्पितः । यावद्देयं धनं जातं तावदेवं तत्क्षणं समर्पितः । यथा यावद्देयं धनं तिष्ठति तावदपरिमितकालमपि भोक्तव्यः । अनेन क्रमेण य उद्यतः समर्पितः स यावद्देयोद्यताधिरुच्यते । एवं कृतकालोपनेयो यावद्देयोद्यतश्चाधिर्द्विविधो ऽपि सविस्तरं व्याख्यात इति ॥ १२४ ॥

स पुनराधिरन्यप्रकारेण द्विविधः । एको गोप्यो...रक्षणीय इत्यर्थः द्वितीयो भोग्यः । प्रकाश एव गृह्यते चादिः । उपचारस्तथैवास्येति । अस्य द्विविधस्याप्याधेर्गुप्तस्य कालान्तरोपश्रयोपचारः । भोग्यस्य फलोपश्रयोपचारः । विपर्यये फलहानिरिति । विपरीतार्थो विपर्यय उच्यते । यतो गोप्यस्य भोगः क्रियते ततस्तस्य कालान्तरे फलहानिर्भवति । अथ प्रकाशस्य भोगः क्रियते । ततस्तस्य सस्यनिवासादिफलहानिर्भवति । इत्येवं विपर्यय इति ॥ १२५ ॥

अत्र यथा लाभहानिर्विपर्यये भवति तद्वद्धनिनः प्रमादाधिनाशे मूलनाशो ऽपि भवति । तत्र प्रमादः । चलादिवृषभादिकस्याकालवाहनमतिवाहनं चेत्यादि गोप्याधेश्च धनिकप्रमादः प्रकाशमोचनम् । इत्यादिना धनिप्रमादेन आधिनाशे संजाते विकृतिं वा प्राप्ते काणकूटभयादौ मूलनाशो

प्रयुक्तं साधयेदर्थं पञ्चकेन बलेन च ॥ १२२ ॥*
यः स्वकं साधयेदर्थमुत्तमर्णो ऽधमर्णकात्।
न स राज्ञा निषेधव्य ऐहिकामुष्मिकार्थतः ॥१२३॥*
अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः।

---

१२२, १२३ om. Vulg. १२७—१२९ om. Vulg. After 130

---

मेव सोपयोगं न सर्वत्रिकम्। तदुक्तं धर्मेण तत्नाम्ना प्रियधर्मस्मरणाय प्रथममर्थं साधयेत्। तेनासिध्यमानं भेदेन राजकीयसभाभयदर्शनेन व्यवहारेण। तथा प्रदानलोभं दर्शयित्वा छलेन। तथा दण्डेन स्वकीयबलेनैव पादबन्धनाचारीप्रक्षेपादिना। एवमेतैः सामादिभिर्धर्मादिभिरुपायैः स्वकीयमर्थं साधयेत्। यथैतदाचरितमुक्तम्। तच्चरिर्गतिभक्षणयोरित्यस्य धातोर्भक्षणार्थरूपमिदम्। चरितं भक्षितम्। न चरितमभक्षितम्। अभोजनमित्यर्थः। तद्वाभोजनं तस्यैव साधनार्थं यः परकीयधनं गृहीत्वा न प्रयच्छति। यः पुनर्धनी स्वकीयमर्थमुद्ग्राहयति तस्याभोजनेन प्रायश्चित्तं नास्ति। केवलं...बालस्याप्युपरोधनार्थं वाचरणात्। प्राणान्तिकभयदर्शनार्थं वा। धनी स्वकीयभृत्यपुत्रेणाभोजनं कारयति स्वयं करोति वा। अयमेवैको विषयो धनिनः स्वयं भोजनेन सर्वत्रेति ॥ १२२ ॥

ये शठा दुष्टाः परकीयं धनं गृहीत्वा भक्षयित्वायुध्यमाना राजाश्रिता भूत्वात्मानं रक्षयितुमिच्छन्तो निषेधं कारयन्ति। स्वच्छन्देन व्यवहारेण राज्ञा धनी स्वमर्थं साधयन्न निषेधव्यः। ऐहिकामुष्मिकार्थतः। इत्यैहिकार्थसंव्यवहारभङ्गभयात्। आमुष्मिकार्थं साधुवर्तनभङ्गपातकभयात्। इति प्रतिभूभेदः समाप्तः ॥ १२३ ॥

अधिक्रियत अप्यधनिना संबन्धाधिकारमानीयते। इत्याधिः। स च द्विविधः। चलाधिः स्थिरादिस्वसो ऽपि द्विलक्षणो ज्ञेयः। एकः कृतकालोपनेयः। द्वितीयो यावद्देयोद्यतः। तत्र कृतकालोपनेयो यः द्विप्रकारः।

बहवश्चेत्प्रतिभुवो दद्युस्ते ऽर्थं यथाकृतम्।
अर्थे विशेषिते ह्येषु धनिनश्छन्दतः क्रिया॥१२०॥*
यमर्थं प्रतिभूर्दद्याद्धनिकेनोपपीडितः।
ऋणिकस्तं प्रतिभुवे द्विगुणं प्रतिदापयेत्॥१२१॥*
धर्मेण व्यवहारेण च्छलेनाचरितेन च।

---

following दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा। न तत्पुत्रा ऋणं दद्युर्दद्युर्दानाय ये स्थिताः॥ १२० om. A. See however, the Comm.

---

बहवश्चेत्प्रतिभुवः स्थिताः स्वकीयस्वकीयांशमुपस्थितं द्रव्यं गृह्णन्ति। ततस्ते यथाकृतमृणं तथैव स्वांशस्थितं दद्युः। अथ सामान्यग्राहकत्वेन यदृच्छया दापनीयत्वेन समस्थायकत्वेनाजीवतः श्रेष्ठगामित्वेनार्थो विशेषितो भवति। ततो धनिकच्छन्दतः क्रिया तेषां मध्ये यत्र सुलभं धनं धनी पश्यति। तमेव विहृत्य गृह्णाति। तथा चोक्तमेव सामान्यग्राहपक्षलक्षणविचारप्रकरणे कल्याणभट्टेन। ये जीवन्ति मृतानां हि ये श्रेष्ठा जीवितामपि। धनी तान्स्वेच्छयादत्ते जीवच्छ्रेष्ठानुगामिनः॥ तथा चायमेव महर्षिर्नारदः परं तदा विशेषमिमं वक्ष्यति। दाप्यः पररामेको ऽपि जीवत्स्वविकृतैः कृतम्। प्रेतेषु न तु तत्पुत्रः परणं दातुमर्हति॥ १२०॥

यदा धनिकेनोपपीड्य प्रतिभूरेव धनं ग्राह्यते। तदा ऋणिकः ...प्रतिभुवे द्विगुणं प्रतिदापयेत्।...अथ ऋणिनः प्रत्यक्षस्याप्यविदितमप्यपीडितो ऽपि प्रतिभूरेव साध्याद्विगुणलोभात्स्वयमेव धनं ददाति। तत ऋणिकृतस्य तत्सममेव दद्यान्न द्विगुणम् ...॥ १२१॥

अत्र चाणक्ये सामभेदोपप्रदानदण्डास्वत्वार एव कार्यसाधनोपाया दृष्टाः। अत्रापि त एव चत्वारः केवलमन्यनामभिर्धर्मव्यवहारच्छलबलसंज्ञा निरुक्ताः। अधिकमत्राचरितम्। अभोजनम्। तच्च ऋणोद्ग्राहणविषय-

उपस्थानाय दानाय प्रत्ययाय तथैव च ।
त्रिविधः प्रतिभूर्दृष्टस्त्रिष्वेवार्थेषु सूरिभिः ॥११८॥*
ऋणिष्वप्रतिकुर्वत्सु प्रत्यये वापि हापिते ।
प्रतिभूस्तदृणं दद्यादनुपस्थापयंस्तथा ॥११९॥*

---

शेषस्य यो भवेत् । याच्यमानं न दत्तं चेद्वृद्धिं तत्र विनिर्दिशेत् ॥ प्रत्ययेनाविशोधतः A.; प्रसवे वापियाचिते Vulg., corrected according to Viramitrodaya ॥ ११९ ॥ After ११९ Vulg. inserts the

---

अत्र यदा धनिकेनर्णिको विधृत एवं ब्रूते यथा मया तव किंचिन्न दातव्यम् । धनिकस्तु ब्रूते यद्याचारेण प्रतिष्ठापयामि ततोऽहं गच्छामि । न्यायकरणस्यैवोपस्थानप्रतिभुवं देहि । एवमुक्त्वा ऋणी धनिकस्य यं प्रतिभुवं प्रयच्छति । एवमुक्त्वा यथा अमुकं हि ते मया न्यायोपस्थानं करणीयम् । अस्मिन्नर्थे त्वं मयास्योपस्थानप्रतिभूर्दत्तः । एवमुक्तः स पुरुषो यथा स्थितो धनिकेन च गृहीतः । तदासौ उपस्थान प्रतिभूरित्युच्यते । इदानीं दानप्रतिभूरुच्यते । स च यदा धनिकपार्श्वाद्द्रव्यमृणिको ग्रहीतुमुद्यतो द्वितीयं तृतीयं वा पुरुषं सामान्यग्राहकं स्वांशदायकं वा पाठयित्वा प्रतिभुवं प्रयच्छति । तदासौ द्रव्यदानप्रतिभूः स्थित इत्युच्यते । अयं च द्वितीयः । तथा यदा धनिकेनर्णिको विधृत एवं ब्रूते । यथा मया तव किंचिन्न दातव्यमासीत् । तत्तदा काल एव सर्वं मया प्रवेशितमिति कारणोत्तरं प्रयच्छति मिथ्योत्तरं वा ददाति । ततश्च धनिको वदति । यद्येवं तर्हि…प्रतिभुवं प्रयच्छ । एवमुक्त ऋणी अस्मिन्नर्थे यं पुरुषं प्रत्युपकारणाय तस्य प्रयच्छति स प्रत्ययप्रतिभूरित्युच्यते । इति त्रिविधोऽप्युक्त इति ॥ ११८ ॥

अत्रातिव्याप्त्या ऋणिकभयत्रासजननार्थमेव मुनिना प्रत्ययोपस्थानप्रतिभुवोरपि ऋणदानविधिरुक्तः ।… ॥ ११९ ॥

गृहीत्वोपगतं दद्यादृणिकायोदयं धनी।
अददद्याच्यमानस्तु शेषहानिमवाप्नुयात् ॥११४॥*
यदि नो लेखयेद्दत्तमृणिना चोदितो ऽपि सन्।
ऋणिकस्यापि वर्धेत यथैव धनिकस्य तत् ॥११५॥*
लेख्यं दद्याद्विशुद्धर्णे तदभावे प्रतिश्रयम्।
धनिकर्णिकयोरेवं विशुद्धिः स्यात्परस्परम् ॥११६॥*
विश्रम्भहेतू द्वावत्र प्रतिभूराधिरेव च।
लिखितं साक्षिणश्च द्वे प्रमाणे व्यक्तिकारके ॥११७॥*

---

धनिकस्यैव वर्धेत तदृणं यन्न लेखितम् Vulg. ॥ ११५ ॥ ११६ is placed before ११५ in Vulg. प्रतिश्रवम्। Vulg. ॥ ११६ ॥ Vulg. inserts the following after ११८ निक्षेपः प्रातिभाव्यं च ऋण-

---

यदि प्रविष्टधनमुपगतोपरि पृष्ठयोर्न प्रयच्छति धनी। ततो यथा धनिक-द्रव्यं वर्धते तथैव ऋणिकस्यापि तदिति ॥ ११५ ॥

यत्किंचित्पत्त्रलिखितमृणं तन्निःशेषं धनिकस्य ऋणी दद्यात्। तदभावे प्रतिश्रयमिति। हृतप्रणष्टाद्यपायबाहुल्यात्तदभावे लेख्याभावे धनी ऋणिकस्य प्रतिश्रयं विशुद्धिपत्त्रं दद्यात्। एवं धनिकर्णिकयोः परस्परं विशुद्धिर्भवति।...इति कुसीदवार्धुषिकभेदः षष्ठः। अतः प्रतिभूभेदो भवति ॥ ११६ ॥

वृद्धिलाभार्थप्रयोगस्य क्रियमाणविश्वासमूलहेतू द्वावेव प्रतिभुवो द्वितीयमाधिः। तेषां च द्रव्यवृद्धिप्रमाणप्रतिभ्वाधीनां चतुर्णामप्यङ्गानां व्यक्तिकारके संदेहप्रणाशनं द्वयमेव प्रमाणम्। लिखितं साक्षिणश्चेति ॥ ११७ ॥

एष वृद्धिविधिः प्रोक्तः प्रीतिदत्तस्य कर्मणः।
वृद्धिस्तु योक्ता धान्यस्य वार्धुषं तदुदाहृतम्॥११०॥*
आपदं निस्तरेद्वैश्यः कामं वार्धुषिकर्मणा।
आपत्स्वपि हि कष्टासु ब्राह्मणस्य न वार्धुषम्॥१११॥*
ब्राह्मणस्य तु यद्देयं सान्वयस्य न चास्ति सः।
निक्षिपेत्तत्स्वकुल्येषु तदभावे ऽस्य बन्धुषु॥११२॥*
यदा तु न सकुल्याः स्युर्न च संबन्धिबान्धवाः।
तदा दद्याद्द्विजातिभ्यस्तेष्वसत्स्वप्सु निक्षिपेत्॥११३॥*

---

Vulg. धर्मतः Vulg. ॥ ११० ॥ ब्राह्मणः स्यान्न वार्धुषी Vulg. ॥१११॥ देयमद्य यश्चास्य नास्ति चेत्। A. निर्वपेत् Vulg. ॥ ११२ ॥ स्वजातिभ्यस् Vulg. ॥ ११३ ॥ यदि नोपलिखेद्दत्तमृणं वावेदयेन्न यत्।

---

एष विधिः प्रीतिदत्तस्य कर्मण उद्दिष्टः। कर्मशब्दः क्वचिद्धिरण्यपर्यायवाचको दृष्टः। या पुनर्धान्यस्य वृद्धिर्भवति ततो वार्धुषिकं नाम वर्तमानमुच्यते॥ ११० ॥

किल कृषिगोरक्षादिवृत्तिर्वैश्यस्य शास्त्रविहिता शास्त्रोत्पादकैव। तत्पुनर्धान्यवृद्धिप्रयोजनं तस्याप्यनिषिद्धम्। तेनैतदुक्तम्। यदि काचिदापद्भवति। ततस्तामापदं काममिच्छया वार्धुषिकर्मणा निस्तरेत्। ब्राह्मणस्य पुनरिदं वार्धुषिकं च कष्टास्वप्यापत्सु न विहितमतिनिषिद्धत्वादिति॥१११॥

अत्र ब्राह्मणस्य यत्किमपि येन दातव्यं विद्यते। तस्य ब्राह्मणस्यापि यदाभावस्तदा तदीयस्वकुल्येषु निक्षिपेत्। कुल्यान्यस्थीन्युच्यन्ते। तान्येकानि समानि येषां ते सकुल्याः पितृपितृव्यतत्सुतादयः। तेषु सकुल्येषु निक्षिपेत्। तदभावे बन्धुषु मातृभगिनीभागिनेयादिष्विति॥ ११२ ॥

स्पष्टार्थः श्लोकः। ईदृशं च ब्राह्मणस्योग्रत्वं दृष्टम्॥ ११३ ॥

हिरण्यधान्यवस्त्राणां वृद्धिर्द्वित्रिचतुर्गुणा।
रसस्याष्टगुणा वृद्धिः स्त्रीपशूनां च संततिः ॥१०७॥
न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित्।
अनाकारितमप्यूर्ध्वं वत्सरार्धात्प्रवर्धते ॥१०८॥*
प्रीतिदत्तं तु यत्किंचिन्न तद्वर्धत्ययाचितम्।
याच्यमानमदत्तं चेद्वर्धते पञ्चकं शतम् ॥१०९॥*

---

Vulg. ॥१०७॥ The following three verses are inserted in Vulg. after ॥ १०७ ॥ सूत्रकर्पासकिण्वानां त्रपुणः सीसकस्य च। आयुधानां च सर्वेषां चर्मणस्ताम्रलोहयोः ॥ अन्येषां चैव सर्वेषामिष्टकानां तथैव च। अक्षय्या वृद्धिरेतेषां मनुराह प्रजापतिः ॥ तैलानां चैव सर्वेषां मद्यानां मधुसर्पिषाम्। वृद्धिरष्टगुणा ज्ञेया गुडस्य लवणस्य च॥ १०९ om.

---

हिरण्यं यथा कयापि वृद्ध्या गृहीतं। तथा तावदेव वर्धते यावद्द्विगुणीभूतम्। धान्यं जल्पितवृद्ध्या तद्दीयमानं प्रतिग्राह्यं तावद्वर्धते यावत्त्रिगुणम्। वस्त्रं तावद्वर्धते यावच्चतुर्गुणम्। रसस्तावद्यावदष्टगुणो भूतः। स्त्रीपशूनां च समाधत्तानां या संततिरुत्पद्यते सा द्रम्मधनिकस्य भवतीति ॥ १०७ ॥

एषामनन्तरोक्तानां वस्तूनां प्रीतिसंव्यवहारेण दत्तानामविचारितवृद्धिर्नास्ति तावद्यावत्षण्मासं ततःपरं त्वकारितापि वृद्धिः षण्मासादुपरि भवतीति ॥ १०८ ॥

प्रीतिदत्तं यत्किमपि भवति तत्तावन्न वर्धते यावन्न याचितम्। यदा पुनर्याच्यमानमपि न दीयते तदा षण्मासादर्वागपि तद्दिवसादारभ्य पञ्चकशतवृद्ध्या वर्धते ॥ १०९ ॥

वृद्धिः सा कारिता नाम यर्णिकेन स्वयं कृता॥१०३॥*
कायाविरोधिनी स्वस्वपणपादादिका क्रमात्।
वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृता ॥ १०४ ॥*
अर्थानां सार्वभौमो ऽयं विधिर्वृद्धिकरः स्मृतः।
या देशावस्थितिस्त्वन्या यत्रर्णमवतिष्ठते ॥१०५॥*
द्विगुणं त्रिगुणं वापि तथान्यच्च चतुर्गुणम्।
तथाष्टगुणमन्यस्मिन्देयं देशे ऽवतिष्ठते ॥ १०६॥*

---

तिस्त्वन्या Vulg. ॥ १०५ ॥ १०६ om. Vulg. हिरण्यवस्त्रधान्यानां

---

धिनी मूलद्रव्यकायस्याविनाशिनी। सा च स्वस्वपरिमाणपादादिका। किमुक्तं भवति। ऋणिकस्योपरि यो द्रव्यपिण्डकायो दिवसभाटकवृद्ध्याचारेण स्वः स्वो दिनप्रतिदिनं पणः पणो देयः। पादः पादो वा देयः। इत्यनेन क्रमेण तं पणं पादं वा प्रतिदिनं गृह्णतो धनिकस्य सुचिरकालेनापि मूलद्रव्यकायमध्यात्किंचिन्न पतति। अपरिमितद्रव्यप्रवेश इति। यदा तदा स द्रव्यपिण्डकाय ऋणिकेनाखण्डित एव संपूर्णो देयः। इत्येषा कायाविरोधिनी वृद्धिः कायिकेति नामोच्यते। अतश्चक्रवृद्धिरुच्यते। यस्यां पुनर्वृद्धौ एको द्रम्मः पञ्चशतेन दत्तः। तत्र विंशतिभिर्मासैर्जातं द्र४। एते ऽपि अन्यैर्विंशतिभिर्भूता द्र ८। पश्चादन्यैर्विंशतिभिर्जाता द्र १६। पुनरन्यैर्द्र ३२। इयं वृद्धिरपि पुनर्वृद्धिरुच्यते।...॥ १०३ ॥ १०४ ॥

अर्थानां वृद्धिकरविधिः सर्वभूमिसामान्यो दृष्टः। अन्या तु देशावस्थितिर्या या यत्र प्रसिद्धा सा तत्रैव यत्रर्णमप्यवतिष्ठते व्यवहारतः प्रतिष्ठते ॥ १०५ ॥

कस्मिंश्चिद्देशे द्विगुणावधिवृद्धिरेव केष्वपि पुनस्त्रिगुणचतुर्गुणाष्टगुणापि। अन्यदेशेष्ववतिष्ठते॥ १०६ ॥

द्विकं त्रिकं चतुष्कं च पञ्चकं च समं स्मृतम्।
मासस्य वृद्धिं गृह्णीयाद्वर्णानामनुपूर्वशः ॥१००॥*
द्विकं शतं वा गृह्णीत सतां वृत्तमनुस्मरन्।
द्विकं शतं हि गृह्णानो न भवत्यर्थकिल्बिषी ॥१०१॥*
कालिका कारिता चैव कायिका च तथापरा।
चक्रवृद्धिश्च शास्त्रेऽस्मिन्वृद्धिर्दृष्टा चतुर्विधा ॥१०२॥*
प्रतिमासं स्रवन्ती या वृद्धिः सा कालिका स्मृता।

---

before १०३ in Vulg. शश्वत्पणपादादि कायिका। B. b. β. C. y. and Mitâksharâ etc.; पणास्त्वन्या तु L. ऋणानां...देशाचारस्थि-

---

अत्र ब्राह्मणेषु प्रयोगवृद्धौ द्विकं शतं धर्म्यम्। क्षत्रियेषु त्रिकं वैश्येषु चतुष्कं शूद्रेषु पञ्चकम्। इयं मासमासवृद्धिर्वर्णानामनुक्रमेणेति ॥ १०० ॥

अथवा सर्ववर्णेष्वपि साधुपुरुषेभ्यः सकाशाद्द्विकमेव शतं गृह्णीयात्। एतत्सतां वृत्तमित्येवं स्मरन्। एवमनया वृद्ध्या प्रयोजको ऽर्थकिल्बिषी न भवति ॥ १०१ ॥

इत्यत्र श्लोके चतुर्विधवृद्धिनामचतुष्टयमिदमुक्तम्। लक्षणं त्विदमुच्यते ॥ १०२ ॥

अनेन श्लोकद्वयेन चतुर्विधापि वृद्धिर्व्याख्याता।...अतीतकालवृद्धिः फलं यस्यां प्राप्यते। सा कालिका वृद्धिरुच्यते। प्रतिमासवृद्धिः स्रवन्ती वृद्धिः फलदेत्यर्थः। सा च शास्त्रोक्ता वर्णानुक्रमेण पञ्चकशतमवधिभूता दृष्टा या पुना ऋणिकेनैव अपात्रभूतेन अथवा पात्रभूतेनैव सविशेषातिवशात्स्व-मुखेनैव दशकादधिका करवृद्धिर्वा कृता। वृद्धिः सा कारिता नाम यर्णि-केन स्वयं कृतेति। अथ कायोच्यते।...द्रव्यपिण्डो द्रव्यकायः। तस्याविरो-

प्रतिग्रहाधिक्रीतेषु पूर्वा पूर्वा बलीयसी ॥९७॥
स्थानलाभनिमित्तं हि दानग्रहणमिष्यते ।
तत्कुसीदमिति प्रोक्तं तेन वृत्तिः कुसीदिनाम् ॥९८॥*
वसिष्ठविहितां वृद्धिं सृजेद्वित्तविवर्धिनीम् ।
अशीतिभागं गृह्णीयाच्छते मासस्य वार्धुषी ॥९९॥*

---

दिषु Vulg. ॥ ९७ ॥ ९९—१०१ om. Vulg. १०४ a is placed

---

वृद्धिपरिच्छेदविषये भवति । तथा तया पश्चिमा बाध्येत । सा उत्तरोत्तरा प्रमाणम् । प्रतिग्रहे पुनर्येन प्रथमं ग्रामो लब्धस्तस्य प्रमाणम् । येन पश्चाल्लब्धस्तस्य न प्रमाणम् । आधिरपि यस्य पूर्वाधिस्तस्य प्रमाणम् । पश्चात्कृताधिरप्रमाणम् । क्रीतमपि येन पूर्वं क्रीतं तस्य प्रमाणम् । पश्चात्क्रीतमप्रमाणम् । एवमेतेषु प्रतिग्रहाधिक्रीतेषु व्यवहारपदेषु पूर्वा क्रिया बलवतीति । इति ऋणादाने प्रमाणभेदः पञ्चमः । अतः कुसीदवार्धुषिकभेदौ भवतः ॥ ९७ ॥

अत्र स्थानशब्दो द्व्याश्रितः स्वस्थानाश्रितः परदेशाश्रितश्च द्रष्टव्यः । तद्यथा । स्थानस्थितस्य अविनष्टद्रव्यपिण्डस्य यो वृद्धिलाभः । तथा स्वस्थाने स्वस्यैव व्यवहारकस्य यो लाभः । तथा स्थाने स्थाने देशे यो वृद्धिक्रमाचारेण लाभः तस्य स्थानलाभः । तस्य निमित्तं दानं प्रयोगं ग्रहणं सवृद्धिकस्य तस्येति दानग्रहणमिष्यते । एतच्च प्रयोगदानग्रहणं स्मृतिसमयशब्देन कुसीदमिति नाम प्रोक्तम् । तेन कुसीदेन प्रायोग्येन कुसीदिनां प्रयोजकानां वृत्तिरिति ॥ ९८ ॥

एकशतस्य प्रयुक्तस्य मासे भुक्ते ऽशीतिभागवृद्ध्या सपादो द्रम्मो भवति । इयं वसिष्ठविहिता अतिधर्मवती वृद्धिः । एनां वृद्धिं वित्तविवर्धिनीं प्रयोजकः सृजेत्प्रवर्तयेदिति ॥ ९९ ॥

अन्यच्च श्रावितादस्मात्स्वयमासन्नमृत्युना ॥९४॥*
न हि प्रत्यर्थिनि प्रेते प्रमाणं साक्षिणां वचः।
साक्षिमत्कारणं तच्च प्रमाणं तस्य जीवतः ॥९५॥
श्रावितश्चातुरेणापि यस्त्वर्थो धर्मसंहितः।
मृतेऽपि तत्र साक्ष्यं स्यात्षट्सु चान्वाहितादिषु॥९६॥*
यद्दणादिषु सर्वेषु बलवत्युत्तरा क्रिया।

---

निश्चये ॥ Vulg. ॥ ९५ ॥ श्रावितोऽनातुरेणापि Vulg. ॥ ९६ ॥ क्रियार्था-

---

च्छिणामत्रैव स्वमुखेनैव को ऽप्यर्थः श्रावितः स्यात्। अथवा असौ मुमूर्षुः केनापि धनिना जल्पयितः। तेनापि समासन्नमृत्युना सो ऽर्थः स्वमुखेन प्रतिपन्नः। ततस्तस्मिन्मृतेऽपि साक्षिणः प्रमाणमिति ॥ ९४ ॥

अत्र अर्थी धनी उच्यते। प्रत्यर्थी ऋणी। तस्मिन्प्रत्यर्थिनि ऋणिके प्रेतीभूते साक्षिणां वचः वचनं न हि प्रमाणम्। यतः साक्षिमत्कारणं तस्य जीवत एव च न मृतस्येति ॥ ९५ ॥

अत्र आतुरेणापि पित्रा पुत्रपरोक्षे ऽपि यो ऽर्थो धर्मदत्तादिसाक्षिणां पुरतः श्रावितः स प्रमाणः। तथा षट्सु चान्वाहितादिषु। तस्मिन्नातुरत्वे समुपस्थिते संजातपश्चात्तापो यद्वदति साक्षिपुरतः। यथा मया अमुकपार्श्वात्सारमुकं वस्तु असारप्रतिवस्तुना अन्वाहितं तदर्पणीयम्। तथा अमुकसत्कं वस्तु मया हृतं तन्मोक्तव्यम्। तथा अमुकेनामुकं वस्तु मम निक्षिप्तम्। तदर्पणीयम्। तथा अमुकं मया बलादवष्टब्धं तन्मोक्तव्यम्। तथा अमुकं याचितम्। तदर्पणीयम्। अमुकं परोक्षं भुक्तम्। तन्मोक्तव्यमिति। एतेषु षट्सु अन्वाहितादिषु मृते ऽपि तस्मिन्साक्षिणः प्रमाणानि ॥ ९६ ॥

ऋणादिषु व्यवहारपदेषु सर्वेष्वपि या या उत्तरा अन्तिमा क्रिया द्रव्य-

अन्वाहितं हृतं न्यस्तं बलावष्टब्धयाचितम्।
अप्रत्यक्षं च यद्भुक्तं षडेतान्यागमं विना ॥९२॥*
तथारूढविवादस्य प्रेतस्य व्यवहारिणः।
पुत्रेण सो ऽर्थः संशोध्यो न तं भोगपदं नयेत् ॥९३॥*
सन्तो ऽपि न प्रमाणं स्युर्मृते धनिनि साक्षिणः।

---

॥ ९२ ॥ न तं भोगो निवर्तयेत् ॥ Vulg. ॥ ९३ ॥ Vulg. inserts the following a fty ९३ यद्विनागममत्यन्तं भुक्तं पूर्वैस्त्रिभिर्भवेत्। न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतम् ॥ श्रावितं यत्स्यात् Vulg. ॥ ९४ ॥ स्यादि-

---

अत्र अन्वाहितमिति यत्किमपि असारं प्रतिवस्तु समर्थपरपार्श्वात्सारं वस्तु कार्यार्थं गृहीतम्। तथा हृतं यत्तस्करन्यायेन तथा यद्विश्वास्य न्यस्तम्। तथा यद्बलात्कारेणावष्टब्धम्। तथा यत्कार्यार्थं याचितम्। तथा यद्देशान्तरगतस्य परोक्षे भुक्तम्। एतैः षड्भिः प्रकारैः प्राप्तं यद्भुक्तं तद्विनागमं भुक्तमित्युच्यते। तेषु भुक्तिरप्रमाणेत्यर्थः॥ ९२ ॥

एवमेतेषां प्रकाराणामेकेनाप्यन्यायेन परकीयमर्थं भुञ्जन्यः कश्चिदर्थधनिना न्यायार्थं प्रारब्धो अनिष्पन्नव्यवहार एव प्रेतीभूतः। तस्य सक्तः स तदवस्थ एव व्यवहारः पुत्रेण संशोध्यः। सो ऽर्थः पितृकामभुक्त्या ततो न भवतीत्यर्थः॥ ९३ ॥

मृते धनिनि यदि कश्चिद्वदति। मम धनिनामुकामुकगौर्महिषी बलिवर्दो वा। अमुककेदारो वा। अमुकप्रयोजने पर्वणि प्रतिपादितः। तथा चामुकाः साधवः साक्षिणो नाम विद्यन्ते। अन्यो ऽपि यदि कश्चिद्वदति। तव पित्रा मम द्रम्मशतं दातव्यम्। अमुकामुकसाक्षिणः। ततो मृते धनिनि मृतान्तरे सन्तो ऽपि साधवः साक्षिणो न प्रमाणं स्युः। अन्यत्र स्वयं श्रावितादिति। यदा पुनस्तेनैव धनिना समासन्नमृत्युना कथंचित्सा-

भुज्यते ऽनागमं यत्तु न तद्भोगपदं नयेत्।
प्रेते तु भोक्तरि धनं याति तद्वंशभोग्यताम् ॥८८॥
स्मार्ते काले क्रिया भुक्तेः सागमा भुक्तिरिष्यते।
अस्मार्ते लिखिताभावे क्रमात्त्रिपुरुषागता ॥८९॥*
आहर्तैवाभियुक्तः स्यान्नार्थानामुद्धरेत्पदम्।
भुक्तिरेव विशुद्धिः स्यात्प्राप्ता या पितृतः क्रमात्॥९०॥*
अन्यायेनापि यद्भुक्तं पितुः पूर्वतरैस्त्रिभिः।
न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतम् ॥९१॥*

---

८९ om. A. भूमेः Vulg. See Viram. 204. आहर्ते वा b. y. L; आहर्तैर्वा B. β. C. प्राप्ता या पितृतः Vulg; प्राप्तानां पितृतः A. See the Comm. ॥ ९० ॥ पित्रा पूर्वतरेण वा। Vulg.; पित्रा पूर्वतरैस्त्रिभिः। Ragh. 52, Vîram. 204. ॥ ९१॥ कालावष्टब्ध० Vulg.

---

अत्र यावद्भोक्ता जीवति तावदनागमं भुज्यमानं परकीयं भवति। यथा-तथो ऽस्योद्धरणसंभवो भवति। यदा पुनरत्र भोक्तापि अप्रार्थित एव मृतः। तदा तद्वस्तु तदीयवंश्यभोग्यतां याति। अतो नोपेक्षणीय-मित्यर्थः ॥ ८८॥

कश्चित्परकीयार्थानामाहर्ता स एवार्थः धनिना स्वार्थसंचितार्थमारम्भ-णीयः। स चाहर्तैव तेनाभियुक्तः सन्तमर्थं प्रतिष्ठापदं नयेत्। तस्मिन्पुनरा-हर्तरि मृते तदीयसंततेरुपरतिपितृक्रमागता भुक्तिरेव प्रतिष्ठाविशुद्धिका-रिणी [न] भवति ॥ ९० ॥

यत्किमपि वस्तु वृद्धपितामहेनाहृतमन्यायेनापि विनागममपि ततश्च प्रपितामहेनापि भुक्तं तदनन्तरं पितामहेनापि। एवमनेन पुरुषपारंपर्येण पितुः पूर्वतरैस्त्रिभिर्यद्भुक्तं तत्पितुः क्रमात्त्रिपुरुषागतं चलस्थिरादिकं वस्तु तत्केनाप्यपहर्तुं न शक्यम्। अत्र भाषायामुत्थानमित्यर्थः ॥ ९१ ॥

राजस्वं श्रोत्रियद्रव्यं न भोगेन प्रणश्यति ॥८१॥*
प्रत्यक्षपरिभोगात्तु स्वामिनो द्विदशाः समाः ।
आध्यादीन्यपि जीर्यन्ते स्त्रीनरेन्द्रधनादृते ॥८२॥
स्त्रीधनं च नरेन्द्राणां न कथंचन जीर्यते ।
अनागमं भुज्यमानं वत्सराणां शतैरपि ॥८३॥*
संभोगो दृश्यते यत्र न दृश्येतागमः क्वचित् ।
आगमः कारणं तत्र न भोगस्तत्र कारणम् ॥८४॥
आगमेन विशुद्धेन भोगो याति प्रमाणताम् ।
अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छति ॥८५॥*
भोगं केवलतो यस्तु कीर्तयेन्नागमं क्वचित् ।
भोगच्छलापदेशेन स विज्ञेयस्तु तस्करः ॥८६॥*
अनागमं तु यो भुंक्ते बहून्यब्दशतान्यपि ।
चौरदण्डेन तं पापं दण्डयेत्पृथिवीपतिः ॥८७॥*

---

इति स्थितिः ॥ Vulg. ॥ ८४ ॥ न तद्भुक्तं परं नयेत् ॥ Vulg. ॥ ८८ ॥

---

राजस्वशब्देन भूमिरुक्ता श्रोत्रियस्वशब्देन गावो ऽभिहिताः। एतेषु सविशेषन्यासाच्चिरकालातिक्रमे ऽपि न नश्यन्तीति ॥ ८१ ॥

आध्यादीनां यः स्वामी तस्य प्रत्यक्षं...द्विदशाः समाः विंशति वर्षाणि येन भुक्तानि तस्यैव तानि जीर्येरन्। परिणतिं यान्तीत्यर्थः। स्त्रीधनं सुप्रतीतम्। नरेन्द्रधनशब्देन पर्यायेण तु भूमिरुक्ता। किल नरेन्द्राणां भूमिरेव धनमित्यतः स्त्रीनरेन्द्रधने तु विंशतिवर्षैरपि न नश्यत इति ॥८२॥

एकं निरन्तरभोगेन न प्रणश्यति। मुनिवचनसिद्धादेशादिति ॥ ८३ ॥

एवं तु पुनरत्रागमस्यैव माहात्म्यं दर्शितमिति ॥ ८४ ॥

समक्षं जीवतो ऽप्यस्य तान्भुक्तिः कुरुते वशे ॥७८॥*
यत्किंचिद्दश वर्षाणि संनिधौ प्रेक्षते धनी।
भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति ॥७९॥*
अजडश्चेदपोगण्डो विषये चास्य भुज्यते।
भग्नं तद्व्यवहारेण भोक्ता तद्धनमर्हति ॥८०॥*
आधिः सीमा बालधनं निक्षेपोपनिधी स्त्रियः।

---

कुर्वतस्तस्य तूष्णीं भूतस्य तिष्ठतः। काले ऽभिपन्ने पूर्वोक्तो व्यवहारो न सिध्यति ॥ भक्तं A. ॥ ८० ॥ नोपभोगेन जीर्यते ॥ Vulg. ॥ ८१ ॥ न संभोग

---

तिक्रान्ता भुक्तिस्तान्परागामेव वशीकुरुते। प्रत्यक्षं प्रापयति। किं पुनर्मृतस्येति ॥ ७८ ॥

यदि पुनर्देशकालबलापेक्षया तं स्वार्थं प्राप्तुं न क्षमः। प्रतिवचः प्रतिदिनं प्रतिमासं प्रतिवर्षं च करोति। ततः कालान्तरे ऽपि तत्तस्य न प्रणश्यति। व्यवहार उत्तरं लभत इत्यर्थः॥ ७९ ॥

यदि जडो न भवति। दीर्घतीव्रामयग्रस्तमूकान्धबधिरो ऽपि वा। यदि चापोगण्डबालः। प्रत्यक्षतो ऽस्य सक्तं स्थावरादिक...वंशयापरेण तु भुज्यते। ततो ऽर्थप्रतिष्ठितं द्रव्यव्यवहारेण तद्भुक्तं यो भोक्ता स एव तद्धनमर्हतीति ॥ ८० ॥

यत्किंचिदधिकृतं वस्तु तत्सुचिरेण कालेनापि तेन द्रव्येण लभते। न भोगेन प्रणश्यति। तथा परसीमा चिराक्रान्तापि स्वस्वभूते देशे पुनर्लभ्यते न प्रणश्यति। तथा मातापित्रोः परोक्षं येन सधनो बालः परिगृहीतस्तद्बालधनं चिरभोगेनापि न प्रणश्यति। तथा निक्षेपो न्यास उपनिधिर्निक्षेपमध्य अन्तर्हितसारद्रव्यम्। तथा स्त्री निक्षेपभूता या भुक्ता। तथा

त्रिविधस्यास्य दृष्टस्य प्रमाणस्य यथाक्रमम् ।
पूर्वं पूर्वं गुरु ज्ञेयं भुक्तिस्तेभ्यो गरीयसी ॥७६॥
विद्यमाने ऽपि लिखिते जीवत्स्वपि हि साक्षिषु ।
विशेषतः स्थावराणां यन्न भुक्तं न तत् स्थिरम्॥७७॥*
भुज्यमानान्परैरर्थान्यः स्वान्मौर्ख्यादुपेक्षते ।

॥ ७८ ॥ Vulg. inserts the following verse after ७६ उपेक्षां

तत्र पूर्वस्य पूर्वस्य गुरुत्वे निर्दिष्टे लिखितप्रमाणस्यैवाधिक्यमुपपद्यते । उत्तरोत्तरं तु भुक्तेर्मान्द्यगौरवव्याख्यानमागच्छति । पुनस्तस्मिन्नेव श्लोकचतुर्थपादे ऽभिहितम् । भुक्तिस्तेभ्यो गरीयसीति । भुक्तेरेवातिगौरवमापादितम् । तत्कथमेतद्योजनीयम् । अत्रोच्यते । स्थावरविषये निरागमाया दुर्बलत्वं दृष्टम् । यथोक्तमत्रैव । संभोगो दृश्यते यत्र न दृश्येतागमः क्वचित् । आगमः कारणं तत्र न भोगस्तत्र कारणम् । एवमनागमाया भुक्तेर्दुर्बलत्वमात्रं प्रतिष्ठते । तस्याः पूर्वं प्रमाणं साक्षिण उक्ताः । ते च यदि स्थावरस्यागमप्रतिष्ठाकारिणो भवन्ति । ततो भुक्तिः प्रतिष्ठते । नान्यथा । एवं भुक्तेः पूर्वसाक्षिप्रमाणस्य गुरुत्वमापन्नम् । ततश्चागमद्वारेणैव साक्षिभ्यो लिखितं श्रेय इति । एवं चागमप्रतिष्ठिता सती भुक्तिस्तेभ्यः साक्षिलिखितदिव्येभ्यो गरीयसीति योजितमिदम् ॥ ७६ ॥

अत्र तु साक्षिलिखितयोरपि प्रमाणयोर्भुक्तिप्रमाणं विना दुर्बलत्वमुपदर्शितम् ।...एकैकं प्रमाणमप्यप्रमाणम् । यदुभयप्रमाणसंपन्नं वस्तु तदविचलं प्रमाणमिति ।...॥ ७७ ॥

स्वकीयानर्थान्द्विपदचतुष्पदस्थावरादिकान्प्रीतिसमर्पितबलात्कारगृहीतशून्याक्रान्तादिप्रपञ्चैः परैर्भुज्यमानानुपेक्षते । तस्य जीवतो ऽपि चिरकाला-

देशकालफलद्रव्यप्रमाणावधिनिश्चये ।
सर्वसंदेहविच्छेदि लिखितं चक्षुरुत्तमम् ॥७१॥
गृहीत्वापि स्थले द्रव्यं योऽपह्नवितुमिच्छति ।
स्थापितः साक्षिभिर्मार्गे स दुःसाध्योऽपि साध्यते॥७२॥
लिखितं स्याद्बहुच्छिद्रं साक्षिणो नाजरामराः ।
भुक्तिस्त्वनर्थसंबद्धा संततैवार्थसाधकी ॥७३॥
तदेतत्त्रिविधं ज्ञेयं प्रमाणाय न साधितम् ।
संदेहमागतमपि धनी धनमवाप्नुयात् ॥७४॥
लिखितं बलवन्नित्यं जीवितश्चैव साक्षिणः ।
कालातिहरणाद्भुक्तिरिति शास्त्रविनिश्चयः ॥७५

---

॥ ७० ॥ गृहीत्वापि स्थगे A. ॥ ७२ ॥ इति शास्त्रेषु निश्चयः ॥ Vulg.
॥ ७५ ॥ भुक्तिस्त्वाभ्यां Vulg. ॥ ७६ ॥ मोहादुपेक्षते । प्रत्यक्षं Vulg.

---

अथ साक्षिप्रशंसा ॥ ७२ ॥

अथ भुक्तिप्रशंसा ॥ ७३ ॥

अत्र बलाबलप्रमाणं निरूपणेनोक्तम् । यदेतल्लिखितं नाम तत्प्रयत्नरक्षितं सन्मृतेष्वपि धनिकर्णिकसाक्षिषु पुत्रपौत्रप्रपौत्रसंततिसंबध्यमानद्रव्यस्योभयपक्षसंभावितसंव्यवहारस्य प्रतिष्ठाप्रविष्टं द्रव्यप्रमाणसंदेहविच्छेदकारकं भवति । साक्षिणस्तु जीवन्त एव प्रमाणमिति । जीवतां चैतदपेक्षया लिखितं बलवन्नित्यमित्युक्तम् । यदा पुनः कालातिहरणं भवति । तदा चतुर्थपञ्चमपुरुषोपरिस्थादपि अपरिमितकालादपि संततभुक्त्यैव धनी धनमवाप्नुयात् । इति शास्त्रस्य निश्चयः । एतत्प्रमाणबलाबलमुक्तम् ॥ ७५ ॥

मार्गे पुनरवस्थाप्यो राज्ञा दण्डेन भूयसा ॥६७॥
प्रमाणानि प्रमाणस्थैः परिकल्प्यानि यत्नतः।
सीदन्ति हि प्रमेयाणि प्रमाणैरव्यवस्थितैः ॥६८॥*
लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृतम्।
धनस्वीकरणे येन धनी धनमवाप्नुयात् ॥६९॥
नाकरिष्यद्यदि स्रष्टा लिखितं चक्षुरुत्तमम्।
तत्रेयमस्य लोकस्य नाभविष्यच्छुभा गतिः ॥७०॥

---

Chapter here. प्रमाणज्ञैः L. परिपाल्यानि यत्नतः। सीदन्ति हि प्रमाणानि Vulg. पुरुषस्यापराधतः॥ L. ॥ ६८ ॥ धनस्वीकरणं Vulg. ॥ ६९ ॥ ७०—७४ -om. Vulg. ततोह्यं यस्य लोकस्य A.

---

यज्ञार्थमभ्यनुज्ञाताः। अथवा अशक्तौ अपाटवे भेषजार्थं वेति ॥ ६६ ॥

अत्र यानि अविक्रेयाणि निर्दिष्टानि तानि विक्रीणन्ब्राह्मणो मार्गच्युतो भवति। स च राज्ञा पुनरपि मार्गे संस्थापनीयः। महता दण्डेनेति। इति ऋणादाने आपद्ब्राह्मणवृत्तिश्चतुर्थः ॥ ६७ ॥

अत्र यत्किमपि प्रमेयं वस्तु प्रकर्षेण मेयं प्रमेयं तत्त्वतो ज्ञेयमित्यर्थः। तत्सर्वं प्रमाणैः परिच्छिन्नं स्फुटीभवति। यथा गणितं संख्यया। मेयं मापनेन।...तथात्रापि द्वाविंशच्छतभेदोपलक्षिते। अष्टादशपदव्यवहारः प्रमेयभूतो लिखितसाक्षिभुक्तिदिव्यप्रमाणैः परिच्छिन्नं स्फुटं भवति। अतो मतानि प्रमाणानि प्रमाणस्थैः पुरुषैः साधुन्टपतिसभ्यादिभिर्यत्नतः परिकल्प्यानि। यतः प्रमाणैर्व्यवस्थापरिभ्रष्टैः सद्भिर्यानि प्रमेयाणि संदिग्धीकर्तुमभिप्रेतानि। तानि सीदन्ति सिद्धिं न प्राप्नुवन्तीत्यतः प्रमाणरक्षणे यत्न उपन्यस्त इति ॥ ६८ ॥

तत्र तावल्लिखितप्रशंसा ॥ ७० ॥

ब्राह्मणस्य तु विक्रेयं शुष्कं दारु तृणानि च।
गन्धद्रव्यैरकावेत्रतूलमूलकुशादृते ॥६४॥
स्वयं शीर्णं च विदलं फलानां बदिरेङ्गुदे।
रज्जुः कार्पासिकं सूत्रं तच्चेदविकृतं भवेत् ॥६५॥
अशक्तौ भेषजस्यार्थे यज्ञहेतोस्तथैव च।
यद्यवश्यं तु विक्रेयास्तिला धान्येन तत्समाः ॥६६॥
अविक्रेयाणि विक्रीणन्ब्राह्मणः प्रच्युतः पथः।

---

ब्राह्मणस्य त्वविक्रेयं β ॥ ६४ यज्ञार्थे ऽपि तथैव च Vulg. ॥ ६६ ॥ विक्रीणानस्त्वविक्रेयं Vulg. ॥ ६७ ॥ Vulg. begins a new

---

अत्र प्रसिद्धानि प्रतीतानि। मधूच्छिष्टं...मदनं च तदुच्यते। क्षारा गुडाद्याः। रसा घृततैलाद्याः। आसवः सुरा। ओदनः कूरः। क्षौमं तन्त्रम्। सोमो यज्ञद्रव्यम्। उपलाः पाषाणाः। मनुष्यः पुरुषः। अम्बु पानीयम्। आपूपाः पक्वान्नम्। वीरुधो गुल्मलतादयः। कौशेयं पट्टसूत्रम्। कुतपमूर्णासंभूतम्। एकशफा एकसंततखुरा अश्वसमाः। उदश्वित्तक्रम्। केशास्चमराद्याः। पिण्याकः खलः। शाकानि आर्द्रौषधयः। एतद्ब्राह्मणस्याविक्रेयम्। श्लोकत्रयोद्दिष्टमिति ॥ ६१ ॥ ६२ ॥ ६३ ॥

ब्राह्मणस्य तु वैश्यवृत्तावपि वर्तमानस्य शुष्कदारूणि तृणानि च शुष्काणि विक्रेयाणि। तत्र गन्धद्रव्यमुशीरबालकमुस्ताद्यम्।...॥ ६४ ॥

अत्र स्वयं शीर्णं च यदन्यदपि फलं किंचित्पतितं भवति। तथा विदलं मुद्गमाषाटकीवल्लाद्यम्। फलानां मध्ये बदिराणीङ्गुदानि च।...तथा यच्च कार्पासोद्भवं सूत्रं तद्यद्यविकृतं रक्तं न भवेत्। एतानि ब्राह्मणस्य विक्रेयाणीति ॥ ६५ ॥

अत्र तिला यथान्यद्धान्यं विक्रेयम्। तथा ते ऽपि तिला धान्यसमा एव

मध्यमे कर्मणी हित्वा सर्वसाधारणे हि ते ॥५८॥*
आपदं ब्राह्मणस्तीर्त्वा क्षत्रवृत्त्यर्जितैर्धनैः।
उत्सृजेत् क्षत्रवृत्तिं तां कृत्वा पावनमात्मनः ॥५९॥
तस्यामेव तु यो वृत्तौ ब्राह्मणो रमते सदा।
काण्डपृष्ठश्च्युतो मार्गादपाङ्क्तेयः प्रकीर्तितः ॥६०॥
वैश्यवृत्त्या चाविक्रेयं ब्राह्मणस्य पयो दधि।
घृतं मधु मधूच्छिष्टं लाक्षाक्षाररसासवाः ॥६१॥
मांसौदनतिलक्षौमसोमपुष्पफलोपलाः।
मनुष्यविषशस्त्राम्बुलवणापूपवीरुधः ॥६२॥
चेलकौशेयचर्मास्थिकुतपैकशफा मृदः।
उदश्वित्केशपिण्याकशाकार्द्रौषधयस्तथा ॥६३॥

---

शाकान्यौषधयस्तथा ॥ Vulg. ॥ ६३ ॥

---

कर्मणी निषिद्धे। ये तु मध्यमे द्वे कर्मणी क्षत्रवृत्तिर्वैश्यवृत्तिश्च। एते ब्राह्मणस्यापि क्वचिदापत्काले विहिते। शूद्रस्यापि क्वचिदधिकस्यापत्काले विहिते इति ॥ ५८ ॥

यदा आपदा ब्राह्मणः क्षत्रियवृत्तिं कारितः। तामापदं तीर्त्वा तां क्षत्रियवृत्तिमुत्सृजेत्। कृत्वा पावनमात्मनः। ब्राह्मणेषु प्रसह्य प्रायश्चित्तं भवतीत्यर्थः ॥ ५९ ॥

यः पुनस्तत्रैव रतिं बध्नाति। स ब्राह्मणः काण्डपृष्ठ इति। स्वर्गाच्च्यवते ऽसौ पितृश्राद्धकर्मादर्हिष्यपाङ्क्तेयः प्रकीर्तितः ॥ ६० ॥

सर्वेषामेव वर्णानामेष धर्म्यो धनागमः ।
विपर्ययादधर्म्यः स्यान्न चेदापद्गरीयसी ॥५५॥
आपत्स्वनन्तरा वृत्तिर्ब्राह्मणस्य विधीयते ।
वैश्यवृत्तिस्ततश्चोक्ता न जघन्या कथंचन ॥५६॥
न कथंचन कुर्वीत ब्राह्मणः कर्म वार्षलम् ।
वृषलः कर्म न ब्राह्मं पतनीये हि ते तयोः ॥५७॥
उत्कृष्टं चापकृष्टं च तयोः कर्म न विद्यते ।

---

वैश्यस्यापि त्रिलक्षणम् ।...शूद्रस्त्वेभ्यस्त्वनुग्रहात् ॥ Vulg. ॥ ५४ ॥ उत्कृष्टं वापकृष्टं वा Vulg. ॥ ५८ ॥ क्षत्रवृत्त्याश्रिते जने । A ॥ ५९ ॥

---

वर्णवृत्तिसमाचरणादधर्म्यः स्यात् । इति ऋणादाने बहुप्रकारधनभेदस्तृतीयः । इदानीमापद्ब्राह्मणविधिरुच्यते ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥

ब्राह्मणस्य आपत्सु स्वकीयवृत्त्या कुटुम्बवर्तनपीडासु अनन्तरवृत्तिरविरुद्धा । क्षत्रियवृत्तिरित्यर्थः । तथा अवृत्त्या कुटुम्बावर्तनपीडासु वृत्त्यसंभवे ततो वैश्यवृत्तिरुक्ता । न जघन्या कथमपि शूद्रवृत्तिर्न तस्येति ॥ ५६ ॥

वृषलशब्देन शूद्र उच्यते । तस्य कर्म सर्वाशित्वं सर्वविक्रयत्वं च । एतद्वार्षलं कर्म ब्राह्मणः कथमपि आपद्गतोऽपि न कुर्यात् । तथा ब्राह्मणस्य यत्कर्म शूद्रः सन्यज्ञोपवीतवेदाध्ययनव्याहृतिहोमादि न कथं च न कुर्वीत । पतनीये हि ते तयोः । इतरेतरविरुद्धकर्मणा । तयोर्ब्राह्मणवृषलयोः । पतनीये भवत इत्यर्थः ॥ ५७ ॥

शूद्रस्य ब्राह्ममुत्कृष्टं ब्राह्मणस्य शूद्रकर्मापकृष्टम् । तत एव तयोस्ते

यथाविधेन द्रव्येण यत्किञ्चित्कुरुते नरः ।
तथाविधमवाप्नोति स फलं प्रेत्य चेह च ॥४९॥
तत्पुनर्द्वादशविधं प्रतिवर्णाश्रयात्स्मृतम् ।
साधारणं स्यात्त्रिविधं शेषं नवविधं विदुः ॥५०॥
क्रमागतं प्रीतिदायः प्राप्तं च सह भार्यया ।
अविशेषेण वर्णानां सर्वेषां त्रिविधं शुभम् ॥५१॥
वैशेषिकं धनं ज्ञेयं ब्राह्मणस्य शुभं त्रिधा ।
प्रतिग्रहेण यल्लब्धं याज्यतः शिष्यतस्तथा ॥५२॥
त्रिविधं क्षत्रियस्यापि शुद्धं वैशेषिकं धनम् ।
करायुद्धोपलब्धं च दण्डाच्च व्यवहारतः ॥५३॥
वैशेषिकं धनं ज्ञेयं वैश्यस्यापि त्रिधा शुभम् ।
कृषिगोरक्षवाणिज्यैः शूद्रस्यैषामनुग्रहात् ॥५४॥

---

B. β. ॥ ४९ ॥ ५० om. A. See the Comm. धनम् for शुभम् Vulg. ॥ ५१ ॥ ब्राह्मणस्य त्रिलक्षणम् Vulg. ॥ ५२ ॥ प्राङ्वैशेषिकं धनम् । युद्धोपलब्धं कारश्च [कार्याच्च] दण्डश्च व्यवहारतः Vulg. ॥ ५३ ॥

---

एते शुक्लशबलकृष्णा भेदा धनस्यैतदर्थं दर्शिताः । येनैतेषां विनियोग इहलोकपरलोकफलानां त्रयाणामपि वर्णानां यच्छुभं तत्सर्ववर्णसाधारणं त्रिविधं भवति ॥ ४९ ॥

वर्णे वर्णे विशेषशुभत्रिविधधनशेषं नवविधं भवति । एवमेव द्वादशविधमपि शुद्धधनं निगमव्याख्यातैः श्लोकैरिदानीमुच्यते ॥ ५० ॥

एतत्सर्ववर्णसमाप्तं त्रिविधं शुद्धधनम् ॥ ५१ ॥

निजनिजवर्णवृत्तिविहितो धनागमो धर्म्यो भवति । विपर्ययात्त्वन्योन्य-

धनं सप्तविधं शुक्लमुद्योगस्तस्य तद्विधः ॥४५॥*
कुसीदकृषिवाणिज्यशुल्कशिल्पानुवृत्तिभिः।
कृतोपकारादाप्तं च शबलं समुदाहृतम् ॥४६॥*
उत्कोचद्यूतदौत्यार्तप्रतिरूपकसाहसैः।
व्याजेनोपार्जितं यच्च कृष्णं हि तदुदाहृतम् ॥४७॥*
तेन क्रयो विक्रयश्च दानं ग्रहणमेव च।
विविधाश्च प्रवर्तन्ते क्रियाः संभोग एव च ॥४८॥

द्यूतचौर्यार्तिप्रातिरूपिकसाहसैः। Vulg. ॥ ४६ ॥ प्रेत्य चेह परत्र च ॥

कुलक्रमप्राप्तम्। एवं सप्तस्थानागतं धनं शुक्लमित्युच्यते। उद्योगोऽप्यस्य तथाविध इति। वियोगफलप्राप्तिस्तस्य श्रेयस्कारिणी शुद्धैव द्रष्टव्या ॥४५॥

तत्र कुसीदं वृद्धिप्रायः। कृषिः कर्षणम्। वाणिज्यं भाण्डकविक्रयः। शुल्कं कन्यासंप्रदाने धर्म्यं चाधर्म्यं च। शिल्पमालेख्यादिविज्ञानम्। अनुवृत्तिः सेवाराधनम्। कृतोपकारः प्रत्युपकारः। तैः सप्तभिः प्रकारैर्ब्राह्मणस्य धनं यद्भवति। तच्छबलमित्युच्यते। मध्यममित्यर्थः ॥ ४६ ॥

तत्रोत्कोचो लञ्चोपचारः। द्यूतमक्षादिक्रीडा। दौत्यं दूतकर्म। आर्तः कश्चिद्रोगार्तो व्यसनी। तथा प्रतिरूपकं सुवर्णरजतादीनां कूटप्रतिप्रज्ञाविकरणम्। साहसं चौर्यादि। व्याजं छलम्। एतैः सप्तभिः प्रकारैर्धनं यदुपार्जितं भवति तत्कृष्णमित्युच्यते। अधममित्यर्थः। एवं शुक्लशबलकृष्णसंज्ञाभिस्त्रिविधं धनमेकैकशश्च सप्तप्रकारमप्यभिहितम् ॥ ४७ ॥

अत्र जगत्यपि क्वचित्कीदृशेनापि तेन त्रिविधेन एकविंशतिभेदभिन्नेन क्रयो विक्रयश्च दानं ग्रहणं च विविधाश्च कर्मक्रियाः प्रवर्तन्ते। विविधसंभोगाश्चेति ॥ ४८ ॥

कुले ज्येष्ठस्तथा श्रेष्ठः प्रकृतिस्थश्च यो भवेत्।
तत्कृतं तु कृतं प्राहुर्नास्वतन्त्रकृतं कृतम् ॥४२॥
धनमूलाः क्रियाः सर्वा यत्नस्तत्साधने मतः।
रक्षणं वर्धनं भोग इति तस्य विधिः क्रमात् ॥४३॥
तत्पुनस्त्रिविधं ज्ञेयं शुक्लं शबलमेव च।
कृष्णं च तस्य विज्ञेयः प्रभेदः सप्तधा पृथक् ॥४४॥
श्रुतशौर्यतपःकन्याशिष्ययाज्यान्वयागतम्।

---

तत्कृतं स्यात्कृतं कार्यं Vulg. ॥ ४२ ॥ तत्साधने स्मृतः Vulg. ॥ ४३ ॥ शुद्धं Vulg. ॥ ४४ ॥ शुद्धमुदयो ऽप्यस्य तद्विधः Vulg. ॥ ४५ ॥ पार्श्विकं

---

अत्र श्लोके समस्तकृताकृतत्वोपसंहार उक्तः। यः कुले ज्येष्ठो वयसा गुणैश्च। तथा श्रेष्ठः संव्यवहारप्रतिष्ठायुक्तः। प्रकृतिस्थश्च अविप्लुतचित्तः पुरुषो यो भवेत्। तत्कृतं तु कृतं ज्ञेयम्।...इति ऋणादाने कृताकृतभेदो द्वितीयः ॥ ४२ ॥

धर्मार्थकामक्रियाः सर्वा अपि धनमूलाः। यतस्तत्साधन उद्यमः कर्तव्यः। तत्साधनोपायश्च त्रिविध उक्तः। प्रथमं रक्षणं द्विपदचतुष्पदादिभ्यः। ततश्च वर्धनं कृषिकलान्तरवाणिज्यादिभिः। तदनन्तरं भोगः। ऐहिकामुष्मिकसुखार्थेनेति। धनभेदाधिकारः श्लोकसंबन्धः ॥ ४३ ॥

धनमेकं शुक्लमुच्यते। द्वितीयं शबलं तृतीयं कृष्णमित्येवं तावत्त्रिविधमिदम्। पुनश्च पृथगिति। एकैकं सप्तसप्तभेदभिन्नं भवतीति ॥ ४४ ॥

तत्र श्रुतागतं विद्वत्ताप्राप्तम्। शौर्यागतं पुरुषकारप्राप्तम्। तपसागतं यमनियमकाम्याकाम्यकर्मयथोक्तविध्यनुष्ठानपात्रताप्राप्तम्। कन्यागतं कन्याविवाहनिमित्तप्राप्तम्। तथा याज्यप्राप्तम्। तथान्वयागतम्। पूर्वज-

स्वतन्त्राः सर्व एवैते परतन्त्रेषु सर्वदा।
अनुशिष्टौ विसर्गे च विक्रये चेश्वरा मताः ॥३८॥*
यद्बालः कुरुते कार्यमस्वतन्त्रस्तथैव च।
अकृतं तदिति प्राहुर्धर्मशास्त्रविदो जनाः ॥३९॥*
स्वतन्त्रो ऽपि हि यत्कार्यं कुर्यादप्रकृतिं गतः।
अकृतं तदपि प्राहुरस्वातन्त्र्यस्य हेतुतः ॥४०॥*
कामक्रोधाभिभूतार्तभयव्यसनपीडिताः।
रागद्वेषपरीताश्च ज्ञेयास्त्वप्रकृतिं गताः ॥४१॥*

Vulg. ॥ ३८ ॥ शास्त्रे शास्त्रविदो जनाः Vulg. ॥ ३९॥ अस्वतन्त्रः स हेतुकः A. See, however, Raghun. Vyavahâratattva p. 63. ॥ ४० ॥ कामक्रोधाभियुक्तार्त° Vulg. See Raghun. ibid. ॥ ४१ ॥

एते पश्चादुक्ताः स्वतन्त्रा राजाचार्यगृहपतयः। ते सर्वे ऽपि स्वकीयस्वकीयपरतन्त्रेष्वेव सर्वदा। तद्यथा। राजा स्वतन्त्रः प्रजासु। परतन्त्रेष्वेतेषु स्वतन्त्रता अनुशिष्टौ आकोटने ताडने। विसर्गे परित्यागे विक्रयमपि यावदीश्वराः प्रभव इत्यर्थः ॥ ३८ ॥

अत्र स्वतन्त्रो ऽपि बालः शिशुर्यत्कार्यं कुरुते। तथा प्रौढो ऽपि दासादिरस्वतन्त्रो यत्कुरुते। तत्कृतमपि अकृतमाहुर्धर्मशास्त्रज्ञा इति ॥ ३९ ॥

अत्र किल पितुः परोक्षे ज्येष्ठपुत्रकार्यकरणे प्रमाणम्। यावत्तत्राप्ययं हेतुरप्रमाणो दृष्टः। यदसावप्रकृतिं गतः कुर्यात्तत्कृतमप्यकृतमाहुः। अप्रकृतिं गत इति। भूतगृहीतो वा द्यूतादिव्यसनगृहीतो वा स्वभावप्रकृतिं परित्यक्तः। अनेन हेतुना स्वतन्त्रो ऽप्यस्वतन्त्रः। स हेतुकः। तेनापि दानाधमनविक्रयादि कार्यं कृतमप्यकृतमेव द्रष्टव्यमिति ॥ ४० ॥

अप्रकृतिंगतलक्षणमिदमुक्तं सप्ताकारमिति ॥ ४१ ॥

अस्वतन्त्राः प्रजाः सर्वाः स्वतन्त्रः पृथिवीपतिः।
अस्वतन्त्रः स्मृतः शिष्य आचार्ये तु स्वतन्त्रता ॥३३॥*
अस्वतन्त्राः स्त्रियः पुत्रा दासादिश्च परिग्रहः।
स्वतन्त्रस्तत्र तु गृही यस्य यत्स्यात्क्रमागतम् ॥३४॥*
गर्भस्थसदृशो ज्ञेय अष्टमाद्वत्सराच्छिशुः।
बाल आ षोड़शाद्वर्षात्पोगण्ड इति शस्यते ॥३५॥*
परतो व्यवहारज्ञः स्वतन्त्रः पितरौ विना।
जीवतोरस्वतन्त्रः स्याज्जरयापि समन्वितः ॥३६॥*
तयोरपि पिता श्रेयान्बीजप्राधान्यदर्शनात्।
अभावे बीजिनो माता तदभावे तु पूर्वजः ॥३७॥*

---

दासादिश्च परिग्रहः। Vulg. ॥ ३४ ॥ श्रीमान् Vulg. ॥ ३७ ॥ नित्यशः।

---

अत्र श्लोकद्वये ऽपीतरेतरापेक्षया स्वतन्त्रत्वमस्वतन्त्रत्वं च प्रदर्शितमिति ॥ ३३ ॥ ३४ ॥

कार्यकारणायोग्यत्वापेक्षया एतदुच्यते। अष्टमात्संवत्सरादर्वाक्। गर्भस्थसदृशः शौचाद्यक्षमः। अष्टम्यात्परतः शौचाध्ययनक्षमः। बाल इत्युच्यते। पोगण्डश्च व्यवहारत्वाक्षमः। आ षोडशाद्वत्सरादिति ॥ ३५ ॥

तावत्पुत्रो ऽपि वृद्धत्वमपि प्राप्त अविभक्तभाग अस्वतन्त्र एवेति ॥ ३६ ॥

तयोरपि मातापित्रोः पिता श्रेयान्। बीजप्राधान्यात्। बीजिन अभावे माता मातुरभावे तत्पूर्वजः श्रेयान्। उत्तरोत्तरापेक्षया चाधरस्यास्वतन्त्रत्वं तदनुदर्शितम् ॥ ३७ ॥

पुत्रेणापि कृतं कार्यं यत्स्यादच्छन्दतः पितुः।
तदप्यकृतमेवाहुर्दासः पुत्रश्च तत्समौ ॥३०॥
अप्राप्तव्यवहाश्चेत् स्वतन्त्रो ऽपि हि नर्णभाक्।
स्वातन्त्र्यं हि स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयः कृतम् ॥३१॥*
त्रयः स्वतन्त्रा लोके ऽस्मिन्राजाचार्यस्तथैव च।
प्रतिवर्णं च सर्वेषां वर्णानां स्वे गृहे गृही ॥३२॥*

---

The correctness and authenticity of the reading preserved in a is proved by the quotations in the Mitâksharâ and other Commentaries. स्वतन्त्रौ Vulg.॥३१॥

---

पितुरसंमतात्पुत्रेणापि यत्कृतं कार्यं तदप्यकृतमेव द्रष्टव्यम्। यतो यथा दास अस्वतन्त्रस्तथा पुत्रो ऽपि पितरि जीवति। अविभक्तभाग अस्वतन्त्र इति ॥ ३० ॥

अत्र किल पितरि मृते पुत्रः स्वतन्त्रः स्यात्। स च ऋणभागपि संभवति। तन्निषेधार्थमाह। प्राप्तव्यवहारो यावत्पोगण्ड इत्यर्थः। तावत्स्वतन्त्रो ऽपि अक्षमत्वादृणभाग्न संभवति। स्वतन्त्रत्वं ज्येष्ठे भवति। ज्येष्ठत्वं गुणैर्वयसा च कृतं भवतीति ॥ ३१ ॥

अस्मिन् लोके एते यथोक्तास्त्रयो ऽपि स्वतन्त्रा उत्तराधरविशेषापेक्षया। तद्यथा। राजा स्वतन्त्र उत्तरगुरुनिरपेक्षत्वात्। प्रजावरत्वापेक्षया। आचार्यो ऽपि शिष्याधरापेक्षया। तथा सर्वेषां वर्णानामपि स्वकीये स्वकीये गृहे गृही अधरपरिग्रहापेक्षया स्वतन्त्र इत्युक्तम् ॥ ३२ ॥

विशेषतो गृहक्षेत्रदानाधमनविक्रयाः ॥ २६ ॥
एतान्येव प्रमाणानि भर्ता यद्यनुमन्यते ।
पुत्रः पत्युरभावे च राजा च पतिपुत्रयोः ॥ २७ ॥
भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृते ऽपि तत् ।
सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते ॥ २८ ॥*
तथा दासकृतं कार्यमकृतं परिचक्षते ।
अन्यत्र स्वामिसंदेशान्न दासः प्रभुरात्मनः ॥ २९* ॥

---

been inserted in the text by a copyist. कार्याण्यङ्करनापदि । Vulg. ॥ २६ ॥ Vulg. inserts the following after २६: नाधिकारो भवेत् स्त्रीणां दानविक्रयकर्मसु । यावत्संजीवमाना स्यात्तावद्भोगस्य सा प्रभुः ॥ In २७, Vulg. reads एतान्यपि...पुत्रः पत्युरभावे वा राजा वा. २९ a om. Vulg. After २९, Vulg. inserts the following: तयाहितमविज्ञेयं क्षेत्रादिकमनाहितम् । In ३०,

---

अतस्ताभिः कृतान्यप्यकृतानीव द्रष्टव्यानि । विशेषतो गृहक्षेत्रदानविक्रयाः । प्रमाणकृतानि बलवन्तीत्यर्थः ॥ २६ ॥

...स च यद्यनुमन्यते । ततः कृतान्यपि सर्वकार्याणि प्रमाणानि । पत्युरभावे पुत्रो वा यद्यनुमन्यते । पतिपुत्रयोरभावे राजा वा यद्यनुमन्यत इति ॥ २७ ॥

अत्र यत्किमपि भर्त्रा परितुष्टेन दत्तम् । तच्च द्रव्यं यथाकाममश्नीयाद्दद्याद्वा गृहक्षेत्रादिस्थावरवर्जितमिति ॥ २८ ॥

यथा स्त्रीकृतं तदा दासकृतमपि कार्यमकृतमेव परिचक्षते ब्रुवते गुरवः । यदि पुनः स एव स्वामिसमादेशात्करोति । ततः सर्वं तत्कृतमपि प्रमाणमेवेति ॥ २९ ॥

पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारी धनिपुत्रयोः॥२३*॥
अन्तिमा स्वैरिणीनां या उत्तमा च पुनर्भुवाम्।
ऋणं तयोः पतिकृतं दद्याद्यस्ते समश्नुते॥ २४*॥
भार्या स्नुषा च भृत्या च भार्यायाश्च परिग्रहः।
एतावद्भिरृणं देयं भूमिं यश्चोपजीवति॥ २५॥
[विभक्ता भ्रातरो ये स्युः पृथग्दारक्रियाधनाः।
यो ह्यपुत्रो मृतस्तेषां तत्पत्नी तत्समश्नुते॥]
स्त्रीकृतान्यप्रमाणानि कार्याण्याहुर्मनीषिणः।

---

bracketed portion om. Vulg. As to v. २४, see before. The bracketed verse seems a marginal gloss which has

---

पतिकृतमृणं दद्यादिति समुदायार्थः। विशेषार्थस्त्वायम्। अत्र उत्तमशब्दः सर्वसाधारणः। एतासां सप्तानामपि मध्ये यैव काचिद्भाग्यसौभाग्यगुणैरुत्तमा। तस्या एव ग्रहीता तत्पतिकृतमृणं दद्यान्न पुत्र इति विशेषनियमात्॥ २४॥

अत्र भार्यास्नुषादीनामेतेषां नामोद्दिष्टानां मध्ये येनैव तत्कुटुम्बार्थं कृतमृणं तेनैव देयम्। अत्रास्वातन्त्र्यदोषसंभवो नास्ति। अयं प्रथमः पक्षः। द्वितीयः पुनस्त्वयम्। यदि तेषां मध्ये येनैव कुटुम्बार्थं यदुद्धरणार्थं कृतमृणं तद्गृहपतिना दायादैर्वा दातव्यमिति। अथवा एतेषां मध्ये य एव कश्चित्तत्कुटुम्बभूमिमुपजीवति। स एव कृतमृणं प्रयच्छत्येष तृतीयः पक्ष इति॥ २४॥

इति ऋणादाने देयादिभेदः॥ २५॥

पत्नीदुहितृवधप्रभृतिसर्वस्त्रीकृतानि सर्वाण्यपि कार्याणि अप्रमाणानि।

स आभजेदृणं वोढुः सैव तस्य धनं यतः ॥ २२* ॥
धनस्त्रीहारिपुत्राणामृणभाग्यो धनं हरेत्।

नुपूर्वशः। यो यस्य हरते दारान्स तस्य हरते धनम् ॥ See २५. In २२, Vulg. reads ऋणं वोढुः स भजते सैव तस्य धनं स्मृतम् ॥ २५, and the

विहीनः केवलस्तिष्ठति। तदा व्यवहारकस्त्रयाणां मध्ये विहृत्य कस्य धनं गृह्णातु। केन च तद्दातव्यमिति। अस्यार्थस्य निगमार्थमेतदुक्तम्। एषां मध्ये ऽपि ऋणभाग्यो धनं हरेत्। धनस्य प्राधान्यात्। धनग्राही ऋणं दद्यात्। तस्मिन्विद्यमाने नान्यः कश्चिदिति। यस्य तु सऋणस्य मृतस्य पुरुषस्य धनस्याभावान्न धनहारी कश्चिज्जातः। स्त्रिया अप्यभावान्न स्त्रीहारी कश्चिदस्ति पितृमातृधनवर्जितः पुत्रः केवलस्तिष्ठति। तदा असतोः स्त्रीहारिणोः पुत्र एव बीजसंभवसंबन्धात्पितृकृतमृणं प्रयच्छति। इति यस्य तु धनस्य हारी न कश्चिदस्ति। न पुत्रो विद्यते। पत्न्येव धनपुत्रविहीनान्यस्य गृहे प्रविष्टा। तदा धनहारिपुत्रयोरसतोरविद्यमानयोः स्त्रीहारी ऋणं दद्यादिति। त्रयाणामपि धनस्त्रीहारिपुत्राणां समुदितानामपि मध्ये येन ऋणं देयं तद्दर्शितम्। तथा। द्वयोरभावे एकैकेन येन ऋणं देयं तदपि संग्रहपाठं दर्शितम्।...यस्य पुनर्निर्धनत्वाद्धनं नास्ति। पुत्रहारी च विद्यते। तदा तयोः स्त्रीहारिपुत्रयोर्द्वयोर्मध्ये केन ऋणं देयमित्यत्रापि। अर्थापत्तितारतम्यापेक्षया यदि रूपयौवनसंपन्ना काममदोद्धता प्रधानाभिमता च स्त्री तस्य तदा स्त्रीहारी ऋणं दद्यात्। यतस्तदेव तस्य धनमित्युक्तमेव। अथवा सापि स्त्री कर्मकारित्वग्रासमात्रभोजना। ततः पुत्रो ऽसतोः स्त्रीधनिनोरिति न्यायात्। पुत्र एव ऋणं दद्यात्। इति विस्फुटीकृतमिदम् ॥ २३ ॥

अयं ग्रन्थकारस्ततः स्वैरिण्यो वक्ष्यति। तिस्रः पुनर्भुवः। (१२. ४६, ४८) एतयोरन्तिमोत्तमयोः स्वैरिणीपुनर्भ्वोः स्त्रियोर्यः स ग्रहीता स एव तत्पूर्व-

पुत्रिणी तु समुत्सृज्य पुत्रं स्त्री यान्यमाश्रयेत्।
तस्या द्रव्यं हरेत्सो ऽन्यो निःस्वायाः पुत्र एव तु॥२०*
या तु सप्रधनैव स्त्री सापत्या चान्यमाश्रयेत्।
सो ऽस्या दद्यादृणं भर्तुरुत्सृजेद्वा तथैव ताम्॥२१*॥
अधनस्य ह्यपुत्रस्य मृतस्योपैति यः स्त्रियम्।

---

om. Vulg. A is faulty. See, however, the Comm. and Vivád. loc. cit. तस्या धनं हरेत्सर्वं Vulg.; तस्या द्रव्यं हरेत्सोऽन्यो A.; तस्य ऋणं हरेत्सर्वं Víramitrodaya, p. 356, Vyavahâramayúkha, p. 72, etc. ॥ २० ॥ Vulg. inserts two S'lokas after २१: भार्या स्नुषा प्रस्नुषा च भार्यायाश्च प्रतिग्रहः। एतान्हरन्नृणं दाप्यो भूमिं यश्चोपजीवति॥ दारमूलाः क्रियाः सर्वा वर्णानाम-

---

अत्र या स्त्री विधवा पुत्रवती च क्रमागतस्त्रीधनवती च कामान्धा पुत्रमुत्सृज्य त्यक्त्वा अन्यं भर्तारमाश्रयेत्। स्त्रीधनस्वकीयसहितापि तस्या यत्स्त्रीधनं तत्सो ऽन्य एव भर्ता गृह्णीयान्न पुत्राः। या पुनर्निःस्वा स्त्रीधनरहिता भर्तृधनसहितान्यं याति। तद्धनमन्यो भर्ता न लभते। तस्य पितृधनस्य पुत्रः स्वामीति॥ २०॥

अत्र या तु स्त्री विधवा बालपुत्रवती च भर्तृसक्तधनसहिता चान्यं भर्तारमाश्रयेत्। सो ऽन्य एव भर्ता तदीयपूर्वभर्तृकृतमृणं दद्यात्। प्रधनकादितदीयपरिग्रहप्रतिपादित्वात्। ... तथैवाविनाश्रितप्रधनकासुत्सृजन्विशुध्यति॥ २१॥

अत्र यस्य पुरुषस्य ऋणयुक्तस्य मृतस्य धनं दायादैराक्रम्य गृहीतम्। पत्नी च निर्धना पुत्रमप्युत्सृज्य अन्यस्य गृहे प्रविष्टा पुत्रो ऽपि धनमातृ-

दद्यादपुत्रविधवा नियुक्ता वा मुमूर्षुणा।
यो वा तद्रिक्थमादत्ते यतो रिक्थमृणं ततः॥ १७॥
न च भार्याकृतमृणं पत्युर्वापि कथं भवेत्।
आपत्कृतादृते पुंसां कुटुम्बार्थो हि दुस्तरः॥ १८*॥
अन्यत्र रजकव्याधगोपशौण्डिकयोषिताम्।
तेषां तत्प्रत्यया वृत्तिः कुटुम्बं च तदाश्रयम्॥ १९*॥

---

Vulg. reads सह ताभ्यां. ये वा तद्रिक्थमापाद्य Vulg. ॥ १७॥ कथंचित्पत्युरापतेत् Vulg. पत्यु दापयेत् C; पत्युरातरेत्। Vivádachintámaṇi, p. 15. कुटुम्बं च तथाश्रयम्॥ Vulg. कुटुम्बार्थो हि दुस्तरः। A. L. and Vivád. loc. cit. ॥ १८॥ Para. १९

---

अत्र या स्त्री विधवीभूता अपुत्रा च। तत्र यदि पत्या म्रियमाणेन निरूपिता। ततः पतिकृतमृणं दद्यात्। अथवा सैव रिक्थग्राहिणी ऋणं दद्यात्। अथवा तस्यायोग्यत्वात्। दायादा रिक्थं गृह्णन्ति। ततो य एव रिक्थं गृह्णाति। स एव ऋणं ददाति। यत्रो रिक्थं संचरति तत ऋणमपीत्युक्तम्॥ १७॥

अत्र भार्याकृतमृणं पत्युर्न संबध्यते। आपत्कृतादृत इति। पतिपुत्रदुहित्रादिकुटुम्बस्य आपदुद्धरणार्थं तु पत्नीकृतमपि ऋणं कुटुम्बपतिर्दद्यात्। यतः कुटुम्बार्थो हि दुस्तरः।...॥ १८॥

अत्र रजकः प्रसिद्धः। शौण्डिको वरटः। एतेषां रजकादीनां स्त्रीप्रत्ययमेव लोकसंव्यवहारो वर्तनं जीवनं च। कुटुम्बमपि तदीयस्त्रीसमाश्रयमेव। एतेषां स्त्रीभिः कृतमृणं कुटुम्बस्य प्रार्थकृतम्। आपत्कृतं विना। नित्यमेव रजकादयस्तयो विनिकल्प्य दद्युरिति॥ १९॥

नार्वाक्संवत्सराद्विंशात्पितरि प्रोषिते सुतः।
ऋणं दद्यात्पितृव्ये वा ज्येष्ठे भ्रातर्यथापि वा॥ १४॥*
दाप्यः परर्णमेको ऽपि जीवत्स्ववियुतैः कृतम्।
प्रेतेषु न तु तत्पुत्रः परर्णं दातुमर्हति॥१५*॥
न स्त्री पतिकृतं दद्यादृणं पुत्रकृतं तथा।
अभ्युपेतादृते यद्वा सह पत्या कृतं भवेत्॥१६*॥

---

दापयेत्॥ १५ om. A. See, however, the Comm. In १६

---

इत्यत्र यानि कुटुम्बव्ययकृच्छ्रकृतादीनि ऋणानि शेषादिभिरपि कृतानि विभक्तदायादैरपि व्यवहारकाणां निर्विकल्पं दातव्यान्येवेति। तत्कथमपि तेषु कालहरणं नास्ति। यदा पुनः... पिता वा पितृव्यो वा ज्येष्ठो भ्राता वा जलवर्त्मना स्थलवर्त्मना वा दूरे देशान्तरगतो भवति। न चागच्छति जीवमानश्च श्रूयते। अस्मिन्विषये नार्वाग्विंशतिमाद्वर्षात्पितरि प्रोषिते सुतः। इत्यादिकं सार्थकम्।...दाप्यः परर्णमेको ऽपीत्यस्य श्लोकस्य यथार्थं व्याख्यानं विधिवचनविषयं चेति। उत्तरार्धं तु निषेधविषयं व्याख्यायते। प्रेतेषु तेषु सामान्यग्राहकेषु लोकान्तरीभूतेषु यथा पिता तथा तत्पुत्रो ऽपि न परर्णं दातुमर्हति। स्वकीयांशमात्रमेव ददद्विशुध्यतीत्युक्तम्॥ १४॥ १५॥

अत्र स्त्री अभ्युपेतादृत इति। स्वयं प्रतिपन्नं विना पुत्रकृतमृणं न दद्यात्। प्रतिपन्नं तु दद्यात्। यतो रिक्थमृणं ततः। अत्र या स्त्री विधवीभूता अपुत्रा च तत्र सैव यदि भर्त्रा म्रियमाणेन निरूपिता। ततः पतिकृतमृणं दद्यात्। अथवा सैव रिक्थग्राहिणी ऋणं दद्यात्प्रतिपन्नं तु दद्यादित्यर्थः। तथा सह पत्या कृतं विना पतिकृतमपि न दद्यात्। स्त्रीसहकृतं तु दद्यादित्यर्थ इत्युक्तम्॥ १६॥

पितुरेव नियोगाद्यः कुटुम्बभरणाय वा ।
ऋणं वा यत्कृतं कृच्छ्रे दद्यात्पुत्रस्य तत्पिता ॥ ११ ॥*
शिष्यान्तेवासिदासस्त्रीप्रेष्यकृत्करैश्च यत् ।
कुटुम्बहेतोरुत्क्षिप्तं दातव्यं तत्कुटुम्बिना ॥ १२ ॥*
ग्राहको यदि नष्टः स्यात्कुटुम्बे च कृतो व्ययः ।
दातव्यं ज्ञातिभिस्तस्य विभक्तैरपि तद्दृणम् ॥ १३ ॥

---

११ om. A. See, however, the Comm. Instead of १३, Vulg. has the following: देयं भार्याकृतमृणं भर्त्रा पुत्रेण मातृकम्। After १४, Vulg. inserts the following: व्याधितोन्मत्तवृद्धानां तथा दीर्घप्रवासिनाम्। ऋणमेवंविधं पुत्रो जीवतामपि

---

प्रतिभुवाश्रितेन कृतम्। एतावन्न दद्यात्। अथवा कुटुम्बभरणार्थं कृतम् अथवा क्वचिदपि प्राणान्तिककृच्छ्रे यत्कृतम्। तत्पुत्रकृतमपि पिता दद्यादित्युक्तम्॥ १० ॥ ११ ॥

इत्यत्र न केवलमीदृशं पुत्रकृतमेव पिता दद्यात्। कुटुम्बहेतोरुत्क्षिप्तम्... कुटुम्बिना देयम्। तत्र शिष्यो विद्यार्थी। अन्तेवासी जल्पितकालावधिवासो शिष्यः। दासो गृहजातः क्रीतो वा। स्त्री पत्नी माता वा। वैयावृत्यकरः। व्यावृत्तस्य भावो वैयावृत्त्यम्। तत्कर्तुं शीलमस्येति वैयावृत्यकरः। अव्यापारकारीत्यर्थः। एतैरपि कुटुम्बार्थे कृतमृणं कुटुम्बिना दातव्यमित्युक्तम्॥ १२ ॥

अत्रैतेषां नामोद्दिष्टानां मध्ये येन केनापि कुटुम्बार्थे कृतमृण...। स यदि देशान्तरं गतो रोगादिना नष्टवान्। ततो व्यवहारकस्य तदृणं भ्रात्राद्यैर्विभक्तैरपि दातव्यमित्युक्तम्॥ १३ ॥

याच्यमानं न दीयेत ऋणं वापि प्रतिग्रहम्।
तद्धनं वर्धते तावद्यावत्कोटिशतं भवेत्॥ ७॥*
कोटिशते तु संपूर्णे जायते तस्य वेश्मनि।
ऋणसंशोधनार्थाय दासो जन्मनि जन्मनि॥ ८ *॥
तपस्वी चाग्निहोत्री च ऋणवान् म्रियते यदि।
तपश्चैवाग्निहोत्रं च सर्वं तद्धनिनां धनम्॥ ९॥*
न पुत्रर्णं पिता दद्याद्दद्यात्पुत्रस्तु पैतृकम्।
कामक्रोधसुराद्यूतप्रातिभाव्यकृतं विना॥ १०॥

---

reads याचमानं। in ७. In ९, Vulg. reads धनिनो धनम्॥

---

नियुक्तः। तेन चोक्तम्। एते वणिजो ऽस्माकं पूर्वजपारंपर्येण मित्रस्थाने। तेनाहं ब्रवीमि। किं न श्रुतं भवद्भिरिति नारदवचनम्। दद्युः पैतामहं पौत्रास्तच्चतुर्थान्निवर्तत इति। तेन देवधरप्रपौत्रो महीधरश्चतुर्थो न ददाति। एतत्स्मार्तदुर्धरवचनमुपहस्य ...दत्तसमस्तमहाजनानुमतिः ...परिणीतसकलशास्त्रपरमार्थो भट्टः स्मार्तशेखरो नाम प्राह। हे दुर्धर भवान् स्मृतिशास्त्रवाक्यार्थविभागेषु न दक्षः। न चापि शब्दार्थव्याख्याने।...यत्पुनरिदं श्रीधरसक्तमेव धनं दशसहस्रमात्रं स्वरूपस्थितमेव तिष्ठति। तद्धि मासकलान्तरितमेव लघ्वोपचारलोभाच्छ्रीधरस्योद्दालितुमिच्छसि। न लज्जसेत्युक्त्वा स्मार्तदुर्धरस्यावसायः॥ ६॥

अत्राजन्माग्निहोत्रपालनमखण्डिततपःसमाचरणं चातिकष्टेन निर्वाह्यते। इयमप्येतदपि महाफलम्।...सर्वं च तद्धनिकस्यैव भवति। नर्णिकस्येति॥ ९॥

...यत्कामान्धेन कृतम्। यत्पुत्रस्योपरि क्रोधान्धेन कृतम्। तथा यत्सुरापानव्यसनान्धेन कृतम्। तथा यद्द्यूतव्यसनान्धेन कृतम्। तथा यत्परस्य

पूजनीयास्त्रयो ऽतीता उपजीव्यास्त्रयो ऽग्रतः।
एतत्पुरुषसंतानमृणयोः स्याच्चतुर्थके ॥ ६ ॥

---

of the copyist, as the Comm. on ६ is incomplete. Vulg.

---

मेव उपजीव्या इति।...चतुर्थे पुरुषे सर्वस्मृतिषूत्तमर्णाधमर्णदायकं सुप्रतिष्ठितमपि। ये ऽधमर्णदानबाह्यं कुर्वन्ति ते मन्दमतयो बाह्या निरपेक्षाः सकण्टकमत्स्याशनपापभाजो भवन्तीति कः संदेहः।...यच्चास्मिन्नर्थे पाटलिपुत्रवृत्तमुपाख्यानमभिलिख्यते। श्रीपाटलिपुत्रनगरे ब्राह्मणः श्रीधरो नाम व्यवहारकः। तेन स्वसंततिसहितस्यात्मनो वर्तनार्थमतिक्लेशार्जितं धनं वणिग्देवधरनाम्नः...द्विकशतमासकलान्तरलाभवृद्ध्या प्रयुक्तं द्रम्माणां दश सहस्राणि। ततस्त्वेकमासे गते देवधरेण कलान्तरे द्रम्मशतद्वयं दत्तम्। यावद्द्वितीयमासः प्रविष्टः। तावद्देवधरः स्वान्निपातदोषान्मृतः। देवधरस्य पुत्रो विसूचिकामृतः। देवधरस्य प्रपौत्रो महीधरो बालस्तिष्ठति। स द्यूतमद्यवेश्याव्यसनी। सूनुभिर्मातुलैः प्रतिग्राहितः। ते ऽपि स्मार्तदुर्धरनाम्ना ब्राह्मणेनागत्याभिहिताः। यथा व्यवहारकश्रीधरस्य रूपको ऽपि न दातव्यः। अहं वः स्मृत्याचारेण स्थानमध्ये ऽपि रक्षयिष्यामि। तैश्चोक्तम्। यद्येवं ततो द्रम्मसहस्रमेकं लक्षपातं (?) दास्यामः। वयं भवद्भिरेव संतुष्टाः। एवं तेषां परस्परं निष्पन्ने द्वितीयमासे च परिपूर्णे संजाते व्यवहारकश्रीधरेण ते महीधरकुटुम्बधुरंधरा मातुलाः कलान्तरेण द्रम्मशतद्वयं प्रार्थिताः। तैश्चोक्तम्। तव मूलमपि नास्ति। कुतः कलान्तरम्। ब्राह्मणस्मार्तदुर्धरेण कथितम्। तच्चतुर्थान्निवर्तत इति। तच्छ्रुत्वा श्रीधर अदृष्टमुद्गरवाताभिघात इव मूर्च्छामधिगम्य लब्धचेतनः सकुटुम्बपरिवारस्वजनपरिवृतः शालामधिगम्य श्रीधर अदृष्टमुद्गरवाताभिघातवृत्तान्तेन देवधरप्रपौत्रं महीधरं समातुलमाहूय। उभयपक्षे ऽपि न्यायाविचलौ प्रतिभुवौ गृहीत्वा महीधरमातुला उक्ताः। श्रीधरस्य कलान्तरं कस्मान्न प्रयच्छतः। तैश्च...ब्राह्मणदुर्धरो

दद्युः पैतामहं पौचास्तच्चतुर्थान्निवर्तते ॥ ४ ॥*
इच्छन्ति पितरः पुचान्स्वार्थहेतोर्यतस्ततः।
उत्तमर्णाधमर्णेभ्यो मामयं मोचयिष्यति ॥ ५ ॥*

---

मोचयिष्यन्ति ये हि नः Vulg. ॥ ५ ॥ Vulg. has the following S'lokas instead of ६: अतः पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः। पिता ऋणान्मोचनीयो यथा न नरकं व्रजेत्॥ तस्मादधिकमादाय स्वामिने न ददाति यः। स तस्य दासो भृत्यः स्त्री पशुर्वा जायते गृहे ॥ A omits ७, ८. This, however, appears to be due to a mistake

---

पौत्राः स्वयमकृतधनदायकाः। तेषामेव स्वकीयपितामहानां स्वयमकृतर्ण-दायकानां सतां तदृणम्। तस्मादेव क्रमादव्याहतं प्राप्तं तदेव दद्युरिति। तच्चतुर्थादिति च। तेभ्यः संततिगुणदायकेभ्यः पुत्रेभ्यो यश्चतुर्थः। तस्मा-दृणसंबन्धो निवर्तते। मूलिकस्य पञ्चमत्वात्। यः पुनर्मूलिकचतुर्थः स पितृ-पितामहप्रपितामहानामुत्तमर्णो ऽधमर्णदाता सर्वमुनिभिरपि समर्थितः। तथा चायमपि द्वितीयश्लोकेनैतन्निःसंदिग्धं कर्तुकामः प्राह ॥ ४ ॥

इत्यस्मिन्द्वितीयश्लोक उत्तमर्णाधमर्णयोरेकयोगनिर्देशो ऽयमेतदर्थं कृतः। येन एकयोगनिर्दिष्टानामर्थिनां सह वा प्रवृत्तिः सह वा निवृत्तिर्भवति। यथा मूलिकचतुर्थपितृपितामहप्रपितामहानां त्रयाणामपि पुरुषाणामुत्तमर्णं पितृपिण्डोदकादिकं ददाति। तथा हिरण्यधान्यादिकमधमर्णमेतेषां त्रया-णामपि ददात्येवेत्यर्थः। तथा च वृद्धप्रपितामहो ऽप्येतदाह ॥ ५ ॥

पूजनीयास्त्रयो ऽतीता इति। अतीताः पितृपितामहप्रपितामहास्त्रयो ऽपि चतुर्थकेनोत्तमाधमर्णयोर्द्वयोरपि निरृणीकर्तव्यास्त्रयो ऽग्रत इति। तेनैव चतुर्थकेन पुत्रपौत्रप्रपौत्रास्त्रयो ऽप्युत्तमर्णाधमर्णयोर्निरृणीकरणार्थ-

ऋणं देयमदेयं च येन यत्र यथा च यत्।
दानग्रहणधर्माभ्यामृणादानमिति स्मृतम्॥ १॥*
पितर्युपरते पुत्रा ऋणं दद्युर्यथांशतः।
विभक्ता अविभक्ता वा यो वा तामुद्वहेद्धुरम्॥ २॥*
पितृव्येनाविभक्तेन भ्रात्रा वा यदृणं कृतम्।
मात्रा वा यत्कुटुम्बार्थे दद्युस्तद्रिक्थिनोऽखिलम्॥३॥*
क्रमादव्याहतं प्राप्तं पुत्रैर्यन्नर्णमुद्धृतम्।

यस्तामुद्वहते धुरम् Vulg. ॥ २ ॥ दद्युस्तत्सर्वं रिक्थिनः A. ॥ ३ ॥

...एवमृणशब्दमात्रस्य निगम उक्तः। इदानीं येन यत्र यथा च यच्च तद्देयमदेयं चेत्यादिकं सविस्तरवक्ष्यमाणपदार्थं दानधर्मग्रहणधर्माभ्यामुपलक्षितं यदृणादानं व्यवहारपदं पञ्चविंशतिव्यवहारभेदभिन्नमभिधीयते॥ १॥

अत्र येषां पित्रा कृतमृणं स यावज्जीवति तावत्स्वयमेव दद्यात्। तस्मिंस्तु पितर्युपरते मृते तदृणं तत्पुत्रा एव दद्युः। यदि विभक्तास्ततः स्वांशतो दद्युः। अथाविभक्तास्ततः सामान्यमेव दद्युः। यो वा तामुद्वहेद्धुरमिति। अत्रैतदुक्तं भवति। यदि ज्येष्ठः सुचिरदूरमवसितो भवति। कुष्ठक्षयपातकादिभिरयोग्यो भवति। तदा यः को ऽपि पितृधनभारस्य धुरमुद्धरेत्। स कनिष्ठो ऽपि पितृकृतमृणं दद्यादित्यर्थः॥ २॥

इत्यत्र पितुर्भ्राता पितृव्यशब्देनोच्यते। तेन पितृव्येनाविभक्तेन यदृणं कृतम्। अथवा मात्रा भ्रात्रा वा कुटुम्बार्थे यदृणं कृतं भवति। ये केचित्तद्रिक्थभाजस्ते सर्वे तत्सर्वमिति। यदि विभक्तास्ततः स्वांशतो दद्युः। अथवा अविभक्तास्ततः सामान्यमेव दद्युरिति॥ ३॥

इत्यस्मिञ्श्लोके तथाग्रतो द्वितीयश्लोको ऽपि चतुर्थपुरुषो ऋणादायकः।... तेनैतदुक्तम्। स्वयमकृतर्णैरपि संततिगुणादाप्यैः पुत्रैर्यत्र्णमुद्धृतं तत्तेषामेव ये

यत्र सभ्यो जनः सर्वः साध्वेतदिति मन्यते ।
स निःशल्यो विवादः स्यात्सशल्यः स्यादतोऽन्यथा ॥१७॥*
न सा सभा यत्र न सन्ति वृद्धा
वृद्धा न ते ये न वदन्ति धर्मम् ।
नासौ धर्मो यत्र नो सत्यमस्ति
न तत्सत्यं यच्छलेनानुविद्धम् ॥ १८ ॥

---

इत्यत्र व्यवहारदर्शनागतो लोकः सभ्यजनो जनशब्दादवगम्यते। अत्र व्यवहारे निष्पन्ने सर्वे सभ्याः। तथा सर्वोऽपि सभ्यजनः साधु तदस्य लोको ऽपि सर्वेतदिति मन्यते जानाति। स एव व्यवहारो निःशल्यो ज्ञेयः। अतो ऽन्यथा विपरीतस्वरूपः सशल्य एवावमन्तव्यः ॥ १७ ॥

एतत्सभालक्षणमभिहितम् ॥ १८ ॥

इदानीं प्रथमं व्यवहारपदमृणादानमारभ्यते ॥

एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते ॥ १३ ॥
अन्धो मत्स्यानिवाश्नाति निरपेक्षः सकण्टकान्।
परोक्षमर्थवैकल्याद्भाषते यः सभां गतः ॥ १४ ॥
तस्मात्सभ्यः सभां प्राप्य रागद्वेषविवर्जितः।
वचस्तथाविधं ब्रूयाद्यथा न नरकं व्रजेत् ॥ १५ ॥
यथा शल्यं भिषग्विद्वानुद्धरेद्यन्त्रशक्तितः।
प्राड्विवाकस्तथा शल्यमुद्धरेद्व्यवहारतः ॥ १६ ॥*

---

तस्य पापस्य पादो गच्छति कर्तारं पादः साक्षिणः पादः सभासदः सर्वान्पादो राजानमृच्छति। राजानं गच्छतीत्यर्थः। यदा पुनर्निन्दार्ह एव निन्द्यते। असत्यस्य पराजयः क्रियत इत्यर्थः। तदा राजा भवत्यनेनाः। अपापाः सभासदो ऽपि तस्मात्पापाद्विमुच्यन्ते। तत्सर्वमेवैनः कर्तारमेवैकं प्रतिपद्यते। अन्यायकर्तारमित्यर्थः ॥ १२ ॥ १३ ॥

...यस्य चक्षुरिन्द्रियं भवति निर्मलं च। स वक्त्रजिह्वातालुभेदिनो मत्स्यकण्टकानपनीय मत्स्यानेवाश्नाति। यः पुनरन्धः सकण्टकातिव्याप्तान्तदपनयनासमर्थः। निरपेक्षः सकण्टकान्मत्स्यानश्नाति। एवं शास्त्रचक्षुः। परोक्षमर्थवैकल्यात्। अर्थासामर्थ्यात्। भाषते यः सभां गत इति ॥ १४ ॥

तस्मादेतत्सर्वमवधार्य सभ्यः सभास्थानं प्राप्य रागद्वेषविवर्जितो भूत्वा तादृशमपक्षपतितं वचो ब्रूयात्। यथा नरकं न गच्छेत्परकीयदोषसमर्थनपातकादिति ॥ १५ ॥

यथा नष्टशल्यमदृष्टमपि दुःखोद्धरणीयमपि भिषग्वैद्यः स च विद्वानिति। शल्योद्धरणप्रयोगकुशलः। बहुप्रकारं यन्त्रतन्त्रप्रयोगयुक्तिभिः शल्यमुद्धरेत्। एवमेव प्राड्विवाकः पापशल्यं व्यवहारान्तर्गतमनुपलक्ष्यमपि व्यवहारयुक्तिभिरुद्धरेदिति ॥ १६ ॥

सभायां न प्रवेष्टव्यं वक्तव्यं वा समञ्जसम् ।
अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी ॥ १० ॥
ये तु सभ्याः सभां प्राप्य तूष्णीं ध्यायन्त आसते ।
यथाप्राप्तं न ब्रुवते सर्वे ते ऽनृतवादिनः ॥ ११ ॥
पादो ऽधर्मस्य कर्तारं पादः साक्षिणमृच्छति ।
पादः सभासदः सर्वान्पादो राजानमृच्छति ॥ १२ ॥*
राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः ।

---

verse = Manu. VIII, 15. सभा वा न प्रवेष्टव्या Vulg. ॥ १० ॥ Vulg. places १५ before ॥ १३ ॥ यन्त्रयुक्तितः Vulg. ॥ १६ ॥

---

इत्यत्र सभ्यैः सभायामेककालमेव न प्रवेष्टव्यम्। न पुनरधर्मन्याययुक्तमित्यर्थः। तथा तस्यां प्रविष्टः सभ्यो ऽब्रुवन्निर्णयप्राप्तावसरस्य विवब्रुन्। धर्मन्यायविपरीतं ब्रुवन्किल्बिषी भवति महापातकीत्यर्थः ॥ १० ॥

ये सभ्या अधर्मविच्छेदस्थानभूतां सभां प्राप्य वादिप्रतिवादिनोः संदेहविच्छेदार्थिनोरपि अन्यकार्यव्यासक्ता इव किंचिदन्यदेव कार्यान्तरं ध्यायन्त इव तूष्णीं तथा आसते तिष्ठन्ति। एकस्य जयं द्वितीयस्य पराजयमवसरप्राप्तमपि न ब्रुवते। ततस्ते सर्वे ऽपि अनृतवादिसमाना राज्ञा दण्ड्याः। अनृतवादिविनययोग्या इत्यर्थः ॥ ११ ॥

एतच्छ्लोकद्वयमपि संततार्थनिगमप्रतिबद्धत्वादेकत्रैवोक्तम्। यदत्र यौ वादिप्रतिवादिनौ व्यवहारमत्सरारूढौ धर्माधिकरणमुपस्थितौ। ततो द्वावपि सत्यौ न चापि द्वावप्यसत्यौ। तयोरवश्यमेकेन सत्येन भवितव्यम्। अपरेणासत्येन। तदासत्यस्यैव सभासदो जयं प्रयच्छन्ति। पराजयं तु सत्यस्यैव। तदा तस्य दुष्टव्यवहारस्य यत्पापमेनःशब्देनोक्तम्। ततश्चतुर्भागविभक्तं भवति।

तत्प्रतिष्ठः स्मृतो धर्मो धर्ममूलश्च पार्थिवः ।
सह सद्भिरतो राजा व्यवहारान्विशोधयेत् ॥ ६ ॥
शुद्धेषु व्यवहारेषु शुद्धिं यान्ति सभासदः ।
शुद्धिश्च तेषां धर्माद्धि धर्ममेव वदेत्ततः ॥ ७ ॥
यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च ।
हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः ॥ ८ ॥
विद्धो धर्मो ह्यधर्मेण सभां यत्रोपतिष्ठते ।
न चास्य शल्यं कृन्तन्ति विद्धास्तत्र सभासदः ॥ ९ ॥

---

inserts two verses = Manu. VIII, 16, 17. After ७ Vulg. inserts another verse रौति धर्मः सभामध्ये भिद्यमानो ऽनृतेषुभिः । अधर्ममग्रतः कृत्वा वध्यो ऽप्येष दुरात्मभिः॥ After ९, Vulg. inserts a

---

तत्प्रतिष्ठ इति । एवं लक्षणोक्तसभ्यप्रतिष्ठितो धर्मो भवति । पार्थिवश्च धर्ममूलः । अतः कारणात् । सह सद्भिः सभासद्भिर्व्यवहारविशोधनं कुर्यात् ।...॥ ६ ॥

यदा राजा व्यवहारान्विशोधयेत् । तदा शुद्धेषु व्यवहारेषु सभासदः शुद्धिं प्राप्नुवन्ति ।...॥ ७ ॥

अत्र धर्मन्यायाचारस्य मूल्यं सभासद एव ।...तेन तान् प्रति पुनरिदमुक्तम् ।...॥ ८ ॥

तत्र यथा लोकः शस्त्राभिघातपीडितो वैद्यपार्श्वमागच्छति । तत्र च ते सभासदस्तस्य तदवस्थधर्मस्याधर्मस्योद्धरणव्यापारनियुक्ताधिकारिणो ऽपि यदा तत्पापशल्यं न कृन्तन्ति । नापनयन्ति । तदा...वृश्चिकविषेणेव । उपेक्षितपापशल्येन । ते एव सभासदो विद्धा भवन्ति । अतः कारणादित्युक्तम् ॥ ९ ॥

युक्तरूपं वदन्सभ्यो नाप्नुयाद्द्वेषकिल्बिषे।
ब्रुवाणस्त्वन्यथा सद्यस्तद्दोषभयमाप्नुयात्॥ ३॥
राजा तु धार्मिकान्सभ्यान्नियुंज्यात्सुपरीक्षितान्।
व्यवहारधुरं वोढुं ये शक्ताः सद्गवा इव॥ ४॥*
धर्मशास्त्रार्थकुशलाः कुलीनाः सत्यवादिनः।
समाः शत्रौ च मित्रे च नृपतेः स्युः सभासदः॥ ५॥*

---

S'lokas after 2: व्यवहारेषु सर्वेषु नियोक्तव्या बहुश्रुताः। गुणवत्यपि नैकस्मिन्विश्वसेद्धि विचक्षणः॥ दश वा वेदशास्त्रज्ञास्त्रयो वा वेदपारगाः। यद्ब्रूयुः कार्यमुत्पन्नं स धर्मो धर्मसाधनम्॥ धर्माणां संशयच्छेत्ता राजा च सुधराधिपः। तस्मान्न वाच्यमेकेन वचनं तु ससंशयम्॥ सभ्यस्तद्दे° Vulg.॥ ३॥ नियुञ्जीत परीक्षितान् Vulg.॥ ४॥ ६ om. b. L. After ६ Vulg.

---

शास्त्राचाराविरुद्धं यत्तद्युक्तरूपमुच्यते। एवंविधं वाक्यं ब्रुवन् सभ्यो नाप्नुयाद्द्वेषकिल्बिषे। ऐहिकामुष्मिकबाधे इत्यर्थः। युक्तवादी सभ्य इहलोकाबाधाकरं लोकद्वेषम्। परलोकबाधाकरं च किल्बिषं नाप्नुयात्। अन्यथा ब्रुवाणः सद्यस्तत्क्षणात्तद्दोषभयमाप्नुयादिति॥ ३॥

...ये व्यवहारधुरं वोढुं शक्ताः सद्गवा इव शास्त्राचारलोकाचारदृष्टपरंपराः प्रौढमतयो ये तान्धार्मिकान् राजा नियुंज्यात्सुपरीक्षितान् कृत्वेति॥ ४॥

अत्र सभासल्लक्षणमभिहितम्। इह धर्मशास्त्रेषु स्मृतितन्त्रसांकेतिकशब्दगूढार्थदुरवबोधानि मुनिवचनानि बाहुल्येन भवन्ति। तेषु...वचनार्थेषु...मन्दमतयो न सम्यग्न्यायदण्डप्रमाणनिर्णयविदः सभासदः सभायोग्या न भवन्तीत्येतदर्थमिदमभिहितं धर्मशास्त्रार्थकुशला इति। कुलीनाः कुलमाहात्म्यात्पक्षपातविकृतिं न भजन्ते। सत्यवादिनः स्वभावादेवानृतादुद्विजन्ते।...॥ ५॥

नानियुक्तेन वक्तव्यं व्यवहारे कथं च न ।
नियुक्तेन तु वक्तव्यमपक्षपतितं वचः ॥ १ ॥*
अनियुक्तो नियुक्तो वा शास्त्रज्ञो वक्तुमर्हति ।
दैवीं स वाचं वदति यः शास्त्रमनुजीवति ॥ २ ॥*

---

धर्मज्ञो... शास्त्रमुपजीवति ॥ Vulg. ॥ २ ॥ Vulg. inserts 3

---

इदानीं व्यवहारविधिरुच्यते ।...अत्र राजसभाव्यवहारकाले लोकाचारजन्यपक्षपक्षाश्रयस्थिता बहवो लोका वादिप्रतिवादिभ्यां सह धर्माधिकरणमागच्छन्ति । तत्र केचिज्ज्ञानिनः केचिदज्ञानिनः केचिज्ज्ञानाभिमानिनः । यदि साकोटनं निषिद्धा न भवन्ति । ततस्ते सभ्यानेवानेकप्रमादवाक्यैर्विक्षोभ्य द्रावयन्ति परस्परं वादकलहकारिणो भवन्ति ।...इति श्लोकपूर्वार्धेनानियुक्तवक्तव्याकोटनाभिहिता । उत्तरार्धेन नियुक्तानामपि सैव दर्शिता । यथा नियुक्तेनैव वक्तव्यमपक्षपतितं वचः । नियुक्तेन तु सभ्येन धर्मासनस्थेन केवलं धर्ममूर्तिमेवावस्थापयता किमपि धर्मशास्त्रोक्तव्यवहारनिर्णयवचनं तदेव वक्तव्यम् । न पुनर्वादिनोरेकतमस्यापि पक्षपाताश्रितं न वक्तव्यमिति ॥ १ ॥

अस्यायमर्थः । यदि कथमपि सर्वेऽपि सभासदो बुद्धिदूषणाच्छास्त्रार्थं विस्मृत्य । अथवा लोभादिना कारणेन शास्त्रोक्तं न्यायमार्गमुत्सृज्य व्यवहारस्यान्याययुक्तं निर्णयदानं प्रवृत्ता भवन्ति । तत्र च प्रसङ्गागतः कश्चित् स्मृतितन्त्रव्यवहारमार्गज्ञो ब्राह्मणः प्रत्यक्षस्तिष्ठति । तेन शास्त्रोक्तवचनपाठपूर्वकं प्रतिषेधनीयाः सभासदः । एवं प्रबोधयतस्तदतस्तस्य कृतं नास्ति । अनियुक्तो ऽपि शास्त्रज्ञो वक्तुमर्हति । यतः शास्त्रं नाम देवभाषा ॥ २ ॥

राज्ञे कुर्यात्पूर्वमावेदनं य-
स्तस्य ज्ञेयः पूर्वपक्षः विधिज्ञैः ॥ ३८॥
साक्षिकदूषणे कार्यं पूर्वसाक्षिविशोधनम्।
शुद्धेषु साक्षिषु ततः पश्चात्साक्ष्यं विशोधयेत् ॥ ३९॥*
साक्षिसभ्यावसन्नानां दूषणे दर्शनं पुनः।
स्वचर्यावसितानां तु नास्ति पौनर्भवो विधिः॥४०॥*
स्वयमभ्युपपन्नो ऽपि स्वचर्यावसितो ऽपि सन्।

---

मम नार्पयति। इत्यादिकानि पूर्वपक्षस्य भाषावादिनो वावेदनोदाहरणानि उक्तानीति ॥ ३८ ॥

यदा प्रतिवादी साक्षिकदूषणं प्रयच्छति। तदा पूर्वं साक्षिविशोधनं साक्षिप्रकरणोक्तन्यायेन कर्तव्यम्। यदि चादुष्टदूषणं करोति ततः क्रियादेषिहीनवादिविनयं ग्राह्यः। ततः शुद्धेषु साक्षिषु साक्षिवचनं विशोध्यम्। व्याजं निर्व्याजं चेति ॥ ३९ ॥

ये साक्षिभिर्वा स्वसाक्ष्येणावसाये प्राप्ताः। ये च सभ्यैरवसायं प्रापिताः। विधर्मिणो मन्यन्ते। तेषां तीरितानुशिष्टन्यायेन राजोत्तरकरणस्यावधिष्ठितो भूत्वा पुनर्व्यवहारदर्शनं कुर्यादिति। ये पुनः स्वचर्यावसिता भवन्ति। कूटसाक्षिप्रपञ्चकरणेन वा कूटीभूताः। स्वयमेव स्वकीयसंबद्धाः प्रपश्यन्ते। तेषां नास्ति पौनर्भवो विधिः। पुनर्व्यवहारदर्शनं च नास्तीति ॥ ४० ॥

अत्रावसन्नास्त्रयो ऽभिहिताः। एकः स्वयमभ्युपपन्नः। स्वमुखेन प्राप्तावसायः। द्वितीयः स्वचर्यावसन्नः। कूटलिखितसाक्षिप्रपञ्चेन प्रपञ्चकरणेन स्वकीयदुष्टचर्यया दुश्चरित्रेणावसन्नः। तृतीय उद्दिष्टसाक्षिभिरेवावसायं प्रापितः। अयं त्रिविधो ऽप्यवसन्नो राज्ञा स्वेच्छया विधूय दण्डनीयः। किं

पण्यमूल्यं भृतिर्न्यासो दण्डो यच्चावहारकम्।
वृथादानाक्षिकपणा वर्धन्ते नाविवक्षिताः॥ ३६॥*
मिथ्याभियोगिनो ये स्युर्द्विजानां शूद्रयोनयः।
तेषां जिह्वां समुत्कृत्य राजा शूले विधापयेत्॥ ३७॥
अज्ञा लेखः पट्टकः शासनं वा
आधिः पत्त्रं विक्रयो वा क्रयो वा।

---

पण्यमूल्यं विक्रीतक्रयाणकमूल्यम्। भृतिः कर्मकरवृत्तिः। न्यासः स्थापनिकमुक्तं द्रव्यम्। दण्डो दोषविनयो राजकुले। अवहारकम् उच्छिन्नकं गृहीतम्। वृथादानं यच्चारणादीनां प्रतिपन्नम्। आक्षिकपणा द्यूतहारितद्रव्यम्। एते पणाः सुचिरकालागतेनापि धनिना सामकाः स्वरूपस्थिता ग्रहीतव्या एते अविचारिता अविवक्षिता न वर्धन्त इत्यर्थः॥ ३६॥

द्विजानां शूद्रयोनयः प्रेषणकारिण एव विहिताः। यदा पुनस्त एव शूद्रा द्विजानामेव मिथ्याभियोगिनो ये स्युः भवन्ति। दर्पाद्वा निजदुर्वचनाविक्षेपकारिणो भवन्ति। तदा तान् शूद्रान् राजा खण्डितजिह्वान् कृत्वा शूले निधापयेत्। ततस्तेन पापेन न गृह्यते। अन्यथा शिष्टपालनार्थं दुष्टनिग्रहार्थं करग्राहिणो निर्मितस्य राज्ञ एव स दोष इति॥ ३७॥

यो राज्ञे पूर्वमावेदयति तस्य पूर्वपक्षो ज्ञेयः। अज्ञा। एतेन राजाज्ञा न गणिता। लेखः। प्रभुसक्तलेखेनायं प्रारब्धः। पट्टकः। अनेन दासी मदीयावष्टब्धा पट्टकलिखितम्। शासनम्। अयं मदीयं शासनग्राममवष्टभ्य भुंक्ते। ममेदं शासनं तिष्ठति। आधिः। अयमाधिः प्रथमं मम ऋणिकेन कृतः। तत्केन भोक्तव्यः। पत्त्रम्। एष मम यत्र लिखितगृहीतमपि द्रव्यं न प्रयच्छति। क्रयः। अस्य हस्ताद्भाण्डं मया क्रीतं मूल्यद्रव्यं च दत्तम्। भाण्डं

आह्वतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥ ३३ ॥*

मणयः पद्मरागाद्या दीनारादि हिरण्मयम्।
मुक्ताविद्रुमशङ्खाद्याः प्रदुष्टाः स्वामिगामिनः ॥ ३४ ॥

गन्धमाल्यमदत्तं तु भूषणं वास एव वा।
पादुकेति राजोक्तं तदाक्रामन्वधमर्हति ॥ ३५ ॥

---

षाद्वसनं पादुकेति राज्ञोक्तो ऽयं वधर्हति ॥ A. See, however, the Comm. and Yâjñavalkya II, 303. ॥ ३५ ॥

---

यः स्वयमभ्युपपन्नः स्वकीयमन्यायवादित्वं प्रतिपन्नः। अतो ये हीनवादशब्देन प्राप्ता विनयमात्राकोटनाः। न तु प्राप्तावसायाः पुनरपि वादयोग्या भवन्तीति। ते चात्रोच्यन्ते। तत्र अन्यवादी यो मतिभ्रंशात्किंचिदन्यद्वदति। यश्च क्रियाद्वेषाद्दूषणं प्रयच्छति। यश्च राजदैविकादिना नोपस्थानकर्ता जातः। यश्च तत्क्षणमेवोत्तरमदत्त्वा उत्तरकालं प्रार्थयति। यश्च स्वकीयवैरिणं दानग्रहणिकं वा दृष्ट्वा तद्भयात्प्रपलायनः। एते पञ्चापि एतैरेव स्थलैश्च प्राप्तावसाया न भवन्ति। तत्क्षणमात्रवादहीनाः पुनरपि वादयोग्या भवन्तीत्यर्थः ॥ ३३ ॥

यद्येतेषां वस्तूनां स्वामी एतानि जातिविशुद्धानि निर्दोषाणि भणित्वा विक्रीणाति। ग्राहको ऽपि तत्प्रत्ययादेव मूल्यं दत्त्वा गृह्णाति। यावदन्यत्र सुदूरमपि गत्वा परीक्षापयति। तावत्कृत्रिमाणि कूटानि यदि भवन्ति। ततस्तानि स्वामिगानि भवन्ति। तेन तेषां स्वामिना तानि गृहीत्वा अन्यानि वा गुणप्रयुक्तानि दत्त्वा परितोषणीयो ग्राहकः। मूल्यं वा समर्पणीयमस्येत्यर्थः ॥ ३४ ॥

एतानि वस्तूनि राजकीयानि यो दर्पात्स्वयमाक्रामति। स राज्ञः सकाशाद्वधमर्हतीति ॥ ३५ ॥

न्यासस्यापह्नवे चैव दिव्या संभवति क्रिया ॥ ३० ॥*
कारणप्रतिपत्त्या च पूर्वपक्षे विरोधिते।
अभियुक्तेन वै भाव्यं विज्ञेयं पूर्वपक्षवत् ॥ ३१ ॥
पलायते य आहूतो मौनी साक्षिपराजितः।
स्वयमभ्युपपन्नश्च अवसन्नश्चतुर्विधः ॥ ३२ ॥*
अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः।

---

गृहमध्ये वा। तथा साहसे व्यवहारे। तथा न्यासापह्नवे। एतेषु प्रदेशेष्वर्थेषु च मानुषीक्रियाभावे दिव्या संभवति क्रियेति ॥ ३० ॥

अत्र कारणप्रतिपत्तिरिति संस्कारेण सह संप्रतिपत्तिः। प्रत्यवस्कन्दनोत्तरमित्यर्थः। सर्वत्र कारणोत्तरे प्रतिवादी संप्रतिपत्तिं कृत्वा कारणं ब्रवीति। अतस्तेन कारणप्रत्युत्तरेण पूर्वपक्षे विरोधिते भाषार्थे निरर्थकीकृते। अभियुक्तेन प्रतिवादिना भाव्यं भावनीयम्। तत्स्वकीयं कारणमुपन्यस्तं खरीकरणीयमित्यर्थः। एतत्तेन विज्ञेयं पूर्वपक्षवत्। पूर्वपक्षं वादित्वं प्रति प्राप्तेन। तत्स्वकीयं कारणं क्रियया खरीकरणीयमित्यर्थः ॥ ३१ ॥

आहूतः आकारितो ऽपि राजपुरुषैः प्रस्तुतव्यवहारखेटनार्थं पलायते। स अवसन्नः प्राप्तावसाय उच्यते। मौनीति यः प्रस्तुतव्यवहारे स्वकीयं प्राप्तावसरं प्रोत्साह्यमानो ऽपि न वदति। मौनी तूष्णीं स्थितस्तिष्ठति। अयमप्यवसायं प्राप्तो द्वितीयः। तथा च साक्षिभिर्यः पराजयं प्रापितः। अयमप्यवसन्नस्तृतीयः। तथा व्यवहारार्थमागतः स्वकीयमन्यायं यः स्वयमेव प्रतिपद्यते। स स्वयमभ्युपपन्नश्चतुर्थो ऽवसायं प्राप्तः ॥ ३२ ॥

अत्र ये समनन्तरपूर्वश्लोके दर्शितास्चत्वारः प्राप्तावसाया उक्ताः पुनरस्मिञ्श्लोके मौनी आहूतप्रपलायी च हीनवादित्वनियममात्रेणानुगृह्य पुनरपि वादयोग्यत्वमापादितौ। ततस्तेषां चतुर्णां मध्ये निश्चितौ द्वावेवावसन्नौ प्राप्तावसायौ प्रतिष्ठितान्तौ। एको यः साक्षिभिः पराजितो द्वितीयो

अभियुक्तो ऽभियोगस्य यदि कुर्यादपह्नवम् ।
अभियोक्ता दिशेद्देश्यं प्रत्यवस्कन्दितो न चेत् ॥ २६ ॥
पूर्वपादे हि लिखितं यथाक्षरमशेषतः ।
अर्थी तृतीयपादे तु क्रियया प्रतिपादयेत् ॥ २७ ॥
क्रियापि द्विविधा प्रोक्ता मानुषी दैविकी तथा ।
मानुषी लेख्यसाक्षिभ्यां धटादिर्दैविकी स्मृता ॥२८॥*
दिवा कृते कार्यविधौ ग्रामेषु नगरेषु वा ।
संभवे साक्षिणां चैव दिव्या न भवति क्रिया ॥ २९ ॥
अरण्ये निर्जने रात्रावन्तर्वेश्मनि साहसे ।

---

अभियुक्तः प्रतिवादी यद्यभियोगस्यापह्नवं मिथ्या करोति । तदा अभियोक्ता वादी देश्यं दिशेदिति । क्रियामानयेदित्यर्थः । यदि स एव वादी प्रतिवादिना प्रत्यवस्कन्दनोत्तरेणाभियुक्तो भवति । तत्र च प्रत्यवस्कन्दनोत्तरे प्रतिवाद्येव नानयेद्देश्यमिति ॥ २६ ॥

यदर्थिना पूर्वभाषायां लिखितं तत्तेन तृतीयपादेन क्रियया खरीकरणीयमित्यर्थः ॥ २७ ॥

मिथ्या कुर्वतः प्रतिवादिनः साधनार्थं क्रिया द्विप्रकारा दृष्टा मानुषी दैविकी च । तत्र मानुषी लेख्यसाक्षिरूपा । दैविकी धटो ऽग्निरुदकं चैव विषं कोशश्च पञ्चमः । इत्येवमादिकेति ॥ २८ ॥

यानि दिवा कृतानि कार्याणि भवन्ति तेषु श्रोतारो द्रष्टारश्च संभवन्ति । लिखितमपि संभवति । तेनैतेषु प्रदेशेषु मानुष्येव क्रिया प्रमाणं न दैविकी । तथा संभवे साक्षिणामिति । यच्च ससाक्षिकमेव प्रयोजनं वृत्तं । तत्र साक्षिसंभव एव विद्यमाने दिव्या क्रिया न भवति ॥ २९ ॥

अरण्ये वनमध्ये पत्तने वा निर्जनप्रदेशे रात्रौ च मानुषासंभवे एकान्त-

यो यस्यार्थे विवदते तयोर्जयपराजयौ ॥ २२ ॥*
यो न भ्राता न च पिता न पुत्रो न नियोगकृत् ।
परार्थवादी दण्ड्यः स्याद्यवहारे ऽपि विब्रुवन् ॥२३॥*
पूर्ववादं परित्यज्य यो ऽन्यमालम्बते पुनः ।
वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः ॥ २४ ॥*
सर्वेष्वपि विवादेषु वाक्छलेनापहीयते ।
पशुस्त्रीभूम्यृणादाने शास्यो ऽप्यर्थान्न हीयते ॥ २५ ॥*

---

वापटुशरीरेण करणाग्रे स्वयमेव नियुक्तो भवति। एवमुक्त्वा यथा ऽस्य जयेन मम जयः। पराजयेन पराजयः। अथवा पटुशरीरेण गृहस्थितेनैव तस्यापि प्रधानपुरुषस्य हस्ते संदिश्य यः को ऽपि प्रहितो भवेत्। एवं तयोरर्थिप्रतिहस्तकयोः करणाग्रे प्रतिष्ठतोर्यस्यार्थे विवदते। तस्य जयपराजयाविति ॥ २२ ॥

अनेके पुरुषाः कामक्रोधलोभग्रस्ताः परकीयार्थ एवासंबध्यमाना अपि अनियुक्ता अपि धनिकत्वं ज्ञात्वा परान्विद्वेषयन्ति। तन्निवारणार्थं स्लोक इति ॥ २३ ॥

यो वादी पूर्वपादलिखितस्वप्रतिज्ञार्थं क्रियया निर्वाहयितुमसमर्थः। अन्यपादाश्रितमभियोगमवतरयति। स तस्मात्संक्रमणाद्धीनवादीति ज्ञेयो वक्तव्य इत्यर्थः ॥ २४ ॥

अन्येषु सर्वेषु विवादेषु वाक्छले। नापहीयते। नावसायं प्राप्नोति। यच्च पुनर्गोमहिष्यादिपशुवादः। यश्च स्त्रीविषयसंबध्यमानो यो वादः। तथा गृहक्षेत्रादिको वादः। यो भूमिवादः। यश्च पञ्चविंशतिभेदभिन्नर्णादानवादः। एतेषु सर्वेष्वपि प्रधानवादेषु केनापि विरक्तवाक्छलमात्रेणावसायं न प्राप्नोति। शास्यो ऽपि विनयं प्राप्नोति। तस्मात्प्रक्रान्तस्वकार्यान्नावहीयते। न परिच्यवत इति ॥ २५ ॥

राजकुलावबोधाय धर्मस्थैः सुविचारितम् ।
तस्मादन्यद्व्यपोह्यं स्याद्वादिनः फलकादिषु ॥ १९ ॥
वादिभ्यामभ्यनुज्ञातं शेषं च फलके स्थितम् ।
ससाक्षिकं लिखेयुस्ते प्रतिपत्तिं च वादिनोः ॥ २० ॥
वादिभ्यां लिखिताच्छेषं यत्पुनर्वादिना स्मृतम् ।
तत्प्रत्याकलितं नाम स्वपादे तस्य लिख्यते ॥ २१ ॥
अर्थिना संनियुक्तो वा प्रत्यर्थिप्रहितो ऽपि वा ।

---

तेषु फलकादिषु यत्किमपि वादिनः सक्तं प्रथममेव लिखितम् । तस्माद्य-दन्यदभ्यधिकमपि तद्धर्मज्ञैः सुविचारितं व्यपोह्यम् । अपनेतव्यमित्यर्थः । तच्च किमर्थं राजकुलावबोधार्थं वादिनश्चेति ॥ १९ ॥

अयं श्लोको वादस्थानकप्रस्थाने न निवरणाय ।...तत्र वादिभ्यामभ्यनु-ज्ञातमित्येकं वाक्यम् । शेषं च फलके स्थितमिति द्वितीयम् । ससाक्षिकं लिखेयुस्त इति तृतीयम् । प्रतिपत्तिं च वादिनोरिति चतुर्थम् ।...के लिखेयुः कारणिकाः । किं लिखेयुः । यत्किमपि वादी भाषाप्रथमपादे स्थितो वदति । ते फलकस्थितं लिखेयुः । यच्चोक्तं शेषं च लिखेयुरिति । तदिह भाषा यावत्फलके ऽभिलिख्यते यावच्च सोत्तरेणावष्टभ्यते तावत्सर्वो ऽपि भाषावादिनामेव स्वकीयपादे स्थितो वादी यदि किमपि विस्मृत्य कुलेखितं प्रसाधयति । सुस्मृतं च सत्यं च लेखयति । तत इदं तस्य प्रत्या-कलितमुच्यते । पश्चादाकलितमित्यर्थः ।...॥ २० ॥

तत्र वादिभ्यामिति द्विवचननिर्देशः कृतस्तद्द्वितीयस्योत्तरवादिनो ऽपि प्रत्याकलितस्यायमेव विधिर्दृष्टः । यच्च ससाक्षिकमुक्तं तच्च साक्षिनिर्देश-काले तृतीयपादे ऽप्ययमेव विधिर्द्रष्टव्यः । यच्चानुज्ञातमित्युक्तं तद्द्वाभ्यामपि वादिभ्यां श्रुतधारिभ्यां द्वयोरपि यथासंभवं लिख्यत इति ॥ २१ ॥

यदि कदाचिच्छरीरापाटवाद्वा स्वयं वक्तुं निष्प्रभुत्वाद्वार्थिना प्रत्यर्थिना

भ्रष्टं तु दुःखितं यत्स्याज्जलतैलादिभिर्हतम् ।
भाषायां तदपि स्पष्टं विस्पष्टार्थं विवर्जयेत् ॥ १४ ॥
सत्या भाषा न भवति यद्यपि स्यात्प्रतिष्ठिता ।
बहिश्चेद्भ्रश्यते धर्मान्नियताद्व्यावहारिकात् ॥ १५ ॥ *
गन्धमादनसंस्थस्य मयास्यासीत्तदर्पितम् ।
व्यवहारिकधर्मस्य बाह्यमेतन्न सिध्यति ॥ १६ ॥
अन्याक्षरनिवेशेन अन्यार्थगमनेन च ।
आकुलं च क्रियादानं क्रिया चैवाकुला भवेत् ॥ १७ ॥
रागादीनां यदेकेन कोपितः करणं वदेत् ।
तदादौ तु लिखेत्सर्वं वादिनः फलकादिषुः ॥ १८ ॥*

---

इत्येतत्सप्त भाषादोषाः । अष्टम उच्यते ॥ १४ ॥

विवरणोदाहरणमिदम् ॥ १५ ॥

इत्यष्टमो ऽयं भाषादोषः । एवमेतैरष्टभिरपि दोषैर्विवर्जिता भाषा ग्राह्या भवतीति ॥ १६ ॥

यदा वादी अन्यादृशार्थस्याक्षरनिवेशं कृत्वा व्यवहारकाले अन्यादृशमेव प्रभूततरार्थोत्पादकमर्थमुपन्यस्यति तदा क्रियादानमाकुलं भवति ।...यदा च प्रथमवादयोर्द्वितीयेन द्वितीयप्रथमेन सभ्याश्च द्वाभ्यामपि व्याकुलाः । तदार्थापत्त्या क्रियापि व्याकुला भवतीति ॥ १७ ॥

रागादीनां कामक्रोधलोभानां मध्ये येनैव भावेन कोपितो वादी करणमागत्य वदेत् । तदेव फलकादिष्विति फलकपत्त्रभूर्जसंपुटिकाकुड्येष्वपि यथासंभवं तत्क्षणमेव लेखको लिखेदिति ।...॥ १८ ॥

अन्यार्थमर्थहीनं च प्रमाणागमवर्जितम्।
लेख्यं हीनाधिकं भ्रष्टं भाषादोषास्तूदाहृताः ॥ ८ ॥*
लब्धव्यं येन यद्यस्मात्स तत्तस्मादवाप्नुयात्।
न त्वन्योन्यमथान्यस्मादित्यन्यार्थमिदं त्रिधा ॥ ९ ॥
मनसाहमपि ध्यातस्त्वन्मित्रेणेह शत्रुवत्।
अतोऽनया महाक्षान्त्या त्वमिहावेदितो मया ॥ १० ॥
द्रव्यप्रमाणहीनं यत्तुलाकाश्रयवर्जितम्।
प्रमाणवर्जितं नाम लेख्यदोषं तदुत्सृजेत् ॥ ११ ॥
आगमवर्जितं दोषं पूर्ववादे विवर्जयेत्।
एकस्य बहुभिः सार्धं पुरराष्ट्रविरोधकम् ॥ १२ ॥
बिन्दुमात्रविहीना वा पदवर्णविदुष्टा वा।
हीनाधिका भवेद्यर्था तां यत्नेन विवर्जयेत् ॥ १३ ॥

---

मात्रापदवर्णैर्व्येकाविश्लिष्टया। A. (sic) The reading above given is supported by an analogous text of Hârîta. ॥ १३ ॥

---

तत्रान्यार्थादयो भाषादोषाः प्रोक्ताः। ते च प्रत्येकं प्रकाशार्थाः क्रियन्ते। तत्रान्यार्थमिति ॥ ८ ॥

इत्यन्यार्थदोषस्वरूपं प्रथमम्। अथार्थहीनम् ॥ ९ ॥

इत्यर्थहीनदोषो द्वितीयः। प्रमाणवर्जित उच्यते ॥ १० ॥

इति तृतीयम्। प्रमाणवर्जितमुच्यते ॥ ११ ॥

इति चतुर्थः। हीनाधिकमुच्यते ॥ १२ ॥

अत्र दोषद्वयमुक्तम् ॥ १३ ॥

प्राङ्न्यायविधिसाध्यं वा उत्तरं स्याच्चतुर्विधम्॥ ४ ॥*
मिथ्यैतन्नाभिजानामि मम तत्र न संनिधिः।
अजातश्चास्मि तत्काल एवं मिथ्या चतुर्विधम्॥ ५ ॥*
मिथ्या च विपरीतं च पुनःशब्दसमागमम्।
पूर्वपक्षार्थसंबन्धमुत्तरं स्याच्चतुर्विधम्॥ ६॥
भाषाया उत्तरं यावत्प्रत्यर्थी विनिवेशयेत्।
अर्थी तु लेखयेत्तावद्यावद्वस्तु विवक्षितम्॥ ७॥

---

१, २६ in Vulg. पुलोपाश्रयवर्जितम्॥ A. This false reading has been conjecturally altered in the text. ॥ ११ ॥ बिन्द-

---

ऽमुकामुककुलजस्याग्रे पराजित इति। प्रतिवादिवचनम्। तच्चतुर्विधोत्तरलक्षणं दर्शितमिति। अथ पारकीयश्लोको ऽत्रैव मूलग्रन्थे लिखितो दृष्टः। सो ऽपि चतुर्विधोत्तरवादी कष्टव्याख्यानश्च भविष्यति। तथापि लिख्यत इति॥ ४॥

विपरीतमिति मिथ्याया विपरीतं संप्रतिपच्युत्तरं भवति। पुनरपि वादिन एव प्रत्यवस्कन्दनोत्तरमित्यर्थः। चतुर्थं चोत्तरं शब्दसमागममुक्तम्। तत्र दलिताभिप्रायेणाप्तोपदेशः शब्दसमागम उक्तः। तेन पुनराप्तोपदेशशब्दः समागमः प्राङ्न्यायोत्तरमुक्तम्। एतेषां चतुर्णां यदि पूर्वपक्षार्थसंबद्धं भवति तत्तदुत्तरं प्रतिवादिना दातव्यमिति॥ ६॥

अर्थी भाषायां स्वकीयं विवक्षितं वस्तु तावदेव लेखयेत्। यावत्प्रत्यर्थी उत्तरं न निवेशयेत्। उत्तराक्रान्तभाषायां तु तस्य विवक्षितवस्तुनस्तस्यापि भूयो लेख्याधिकारो नास्ति॥ ७॥

सुनिश्चितबलाधानस्त्वर्थी स्वार्थप्रचोदितः।
लेखयेत्पूर्वपक्षं तु कृतकार्यविनिश्चयः॥ १॥
पूर्वपक्षश्रुतार्थस्तु धन्यर्थी तदनन्तरम्।
पूर्वपक्षार्थसंबन्धं प्रतिपक्षं निवेशयेत्॥ २॥*
श्वो लेखनं वा स लभेत्त्र्यहं सप्ताहमेव वा।
अर्थी तृतीयपादे तु युक्तं सद्यो ध्रुवं जयी॥ ३॥
मिथ्या संप्रतिपत्तिर्वा प्रत्यवस्कन्दमेव वा।

२. १—४४ om. Vulg. २, १ is however inserted after

अर्थी पूर्वपक्षं लेखयेत्। भाषामित्यर्थः। स चार्थप्रचोदितः। न राज्ञा प्रचोदितो न वैरिणा। स्वकीयेनैवार्थेन प्रचोदितः। तथा कृतकार्यविनिश्चयः। यावदिदं प्रारब्धप्रयोजनं मयान्ते न नीतं तावदन्यन्न करोमीति कृतनिश्चयः। एतदर्थिकर्तव्यमुक्तम्। अतः प्रत्यर्थिकर्तव्यमुच्यते॥ १॥

तथा धनी अर्थीत्युक्तः। ऋणी प्रत्यर्थीत्यभिहितः। तथा भाषायाः पूर्वपक्षसंज्ञा। तदुत्तरस्य प्रतिपक्षसंज्ञा। अर्थिना लिखितपूर्वपक्षश्रुतार्थस्तु प्रत्यर्थी तदनन्तरं पूर्वपक्षार्थसंबन्धं प्रतिपक्षं निवेशयेदुत्तरं दद्यादित्यर्थः॥ २॥

अत्र श्लोकेन पूर्वार्धेन उत्तरवादिनः कार्यमुक्तम्। उत्तरार्धेन पूर्ववादिनः। तद्यथा। अनन्तरोक्तः प्रत्यर्थी यद्युत्तरकालं प्रार्थयति तत आगामिदिवस उच्यते। ततः श्वो लेखनमागामिदिवसे लेखनं वा स लभेत्। अथवा त्र्यहं सप्ताहं वा। उत्तरकालस्तस्य दातव्यः। अर्थी तृतीयपादे तूत्तरकालं न लभते। सद्यो ध्रुव जयं लभते। तत्पूर्ववादिलिखितार्थस्य क्रियाद्वारेण खरी करणसहितमिति॥ ३॥

संप्रतिपत्तिस्तु भाषार्थस्य कल्पसमर्थना। प्रत्यवस्कन्दनं वादिन एव सकारणं प्रत्यभियोगवादिनः। प्राङ्न्यायविधिसिद्धिः ममायं पूर्वमेवास्मिन्नर्थे

तलवद्दृश्यते व्योम खद्योतो हव्यवाडिव ।
न तलं विद्यते व्योम्नि न खद्योते हुताशनः ॥ ७२ ॥*
तस्मात्प्रत्यक्षदृष्टो ऽपि युक्तमर्थः परीक्षितुम् ।
परीक्ष्य ज्ञापयन्नर्थान्न धर्मात्परिहीयते ॥ ७३ ॥*
एवं पश्यन्सदा राजा व्यवहारान्समाहितः ।
वितत्येह यशो दीप्तं प्रेत्याप्नोति त्रिविष्टपम् ॥ ७४ ॥*

---

कान्तिकी मता ॥ यत्नान्न धर्मात् Vulg. ॥ ७३ ॥ ब्रध्नस्याप्नोति विष्टपम् ॥ Vulg. ॥ ७४ ॥

---

इत्यसहायनारदभाष्ये केशवभट्टप्रोत्साहितकल्याणभट्टपरिशोधितव्यवहारमातृकायां प्रथमो ऽध्यायः समाप्तः ॥

किं तु राज्ञा विशेषेण स्वधर्ममनुरक्षता ।
मनुष्यचित्तवैचित्र्यात्परीक्ष्या साध्वसाधुता ॥ ६८ ॥
पुरुषाः सन्ति ये लोभात्प्रब्रूयुः साक्ष्यमन्यथा ।
सन्ति चान्ये दुरात्मानः कूटलेख्यकृतो जनाः ॥ ६९ ॥
अतः परीक्ष्यमुभयमेतद्राज्ञा विशेषतः ।
लेख्याचारेण लिखितं साक्ष्याचारेण साक्षिणः ॥ ७० ॥
असत्याः सत्यसंकाशाः सत्याश्चासत्यसंनिभाः ।
दृश्यन्ते विविधा भावास्तस्माद्युक्तं परीक्षणम् ॥ ७१ ॥*

---

स्वधर्मं परिरक्षता । नराणां Vulg. ॥ ६८ ॥ ते लोभाद्ये ब्रूयुः Vulg. ॥ ६९ ॥ Vulg. inserts the following verse after ७० लेख्य-मालेख्यवत्केचिल्लिखन्ति कुशला नराः । अतो न लेख्यसामर्थ्यात्सिद्धिरै-

---

...इदानीं मनुष्यचित्तवैचित्र्यस्य व्याख्यामाह ॥ ६८ ॥

अनेन श्लोकद्वयेन पुरुषचित्तवैचित्र्यं दर्शयित्वा साक्षिप्रमाणयोरपि प्रमाणादरो दर्शितः । यथोक्तं लेख्याचारेण लिखितं साक्ष्याचारेण साक्षिण इति । तदग्रतो लेख्याचारपरीक्षा साक्ष्याचारपरीक्षा च सविस्तरा भविष्यति । तेनोभयाकारप्रकारेणोभयमप्येतत्परीक्ष्यमित्युक्तम् । तत्रैव वक्ष्याम इति ॥ ६९ ॥ ॥ ७० ॥

अत्र यथा आकाशो भूतलवद्दृश्यते । परं दृश्यमाने ऽपि तत्र भूतलं नास्ति । यथा च खद्योते वह्निस्फुलिङ्गसदृशे ऽपि दृश्यमाने तत्र वह्निर्नास्ति । तथा क्वचित्पुरुषवचने ऽपि सत्याभासे दृश्यमाने ऽपि सत्यं न भवति । तस्मात्प्रत्यक्षदृष्टो ऽप्यर्थस्तात्पर्यतः परीक्षितुं युक्तः । यत एव दृश्यन्ते विविधा भावास्तत एव परीक्ष्य ज्ञापयन्नर्यान्न परिहीयते ॥ ७२ ॥

तीरितं चानुशिष्टं च यो मन्येत विधर्मतः ।
द्विगुणं दण्डमास्थाय तत्कार्यं पुनरुद्धरेत् ॥ ६५ ॥*
दुर्दृष्टे व्यवहारे तु सभ्यास्तं दण्डमाप्नुयुः ।
न हि जातु विना दण्डं कश्चिन्मार्गेऽवतिष्ठते ॥ ६६ ॥*
रागादज्ञानतो वापि लोभाद्वा यो ऽन्यथा वदेत् ।
सभ्यो ऽसभ्यः स विज्ञेयः तं पापं विनयेन्नृपः ॥ ६७ ॥

---

a om. Vulg. भावितं चानुशिष्टं च C. ॥ ६५ ॥ यातु विना दण्डं कश्चिद्दुर्गे Vulg. The reading of A. is supported by Vîr-am., 123. विनयेद्भृशम् Vulg. ॥ ६७ ॥

---

यत्तीरितमित्युक्तं तद्व्यवहारस्य चतुर्थपदनिर्णयावसरे वादिप्रतिवादिनोः सभ्यैरेकवाक्यतयोच्चरितजयपराजयमात्रप्रकटीकृतनिर्णयम्। एतत्तीरितमित्युक्तम्। अनुशिष्टं पुनरुच्यते। यत्सभ्यैरेव तदनन्तरमपराधसारासारपर्यालोचनतया निगदितदण्डं तदनुशिष्टम्। ... एकतमे प्रदेशे ऽपि स्थित्वा य एवात्मानं विधर्मणा कुन्यायेन पराजितं मन्येत्। स एव तत्र स्थित एव राजकुले द्विगुणदण्डमुद्दिश्य तत्पुरतस्तत्कार्यं पुनरुद्धरेदिति ॥ ६५ ॥

...अयुक्तनिर्णयदोषः सभ्यानामुपरि चरति। ततः सभ्या अपि तं दण्डं प्राप्नुयुरिति ।... ॥ ६६ ॥

रागात्पूर्वसंभूतक्रोधात्। अज्ञानतो मूर्खत्वात्। लोभादुपचारात्।... यो ऽन्यथा वदेत्। न्यायविपरीतमित्यर्थः। स सभ्यो ऽसभ्यो विज्ञेयः। सभायोग्यो न भवतीत्यर्थः।... ॥ ६७ ॥

सन्ति ज्ञातार इत्युक्त्वा दिशेत्युक्तो दिशेन्न यः।
एतैस्तु कारणैः सर्वैर्धर्महीनान्विनिर्दिशेत् ॥ ६१ ॥
निर्णिक्तव्यवहारेषु प्रमाणमफलं भवेत्।
लिखितं साक्षिणो वापि पूर्वमावेदितं न चेत् ॥ ६२ ॥*
यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः।
निर्णिक्तव्यवहाराणां प्रमाणमफलं तथा ॥ ६३ ॥*
अभूतमप्यभिहितं प्राप्तकालं परीक्षयेत्।
यत्तु प्रमादान्नोच्येत तद्भूतमपि हीयते ॥ ६४ ॥

---

are nearly identical with Manu. VIII. 53, 54, 57. ६२

---

यस्त्वेवं वदति यथा लिखितं मम विद्यते साक्षिणो वा। तच्छ्रुत्वा सभ्यैरुक्तम्। यदि ज्ञातारः सन्ति ते दिश आवेदयेत्यर्थः। यावता न दिशति न तत्रानयति। एतान्सर्वानप्येतैर्लक्षणैर्धर्महीनान्विनिर्दिशेत् ॥ ६१ ॥

...अनेन दुष्टर्णिकेन मम द्रव्यं दातव्यमस्ति। तच्च साक्षिप्रमाणसहितं तथापि न ददाति। अतो ऽयं मम राजकुले समर्पणीय इत्यादिपूर्वजल्पावसरे यदि साक्षिप्रमाणं क्वचिदपि नावेदितं न कीर्तितं भवेत्। ततो निर्णिक्त व्यवहारे तत्पश्चादुपन्यस्तमपि न प्रमाणं भवति। यदि पुनरेवं तत्पूर्वमावेदितं यद्यपि दैवयोगाद्वा करणराजसभाक्षेमाद्वा मतिविभ्रमाद्वा वादिना तृतीयपादे तन्नोपन्यस्तम्। तथापि प्रतिभूपर्यन्तनिर्णिक्तव्यवहारे ऽपि यावदद्यापि करणं तत्रैव तिष्ठति। तावत्तेन तत्प्रमाणमुपन्यस्तम्। सभ्यैः परीक्ष्य प्रमाणीकरणीयमेव। ... ॥ ६२ ॥

प्राप्तावसरं यदुपन्यस्तं भवति तत्प्रदुष्टसाक्षिकं परीक्ष्य परिहरेत्। यत्पुनरतिक्रान्तस्वकीयावसरं तद्भूतमप्युपन्यस्तं वादिप्रमादात्तस्य ग्रन्थिच्छुटितद्रव्यमिव तदेवापुण्यैरेव तद्भूतं प्रणष्टम्। ... ॥ ६४ ॥

सापदेशं हरन्कालमब्रुवंश्चापि संसदि।
उक्त्वा वाचो विब्रुवंश्च हीयमानस्य लक्षणम्॥५८॥
पलायते य आहूतः प्राप्तश्च विवदेन्न यः।
विनेयः स भवेद्राज्ञा हीन एव स वादतः॥५९॥
सम्यक्प्रणिहितं चार्थं पृष्टः सन्नो ऽभिनन्दति।
अपदिश्य च यो देश्यं पुनस्तमनुधावति॥६०॥

---

॥५७॥ सोपदेशं हरेत्कालम॰ Vulg.॥५८॥ राज्ञो हीन एव विवादतः॥ Vulg.॥५९॥ Vulg. omits ६०, ६१. These two verses

---

तत्रापदेशो व्याजः। सव्याजं कालहरणं कुर्वन्तावदपटुरहम्। तावदस्वुचिरहम्। नोत्तरं प्रयच्छामि। तथा च। यस्य सभ्यैः पृष्टो न ब्रवीतीति। यस्य प्रथमं वचनमुक्त्वा पश्चाद्ब्रवीति। न मया तदुक्तम्। इत्येतैश्चिन्हैस्तस्य हीयमानस्य लक्षणं ज्ञेयमिति॥५८॥

यस्य राज्ञाहूतः सन्पलायते। तथा पलायमानो ऽपि पुरुषैर्यत्नादानीतः। तत्र प्राप्तः। प्रचोद्यमानो ऽपि किंचिन्न वदेत्। स विनेयो राज्ञा भवति। यतो हीन एव स तस्माद्वादत इति॥५९॥

सम्यक्करणेन करणाग्रे प्रथममावेदितमपि। यावत्सभ्यैः पृष्टस्तावत्तमेव नाभिनन्दति। न समर्थयतीत्यर्थः। तथापदिश्यार्थमलपित्वा पुनस्तमेवानुधावति। अस्यायमेवार्थः। सभ्यैः पृष्टः किं तव साक्षिणो लिखितं च किंचिदस्ति। एवं पृष्टः प्रथमं वदति। न किंचिदस्ति। एवमपदिश्य पुनस्तमेव वदति। अनुधावति। यथा विद्यते मम लिखितं साक्षिण एवेति। सो ऽपि हीयमानः॥६०॥

नाभियुक्तो ऽभियुञ्जीत तमतीर्त्वार्थमन्यतः।
न चाभियुक्तमन्येन न विद्धं वेद्धुमर्हति ॥ ५५ ॥
यमर्थमभियुञ्जीत न तं विप्रकृतिं नयेत्।
नान्यत्पक्षान्तरं गच्छेद्गच्छन्पूर्वात्स हीयते ॥ ५६ ॥
न च मिथ्याभियुञ्जीत दोषो मिथ्याभियोगिनः।
यस्तत्र विनयः प्रोक्तः सो ऽभियोक्तारमाव्रजेत् ॥५७॥

---

given quite incorrectly in Vulg. मिथ्याभियोगतः। Vulg.

---

वादिना प्रतिवादी यो ऽभियुक्तः स तं वाद्यभियोगमन्ते ऽनीत्वा परिसमाप्तिमनीत्वा तमेव वादिनं न प्रत्यभियुञ्जीत। द्वयोर्वादिनोरेककालमनिर्णयगमकत्वात्। तं च स्वकीयाभियोगं निर्वाह्य यदि सत्यमेव किमपि तस्य स्वकीयमभियोगकारणमप्यस्ति। ततः स एव प्रतिवादी तस्य वादिनस्तत्क्षणमेवाभियोगं दत्त्वा स्वयं वादी भवति। यश्चान्येनाभियुक्तः प्रारब्धव्यवहारस्तिष्ठति। तमपि नाभियुञ्जीत। यतो न विद्धं वेद्धुमर्हति। येन व्याधेन मृगः प्रथमं विद्धः। तं यदि द्वितीयो ऽपि विध्यति तस्य वृथाश्रमः। प्रथमस्यैव तत्राधिकारो न द्वितीयस्येति ॥ ५५ ॥

...प्रथमं लभ्यद्रव्यं जनं प्रार्थयित्वा द्वितीयवेलायामधिकं प्रार्थयते। अधिकं वा प्रथममुक्त्वा जनं वदति। इमां सर्वथापि अर्थविप्रकृतिं विनाप्तां विप्रकृतिं न नयेत्। तथान्यत्पक्षान्तरं गच्छेदिति। प्रथमं स्वकीयसुवर्णस्य विंशतिगद्याणकप्रार्थनां कृत्वा द्वितीयवेलायां वदति। मदीयपुत्रस्यानेन दातव्यमस्ति द्रम्म ॥ ५० ॥ एतदन्यत्पक्षान्तरमुच्यते। तं न गच्छेत्। यतो द्वितीयपक्षान्तरं गच्छन्पूर्वपक्षाद्वादी हीयत इति ॥ ५६ ॥

[राजप्रत्यक्षदृष्टानि सुहृत्संबन्धिबान्धवैः ।
प्राप्तद्विगुणदण्डानि कार्याणि पुनरुद्धरेत् ॥ ५० ॥]
आसेधकाल आसिद्ध आसेधं यो व्यतिक्रमेत् ।
स विनेयो ऽन्यथा कुर्वन्नासेधा दण्डभाग्भवेत् ॥ ५१ ॥*
निर्वेष्टुकामो रोगार्तो यियक्षुर्व्यसने स्थितः ।
अभियुक्तस्तथान्येन राजकार्योद्यतस्तथा ॥ ५२ ॥*
गवां प्रचारे गोपालाः सस्यारम्भे कृषीवलाः ।
शिल्पिनश्चापि तत्कालमायुधीयाश्च विग्रहे ॥ ५३ ॥*
अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती ।
विषमस्थश्च नासेध्यो न चैतानाह्वयेन्नृपः ॥ ५४ ॥*

---

स विनेयो ऽन्यथा कुर्वन्नुत्क्रामन् Vulg. ॥ ५१ ॥ सस्यव्यापे b. L.; सस्यबन्धे B. β. C. y. ॥ ५३ ॥ चिन्दन्द्रेद्धुमर्हति Vulg. ॥ ५५ ॥ ५६ is

---

चिदासेधदातापि च शास्त्रनिषिद्धकाले वा प्रयोजनसंबन्धरहितो ऽपि वा । एवमेव राजाज्ञया कस्यापि आसेधं करोति । तत एवमन्यथा कुर्वन्स एवासेधा दण्डमर्हति ॥ ४९ ॥

निर्वेष्टुकामः परिणेतुमुद्यतः । तथा रोगार्तः । यियक्षुर्यज्ञार्थमुद्यतः । व्यसनाभिभूतश्च यो भवति । तथा अन्येन य आक्षिप्तः । तथा गोषु गोप्रचारस्थिता गोपालाः । सस्यारम्भकाले कृषीवलाः । शिल्पिनश्च प्रतिष्ठाकाले । आयुधधारिणो विग्रहकाले । अप्राप्तव्यवहारः पोगण्डः । राजकार्योद्यतः । अन्यतीरितकार्यो दूतो वा । दानोन्मुखः पर्वनिमित्तकाले । व्रती निमित्तव्रतस्थः । विषमस्थश्च तत्काले राजदैविकाभिभूतः । एते सर्वे ऽपि एवं स्थिताः...नासेधनीयाः ।...॥ ५२ ॥ ५३ ॥ ५४ ॥

प्रसह्य स विनेयः स्यात्स चास्यार्थो न सिध्यति ॥४६॥*
वक्तव्ये ऽर्थे न तिष्ठन्तमुत्क्रामन्तं च तद्वचः।
आसेधयेद्विवादार्थी यावदाह्वानदर्शनम् ॥ ४७ ॥*
स्थानासेधः कालकृतः प्रवासात्कर्मणस्तथा।
चतुर्विधः स्यादासेधो नासिद्धस्तं विलङ्घयेत् ॥ ४८ ॥*
नदीसंतारकान्तारदुर्देशोपप्लवादिषु।
आसिद्धस्तं परासेधमुत्क्रामन्नापराध्नुयात् ॥ ४९ ॥*

---

and Vîram. 102 ॥ ४६ ॥ ५० om. Vulg. ये। ऽतिवर्तते। Vulg.

---

आसेधः। यत्र उच्चलितस्तत्र यदि यास्यसीति प्रवासादासेधो ऽयम्। अस्मिन् कर्मणि यदि लगिष्यसीति कर्मण आसेधो ऽयम्। एवमयमासेधश्चतुर्विधो भवति। तेषामेकेनापि प्रकारेण आरम्भके…न व्यतिक्रमेत्तमासेधम्। अन्यथा राजापराधपतितः संभवेदिति ॥ ४६ ॥

नदीसंतारस्तारगमनम्। कान्तारं भयानकं वनम्। दुर्देशः कुप्रदेशः। उपप्लवो देशभङ्गः। शोकाद्युपप्लवो वा। ईदृशेषु प्रदेशेष्ववसरेषु च। आसिद्ध आसेधं व्यतिक्रामन्नृपस्यापराधप्राप्तो न भवति ॥ ४७ ॥

अयं श्लोक अत्राप्रस्तुतो ऽपि मूलग्रन्थं दृष्ट्वा लिखितः। यानि कार्याणि राज्ञा प्रत्यक्षदृष्टानि कृतानि। यानि च सुहृत्संबन्धिबान्धवैर्दृष्टानि। परं यानि द्विगुणदण्डप्राप्तानि। द्विगुणपणेन द्वितीयवारं दृष्टानि पुनरुद्धरेत्।… ॥ ४८ ॥

ये शास्त्रे निषिद्धा आसेधकालास्तैर्विना सुस्थकालस्थितो य आसेधो यथाप्रयोजनं संबध्यमानार्थे य आसिद्धः। यस्तमासेधं न गणयति क्रामत्येव स राज्ञा स्वकीयप्रतापस्याखण्डनार्थे विनेयः। विनयं ग्राह्यः। अथ कदा-

व्यवहारः कृतो ऽप्येषु पुनः कर्तव्यतामियात् ॥ ४३ ॥*
गहनत्वाद्विवादानामसामर्थ्यात्स्मृतेरपि ।
ऋणादिषु हरेत्कालं कामं तत्त्वबुभुत्सया ॥ ४४ ॥*
गोभूहिरण्यस्त्रीस्तेयवाग्दण्डात्ययिकेषु च ।
साहसेष्वभिशापे च सद्य एव विवादयेत् ॥ ४५ ॥*
अनावेद्य तु यो राज्ञे संदिग्धे ऽर्थे प्रवर्तते ।

---

b. C. L. ॥ ४३ ॥ Vulg. inserts the following verse after ॥ ४४ ॥ अभियुक्तो न चेद्ब्रूयाद्बध्यो (वध्यो) दण्ड्यश्च धर्मतः । न चेद्द्विपक्षात्प्रब्रूयाद्धनं प्रति पराजितः ॥ वाग्दण्डान्यथिकेषु च । A, corrected according to Vîram. 139, where this verse is quoted. Vulg. has पारुष्यद्वयकेषु च ।...अभिशापेषु...॥ ४५ ॥ Vulg. inserts the following verse after ॥ ४५ ॥ सद्यो वैकाहं पञ्चाहं त्र्यहं वा गुरुलाघवात् लभेतासौ त्रिपक्षं वा सप्ताहं वा ऋणादिषु ॥ अनिवेद्य Vulg.

---

अरातिषु शत्रुषु । एतेषु प्रदेशेषु व्यवहारः कृतो ऽपि न प्रतिष्ठितः । तेन पुनः कर्तव्यतां प्राप्नोतीत्यर्थः ॥ ४३ ॥

विवादानां गहनत्वात् लोकानां च व्ययतया चिरवृत्तप्रयोजनस्मरणस्यासामर्थ्यात् । ऋणादिषु व्यवहारेषु उत्तरवादिन उत्तरकालं दद्यात् । काममेवमपि भवति । तत्त्वबुभुत्सया सद्भावबोधार्थं बोद्धुमिच्छा बुभुत्सा ॥ ४४ ॥

ऋणादिषु मध्यपतितत्वादेष्वपि कालहरणे प्राप्ते तदपवादः क्रियते । एतेषु पुनर्व्यवहारविशेषेषु सद्य एवोत्तरं दापयेदिति ॥ ४५ ॥

अस्मात् स्थानाद्यदि त्वमद्य गच्छसि तव राजकीयाज्ञा अयं स्थानासेध उच्यते । अस्मात्पत्तनादियन्तं कालं यावद्यदि गच्छसीति अयं कालकृत

व्यवहारो हि बलवान्धर्मस्तेनावहीयते ॥ ४० ॥
सूक्ष्मो हि भगवान्धर्मः परोक्षो दुर्विचारणः ।
अतः प्रत्यक्षमार्गेण व्यहारगतिं नयेत् ॥ ४१ ॥
यात्यचौरो ऽपि चौरत्वं चौरश्चायात्यचौरताम् ।
अचौरश्चौरतां प्राप्तो माण्डव्यो व्यवहारतः ॥ ४२ ॥
स्त्रीषु रात्रौ बहिर्ग्रामादन्तर्वेश्मन्यरातिषु ।

---

भिहीयते ॥ B. β. C.; तेनाभिधीयते b. L. ॥ ४० ॥ याते Vulg. ४१. b om. Vulg. ॥ ४१ ॥ स्त्रीषु शात्रौ च बलिभिरन्तर्वेश्मनि रात्रिषु ।

---

संबन्धस्तु धर्मशास्त्रपरिहृतो ऽपि दाक्षिण्यकृतो ऽपि परिहार्य एव । सर्वत्र न वर्तते । स्नानपानभोजनादि सर्वलोके ऽप्यादृतम् । अतो ऽत्र युक्तियुक्तो विधिः स्मृतः । सर्वथा एवमेव वक्ष्यमाणम् । देशे देशे य आचारः पारंपर्यक्रमागतः । स शास्त्रार्थबलान्नैव लङ्घनीयः कदाचन ॥ ४० ॥

...प्रत्यक्षो ऽस्य मार्गो लैङ्गिकमनुमानम् । शुभाशुभात्मकम् । सुखदुःखमुपभुज्यत इति । समस्तागमसमर्थितमिदम् । अथवा प्रत्यर्थमार्गः । विवेकिसाधुविशिष्टपूर्वप्राज्ञमार्गः । तेन धर्मगतिं नयेदिति ॥ ४१ ॥

एवं भगवान्धर्मो दुर्विचारणः । येन चौरः क्षिप्तरिक्थमात्रदर्शनात् । अविज्ञातधर्मपरमार्थन्दपतिपार्श्वादचौरो ऽपि महर्षिर्माण्डव्यो मौनव्रततपःस्थितो ऽदत्तोत्तरत्वाच्चौरतां प्राप्तः । अतः कारणात्पात्रापात्रपर्यालोचनापि निपुणतया कर्तव्येति ॥ ४२ ॥

स्त्रीष्विति पत्नीदुहितृस्वीकृतः । अथवा स्त्रीभिरेव व्यवहारो दृष्टः । रात्राविति रात्रिः शयनाय । न तु व्यवहाराय तस्यां साक्षादेव प्रमाणव्यवहारासंभवः । बहिर्ग्रामादित्यरण्य इति । अन्तर्वेश्मनि गृहमध्ये ।

धर्मशास्त्रार्थशास्त्राभ्यामविरोधेन यत्नतः।
संपश्यमानो निपुणं व्यवहारगतिं नयेत् ॥ ३७॥
यथा मृगस्य विद्धस्य व्याधो मृगपदं नयेत्।
कक्षे शोणितपातेन तथा धर्मपदं नयेत् ॥ ३८॥
यत्र विप्रतिपत्तिः स्याद्धर्मशास्त्रार्थशास्त्रयोः।
अर्थशास्त्रोक्तमुत्सृज्य धर्मशास्त्रोक्तमाचरेत् ॥ ३९॥
धर्मशास्त्रविरोधे तु युक्तियुक्तो विधिः स्मृतः।

---

मार्गतः Vulg. समीक्षमाणो निपुणो Vulg.; नियतं B; नियुतं β. ॥३७॥ ३८ om. Vulg. धर्मशास्त्राविरोधेन युक्तियुक्तो विधिर्मतः।...तेना-

---

किंचिद्धर्मशास्त्रोक्तमर्थशास्त्रविरुद्धं भवति। किंचित्पुनरर्थशास्त्रोक्तं धर्मशास्त्रविरुद्धं भवति। तयोरितरेतरतामालोचनेन यथालोकाचारविरुद्धं न भवति। तथा ससभ्यो ऽपि राजा व्यवहारगतिं नयेत् ॥ ३७॥

कक्षं वनगहनम्। यथा तस्मिन्वनगहने स्थितो मृगः संग्रहं दुरानेयो भवति। एवं परमार्थधर्मो ऽपि संग्रहं दुरानेयः। तस्य विद्धस्य व्याधो लुब्धकः प्रचुरतृणाच्छन्नभूम्यां दुर्लभमपि तन्मार्जप्रहारनिर्गमस्थानं संततशोणितपातेन पदं तावन्नयेद्यावदग्रतः पतितः स एव मृगो दृष्टस्तेन। एवं राजापि ससभ्यः क्रियामार्गानुसारेण तावद्धर्मपदं नयेद्यावत्परमार्थधर्म एव दृष्ट इति ॥ ३८॥

तथा च धर्मशास्त्रोक्तम्। अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया। सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात्। तथा च। नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ। पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते। इत्यादिकधर्मशास्त्रोक्तमपि लोकाचारव्यवहारे च परित्यक्तम्। मातुल-

तस्माद्धर्मासनं प्राप्य राजा विगतमत्सरः।
समः स्यात्सर्वभूतेषु बिभ्रद्वैवस्वतं व्रतम्॥ ३४॥
धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः।
समाहितमतिः पश्येद्व्यवहाराननुक्रमात्॥ ३५॥*
आगमः प्रथमं कार्यो व्यवहारपदं ततः।
चिकित्सा निर्णयश्चैव दर्शनं स्याच्चतुर्विधम्॥ ३६॥

---

* inserts अर्थानर्थावुभौ बुद्ध्वा धर्माधर्मौ च तावुभौ। वर्णक्रमेण सर्वेषां पश्येत्कार्याणि कार्यिणाम्॥ चिकित्सा निर्णयश्चैतद्दर्शनं Vulg. ॥ ३६॥

---

तस्मादेवंविधमहार्थलाभाद्राजा विगतमत्सरो रागद्वेषविवर्जितो वैवस्वतो यमो धर्मराजः। तस्य व्रतं लोकानां स्वजातशुभाशुभफलदत्त्वं तद्विभूत्वा धारयन्। धर्मासनं धर्माधिकरणं प्राप्य सर्वभूतेषु समः स्यादिति॥ ३४॥

धर्मशास्त्रं पुरस्कृत्य यत्किमपि सभ्यैः प्राड्विवाकसहितैरवधारितं तदेव प्राड्विवाकमते स्थितः प्रमाणीकृत्य समाहितमतिरेकचित्तः। तत्र स्थितः परिहृतगीतनृत्यक्रियासक्ती राजा व्यवहारान् पश्येदनुक्रमादिति भाषोत्तरक्रियानिर्णयचतुःपादानुक्रमादित्यर्थः॥ ३५॥

आगमः संबन्धः। तत्तद्दणादानादि अष्टादशपदानां मध्ये कतमदिदं व्यवहारपदानां मध्ये कतमदिदं व्यवहारपदम्। तस्यापि मध्ये...तदीयशाखाभेदः। इति व्यवहारस्य नाम करणीयम्। ततस्तस्य चतुष्पादक्रियानिर्वाहादिकरव्याधिरिति चिकित्सा करणीया। ततः प्रमाणपरीक्षानुसारेण तस्य व्यवहारस्य निर्णयः कार्यव्यवहारदर्शनं स्याच्चतुर्विधमिति॥ ३६॥

दिव्यान्यप्यप्रमाणानि नीयन्ते वाक्यवञ्चकैः।
देशकालप्रमाणादावप्रमादो भवेदतः॥ ३०॥
तत्र शिष्टं छलं राजा मर्षयेद्धर्मसाधनः।
भूतमेव प्रपद्येत धर्ममूला यतः श्रियः॥ ३१॥
धर्मेणोद्धरतो राज्ञो व्यवहारान्कृतात्मनः।
संभवन्ति गुणाः सप्त सप्त वह्नेरिवार्चिषः॥ ३२॥
धर्मश्चार्थश्च कीर्तिश्च लोकपङ्क्तिरुपग्रहः।
प्रजाभ्यो बहुमानं च स्वर्गे स्थानं च शाश्वतम्॥ ३३॥

---

बलादानस्त्वर्थी स्वार्थप्रचोदितः। लेखयेत्पूर्वकार्यं च कृतकार्यविनिर्णयः॥ ३० om. Vulg. | वर्जयेद्धर्मसाधनः। C ॥ ३१ ॥ After ३४ Vulg.

---

यत्र चेयमीदृशी छलगतिर्वादिनः प्रमाददोषात्संपद्यते। तत्र तस्य स्वच-र्यावसितस्य वादिनः किं करोतु राजा किं सभ्याः।...॥ ३०॥

अत्र मुनिमतमिदम्। शिष्टो विशिष्टः। तस्य च्छलग्राहिणा प्रतिवादिना वा छलमारोप्यते। तद्राजा मर्षयेन्न गृह्णीयादित्यर्थः। तं वादिशिष्टं छलं राजा मर्षयेद्धर्मसाधनः। क्षमयेदित्यर्थः। उत्तराक्रान्तभाषाछलेन भूता-र्थनाशं कुर्यात्।...॥ ३१॥

धर्मेण व्यवहारान्पश्यतो राज्ञो यावदग्नेः प्रतापिनः सप्तार्चिषः। तथा तस्यापि प्रतापाङ्गभूताः सप्त गुणाः संभवन्ति। अथ के के तदुच्यते॥ ३२॥

तत्र लोकपङ्क्तिर्जनानुरागः।...एते च वह्नेर्गुणास्तस्य संभवन्ति॥ ३३॥

ह्यभियोगस्तु विज्ञेयः शङ्कातत्त्वाभियोगतः।
शङ्कासतां तु संसर्गात्तत्त्वं होढादिदर्शनात् ॥ २७ ॥*
पक्षद्वयाभिसंबन्धाद्द्विद्वारः समुदाहृतः।
पूर्ववादस्तयोः पक्षः प्रतिपक्षस्तदुत्तरम् ॥ २८ ॥*
भूतच्छलानुसारित्वाद्द्विगतिः स उदाहृतः।
भूतं तत्त्वार्थसंयुक्तं प्रमादाभिहितं छलम् ॥ २९ ॥*

---

Vulg. inserts the following verse before २९ सुनिश्चित-

---

तत्र द्विप्रकार एवाभियोगो भवति। एकः शङ्काभियोगो द्वितीयस्तत्त्वाभियोगश्च। एतयोश्च द्वयोरपि लक्षणमेकस्यैव श्लोकस्यार्धेनाभिहितम्। शङ्का सदा असत्संसर्गादिति। असन्तो ये प्रसिद्धाश्चौरकर्मवृत्तयः। तथा वेश्याद्यूतव्यसनं चासत्। एतेषु यस्य सदा अत्यासक्तिर्दृश्यते तस्य गृहभेदकस्योपरि नाष्टिकस्य पुरुषस्य महती शङ्का समुत्पद्यते। तेनार्थचलनं तस्यासत्सङ्गिनो नाष्टिको ऽभियोगं यं ददाति। स शङ्काभियोग उच्यते। यस्तु तत्त्वाभियोगः स होढादिदर्शनाद्भवति। स्वकीयं द्रव्यं यन्नष्टं तद्धोढमुच्यते। तं दृष्ट्वा यो ऽभियोगः परस्य दीयते स तत्त्वाभियोग उच्यते। तत्र शङ्काभियोगस्य देवकुलं निर्णयस्थानम्। तत्त्वाभियोगस्य राजकुलमिति ॥ २७ ॥

...तेन द्वारेण व्यवहारः प्रविशति। द्वितीयं द्वारं प्रतिपक्षस्थित उत्तरवादी यानि वदति तेन द्वारेण प्रविशतीति ॥ २८ ॥

व्यवहारो यथा प्रवेशकाले द्विद्वारः। तथा निगमनकाले ऽपि द्विगतिः। तत्र व्यवहारस्यैका गतिर्धर्मन्यायतत्त्वभूतार्थनिर्णयेन भवति। द्वितीया प्रमादाभिहितनिर्णयेन।...॥ २९ ॥

दायभागे तु एकोना भेदा द्वादश साहसे।
वाग्दण्डपारुष्ययोस्तु द्वयोर्भेदास्त्रयः स्मृताः ॥ २४ ॥
द्यूताह्वयं चैकभेदं षड्भेदं तु प्रकीर्णकम्।
एवमेषां प्रभेदानां द्वात्रिंशच्छतमेव वै ॥ २५ ॥*
कामात्क्रोधाच्च लोभाच्च त्रिभ्यो यस्मात्प्रवर्तते।
त्रियोनिः कीर्त्यते तेन त्रयमेतद्विवादकृत् ॥ २६ ॥*

---

तद्भागनिरूपणा। अविभाज्यनियमः। स्त्रीधननिरूपणा। स्त्रिया अभावे स्त्रीधननिरूपणा। भ्रातृद्रव्यविधिः। मातापितृपुत्रविभागः। अज्ञातपितृ-पुत्रिकादिविधिः। अनियुक्तपितृविधानम्। दीर्घतीव्रामयादिपुत्रांशविधिः। संसृष्टिपुत्रविभागः। प्रेतादिभ्रातृद्रव्यलब्धविधिः। कुटुम्बार्थे युक्तायासादि-विधिः। विभागसंदेहनिर्णयः। पुत्रसंख्यानियमश्चेति भेदानामेकोनविंशति। साहसे साहसलक्षणम्। साहसदण्डविधानम्। आधिच्छलस्तेयम्। क्षुद्रद्रव्यमध्यमोत्तमविधानम्। द्विविधतस्करलक्षणम्। तस्करस्य व्यव-कर्षणम्। भक्तावकाशप्रदानादि। चोरविधिः। साहसस्तेयदण्डः। पदेन चौरान्वेषणविधिः। चौराभावे चौरादिद्रव्यापनयनं चेति द्वादश भेदाः। वाक्पारुष्ये तद्भेदः। दण्डपारुष्ये तद्भेदः। उभयोर्दण्डलक्षणं चेति भेदत्रयम्। द्यूतसमाह्वयमेकभेदम्। प्रकीर्णके राज्ञा स्वयं वर्णाश्रमपालनम्। राजोप-वर्णनम्। राजब्राह्मणवृत्तिः। स्वद्रव्यदाने राज्ञोऽभ्यनुज्ञा। ब्राह्मणकर्मवृत्ति-निरूपणम्। अष्टमङ्गलकविधानमिति षड्भेदाः। एवमेतेष्वष्टादशप्रधान-व्यवहारपदेष्वन्तर्गतव्यवहारपदभेदा द्वात्रिंशदधिकशतम्। इदानीं त्रियो-न्यादिकमुच्यते ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

कामादयस्त्रयो यस्मात्प्रवर्तन्ते तस्मात्त्रियोनिरेव व्यवहार उच्यते ॥ २६ ॥

नवभेदा अशुश्रूषा वेतनं स्याच्चतुर्विधम् ।
अस्वामिविक्रये तु द्वौ विक्रीयादानमेकधा ॥ २२ ॥
क्रीत्वा मुक्तं चतुर्भेदं समयाकार्यमेकधा ।
क्षेत्रवादो द्वादशधा स्त्रीपुंसोर्भेदविंशति ॥ २३ ॥

---

विषविधिः। कोशविधिः। इति पञ्चविंशतिभेदमृणादानं भवेत्। तथा औपनिधिके न्यासः। औपनिधिकम्। याचितकम्। अन्वाहितकम्। शिल्पिहस्तगतमिति भेदाः षट्। संभूयसमुत्थाने सामवायिकम्। ऋत्विग्याज्यम्। शौल्किकं चेति भेदत्रयम्। दत्ताप्रदानिके देयमदेयं दत्तमदत्तं चेति भेदचतुष्टयम्। अशुश्रूषाभ्युपगमे शुश्रूषाभेदः। अशुभकर्मभेदः। शिष्यवृत्तम्। अन्तेवासिवृत्तम्। अधिकर्मकृद्वृत्तम्। स्वामिप्रसादाद्दास्यविमोक्षश्चेति भेदा नव। वेतनस्यानपाकर्मणि भृतकवेतनम्। गोपालादिकम्। पण्यस्त्रीशुल्कविधानं। भाटकविकल्पश्चेति भेदचतुष्टयम्। अस्वामिविक्रये अस्वामिविक्रयो निधिलाभश्चेति भेदद्वयम्। विक्रीयासंप्रदानमेकभेदम्। क्रीत्वानुशये कालभेदः। परिभुक्तवासोनियमः। धातुक्षयभेदः। तान्तवसंस्कारश्चेति भेदचतुष्टयम्। समयस्यानपाकर्मैकभेदम्। तथा क्षेत्रजे क्षेत्रवादो गृहवादः। उद्यानवादो निपानवादः। आयतनवादो ग्रामवादश्चतुष्पथादिभूषणप्रतिषेधः। सेतुविधानं खिलविषयः। सस्यरक्षा सस्यवृद्धिर्हेतुविधानम्। स्त्रीपुंसयोः संबन्धे पुंस्त्वपरीक्षा। कन्यादाननियमः। ऋत्विग्व्यतिक्रमदोषः। कन्यादानकालः। कन्यावरयोरदुष्टदूषणापराधः। विवाहविधिः। स्वैरिण्यादिविधानम्। अपत्यजाविवेकः। संग्रहणविधानम्। स्त्रीव्यतिक्रमदण्डः। गुरुतल्पलक्षणम्। पश्वादिगमनदोषः। पत्यभावे ऽपत्यविधिः। जारजातविधानम्। नियुक्तानियुक्तापरगमनविधिः। दुष्टस्त्रीपुरुषविधानम्। प्रोषितभर्तृकानिर्णयः। संकेतलक्षणं चेत्येवं विंशति भेदाः। दायभागे रिक्थभागविवेकः।

वाक्पारुष्यं तथैवोक्तं दण्डपारुष्यमेव च।
द्यूतं प्रकीर्णकं चैवेत्यष्टादशपदः स्मृतः॥ १९॥*
एषामेव प्रभेदो ऽन्यो द्वात्रिंशदधिकं शतम्।
क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते॥ २०॥*
ऋणादानं पञ्चविंशति षडौपनिधिके स्मृताः।
संभूयोत्थे त्रयो भेदाश्चतुर्दत्ताप्रदानके॥ २१॥

---

Vulg.; प्रभेदेन: L. ॥ २०॥ २०—२५ om. Vulg. and Vîr., etc. It must be owned that the style and language of these verses has a very suspicious look. In २५, A reads एवमेकश्भेदानामेतद्द्वात्रिंशच्छतम्॥ १५॥ शङ्कातत्त्वाभिदर्शनात्। ... ह्रोढाभिदर्शनात्॥ Vulg. ॥ २७॥

---

प्रकरणस्थिता एव द्वात्रिंशन्मात्रा अपि सविस्तरमभिहिताः। एष सकलशास्त्रार्थसंग्रहः। तेषां च यथाक्रमस्थितिभेदसहितानामष्टादशव्यवहारपदानामनुलग्ना एव निर्णया भविष्यन्ति। तेन व्यवहारभेदा अपि द्वात्रिंशदधिकशतप्रमाणाः शाखोपशाखावस्थिताः संक्षेपविस्तरसंख्योपलक्षिता इहापि लिख्यन्ते। तत्र तावत्संक्षेपसंख्येयम्॥ १६॥ १७॥ १८॥ १९॥

इदानीमियमेव भेदसंख्या प्रत्येकतामुद्दिष्टव्यवहारपदशाखाभेदैः सविस्तरादभिलिख्यते। तत्र ऋणादाने देयादेयादिभेदाः कृताः। ऋणभेदो धनभेद आपद्ब्राह्मणवृत्तिः। प्रमाणभेदः। कुसीदवार्धुषिकभेदौ। प्रतिभूभेदः। आधिभेदो लेख्यभेदः। असाक्षिभेदः। पूर्वोत्तरसाक्षिनियमः। षड्विवादपदकसाक्षिनिन्दा। साक्षिप्रत्युद्धारः। कूटसाक्षिकम्। साक्ष्यधिश्रावणा। साक्षिबलाबलम्। लेख्यसाक्ष्यभावविधिः। घटविधिः। अग्निविधिः। उदकविधिः।

राजा सत्पुरुषः सभ्याः शास्त्रं गणकलेखकौ।
हिरण्यमग्निरुदकमष्टाङ्गः समुदाहृतः ॥ १५ ॥*
ऋणादानं ह्युपनिधिः संभूयोत्थानमेव च।
दत्तस्य पुनरादानमशुश्रूषाभ्युपेत्य च ॥ १६ ॥*
वेतनस्यानपाकर्म तथैवास्वामिविक्रयः।
विक्रीयासंप्रदानं च क्रीत्वानुशय एव च ॥ १७ ॥*
* सप्तदशाध्यायो नाधिगम्यते।

मूलं चन्दनवृक्षस्य माषचूर्णपरिप्लुतम् ।
जङ्गमस्य विषस्याशु प्रकरोति च संक्षयम्[१] ॥ १० ॥
तक्रं केशरसंयुक्तं विषं सद्यो नवाभ्रकम् ।
हयस्य जङ्गमं नाशं विषन्नयति[२] तत्क्षणात् ॥ ११ ॥
सौपर्णी[३] विषकङ्कोली पिष्ट्वा मद्येन भाविता ।
जङ्गमं गात्रतः कृत्स्नं विषन्नयति तत्क्षणात्[४] ॥ १२ ॥
एला कङ्कोलिकामूलं सौपर्णीघृतमिश्रितम् ।
विषनाशं करोत्याशु नस्यदानेन वाजिनाम् ॥ १३ ॥
कौसुम्भं केशरं लाक्षा माक्षिका नाकुली तथा[५] ।
कृत्रिमस्य विषस्या[६]शु प्रकरोति च संक्षयम् ॥ १४ ॥
चम्पकं[७] मालतीमूलमुन्मत्तकरसं तथा ।
अश्वानां नाशयत्याशु विषं जङ्गममाश्रितम्[८] ॥ १५ ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते विषयोगाध्यायः षोड़शः ॥

---

१ । करोति हयसंक्षयम् । कः ।
२ । जङ्गमविषं ध्रुवं नश्यति । कः ।
३ । सौवर्णी । कः ।
४ । जङ्गमं गात्रसंमिश्रं विषं नाशयति क्षणात् । कः ।
५ । साकुला तुला । कः ।
६ । क्रान्ताश्वस्य विषस्य । कः ।
७ । माक्षिकं । कः ।
८ । श्यावृतम् । कः ।

सामान्येन प्रदिष्टोऽयमगदो विषनाशनः।
पृथक् पृथग्विभागेन कर्त्तव्यं साम्यतः परम्[१] ॥ ३॥
त्रिविधं कीर्त्तितं चैव कृत्रिमञ्च ततःपरम्।
त्रिविधं कीर्त्तितं प्राज्ञैर्विषज्ञानविचक्षणैः॥ ४ ॥
स्थावरं कन्दजं[२] प्रोक्तं जङ्गमं सत्वसंस्थितम्[३]।
कृत्रिमं योगजं प्रोक्तं त्रिविधं विषमुच्यते॥ ५ ॥
यदा स्थिरं समश्नन्ति कदाचित्तुरगोत्तमाः।
तदा कार्य्यं विधानज्ञैरगदस्य प्रयोजनम्॥ ६ ॥
केशरं पद्मनालञ्च सौपर्णी[४] वदरीफलम्।
तक्रमिश्रं हये दत्तं सर्व्वथा विषनाशनम्[५] ॥ ७ ॥
सौपर्णी सिन्धुवारञ्च नागवल्ली जटा तथा।
विषार्त्तं प्राप्य संमिश्रं दुग्धे स्यादायुधी हयः[६] ॥ ८ ॥
अश्वगन्धा रुहा एला[७] घृतमिश्रा प्रयोजिता।
विषनाशन्नयत्याशु जङ्गमं हयगात्रतः॥ ९ ॥

---

१। कर्त्तव्यः संमतः परः। कः।
२। सहजं। कः।
३। सत्त्वमाश्रितं। कः।
४। सौवर्णी। कः।
५। क्रमसिश्रं हये दत्तं विषनाशकरं परम्। कः।
६। श्यामा वृषा हयः। कः।
७। मित्ता। कः।

सेफालिका रुहानीले वेणुका सिन्धुवारिका।
एतैः क्वाथः कृतः सम्यक् कृमिनाशकरः परः॥ १४॥
मातुलुङ्गस्य बीजानि चन्दनं सितसर्षपाः।
उशीरं पुष्करं ब्राह्मी लक्ष्मणा च पुनर्नवा॥ १५॥
क्वाथोऽयं शुण्ठिचूर्णेन धावितक्लेशनाशनः।
प्रकरोति तुरङ्गानां सर्व्वदैव सुखं[1] तथा॥ १६॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते क्वाथाध्यायः पञ्चदशः॥

## अथ षोड़शोऽध्यायः।

### विषम्।

वारुणी माक्षिकी गौरी श्रीतालीवीजपूरकम्[2]।
कृमिक्लेदविनाशाय क्वाथो नित्यं रुजाहरः[2]॥ १॥
अश्वगन्धा घृतं क्षौद्रं विषदग्धस्य वाजिनः।
विषनाशं[3] करोत्येव सर्व्वगात्रेषु तत्क्षणात्॥ २॥

---

१। सुखावहम्। खः।
२। रुजापहा। कः।
३। विनाशनं। खः।

प्रकरोति सदा[1] नाशं पित्तस्यागन्तुकस्य च ।
एकविंश[2]दिनं यावच्छालिहोत्रमतं यथा[3] ॥ ५ ॥
शुण्ठी हरीतकी पाठा ब्राह्मी मुस्ता शिफालिका ।
हरिद्राद्वयसंयुक्ता हरितालं मनःशिला ॥ ६ ॥
सिद्धस्त्रिभागशेषोऽयं क्वाथो हन्यात्त्रिरात्रिकम् ।
सन्निपातमशेषेण पलिकः पलमात्रकः ॥ ७ ॥
मधुकं[4] केशरं पत्रं भल्लातकविभीतकम् ।
शङ्खपुष्पं रुहा सारं समभागेन मिश्रितम् ॥ ८ ॥
कासार्त्तस्य समुद्दिष्टः क्वाथोऽयं त्रिफलात्मकः ।
उत्साहवर्द्धकः सद्यस्तथा कायाग्निदीपकः ॥ ९ ॥
कुमारी शाल्मली पाठा मञ्जिष्ठा चेन्द्रवारुणी ।
काकोली समभागेन क्वाथयेत् समभागतः ॥ १० ॥
पलद्वयप्रमाणेन ततः पीतेन वाजिना ।
मोहये[5]च्छूलजं दोषं मूत्रदोषं च तत्क्षणात् ॥ ११ ॥
यवानी माक्षिकं कासं सौवर्चलयुताभया ।
क्वाथयेदष्टमांशेन तत्पानाज्जायते हयः ॥ १२ ॥
प्रदीप्ताग्निस्तु तेजस्वी[6] सर्व्वरोगाद्विमुच्यते ।
स शीघ्रमार्गगामी च स्निग्धो रोगविवर्ज्जितः ॥ १३ ॥

---

१ । मरुन्नाशं । कः ।
२ । एकत्रिंशत् । कः ।
३ । तथा । कः ।
४ । मधुरं । कः ।
५ । नाशयेत् । कः ।
६ । सुतेजाढ्यः । कः ।

भृङ्गराजो विशाला[१] च पाठा चैव पुनर्नवा।
विल्वमारुष्ककं[२] रोध्रं सैन्धवं तगरं[३] तथा ॥ ११ ॥
एतैः पक्वा घृतं वाजी संप्राप्यार्त्तेर्विमुच्यते[४] ॥ १२ ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते घृताध्यायश्चतुर्दशः ॥

## अथ पञ्चदशोऽध्यायः।

### क्वाथः।

पूर्व्वाणि[५] समभागानि क्वाथयेत् कूपवारिणा।
ततोऽष्टांशं समादाय तोयस्य क्वथितस्य च ॥ १ ॥
एतत् सिद्धार्थकं नाम ह्युत्कृष्टं[६] सर्व्ववाजिनाम्।
कायाग्निं वर्द्धयत्याशु नीरोगत्वं प्रयच्छति॥ २ ॥
मुस्ता मधुकपत्राणि केशरं लवणं रुहा[७]।
शताह्वा शाल्मली धात्री त्रपुसं फलिनी तथा॥ ३ ॥
क्वाथयित्वा जलं[८] कौपं दत्तैस्तुल्यैर्विचक्षणः।
त्रिभागमेवमादाय ततो दद्याद्धयस्य च॥ ४ ॥

१। विशालाक्षी। कः।
२। आरुषकं। कः।
३। नागरं। कः।
४। आर्त्तिं विमुञ्चति। कः।
५। एतानि। कः।
६। कण्ठहृत्। कः।
७। गुहा। कः।
८। जलात् कौप्यादेतैः। कः।

वलपुष्टिकरं नित्यं सर्व्ववातविनाशनम्।
सर्व्वरोगप्रशमनं कायाग्नेश्च प्रदीपनम्॥ ४ ॥
ओजस्करं व्याथानाशं शीहशोषप्रणाशनम्।
धातकी केशरं कुष्ठं कुसुम्भं कुंकुमं नलम्॥ ५ ॥
दाड़िमं[1] सितरोध्रञ्च पलमात्राणि निःक्षिपेत्।
घृतञ्च पाचयेत्[2] पानादभिघातान्वितो हयः॥ ६ ॥
जायते सर्व्वशुद्धाङ्गो[3] महाप्राणैर्न संशयः।
आरनालं वचा कुष्ठं पिङ्गला सिक्थकं[4] घृतम्॥ ७ ॥
एतैः पक्वं घृतं सम्यक् पित्तव्याधिविनाशनम्।
हरिद्राद्वयसंयुक्तं गन्धकं तु मनःशिला॥ ८॥
क्वाथयेन्नवनीतेन त्रिगुणेन घृतेन च।
अभ्यङ्गेनाथ पानेन सप्तरात्रेण[5] वाजिनः॥९॥
कण्डूतिर्निःक्षयं[6] याति तथोदरभवा रुजः[7]।
माक्षिकं निम्बपत्राणि नखं[8] गुग्गुल एव च॥ १० ॥

---

१। दाड़िमी। कः।
२। पाचयत्याममभिघातान्विते हये। कः।
३। सिद्धाङ्गो महाप्राणः। कः।
४। सत्कृतं हयम्। कः।
५। सदा गात्राणि। कः।
६। कण्डूर्निःसंज्ञतां। कः।
७। च एक्। कः।
८। नवं। कः।

तदा पिण्डः प्रदातव्यः स्थूलैरण्ड[1]दलैरलम् ॥ ३६ ॥
कर्पूरशर्करालोध्रं माक्षिकं त्रिफलान्वितम् ।
तुरङ्गिन्याः प्रशंसन्ति पिण्डोऽयं वाजिनः शुभः ॥ ३७ ॥
पत्रकं सिन्धुवारञ्च भ्रामरं[2] चक्रकिंशुकम् ।
मांसवृद्धौ प्रशंसन्ति पिण्डोऽयं वाजिनः शुभः ॥ ३८ ॥
सैन्धवं चूलिका[3]क्षारं विडङ्गानि मधूनि च ।
शस्त्रपीड़ाभिभूतस्य पिण्डोऽश्वस्य प्रशस्यते ॥ ३९ ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते पिण्डाध्यायस्त्रयोदशः ॥

## अथ चतुर्दशोऽध्यायः ॥

### घृतविधानम् ।

शिलाजतु विशाला च पद्मकं नागकेशरम् ।
लाक्षा पद्मकमूलञ्च निम्बद्वयसमन्वितम् ॥ १ ॥
घृतं माक्षिकसंयुक्तं[4] सप्तविंशतिकं विदुः ।
अष्टांशं तु समादाय सुरामांसघृतस्य च ॥ २ ॥
पलमात्राणि सर्व्वाणि पूर्व्वद्रव्याणि निःक्षिपेत् ।
तेषां[5] दानेन तत्सर्पिर्जायते सर्व्ववाजिनाम् ॥ ३ ॥

---

१ । तिलैरण्ड । कः ।
२ । द्यवकं चम्पकं तु च । कः ।
३ । वेलिका । कः ।
४ । समांसकं देयम् । कः ।
५ । तेषामाद्येन । कः ।

कासदोषोपशमनः[१] पिण्डः समेः सुखप्रदः ॥ २८ ॥
तक्रं कर्पूरचूर्णञ्च शिवं सौवर्च्चलान्वितम् ।
पिण्डोऽयं वस्तिसंरोधे[२] वाजिनः संप्रकीर्त्तितः ॥ २९ ॥
सौवर्च्चलं हरिद्राच पिप्पली चेन्द्रवारुणी ।
मूत्रकृच्छ्रे[३] परीक्षन्ति पिण्डोऽयं तुरगस्य हि ॥ ३० ॥
पिण्डीर[४]सक्तवः क्षौद्रं भल्लातकफलं वृषम्[५] ।
रक्तमूत्रे तु पिण्डोऽयं वाजिनां रक्तनाशनः ॥ ३१ ॥
अभया यष्टिका श्यामा देवदारु सगन्धकम् ।
पुरीषे रक्तसंमिश्रे सदा शंसति वाजिनः ॥ ३२ ॥
पटोलं धातकी मुस्ता यष्टिका गिरिकर्णिका ।
रक्ताधिके कृतः पिण्डः करोति रुधिरक्षयम् ॥ ३३ ॥
हरिद्राद्वयसंयुक्तं गन्धकं कटुतैलकम् ।
पिण्डकं[६] श्रुतियुक्तानां सदाश्वानां प्रशस्यते ॥ ३४ ॥
अतसीपत्रकं निम्बं[७] न्यग्रोधकलिकान्वितम् ।
अतीसारे सुशंसन्ति[८] पिण्डोऽयं वाजिनः शुभः ॥ ३५ ॥
व्रणैः कृमिभिरत्यर्थं सदा वाजी प्रपीड्यते ।

---

१ । कासे दोषप्रशमनो पिण्डोऽश्वस्य प्रशस्यते । कः ।
२ । धृतिसारोधः । कः ।
३ । मूत्रकृच्छ्रे प्रशंसन्ति । कः ।
४ । डिण्डीरं शर्करा । कः ।
५ । भल्लातकमुलुञ्चकम् । कः ।
६ । पिण्डोऽयं । कः ।
७ । नीकं । खः ।
८ । प्रशंसन्ति । कः ।

सिता दुग्धं सकर्पूरमेलया[1] पत्रसंयुतम्।
अग्नि[2]दाहार्त्तियुक्तानां पिण्डोऽयं वाजिनां स्मृतः॥२१॥
ग्रीष्मासह्य[3]प्रतप्तानामारनालं परिस्रुतम्।
सक्तुदिच्छन्ति पिण्डेन[4] वाजिनां सुखकारकम्॥ २२ ॥
वृष्टिवातार्द्दितानाञ्च वाजिनां पुष्टिकृन्मतः।
पिण्डः कृतः सतैलेन लशुनेन पलेन च॥ २३ ॥
महाघृतं सकर्पूरं शर्करा दुग्धमेव च।
कफ[5]नाशकरः प्रोक्तः पिण्डोऽयं सुखदः स्मृतः॥ २४॥
रोचना च वरी[6] धात्री तथा स्याद्बीजपूरकः।
गुल्मं प्रशमयन्त्याशु वाजिनां हृदयोद्भवम्॥ २५ ॥
सहदेवी वचा कुष्ठं वरुणा चेन्द्रवारुणी।
अतिश्वासं हरन्त्येते वाजिनां मधुना सह॥ २६ ॥
उदुम्बरफलं[7] मांसं सौकरं माहिषं दधि।
हयस्य चातिवृद्धस्य[8] करोति परमं सुखम्॥ २७॥
विभीतकं प्रियङ्गुश्च सर्ज्जिका लवणं तथा।

---

१। एलापत्रकसंयुतम्। कः।
२। स्निग्धा। कः।
३। ग्रीष्मदाह। कः।
४। शर्करामिश्रितः पिण्डः। कः।
५। कम्प। कः।
६। वर्वरी। खः।
७। औदुम्बर। कः।
८। शीतबद्धस्य। कः।

समांशकेन पिण्डोऽयं करोति[1] लघिमा हये ॥ १४ ॥
मद्यं मरिचसंयुक्तं लशुनं नागकेशरम्।
द्विगुणं मेषमांसं च पिण्डो[2] दत्तो जयेच्छ्रमम् ॥ १५ ॥
जंभीरं फलिणीपत्रं त्वचा किञ्जल्कमेव च।
जातशोणित[3]वाहानां पिण्डोऽयं रक्तनाशनः ॥ १६ ॥
तमालं पुष्करं लोध्रमपामार्गं सतिन्दुकम्।
पयसा पिण्डमेतद्धि वातकोपप्रणाशनम्[4] ॥ १७ ॥
आरनालं प्रविष्टा च पथ्या नेपालिका[5]फलम्।
पिण्डे दत्ते[6] हये दध्ना निहन्त्याशु विजृम्भितम् ॥ १८ ॥
मुद्गपूगं[7] वचामिश्रं तथा सर्ज्जरसान्वितम्।
पिण्डे दत्ते निहन्त्याशु क्रमिसंघं[8] व्रणोद्भवम् ॥ १९ ॥
स्नुहीक्षीरं सकर्पूरं कूपोदकविभावितम्।
पिण्डोऽयं हन्ति मध्यस्थान् रोगान्[9] सर्व्वान् क्रमि-
व्रजान् ॥ २० ॥

---

१। लघुत्वं कुरुते। कः।
२। पिण्डे दत्ते। खः।
३। जातप्रोणा वराश्वानां पिण्डोऽयं व्याधिनाशनः। खः।
४। वातकोपः प्रशाम्यति। कः।
५। नैपालिकी। कः।
६। पिण्डं दत्तं। कः।
७। यूषं। खः।
८। क्रमिं सद्यो व्रणोद्भवम्। कः।
९। उदरस्थान् क्रमिव्रणान्। कः।

मेथिका[१] धातकी काली सारणी[२] वीजपूरकः ।
पिण्डो दत्तो वराश्वानां तेजोवृद्धिकरः स्मृतः ॥ ७ ॥
कटुका मद्यसंमिश्रा धात्री लोध्रगुड़ान्विता ।
दत्ता[३] पिण्डविधानेन वाजिनां सुखवृद्धिदा ॥ ८ ॥
त्रिफला कटुका मुस्ता विड़ङ्गानि च चित्रकम् ।
सदालस्यसमेतानां वाजिनां पिण्ड आर्त्तिहृत् ॥ ९ ॥
वचा विदलिताः[४] स्निग्धाः सघृताः क्षारभाविताः ।
पिण्डैर्दत्ताः प्रकुर्वन्ति वाजिनां व्याधिनाशनम् ॥ १० ॥
सैन्धवं नागरं श्यामा गुड़ूची सितसर्षपाः ।
अम्लवेतसमस्थानां[५] पिण्डोऽयं शूलनाशनः ॥ ११ ॥
पिप्पली पिप्पलीमूलं[६] कटुका सहदेविका ।
दूर्व्वा[७]पल्लवसंमिश्रः पिण्डोऽयं मोहनाशकः ॥ १२ ॥
केशरं श्रीफलं तालं माक्षिकं गिरिकर्णिका ।
पिण्डोऽयं स्नथने शस्तो वाजिनां सुगतिप्रदः[८] ॥ १३ ॥
वचालोध्रं सकर्पूरं गुहा श्यामा गुड़ं मधु ।

---

१ । मिथिका । कः ।
२ । सरणी वीजपूरिका । खः ।
३ । दत्तः पिण्डविधानेन वाजिनां सुखवृद्धिदः । कः ।
४ । विषलता स्निग्धा सघृता क्षारभागिका । कः ।
५ । संयुक्ताः । कः ।
६ । मुस्ता । कः ।　　७ । पृथ्वीपनस । कः ।
८ । पिण्डः श्लेष्मगणे प्रशस्तो वाजिनां हि सुखप्रदः । कः ।

# अथ चयोदशोऽध्यायः ।

पिण्डः ।

कटुका च जयन्ती च भ्रामरी सुरसा[१] घनाः ।
पञ्चामृतमयः पिण्डो वाजिनामयमिष्टकृत् ॥ १ ॥
एला शतघ्नी[२] सुरसा काकजङ्घा[३] शतावरी ।
माक्षिकं ससितं पिण्डः पित्तयुक्ते[४] हि वाजिनि ॥ २ ॥
माक्षिकं[५] सैन्धवं मुस्ता गोमूत्रं च हरीतकी ।
समभागेन पिण्डोऽयमुक्तो वह्निप्रदीपकः ॥ ३ ॥
कंकोलं[६] केतकी द्राक्षा शर्करा मधुयष्टिका ।
दत्तो घृतयुतः पिण्डः पुष्टिं नयति वाजिनः[७] ॥ ४ ॥
मत्स्यमांसेन संयुक्तं ग्रावचूर्णं[८] घृतप्लुतम् ।
वलहीनस्य वाहस्य पिण्डोऽयं वलवर्द्धनः ॥ ५ ॥
वला मद्यं[९] दधि क्षौद्रं भक्षयंस्तुरगो भवेत्[१०] ।
अतिवृद्धोऽपि सूक्ष्मोऽपि यथा[११] षट्सप्तवार्षिकः ॥६॥

---

१ । सरसा । खः ।
२ । स्तनघ्नी । कः ।
३ । कालजंघा । कः ।
४ । पित्तयुक्तस्य वाजिनः । कः ।
५ । संप्रायाखिलरोगेषु गोमूत्रेषु । कः ।
६ । कंकोली । कः ।
७ । वाजिनाम् । खः ।
८ । माषचूर्णं । कः ।
९ । चूर्णमिष्टं । कः ।
१० । भटम् । कः ।
११ । भवेद्व्यत्सप्तवार्षिकः । कः ।

शीतोदकेन संयुक्तं नस्यं रक्तविनाशनम् ॥ २० ॥
धातकी गण्डकी चैव गोमूत्रं लवणं तथा ।
नस्ये दत्तं कफं हन्ति तमः सूर्य्योदये यथा ॥ २१ ॥
शुण्ठी घृतञ्च दुग्धञ्च रससारं[१] तथैव च ।
वातदोषविनाशाय नस्यमेतत्प्रयोजयेत् ॥ २२ ॥
माक्षिकं शर्करायुक्तं[२] चन्दनं केशराणि च ।
नस्योऽयं वारिणा सद्यः पित्तनाशकरः परः[३] ॥ २३ ॥
गुडूची शुण्ठी मुस्ता च तगरं सितसर्षपाः ।
सन्निपाते सपित्तेऽयं नस्यः स्याज्जीवरक्षकः[४] ॥ २४ ॥
अभया पुन्निणी धात्री[५] एला लाक्षा शतावरी ।
सन्निपातेऽनिलाधिक्ये नस्योऽयं क्षेमकारकः ॥ २५ ॥
मरिचं पिप्पलीमूलं वचा भारङ्गिका[६]भया ।
सन्निपाते कफाधिक्ये नस्यं सद्यः सुखप्रदम् ॥ २६ ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते नस्याधिकाराध्यायो द्वादशः ॥

---

१ । रजःसारं । कः ।
२ । मिश्रं । कः ।
३ । सदा । कः ।
४ । तु नस्योऽयं वारिणा कामकारकः । कः ।
५ । एला । कः ।
६ । सारङ्गिका । कः ।

पिप्पलीमिश्रतोयेन[१] ससितासलिलेन च ।
नस्यं यच्छति सप्तीनां सर्पिषा[२] यच्छते वलम् ॥
नस्यं स्निग्धं तथा रूक्षं तिक्तञ्च मधुरं तथा ।
चतुर्धा वाजिशास्त्रज्ञैर्यथावत्परिकीर्त्तितम् ॥ १५ ॥
देयं वाताधिके स्निग्धं रूक्षं[३] तिक्तं कफाधिके ।
मधुरं[४] चैव पित्ताढ्ये तुरङ्गे समयोचितम् ॥ १६ ॥
द्विपञ्चाशत्प्रमाणं वा श्रेष्ठं तन्नस्यमुच्यते ।
पादोनं[५] मध्यमं तच्च षड्विंशत्या तथाधमम् ॥ १७ ॥
नस्यान्ते वाजिनो रक्तं सदा पुष्टं प्रजायते ।
नस्यदानात् हृतं तस्य विनाशमुपगच्छति ॥ १८ ॥
दाड़िमं पुष्करं श्रीकं श्वेतदूर्वाङ्कुरास्तथा ।
शीतोदकेन[६] संयुक्तं रक्तं दुष्टं न जायते ॥ १९ ॥
धातकी गोक्षुरं रोध्रं कुसुम्भं सिन्धुवारकम् ।

---

१ । तैलेन शिलाच । कः ।
२ । स तेषां । कः ।
३ । रौच्यतिक्ते । कः ।
४ । पित्ताधिकेतु मधुरं तुरङ्गे संप्रयोजितम् । कः ।
५ । षष्ठोत्तरं मध्यमं प्रोक्तं षड्‌विंशत्या । कः ।
६ । शीतोदकेन तन्नस्यं दुष्टरक्तं जयेत् ध्रुवम् । कः ।

युक्तं शीतोदके स्तोके तेषां नस्येऽपसर्पयेत्[१] ।
गुडूची कौमुदी ताली मिश्रिता कूपवारिणा[२] ॥ ७ ॥
नस्ये दत्ता वराश्वानां शिशिरे[३] सुखदा स्मृता ।
अपामार्ग[४] महानस्यं सर्व्वरोगविनाशनम् ॥ ८ ॥
केवलं कटुतैलं वा गोमूत्रे पाचितं च यत् ।
मैथुनाद्रिक्तसन्धीनां स्रोतोवलकरं विदुः ॥ ९ ॥
कण्ठरोगे तथा नस्यं गोमूत्रलवणान्वितम् ।
महद्गुणकरं प्रोक्तं सर्व्वदोषनिवारणम् ॥ १० ॥
अपामार्गस्य[५] मूलेन नस्ये मूत्रंच छागलम् ।
मुखरोगविनाशाय नस्यं मत्स्य[६]वसोद्भवम् ॥ ११ ॥
लशुनं पिप्पलीमूलं गण्डकी नागकेशरम् ।
दत्तं नस्येन रोगघ्नं कटुतैलेन वाजिनाम् ॥ १२ ॥
नस्यं पर्य्युषितैस्तोयैः[७] प्रातर्दत्तं तु केवलैः[८] ।
अश्वानाञ्च नराणाञ्च चाक्षुष्यं वलवर्द्धनम् ॥ १३ ॥

---

१ । दोषप्रशान्तये । कः ।
२ । मिश्रितं कोष्णवारिणा । कः ।
३ । शरीरे । कः ।
४ । अभयाद्यं । कः ।
५ । मूत्रं चैव पुमानस्यं । कः ।
६ । वत्स । कः ।
७ । नस्ये पर्य्युषितं । कः ।
८ । केवलम् । कः ।

## अथ द्वादशोऽध्यायः ।

### नस्यः ।

कासश्वाससमो नस्यो वातपित्तकफोद्भवः ।
नस्यः संनाशयेत्तस्मात्तं नस्यं योजयेद्धये ॥ १ ॥
पिप्पली सैन्धवं सारं नागरं[1] च गुड़ान्वितम् ।
कृत्तिकासार[2]मध्याग्रं वाजिनां[3] श्लेष्मनाशनम् ॥ २ ॥
चूलिकालवणं नस्ये सदा रोगविनाशनम् ।
सिता[4]चन्दनतोयानि सान्तुकाख्यानि[5] वाजिनाम् ॥ ३ ॥
नस्यकर्म्माणि युक्तानि नाड़ीवातप्रशान्तये ।
मृदुकैरार्द्रकं सान्द्रं वचाक्षारविमिश्रितम् ॥ ४ ॥
नस्ये दत्तं वातशान्त्यै हयरोगविनाशनम् ।
शर्करां माक्षिकं सैरं[6] पटोलं पलसंयुतम् ॥ ५ ॥
नस्ये[7] शरदि सप्तीनां जायते रोगशान्तये ।
वचा चोष्माणकं[8] कुष्ठं शुण्ठीच कासमर्द्दिका[9] ॥ ६ ॥

---

१ । निर्वारं गरुड़ान्वितम् । कः ।
२ । कृतिकाग्रस्य । खः ।
३ । सर्व्वदोषप्रशान्तये ।
४ । शिला । कः ।
५ । शिक्तकाख्यानि वाजिनाम् । कः ।
६ । सारं । कः ।
७ । नस्यं । कः ।
८ । चोव्कणकं । कः ।
९ । पुष्करमाक्षिकं । कः ।

ततो मन्दाग्निनाविष्टो रोगाभावे[1] प्रजायते ।
तस्मात्सर्व्वप्रयत्नेन वसन्ते वाहयेद्धयम् ॥ ५३ ॥
ग्रीष्मकालेच संप्राप्ते दूर्व्वाभोज्यं प्रशस्यते ।
वाजिनामिह सर्व्वेषां घर्म्मतापोपशान्तये ॥ ५४ ॥
घृतपानं विशेषेण सुच्छायासु निबन्धनम् ।
रक्तस्रावेच गात्रेषु ग्रासं वा घृतसंयुतम् ॥ ५५ ॥
दूर्व्वाभावे प्रदातव्यं तुरगाय घृतान्वितम् ।
क्षत्त[2]काशस्यमध्याग्रं सर्व्वदोषोपशान्तये ॥ ५६ ॥
एवं स्वस्थमयं सम्यगुपचारं[3] करोति यः ।
हयस्यतु गृहे नित्यं[4] तस्य वर्द्धन्ति वाजिनः ॥ ५७ ॥
नीरोगाः पुष्टिसंयुक्ताः प्रहृष्टोत्साहसंयुताः ।
तर्पिता[5] भूमिपैरश्वा भूमिमार्गक्रियाक्षमाः ॥ ५८ ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते ऋतुपर्य्यायाध्याय एकादशः ॥

---

१ । श्रमाभावे । कः ।

२ । स्ति । कः ।

३ । उपहारं । खः ।

४ । गृहे । कः ।

५ । सुदुर्लभास्तेऽपि वै अश्वा भूमिकाग्रेक्रियाक्षमाः । कः ।

अन्नाभावे प्रदातव्यं घृतं वा यदि वा पयः।
शस्यं वा मांसमेवाथ पुष्ट्यर्थं वाजिनां सदा ॥ ४५ ॥
यस्याश्वः शस्यमश्नाति सदा लवणमिश्रितम्[१]।
किं तस्य शस्यदानेन यथाभूतेन[२] भूपतेः ॥ ४६ ॥
शस्याभावेऽथ यवसं शुष्कं वा यस्य वाजिनः।
दिवानिशमरण्ये च स्वेच्छया संविभुक्तिकाः[३] ॥ ४७ ॥
तेचापि वाजिनो ज्ञेया यथा शस्यचरास्तथा।
तथा सर्व्वप्रयत्नेन मुक्तान्[४] सञ्चारयेद्वने ॥ ४८ ॥
आरोग्यार्थं सुपुष्ट्यर्थमुत्साहार्थं विशेषतः।
वित्तव्ययस्य रक्षार्थं हरेद्रोगं[५] प्रयत्नतः ॥ ४९ ॥
वसन्तसमये प्राप्ते वाहयेत् सततं हयम्।
सनिम्बं लवणं दद्यात्ताभ्यां तैलं[६] विशेषतः ॥ ५० ॥
सर्व्वच सम्भवं भोज्यं तैलं वा यदि वा घृतम्।
न दोषकारणं प्रोक्तं सक्षारं लवमश्नतः ॥ ५१ ॥
वसन्तसमये योऽश्वः स्थाने तिष्ठति बन्धने।
तस्योत्साहः[७] प्रणश्येत सालस्यं जायते वपुः ॥ ५२ ॥

---

१। वर्जितं। कः।
२। वृथा दानेन भूपतिः। कः।
३। च भुनक्ति यः। कः।
४। मुक्ताः। खः।
५। दरिद्रस्य। कः।
६। सतैलञ्च। कः।
७। तस्योत्साहप्रणाशाय। कः।

नच शूलं नच श्वासो [1]नच प्लीहा नच क्लमः।
नच रक्तप्रकोपश्च नच वातादिधातवः[2] ॥ ३८ ॥
योग्योऽशनार्थं वाहानां प्रधानो यव ईष्यते।
यवाभावेऽथ चणका धान्यमन्यतमं परम् ॥ ३९ ॥
यवाभावेऽथवा दद्यान्मुकुष्टांस्तैलसंयुतान्[3]।
भोजने तुरगेन्द्राणां परां पुष्टिमभीप्सताम् ॥ ४० ॥
मुकुष्टभोजनाद्वाजी पुष्टिं गच्छत्यलौकिकीम्।
उत्साहं परमं धत्ते सच[4] रोगैर्विमुच्यते ॥ ४१ ॥
अप्राप्तौ च मुकुष्टानां मुद्गा देया मनीषिभिः[5]।
सतैलास्तेऽपि कुर्व्वन्ति पुष्टिं सत्वविवर्द्धिनीम् ॥ ४२ ॥
एते पुष्टिगुणाः प्रोक्ताश्चणकाहारजा हये।
नान्यस्तस्मादभावेन सर्व्वेषां तान् विनिर्द्दिशेत् ॥ ४३ ॥
नान्यद्धितं[6] प्रशंसन्ति पञ्चमं वाजिनां बुधाः।
भक्षणार्थं यतस्तस्य दानो[7]ल्लङ्घनमुत्तमम् ॥ ४४ ॥

---

१। प्लीहं नच तथोदरे। कः।
२। वातादिव्याधिजः। कः।
३। तदभावे यवान् दद्यात्। मुकुटान् तैलसंयुतान्। कः।
४। सर्व्वरोगैः प्रमुच्यते। कः।
५। विवेकिभिः। कः।
६। नान्यदन्नं। कः।
७। दानं। कः।

दुग्धं वा केवलं रात्रौ क्वथितं संप्रशस्यते ।
तथान्यदपि यत्किञ्चिन्मधुरं संप्रजायते ॥ ३० ॥
पानाय सारसं तोयं यवसं सुमनोहरम् ।
नीलवर्णमकृष्टाश्च घृतं प्रायेन संयुतम् ॥
वाहनं च प्रयत्नेन सुस्वल्पमपि वर्जयेत् ॥ ३१ ॥
परीक्षाग्नौ यथा हेम्नः स्नेहस्य च प्रतिक्रिया ।
हयजीवस्य तद्वच्च परीक्षा यवभक्षणे ॥ ३२ ॥
यथा सांयात्रिकः पारं गत्वोच्चैः स्वस्थतां व्रजेत् ।
तद्वत् यवाशनोत्तीर्णाः शुद्धदेहा हयोत्तमाः ॥ ३३ ॥
अल्पेनापि हि छिद्रेण यथा नश्यति नौर्जले ।
स्वल्पेनापि हि दोषेण यवदोषांस्तथैव च ॥ ३४ ॥
एवं ज्ञात्वा विदग्धेन यवा देयाः प्रयत्नतः ।
प्राप्तक्षीरा विशेषेण शिशिरे समुपस्थिते ॥ ३५ ॥
शुष्का वापि यवा देयाः सर्व्वकालं च वाजिनाम् ।
प्राणदास्ते ततो[१] ज्ञेयाः सर्व्वव्याधिविनाशनाः ॥ ३६ ॥
यश्चाश्नाति यवानाशु शुष्कांश्च स्वेच्छया सदा ।
न तस्य[२] जायते रोगः कदाचिच्च यवान्नभाक् ॥ ३७ ॥

---

१ । यतः । कः ।

२ । ततश्च जायते रोगः । खः ।

एवं रक्तविशुद्धानां कृत्वा यत्नेन वाजिनाम्।
दद्याद्गोमूत्रसंयुक्तां सतैलां च हरीतकीम्॥ २०॥
दिनं त्रिसप्तकं यावत् पलपञ्चप्रमाणतः।
ततः शुद्धिमवाप्नोति निःशेषाद्रुधिरोद्गमात्॥ २१॥
ततो नवतृणाहारं संप्राप्य सुमनोहरम्।
परां पुष्टिमवाप्नोति नीरोगश्च प्रजायते॥ २२॥
न प्रायोवाहयेदश्वं प्रावृट्काले कथञ्चन।
य इच्छेद्वाजिनस्तस्य वाहनं दशमासिकम्॥ २३॥
कूपोदकं सदा शस्तं पानाय जलदागमे।
अभ्यङ्गः कटुतैलेन निर्वातस्थानबन्धनम्॥ २४॥
एकाहांतरितं दद्याल्लवणञ्च विचक्षणः।
पलद्वयप्रमाणेन मुखजापरिशुद्धये॥ २५॥
मुखरोगमवाप्नोति क्षारस्वादविवर्जितः।
वृष्ट्यम्भोभिस्तु सिक्ताङ्गस्तेजसा त्यजते हयः॥ २६॥
अशुद्धोदकजान् प्राप्तान् प्राप्नोति शतशः परान्।
नवोदकप्रधानेन बलहीनश्च जायते॥ २७॥
तस्मात् सर्व्वप्रयत्नेन प्रावृट्काल उपस्थिते।
अनेन विधिना प्राज्ञो वाजिनः परिपोषयेत्॥ २८॥
ततः शरदमासाद्य बहुखण्डसमन्वितम्।
शस्तं क्षारोदनं सप्तपलाष्टपरिसंख्यया॥ २९॥

औषधानाञ्च सर्व्वेषां क्वाथानां[१] नस्यकर्म्मणाम् ।
तैलानाञ्च घृतानाञ्च यवस्य यवसं परम् ॥ १२ ॥
पर्व्वतानां यथा मेरुरायुधानाञ्च वज्रकम् ।
तथा सर्व्वोपचाराणां समैः श्रेष्ठत्तमा[२] यवाः ॥ १३ ॥
देवतानां यथा विष्णुर्ब्रह्मा वेदविदां वरः ।
नदीनाञ्च यथा गङ्गा तथा श्रेष्ठा यवा हये ॥ १४ ॥
यथोदितः सहस्रांशुर्निःशेषं तिमिरं जयेत् ।
तथा शरीरजान् दोषान्[३] यवाः सप्तैर्हरन्ति च ॥ १५ ॥
उपचारक्रियाः सर्व्वाः पञ्चर्त्तुजनिता हये ।
कृताः स्युर्यवभोज्येन सप्तैस्तस्य कृता नरैः[४] ॥ १६ ॥
यस्य दत्ता यवा भोज्ये शिशिरे समुपस्थिते ।
अकृतापि[५] कृता सर्व्वा पञ्चर्त्तुजनिता हये ॥ १७ ॥
कृताः स्युर्यवभोज्येन सप्तैस्तस्य कृता नरैः ।
नीरोगास्तुरगाः सर्व्वे शालिहोत्रमतं यथा ॥ १८ ॥
पञ्चर्त्तुजनिता वाथ[६] क्रिया न्यस्ता तुरङ्गमे ।
अतीतास्ते विजानीयाद्यवभोज्यविवर्जिताः ॥ १९ ॥

---

१ । क्वाथ्यतां । कः ।
२ । अष्टोत्तमाः । खः ।
३ । सर्व्वान् । कः ।
४ । कृताः सर्व्वेण भोजेन सप्तैस्तु सुकृताय वै । कः ।
५ । क्रिया अपि कृताः सर्व्वाः । कः ।
६ । व्यथा । कः ।

अन्ये सप्तदश प्राहुः शिराद्वाराणि वाजिनः।
विकारयुक्तं यद्रक्तं सुस्वल्पमपि वर्जयेत् ॥ ५ ॥
एवं शरदि यः सम्यक् पुष्टिं नयति वाजिनाम्[१]।
तस्य यद्वाञ्छितं किञ्चिद्यानार्थं[२] तच्च सिध्यति ॥ ६ ॥
ततो हेमन्तमासाद्य निवाते निबधेद्धयम्[३]।
मासोत्थं यवसन्दद्यात् पानीयञ्च यथेच्छया ॥ ७ ॥
घृतं वा यदि वा तैलं पाने दद्याद्विचक्षणः।
वाहयेच्च[४] शनैर्नित्यं सर्व्वदोषप्रशान्तये ॥ ८ ॥
ततः शिशिरमासाद्य दद्यात्तैलं हि वाजिनाम्।
पलाष्टकप्रमाणेन यावद्दिनत्रिसप्तकम्[५] ॥ ९ ॥
यवोत्थं यवसन्दद्या[६]द्देकविंशत्यहानि च।
यवाभावेऽथ चणकान् दद्यादार्द्र[७]तरान् सदा ॥ १० ॥
तदभावे मस्तूरांश्च शुष्कार्द्रांस्तैलसंयुतान्।
यवसं चापि तद्देयं[८] नीरोगो जायते हयः ॥ ११ ॥

---

१। वाजिनः। कः।
२। नानार्थं तत्प्रसिध्यति। कः।
३। अश्वं निबन्ध्ययेत्। कः।
४। वाहनञ्च। कः।
५। भवेद्यावद्दिसप्तकम्। कः।
६। पश्चाद्द्याद्विंशत्यहानि च। कः।
७। आर्द्रान् वरान्। कः।
८। यत्प्रोक्तं प्रविष्ये तदहं यदा। कः।

यस्य पित्तप्रसक्तस्य काले नीरदवर्त्तिनि।
हयस्य जीवितं तावद्दिनानि दश पञ्च च ॥ ४८॥
एवं रक्तविकाराणां ज्ञात्वा धातुं तुरङ्गमे ॥
ततः प्रतिक्रिया कार्य्या उक्ता या कीर्त्तिता परा॥४९॥
भयादपीतपानीयशीतविश्रीयुतस्य च।
आर्त्तोऽपि ताड़ितोऽत्यर्थं तिर्य्यग्विद्धो यदापिवा ॥ ५० ॥
श्रमाज्वराच्च बन्धाद्वा गात्रे वा विषमस्थिते।
क्षीणशोणितमांसस्य शिरावेधः प्रशस्यते ॥ ५१ ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते धातुपरीक्षाध्यायो दशमः ॥

## अथैकादशोऽध्यायः ॥

ऋतुचर्य्या।

द्वासप्ततिसहस्राणि नाड़ीनां हि भवन्ति च।
वाजिनामिह सर्व्वेषां वायुरक्तं व्यवस्थितम्॥ १ ॥
तासां निर्मोचनार्थाय द्वाराण्यष्टौ वदाम्यहम्।
यैर्याति कुत्सितं रक्तं सर्व्वदेहसमुद्भवम्॥ २ ॥
कण्ठे वक्षसि तालौ च नासयोश्च मुखे तथा।
अण्डयोरथ पादेषु पादयोरुभयोरपि ॥ ३ ॥
कालं वलञ्च विज्ञाय वाजिनां भिषगुत्तमः।
शिरामोक्षं प्रकुर्वीत स्थानेष्वेतेषु पण्डितः ॥ ४ ॥

एकादशभिर्दूर्व्वाभो[1] वत्सरेण हिमद्युतिः ॥ ३९ ॥
यस्य श्वासो भवेदुष्णः शरीरं पुलकांकितम्[2] ।
जिह्वा हिमकराकारा[3] मासषट्कं स जीवति ॥ ४० ॥
ग्रीवाग्रे पिण्डिका यस्य जायते च तथाधरे ।
मूत्रं करोति रक्ताभं मासषट्कं स जीवति ॥ ४१ ॥
वर्णः श्वेतो यदा यस्य नेत्रयोश्च प्रजायते ।
दशमासान् समासाद्य पित्तार्त्तो न स जीवति[4] ॥ ४२ ॥
यस्य नीलप्रभे स्यातां नेत्रे वातार्द्दितस्य तु ।
मासत्रयञ्च कृच्छ्रेण यः सप्तिः स न जीवति ॥ ४३ ॥
श्लेष्मयुक्तस्य वा रक्ते यदि स्यातां विलोचने ।
वक्त्रगन्धः सुरातुल्यो दश मासान् स जीवति ॥ ४४ ॥
यस्य नेत्रे हरिद्राभे स्यातां पित्तार्द्दितस्य च ।
तस्यायुः सप्तमासाख्यं मुनिभिः परिकीर्त्तितम् ॥ ४५ ॥
बहुवर्णे घने नेत्रे स्यातां धातुसमागमे ।
तस्य सप्तेर्भवेन्मृत्युः सप्तरात्रादसंशयम् ॥ ४६ ॥
यस्यैकं लोचनं नीलं द्वितीयं रक्तसन्निभम् ।
दृश्यते स च विज्ञेयः पित्ताढ्यो मासजीवकः ॥ ४७ ॥

---

१ । रक्ताभः । कः ।
२ । विपुलान्वितम् । कः ।
३ । समाकारा । कः ।
४ । वाजिनः पित्ततप्तस्य दशमासं स जीवति । कः ।

शिरीषं क्षुद्रकं लाक्षां काथयित्वा[1] त्रिभागतः ।
यस्यैतत्सन्निपाताय वाजिनः संप्रदीयते ॥ ३२ ॥
तस्य तन्नाशमायाति तमः सूर्योदये यथा ।
स्वस्थस्यापि हि नेत्रान्ते स्यातां नीले च वाजिनः॥ ३३॥
गन्धश्च सदृशः छोण्या तदा मृत्युर्द्विमासिकः ।
नीले पीतेऽथ नेत्रान्ते स्यातां चेद्वाजिनः क्वचित्[2]।
स निर्व्वाणमवाप्नोति त्रिभिर्मासैरसंशयम् ॥ ३४ ॥
यस्य नेत्रान्तरे रेखा बहुवर्णा प्रजायते ।
विशेषात् स्वरभेदः स्यात्तस्यायुः पाञ्चमासिकम् ॥ ३५ ॥
जिह्वायां जायते विन्दुरकस्माद् यस्य वाजिनः ।
कृच्छ्रञ्च जीवते मासं स वाजी नात्र संशयः ॥ ३६ ॥
पीतो मासद्वयेनैव सप्तेर्मृत्युं प्रयच्छति ।
त्रिभिर्मासैस्तथा रक्तश्चतुर्भिश्च विचित्रितः ॥ ३७ ॥
पञ्चभिर्नीलवर्णश्च षड्भिर्वज्रसमाकृतिः[3] ।
सप्तभिः पाटलाकारश्चम्पकाभस्तथाष्टभिः ॥ ३८ ॥
नवभिश्च हरिद्राभो दशभिर्जन्तुकोपमः[4] ।

---

१ । लाक्षाक्वाथं पीत्वा । खः ।
२ । नीलपीतेऽथ नेत्राणां स्यातांश्चेद्वाजिनः क्वचित् । कः ।
३ । वज्रसमप्रभः । कः ।
४ । शंखकोपमः । कः ।

अस्मकञ्च[1] युतन्दध्ना माहिषेण निशागमे।
सन्निपातेऽथ[2] रक्तेन यदा संपीड्यते हयः ॥ २५ ॥
यदा[3] वेपथुमाप्नोति काशते च निरर्गलम्।
निद्रालस्याग्निमन्दत्वं वस्तौ मलनिबन्धनम्[4] ॥ २६ ॥
कर्णयोः पातनञ्चैव वक्त्रा[5]ल्लालाविमोक्षणम्।
तत्रापि शोधयेद्रक्तं ततो लङ्घनमर्हति ॥ २७ ॥
यावद्दोषस्य निर्णाशं स्तोकोदकहुताशनः।
क्वचिदुष्णं क्वचिच्छीतं क्वचिद्भेषजसंयुतम् ॥ २८ ॥
प्रदेयं युक्तितत्वज्ञै[6]र्वारि वार्य्यं न कुत्रचित्।
सपथ्या[7] चामृता चैव कटुकाच वचा तथा ॥ २९ ॥
शामयेत्तत्क्षणादेव त्रिधातुकुपितं ज्वरम्।
शिरीषं श्रीफलञ्चैव वेतसञ्चैव वृद्धिभाक् ॥ ३० ॥
मन्दाग्नित्वं सदोषाणां कुरुते भस्मसाद्द्रुतम्।
मधुकं[8] मधुजालञ्च माधुर्यं कुलिकान्वितम् ॥ ३१ ॥

---

१। उरभकं। खः।
२। सन्निपातेन रक्तेन। खः।
३। तदा। खः।
४। ततो मलविशोधनम्। कः।
५। वक्त्रे। कः।
६। यत्नतस्तज्ज्ञैः। खः।
७। सपर्पटामृता। खः।
८। मधुरं मधुनालञ्च माधुर्य्यं गुलिकान्वितम्। खः।

वाजिनः श्लेष्मरक्ताभ्यां दूषितस्य सदा[१] भवेत्।
नेत्रान्ते विन्दुकाकारकण्डूस्तस्य तथोदरे॥
तदा मृत्युमवाप्नोति षण्मासाभ्यन्तरे ध्रुवम्॥ १८॥

शुंठ्यामृता गोक्षुरकं घनञ्च
श्यामावचाहिंगुयुताच यष्टिः।
कफप्रणाशाय विनिर्मितोऽयं
पिण्डः प्रसिद्धश्च कफापहश्च॥ १९॥

नोचेदश्नाति शुंठ्याढ्यं सैन्धवन्नस्य[२]मार्गतः।
वायुरक्तप्रकोपेण पीड़ितस्तु तुरङ्गमः।
कुक्षिद्वये हय[३]स्तीव्रं मुहुः श्वासं प्रमुञ्चति॥ २०॥
नैकत्र मन्यते[४] स्थातुं ह्रेषते च निरर्गलम्।
एवं वातोद्भवं ज्ञाप्यं[५] रक्तन्देहे हयस्य च॥ २१॥
शोधयित्वाथ सन्दद्यान्महाघृतमनल्पकम्।
ततः शुद्धिमवाप्नोति परां पुष्टिञ्च गच्छति॥ २२॥
उत्साहं कुरुते मार्गे सर्वदोषविवर्जितः।
वातरक्तप्रकोपेण लोचनान्ते हयस्य च॥ २३॥
यदा स्यातां सिते रक्ते काशः कडूस्तथानने।
तदा तस्य भवेन्मृत्युर्यदि नाश्नाति चामिषम्॥ २४॥

---

१। यदा। खः।
२। तस्य मार्गते। कः।
३। कुक्षिद्वयग्रहः। खः।
४। रमते। खः।
५। ज्ञात्वा। खः।

तदा कण्डूतिमासाद्य कम्पते सततं वपुः ।
छायां वाञ्छति यत्नेन विशेषेण जलाश्रयम् ॥ १० ॥
मुहुर्वाञ्छति पानीयमाहारञ्च विशेषतः ।
एवं[1] वातोत्थरक्तेन ज्ञात्वाश्वम्पीडितं ततः ॥ ११ ॥
शिरामोक्षं विधायैव दद्यात्सकटुकं गुड़म् ।
ततः शुद्धिमवाप्नोति नीरोगः संप्रपद्यते ॥ १२ ॥
पित्तासृग्दूषितो वाजी[2] यदि चाश्रूणि मुञ्चति ।
नेत्रान्ते पाण्डुरत्वञ्च सद्यो मृत्युमवाप्नुयात् ॥ १३ ॥
नेत्रयोर्लक्षणं प्रोक्तं पित्तरक्तसमुद्भवम् ।
श्लेष्मरक्तप्रकोपेण यदा सम्पीड्यते हयः ॥ १४ ॥
अधोवक्त्रो भवेन्नित्यं कासते च मुहुर्मुहुः ।
आहारं न च गृह्णाति नोत्साहं कुरुते क्वचित्[3] ॥१५॥
न विन्दति कशाघातं[4] न च पार्ष्णिं नचासनम् ।
नासाग्रेण क्षिपेत्तोयं वह्निघर्मञ्च [5]वाञ्छति ॥ १६ ॥
तस्यापि शोधयित्वासृग् दद्याच्छुण्ठ्या युतं गुड़म्[6] ।
सर्वं रक्तन्ततः शुद्धा निःशेषं[7] समवाप्नयात् ॥ १७ ॥

१। एवं पित्तेन रक्तेन ज्ञात्वा संपीड़ितं हयम्। खः।
२। रक्तपित्तार्दितोऽश्वश्च। खः।
३। पथि। खः।
४। काशाद्यं। कः।
५। वाञ्छते वह्निमातपम्। खः।
६। समन्वितम्। कः।
७। निःशेषाङ्गमवाप्नुयात्। खः।

तेन[1] संशोध्यते रक्तं वाजिनां दोषसम्भवम् ।
ततः शुद्धशरीरोऽथ पिण्डाद्यैश्च वलीकृतः[2] ॥ ४ ॥
श्रावणे शष्प[3]मासाद्य वज्रवत् सुदृढो भवेत् ।
यदि[4] रक्ताधिको वाजी सस्यमश्नाति[5] कर्हिचित् ॥५॥
रक्तात् सञ्जायते पित्तं ततो[6] नाशमवाप्नुयात् ।
रक्ताधिकश्वासपुटः[7] स्नेहाद्यैः शस्यमत्ति चेत्[8] ॥ ६ ॥
संप्राप्य[9]श्लेष्ममचिराद्वयो नाशमवाप्नुयात् ।
हीनरक्तो यदा शस्यं रूक्षोऽश्नाति तुरङ्गमः ॥ ७ ॥
तदा वायुं परं प्राप्य सद्यो नाशमवाप्नुयात् ।
तच्चेदं लक्षणं प्रोक्तं रक्तकोप[10]समुद्भवम् ॥ ८ ॥
धातूनामपि सर्वेषां ज्ञेयश्चिह्नं विचक्षणैः ।
पित्तरक्तप्रकोपेण यदा संपीड्यते हयः ॥ ९ ॥

---

१ । तस्मात् संशोधयेद्रक्तम् । खः ।
२ । अश्वः पिण्डादिप्रवलीकृतः । खः ।
३ । बलम् । खः ।
४ । ततो । कः ।
५ । शस्यं नाश्नाति । कः ।
६ । पित्तात् । खः ।
७ । रक्ताधिकोऽश्वोऽथ पुष्टौ । खः ।
८ । शस्यमाचरेत् । खः ।
९ । ततः श्लेष्माणमासाद्य सोऽचिरान्नाशमाप्नुयात् । खः ।
१० । काय । कः ।

पदप्रघातसंज्ञानि दोषो यैरुपजायते ॥ ५४ ॥
कामात् कोपाद्भयान्मोहाद्दर्पाच्चैव मदाश्रयात् ।
पर्य्याणारोहदोषाच्च दूष्यन्तेऽश्वा निसर्गतः ॥ ५५ ॥

श्रीयुक्तसामन्तनरेन्दवन्दितं
रणे हयारोहवराभिनन्दितम् ।
धर्म्मार्थकामादियशःप्रधान-
मित्थं कृतं वाहनशास्त्रविस्तरम् ॥ ५६ ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते वाहनाध्यायो नवमः ॥

## अथ दशमोऽध्यायः ।

### धातुपरीक्षा ।

अथातः संप्रवक्ष्यामि धातूनां लक्षणं परम् ।
येन विज्ञानमात्रेण ज्ञायन्ते रोगसम्भवाः ॥ १ ॥
ततः शुद्धशरीरोऽत्यरक्तदोषानवाप्नुयात् ।
रक्तदोषा[१]त्तदा वाजी प्राप्नोत्येव महामयान् ॥ २ ॥
तस्मात् सर्व्वप्रयत्नेन रक्तं ज्ञेयं विचक्षणैः ।
आषाढ़समये प्राप्ते शिरामोक्षेण[२] कृत्स्नशः ॥ ३ ॥

---

१ । दोषदूष्यात् । खः ।
२ । शिरामोक्षञ्च कारयेत् । कः ।

स्वामिघाताय चादत्ते तेषां रूपमिदं शृणु ॥ ४४ ॥
वानरोलूकमार्जारतरक्षुगण्डलोचनाः ।
गतिर्वा असुरैस्तुल्या स्थूलमेढ्रशिरान्विताः ॥ ४५ ॥
लम्बौष्ठकर्णनासाश्च कृत्स्नहीनाधिकद्विजाः ।
विच्छिन्नप्रोथगण्डा ये भ्रुकुटीचित्रमेहनाः ॥ ४६ ॥
एते दोषास्तथान्येऽपि सुकुलाश्वसमुद्भवाः ।
खलानामिह राजेन्द्र वक्तुं शक्या न मादृशैः ॥ ४७ ॥
लक्ष्यं प्रधानमित्येके चान्ये लक्षणमाश्रिताः ।
लक्ष्यलक्षणमेतेषां तेनेदं दुष्करं विदुः ॥ ४८ ॥
अव्याप्तिरतिसंक्षेपादतिव्याप्तिश्च विस्तरात् ।
मुनीनामेकवाक्यत्वाद् ब्रूयामः स्थितिदुष्कराः ॥ ४९ ॥
सत्ववर्णगतिच्छायास्वरस्थानगतिः कुलम् ।
पुष्पं पुण्ड्रकनामानि दोषं वा जवलक्षणम् ॥ ५० ॥
एवं लक्षणसंयुक्तं दृश्यते शूररक्षणे ।
लक्षणेन विहीना ये निर्दोषाःस्युः प्रधाविताः ॥ ५१ ॥
हयरोहस्य का चिन्ता लक्षणैः शुभनिन्दितैः ।
तेनात्र न कृतोऽस्माभिर्हयलक्षणविस्तरः ॥ ५२ ॥
हयवाहनविज्ञानं कौतुकाहितबुद्धयः ।
अनायासेन गृह्णन्ति परं दृष्ट्वा इमे जनाः ॥ ५३ ॥
चलासनं कषा रागाः पाणिघातप्रतोदनम् ।

ध्रुवं जयं तत्र रणे नराणाम्॥ ३८॥
सन्ध्याङ्घ्रिघातेन महीं निहन्ति
ह्रेषन्ति ये स्वामिमुखं निरीक्ष्य।
प्रदक्षिणावर्त्तविकीर्णपुच्छा
जयावहास्ते समरे नृपाणाम्॥ ३९॥
विच्छिन्नदीनस्वरगद्गदा ये
अश्रुप्लुता भिन्नपुरीषमूत्राः।
अनल्पमाना दिनकृन्निरीक्ष्याः
पराजयं ते कथयन्ति युद्धे॥ ४०॥
अन्यापदं याश्च वदन्ति दीनाः
सव्येतरं चक्रविकीर्णपुच्छाः।
युग्यासनादीन् परिवर्जयन्ते
पराजयं ते कथयन्ति भर्त्तुः॥ ४१॥
विना निमित्तं रसयन्त्यभीक्ष्णं
आकुञ्चिता व्यापितमक्षिकाङ्गाः।
ध्यायन्ति घातैश्च न चोद्विजन्ते
भयावहास्ते समरे नृपाणाम्॥ ४२॥
शोकं शीलं भयं लज्जामालस्यं चैवमादिषु।
सुकूलं तं विजानीयादलं पर्य्याणवारणे॥ ४३॥
स्थाणुकण्टकवृक्षैश्च सुधाखदिरकण्टकैः।

सर्व्वं क्रमेण कर्त्तव्यमन्यथा दोषसम्भवः ॥ ३२ ॥
रक्तपित्तसमीरोत्थमन्यास्तम्भोदरादयः ।
हृद्रोगा वातशूलानि शीतोष्णोदकपानतः ॥ ३३ ॥
रक्तपित्तहरं देयं प्रतिपानं गुडौदनम् ।
रक्तपित्तसमीरोत्थं दातव्यं शर्करोदकम् ॥ ३४ ॥
जीवनं वातपित्तघ्नं वृष्यं वल्यतमं ततः ।
सर्व्वरोगहरोऽश्वानां मधु जाङ्गलको रसः ॥ ३५ ॥
स्वच्छाक्तञ्च घृतं क्षीरं वारियुक्तं तुरङ्गमः ।
पीत्वा हि निर्हरेद्दोषान् श्रमभाराध्वसंश्रवान् ॥ ३६ ॥

धर्म्मार्थकामाविजयो यशःश्री-
शोभासुखं जातिजनैश्च पूज्या ।
रणे निमित्तानि शुभावहानि
नृपस्य चैवं विनिवेदयन्ति ॥ ३७ ॥
प्रत्यूषकाले च दिनं निरीक्ष्य
वह्निं द्विजं पूर्णघटं कुमारीम् ।
छत्रं ध्वजं चामरदर्पणञ्च
रुष्टञ्च दृष्ट्वा तुरगं जयाय ॥ ३ ॥
श्रुत्वा तु शङ्खाम्बुदवेदवाक्यं
पुण्याहमाङ्गल्यशिवस्य गीतम् ।
ह्रेषं निमित्तं भवति स्वनेन

वालो वृद्धः कृशो रोगी दन्तस्तेदो महावली ॥ २२ ॥
पूर्णातिरिक्तकोष्ठञ्च गुर्व्विणीं न च वाहयेत्।
समाञ्च विपुलाञ्चैव किञ्चित्-पांशुसमन्विताम्॥ २३ ॥
एकान्ते विजने चैव रङ्गभूमिं हयं नयेत्।
सान्द्राञ्चैव सुकठिनां पाषाणोदकगर्त्तिकाम्॥ २४ ॥
तृणकाष्ठसमायुक्तां रङ्गभूमिं विवर्ज्जयेत्।
विण्मूत्रं कारयेदश्वं क्रोशक्रोशद्वयान्तरे ॥ २५ ॥
वारि दद्याद् यथाकामं घासं मुष्टिञ्च चारयेत्।
अन्यथा दोषजातानि वक्ष्याम्येतानि तावतः ॥ २६ ॥
गुरुविस्तब्धगात्रश्च छिन्नश्वासो च कम्पते।
दुर्म्मना रुद्धविण्मूत्रः सर्व्वकर्म्माक्षमो हयः ॥ २७ ॥
गूढ़मेढ्रोन्नतग्रीवो रक्तमेही गुरुक्लमः।
क्षुत्तृष्णाहृतशुष्कास्यश्छायां प्राप्य वितिष्ठति ॥ २८ ॥
तर्ज्जनैर्हन्यमानोऽपि विधुनोति शिरः परम्।
मुहुर्विनमते पृष्ठं पदमेकं न गच्छति ॥ २९ ॥
भाराध्वानपरिश्रान्तं शनैः संक्रामयेत् पथि।
नावतारितपर्य्याणं मार्गेऽध्वानसमागतम्॥ ३० ॥
मुक्तपुच्छाग्रवन्धस्य खलीनं नावतारयेत्।
मर्द्दयित्वास्य गात्राणि पांशुमध्ये विवर्त्तयेत्॥ ३१ ॥
स्नानपानावगाहञ्च प्रतिपानं सभोजनम्।

वेदवित्सादिचित्तञ्च उक्तो धावति तिष्ठति ॥ १२ ॥
सुभावर्त्तगतिच्छायाबलशीलसमन्वितम् ।
गन्धवर्णस्वरोत्कण्ठसारपुण्ड्रविभूषितम् ॥ १३ ॥
एवं विधं समारुह्य देवतांशं हयं नृपः ।
जित्वा रिपुकुलं भुंक्ते निःशङ्कोऽथ वसुन्धराम् ॥ १४ ॥
जवः श्रेष्ठस्तुरङ्गानामुत्तमाधममध्यमः ।
त्रिविधोऽपि तथा भिन्नो जवभेदः स उच्यते ॥ १५ ॥
यवोदरैरष्टसङ्ख्यैरङ्गुलं परिकीर्त्तितम् ।
हस्तश्च तैश्चतुर्विंशैः कार्मुकं तैश्चतुर्गुणैः ॥ १६ ॥
अक्ष्णोर्निमेषणैः काष्ठा अष्टलघ्वक्षरं तथा ।
मात्रा ज्ञेया प्रमाणैश्च पूर्व्वप्रोक्ता तपोधनैः ॥ १७ ॥
मात्राषोड़शकेनाश्वो यो धावति धनुःशतम् ।
तमश्वमुत्तमं विद्याद्वायुवेगं महाजवम् ॥ १८ ॥
यथोत्तमजवा वाहास्तथाश्वा मध्यमाधमाः ।
चतुरस्त्यधिकां वृद्धिं मात्राणां लक्षणं बुधाः ॥ १९ ॥
नभस्यश्वयुजे मासि भाराध्वानं जवं त्यजेत् ।
वज्राग्निसदृशं पित्तं श्रमात् कुप्यत्ति वाजिनाम् ॥ २०
कार्य्येणैव महान् किञ्चिद् युज्यो नभसि कार्त्तिके ।
हेमन्ते शिशिरे योगं वसन्ते च यथेच्छया ॥ २१ ॥
श्लेष्मक्षयात् श्लथं गात्रं न ग्रीष्मे वाहयेद्धयम् ।

ऋजुर्वृत्तानुवृत्ता[१] च गोमूत्रा सर्व्वकर्म्मसु ।
युज्यमानानि दृश्यन्ते प्रायशोहि विचक्षणैः ॥ ३ ॥
शालिहोत्रमुनिप्रोक्ता चर्य्या षोड़श वाजिनाम् ।
तासामनुपयोगित्वान्न कृतः संग्रहो मया ॥ ४ ॥
तीक्ष्णस्त्वेकेन मुदितो द्वाभ्यां भद्रस्तु धावति ।
त्रिभिर्दण्डैस्तदा मन्दः क्रमात् षष्ठाभिताड़नैः ॥ ५ ॥
तीक्ष्णाश्वभद्रमन्दानां प्रधानो जव उच्यते ।
सोऽप्यनेनैव मार्गेण संविभज्यो विजानता ॥ ६ ॥
आवाहिता विनश्यन्ति सर्व्वकर्म्मक्षमा हयाः ।
कृशा व्याधिपरीताङ्गा जायन्तेऽत्यन्तवाहनात् ॥ ७ ॥
वलं कालो वयो भूमिः कालः सत्वमतः क्रमात् ।
कुर्य्यादेकान्तरे योगश्चातियोगोहि दोषवान् ॥ ८ ॥
तच्च लोकप्रसिद्धं हि बोद्धव्यं यत्नतो बुधैः ।
हयवाहनवैज्ञानी नरेन्द्रैः पूज्यते सदा ॥ ९ ॥
धाविते ये गुणाः सप्तेर्वक्ष्यमाणान्निबोध तान् ।
शालिहोत्रादिशास्त्राणां व्यायामफलसम्भवान् ॥ १० ॥
स्थिरमांसो भारसहो लघुगात्रः पराक्रमी ।
दीप्ताग्निश्च सुशीलश्च व्यायामेनोपजायते ॥ ११ ॥
सत्याथा विनयी प्रीतो निर्द्दोषस्तापवर्जितः ।

---

१ । ऋजुवृत्ता सुवृत्ता । कः ।

कुलशीलवलो[१]पेतः कथमश्वो न धावति ॥ १९ ॥
गतिरेका स्रुता चान्या[२] चतुराख्या तृतीयका[३] ।
वेगसन्धिश्चतुर्थी च[४] धारावेगगतिस्तथा ॥ २० ॥
श्लथरागार्थवेषस्य[५] चञ्चलस्य त्रिकोणतः ।
नित्यमुद्यतदण्डस्य तस्य वाजी न धावति ॥ २१ ॥
धारा तु पञ्चमी प्रोक्ता न शृणोति न पश्यति ।
सर्व्वकर्म्मक्षमो वाजी तस्मात्तां परिवर्जयेत् ॥ २२ ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते आरोहणाध्यायः॥

## अथ नवमोऽध्यायः ।

ऋतुचर्य्या ।

कर्म्मचर्य्यासु[६] नित्यानां शुद्धान्नं सुनिवर्हितम् ।
धनुरष्टादशे योज्यं वाजिनां मण्डलं क्रमात्[७] ॥ १ ॥
सङ्कोचयेज्जयं तावद् यावत् कार्म्मुकपञ्चकम् ।
तदूर्द्ध मण्डलैर्योज्यो गोमूत्रात्तदनन्तरम् ॥ २ ॥

---

१ । वयः । कः ।
२ । चास्य । कः ।
३ । द्वितीयका । कः ।
४ । तृतीया च धारा वेगवतीतरा । कः ।
५ । बन्धस्य चपलस्य त्रिकोन्नतः । कः ।
६ । ऋतुचर्य्यासुनिष्पन्नं सादिना सुनिवर्हितम् । खः ।
७ । मण्डलेन तु । खः ।

सर्व्वथा[1] प्राप्तदण्डस्य दण्डमेकं निपातयेत् ॥ ११ ॥
ह्रेषणे स्कन्धमुद्दिष्टं स्खलिते जघनान्तरम्।
भीते वक्षःस्थलं हन्यादक्ष्णोन्मार्गगामिनम् ॥ १२ ॥
अस्थाने ताड़ितो वाजी बहून्[2] दोषान् प्रदर्शयेत्।
ताव[3]द्भवन्ति ते दोषा यावज्जीवत्यसौ हयः ॥ १३ ॥
दण्डेनाभिभवेद्वाहा[4]न्नारोहेद्दण्डवर्ज्जितान्।
दण्डोहि साधनं तीव्रं पदं[5] दण्डात् प्रजायते ॥ १४ ॥
तुलावदुद्धृता वल्गा नात्युच्चा नातिलम्बिता।
दोषं दृष्ट्वातु कर्त्तव्या तिर्य्यगाकुञ्चिता श्लथा ॥ १५ ॥
कटिं सक्तेश्च शैथिल्याद्वहमानस्य ताड़येत्।
सद्यः प्रस्खलिते गात्रं तत्र दण्डं प्रदापयेत् ॥ १६ ॥
अकालदण्डपाताच्च[6] त्वकालग्रहमोक्षणात्।
अकालहिंसाघाताच्च तेन वाजी न धावति ॥ १७ ॥
आसनं शिथिलं यस्य स्वरो यस्य न भीषणः।
लघुप्रहारदाता च वाजी तस्य न धावति ॥ १८ ॥
सर्व्वलक्षणसम्पन्नः सर्व्वदोषविवर्जितः।

---

१। सर्व्वस्य।
२। बहुदोषः प्रजायते। कः।
३। एते। कः।
४। हयो दण्डादभिभवेत्। कः।
५। परमश्वस्य जायते। कः।
६। अकालदण्डपातश्च अकालग्रहमोक्षणम्। अकालहिंसाघातश्च। खः।

स वाजिवाहः कथितः पृथिव्यां
शेषा नरा भारवहा[१] हयानाम् ॥ ४ ॥
प्राज्ञः सत्वबलोत्साही दृढः[२] सर्व्वाङ्गसौष्ठवः ।
जितशीतातपालस्यो जितायासो जितासनः[३] ॥ ५ ॥
हयकालबलप्राणजवकामाध्वयोगवित्[४] ।
शान्तोपचारसारज्ञो रणक्रीड़ासु दीक्षितः ॥ ६ ॥
वाजिनां हृदयज्ञश्च स्थाने दण्डनिपातवित् ।
दुष्टाश्वदमने दक्षः सर्व्वक्लेशसहः शुचिः ॥ ७ ॥
ग्रासौषधान्नपानीये परव्यूहावलोकने ।
चिषु श्रेष्ठः[५] प्रवेशे च निर्गमे कुशलोऽस्त्रवित् ॥ ८ ॥
रोगं विकुरुते यश्च हत्त्या वाधाविचारवित् ।
धनुःकुन्तासिशक्तिज्ञः सोऽश्ववाहः प्रकीर्त्तितः ॥ ९ ॥
वक्त्रे स्कन्धे मुखे कोष्ठे गात्रे सक्थ्यौ च ताड़येत् ।
उन्मार्गी यदि भ्रष्टोऽश्वो मूढ़ः स्खलति ह्रेषते ॥ १० ॥
कुपिते[६] पुच्छसंस्थाने भ्रान्ते जानुद्वयं तथा ।

---

१ । भारकराः । कः ।
२ । दृढ़सर्व्वाङ्गसौष्ठवः । कः ।
३ । जितनिद्रो जिताशनः । कः ।
४ । हयकामास्त्रयोगवित् । कः ।
५ । ज्ञानप्रदेशेषु । कः ।
६ । हेषते स्कन्धसंस्थानम् । कः ।

## अथाष्टमोऽध्यायः ।

आरोहणम् ।

अथातः संप्रवक्ष्यामि हयारोहणमुत्तमम् ।
येन विज्ञानमात्रेण रेवन्तेनोपमीयते ॥ १ ॥

चलकिसलयपादः कर्णमध्यैकदृष्टिः
न चलति कटिदेशे आसने संस्थितश्च[१] ।
हयहृदयगतिज्ञः स्थानदण्डावपाती
स खलु तुरगयोक्ता मान्यते[२] पार्थिवेन्द्रैः ॥ २ ॥

यो[३] नित्यं दृढमुष्टिहस्तलघुकः क्रोधानलैर्वर्ज्जितः
सत्यैकस्थिरबुद्धिमध्यमतनुः[४] शास्त्रस्थतत्त्वज्ञकः[५] ।
काले दण्डनिपातविश्रमयुतः ताम्बूलवक्त्रान्वितः[६]
त्वेवं[७] लक्षणसंयुतो हयरुहो राज्याधिपैः पूज्यते ॥ ३ ॥

ऊरू स्थिरौ[८] यस्य चलौ च पादौ
त्रिकोन्नतं संहतमासनञ्च[९] ।

---

१ । व्यापितोऽपि स्थितो यः । कः ।
२ । पूज्यते । कः ।
३ । दार्ढ्यं मुष्टिगतं करेण लघुता । कः ।
४ । सत्वैकस्थिरबुद्धिमध्यमनतिः । खः ।
५ । शास्त्रार्थविद्धार्म्मिकः । कः ।
६ । ताम्बूलपूर्णाननः । कः ।
७ । श्रीमाल्लक्षयुतो महाहयपरो राजाधिपैः । कः ।
८ । उरः स्थिरं । कः । ९ । संहतमासनश्च । कः ।

द्विजस्य वेदोऽथ मुनेरपि क्षमा
पराक्रमः शस्त्रवलोपजीविनः ॥ ९ ॥

आकर्षन्निव गां वभन्निव खुरौ पश्चार्द्धमुद्यन्निव
स्वीकुर्व्वन्निव खं पिवन्निव दिशो वायुं समश्नन्निव ।
साङ्गारप्रकरान् स्पृशन्निव महीं छायाममर्षन्निव
चञ्चच्चामरवीज्यमानवदनः श्रीमान् हयो धावति ॥१०

अलक्षितगतागतैर्मृगदृशां कटाक्षैरिव
क्षणानुनयशीतलैः प्रलयकेलिकोपैरिव ।
सुवृत्तमसृणोत्तरैर्मृगदृशामुरोजैरिव
त्वदीयतुरगैरलं धरणिचक्रमाक्रम्यते ॥ ११ ॥

येषां दीपशिखोपमानि नयनान्युद्भावितः सन्निव
ग्रीवा क्रौञ्चनिभा विभाति च समा पादाश्च मुद्गोपमाः ।
वेगो वायुरिवाथ वानरसमः स्याद्वारणप्रेङ्खितम्
शङ्खक्रौञ्चमृगेन्द्रदुन्दुभिघनव्याघ्रेभतुल्यस्वनः ॥१२॥

वक्त्रे यो हरिणाधिपप्रतिनिभो व्याघ्रोपमो वाहुभिः
आवर्त्तोऽश्वशुभैः प्रधानकुलजाः सुस्निग्धवर्णप्रभाः ।
उष्ट्राक्षाः प्रियदर्शनाश्च सुभगाः श्वासैः सुगन्धैश्च ये
धन्यास्ते जयराज्यवित्तसुखदाः संवाहका भूपतेः ॥१३॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते वेगवर्णनो नाम सप्तमोऽध्यायः ।

## अथ सप्तमोऽध्यायः ।

वेगः ।

गुणानामिह सर्व्वेषां गुणो वेगमयोऽधिकः।
अश्वानां शस्यते तज्ज्ञैरश्वज्ञानविचक्षणैः ॥ १ ॥
संवाहनविधानेन प्रकाशं यान्त्यसंशयम् ।
तस्मात् सर्व्वप्रयत्नेन वेगो ज्ञेयश्च वाजिनाम् ॥ २ ॥
अवाहिता विनश्यन्ति विनश्यन्त्यतिवाहिताः ।
अश्वानां वाहनं पथ्यं सानुरागञ्च मोक्षणम् ॥ ३ ॥
अधमा मध्यमास्ते स्युर्मध्यमाश्च तथोत्तमाः ।
उत्तमाश्चोत्तमा भूयो वाह्यमानास्तुरङ्गमाः ॥ ४ ॥
रूढ़मश्वविदां श्रेष्ठं रूढ़े सर्व्वं प्रतिष्ठितम् ।
रूढ़ेन तु विहीनस्य लक्षणं चाप्यलक्षणम् ॥ ५ ॥
रूपावर्त्तगतिच्छायासत्ववर्णवयोवलम् ।
जवहीनस्य वाहस्य सर्व्वमेव निरर्थकम् ॥ ६ ॥
गतेर्धन्यतरो वर्णो वर्णाद्धन्यतरः स्वरः ।
स्वराद्धन्यतरं सत्वं सर्व्वं सत्वे प्रतिष्ठितम् ॥ ७ ॥
लघुत्वं मातृदोषेण पितृदोषेण जाड्यता ।
दौर्वल्यं स्वामिदोषेण स्वदोषो नास्ति वाजिनाम् ॥८॥

जवो हि सप्तेः प्रथमं विभूषणं
त्रपाङ्गनायाः कृशता तपस्विनः ।

आस्यं भुजौ केशककाटिकाश्च
दीर्घं चतुष्कं तुरगस्य शस्तम् ।
तथोन्नते घ्राणपुटे ललाटे
शफाश्च तज्ज्ञाश्चरणौ वदन्ति ॥ १४ ॥
ओष्ठौ च जिह्वाप्यथ[1] तालुकञ्च
मेढ्रं सुरक्तं शुभदं हयस्य
लघूनिबन्धाश्चरणेषु कोष्ठं
श्रोत्राणि सर्व्वाणि तथैव पुच्छम् ॥ १५ ॥
कर्णान्तरं कर्णसमन्वितञ्च
वंशं तथा ह्रस्वतरं प्रशस्तम्[2] ।
वक्त्रं मुखं कन्धरजानुनी च
पार्श्वञ्च सप्तेः[3] शुभदं प्रदिष्टम् ॥ १६ ॥
कक्षान्तरं चोदरमध्यमञ्च
निम्ना कटी तानि[4] सजानुकानि ।
वक्षःशफोरूजघन[5]स्थलञ्च
चतुष्कमेतत् पृथुलं प्रदिष्टम्[6] ॥ १७ ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते सर्व्वावयवप्रमाणो नाम षष्ठोऽध्यायः ॥

---

१ । रसज्ञावथ । खः ।
२ । प्रदिष्टम् । खः ।
३ । सर्व्वे । कः ।
४ । तालु । कः ।
५ । शफैर्वाजिघटा । खः ।
६ । समस्तम् । कः ।

सप्तविंशप्रमाणेन मुखमश्वस्य शस्यते।
कर्णौ षडङ्गुलौ प्रोक्तौ तालुकं चतुरङ्गुलम्॥७॥
चत्वारिंशच्च सप्ताढ्याः स्कन्धाः सम्यक् प्रकीर्त्तिताः[१]।
पृष्ठवंश[२]श्चतुर्व्विंशः सप्तविंशा तथा कटी॥८॥
अतिसूक्ष्मं तथा निम्नं पुच्छं हस्तद्वयायतम्[३]।
लिङ्गं हस्तप्रमाणञ्च तथाण्डौ चतुरङ्गुलौ॥९॥
मार्ग[४]स्थानं चतुर्व्विंशं हृदयं षोड़शाङ्गुलम्।
कटिकक्षान्तरञ्चोक्तं चत्वारिंशत्[५] प्रमाणतः॥१०॥
मणिबन्धद्वयं चैव खुराश्च चतुरङ्गुलाः।
अशीत्यङ्गुल उत्सेधो दैर्घ्यञ्च द्व्यधिकं शतम्।
एवं क्रमेण गात्रस्य प्रमाणं वाजिनां मतम्॥११॥

दीर्घाणि चत्वारि तथोन्नतानि
चत्वारि रक्तानि च सूक्ष्मकाणि।
ह्रस्वानि[६] चत्वार्य्यथ चायतानि
भूयश्च चत्वार्य्यथ नम्रकाणि[७]॥१२॥

द्वात्रिंशत्[८] क्रमशोऽप्याहुर्लक्षणानि मुनीश्वराः।
तान्यहं कीर्त्तयिष्यामि वाजिनाञ्च पृथक् पृथक्॥१३॥

---

१। संपरिकीर्त्तिताः। खः।
२। पृष्ठिवंशः। खः।
३। हस्तार्द्धमायतम्। खः।
४। मार्गं। खः।
५। चतुर्व्विंशत्। खः।
६। हस्तानि। खः।
७। निम्नकानि। कः।
८। द्वात्रिंशच्च समानि। कः।

# अथ षष्ठोऽध्यायः ।

अवयवप्रमाणम् ।

दीर्घह्रस्वविमांसास्या ये भवन्ति तुरङ्गमाः ।
ते शस्ताः पार्थिवेन्द्रस्य यानवाहनकर्मणि ॥ १ ॥
स्कन्धमभ्युन्नतं दीर्घं वक्रग्रीवं विशेषतः ।
चमरालङ्कृतं सम्यक् स्तोकवालसमन्वितम् ॥ २ ॥
येषां पृष्ठं[१] सुवंशं स्याद्विपुलं ब्रणवर्जितम् ।
किञ्चिन्मध्ये भवेन्निम्नं[२] राजार्हास्ते तुरङ्गमाः ॥ ३ ॥
स्निग्धरोमा सुवृत्ता च [३]सुस्थूला विपुला कटी ।
ग्रथिताः सुदृढा रम्या भुजा मांसप्रपूरिताः[४] ॥ ४ ॥
पादा निर्मांसलावक्राश्चक्राकारखुरान्विताः ।
अप्रमाणं तथा वक्षः कर्णौ लघुतरौ स्मृतौ[५] ॥ ५ ॥
पार्श्वौ तनुतरौ[६] शस्तौ सुरसस्निग्धतालुकम्[७] ।
दन्ताश्च शिखराकारा विपुला चन्द्रवर्चसः ॥ ६ ॥

---

१ । पृष्ठिः सुवंशा वा विपुला ब्रणवर्जिता । खः ।
२ । निम्नाः । खः ।
३ । विपुला कटिग्रथिता । खः ।
४ । सुदृढाश्च भुजा येषां मांसशोणितपूरिताः । खः ।
५ । शुभौ । खः ।
६ । शुभतरौ । खः ।
७ । रक्तं स्निग्धञ्च तालुकम् । खः ।

ततः श्वेताः प्रदृश्यन्ते यावद्वर्षचयं पुनः ।
ततः काचप्रभाः सम्यक् यावत् संवत्सरास्त्रयः ॥ ७ ॥
ततः सप्तदशादूर्द्ध्वं यावद्वर्षाणि विंशतिः ।
मक्षिकाभारदास्तेषां यावद्वर्षचयं पुनः ॥ ८ ॥
तस्मादुदूखलं प्राप्तास्तावद्वर्षचयं पुनः ।
प्रकम्पञ्च समागम्य पश्चात् पातः समाचयम् ॥ ९ ॥
द्वात्रिंशद्वत्सरैरेव वाजी निर्व्वाणमाप्नुयात् ।
दंष्ट्राचतुष्टयं श्वेतं वक्त्रेण परमायुषि ॥ १० ॥
अश्वानामेव सर्व्वेषां दन्ता द्वादश कीर्त्तिताः ।
कालिका हारिणी शुक्ला काचावाप्यथ मक्षिका ॥११॥
शङ्खोदूखलकञ्चैव दन्तानाञ्चलनं तथा ।
ततस्तु पतनं विद्यादेष व्यञ्जनसंग्रहः ॥ १२ ॥
चतुर्विंशतयो दंष्ट्राः शालिहोत्रमतं तथा ।
एवं दन्तविशेषेण सर्व्वेषामिह वाजिनाम् ।
विज्ञेया चायुषः सङ्ख्या वाजिपोषणतत्परैः ॥ १३ ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते दन्तोद्भेदोनाम पञ्चमोऽध्यायः ।

शङ्खपाद्मुखो यस्तु[1] आवर्त्तैः कुत्सितैरपि ।
न दुष्यति सदावर्त्तः शालिहोत्रमतं यथा ॥ ३३ ॥

इति श्रीनकुलविरचितेऽश्वचिकित्सिते आवर्त्ताध्यायश्चतुर्थः ॥

## अथ पञ्चमोऽध्यायः ।

### दन्ताः ।

दन्तोद्भेदं प्रवक्ष्यामि वाजिनामायुलक्षणम् ।
येन विज्ञातमात्रेण आयुर्ज्ञानं प्रचक्षते ॥ १ ॥
अश्वस्तु तनुभिर्दन्तैः क्षीरदन्त इति स्मृतः ।
तथा षोड़शभिः कोणो प्राज्ञैर्द्वादशमासिकः ॥ २ ॥
त्रिंशन्मासोद्भवाः सर्व्वे अखण्डाः परिकीर्त्तिताः ।
द्वौ स्यातां द्वौ च न स्यातां मूर्द्धोपरि यथाक्रमम् ॥ ३ ॥
चतुर्भिर्वत्सरैर्दन्ताः कालिकान्ये भवन्ति च ।
तथान्यः सप्तमे वर्षे चतुर्थः कालिको भवेत् ॥ ४ ॥
अष्टमे वत्सरे प्राप्ते प्राप्ताः स्युः सार्व्वकालिकाः ।
नवमे त्वथवा रेखा पीतत्वं शंसयन्ति च ॥ ५ ॥
तथाप्येकादशे वर्षे तावत् पीतत्वमागताः ।
तिष्ठन्ति दशनास्तेषां वाजिनामप्यसंशयम् ॥ ६ ॥

---

१ । वात्र नावर्त्तैः । खः ।

त्रिवलिस्थो यदावर्त्तस्त्रिवर्गस्य प्रणाशकः[१] ।
वाजिनस्ते परिज्ञेयाः स्त्रीपार्श्वस्था[२] भयप्रदाः ॥ २५ ॥
पुच्छ[३]देशे यदावर्त्तो वाजिनः संप्रदृश्यते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो नृपैः ॥ २६ ॥
गुह्ये पुच्छे वलौ यस्य भवन्त्यावर्त्तकास्त्रयः ।
स कृतान्तस्वरूपेण वर्जनीयस्तुरङ्गमः ॥ २७ ॥
अधऊर्द्ध[४] यदा वाजी सम्पुटं न स्पृशेत् क्वचित् ।
यमदूतः स विज्ञेयो वर्जनीयः प्रयत्नतः ॥ २८ ॥
हीनदन्तोऽधिदन्तश्च कराली कृष्णतालुकः ।
मुशली च तथा शृङ्गी षडेते स्वामिघातकाः ॥ २९ ॥
एकाण्डजातश्चैकाण्डो[५] हीनांगोप्यधिकाङ्गकः ।
परित्याज्यः स[६] वाञ्छद्भिरन्विष्य परमं यशः ॥ ३० ॥
घण्टी वदनको वाली शृङ्गीचैव चतुर्थकः ।
वर्जनीयः प्रयत्नेन सर्वे ते पापकृत्तमाः ॥ ३१ ॥
घण्टी च स्वामिनं हन्ति वदनी धनसंक्षयम् ।
अन्तःपुरं तथा वाली शृङ्गी राष्ट्रविनाशनः ॥ ३२ ॥
षट्पदाभो भवेद्यश्च कृष्णतालुर्न दुष्यति ।

---

१ । प्रसाधकः । खः ।
२ । श्रीपार्श्वः स शुभप्रदः । खः ।
३ । पृष्ठ । खः ।
४ । अधोर्द्धं च यदा । कः ।
५ । एकाण्डकोऽप्यनण्डश्च । खः ।
६ । भूपालैः संग्रामे क्षेमकरकः । ख ।

कर्णमूले यदावर्त्तस्तन्मध्ये च तथापरः।
विजयाख्यावुभौ ज्ञेयौ युद्धकाले जयप्रदौ ॥ १७ ॥
नासामध्ये यदावर्त्त एको वा यदि वा त्रयः।
चक्रवर्त्ती स विज्ञेयो वाजी भूपालपूजितः ॥ १८ ॥
कण्ठे यस्य महावर्त्त एकोऽश्वस्य[१] प्रजायते।
चिन्तामणिः स विज्ञेयश्चिन्तितार्थविवृद्धिदः ॥ १९ ॥
स्कन्धे पार्श्वे यदावर्त्तः स भवेत् पद्मलक्षणः।
करोति विधिवत् पद्मे स्वामिनः सततं सुखम् ॥ २० ॥
शुक्त्याख्यौ[२] तालुकान्तस्थावावर्त्तौ कीर्त्तिवृद्धिदौ।
हयस्य स्वामियुक्तस्य सदैव सुसुखावहौ ॥ २१ ॥
एका[३]वर्त्तो भवेद्यस्य[४] कक्षान्ते वाजिनो यदा[५]।
स रणे मृत्युमाप्नोति द्वौ च[६] स्वामिविनाशनौ ॥ २२ ॥
जानुदेशे यदावर्त्तो वाजिनः संप्रदृश्यते।
प्रवासं सततं ब्रूते स्वभर्त्तुः क्लेशसंयुतम् ॥ २३ ॥
वाजी मेढ्रतलावर्त्तो वर्जनीयो महीभुजाम्।
स करोति हरेर्नाशं परचारसमुद्भवम्[७] ॥ २४ ॥

---

१। एकः स्पष्टः। खः।
२। शुक्लाख्यौ। खः।
३। यस्य। खः।
४। व्यक्तः। खः।
५। अशुभः। खः।
६। चाश्ु। खः।
७। परस्परसमुद्भवम्। खः।

त्रयो यस्य ललाटस्था आवर्त्ता अधरोत्तराः ।
त्रिकूटः स परिज्ञेयो वाजिवृद्धिकरः परः ॥ ९ ॥
एवमेव प्रकारेण त्रयो ग्रीवां समाश्रिताः ।
त्रयावर्त्तः[१] स वाजीशो जायते भूपमन्दिरे ॥ १० ॥
ललाटे युगलावर्त्तौ चन्द्रार्कौ संप्रकीर्त्तितौ ।
वाजिनो यदि[२] तौ स्यातां राष्ट्रवृद्धिकरौ परौ ॥ ११ ॥
उपर्य्युपरि यस्य स्युरावर्त्ता अलिके त्रयः ।
निःश्रेणिः सतु विज्ञेयो राष्ट्रवृद्धिकरः परः ॥ १२ ॥
एकोऽथवा कपोलस्थो यस्यावर्त्तः प्रदृश्यते ।
वर्त्तमानः[३] स विज्ञेयः स इच्छेत्स्वामिनाशनम् ॥ १३ ॥
कपोलाभ्यान्तथावर्त्तौ विद्येते[४] वाजिनो यदि ।
तावश्विनाविति प्रोक्तौ युद्धकाले जयप्रदौ ॥ १४ ॥
गण्डावर्त्तौ[५] भवेद्यस्य वाजिनो दक्षिणाश्रयः ।
स करोति महासौख्यं स्वामिनः शिवसंज्ञकः ॥ १५ ॥
तद्वद्वामाश्रयः क्रूरः प्रकरोति धनक्षयम् ।
इन्द्रकाख्या[६]वुभौ शस्तौ नृपराज्यविवृद्धिदौ ॥ १६ ॥

---

१ । यस्यावर्त्तः । खः ।
२ । यस्य । खः ।
३ । रथिनामश्वनिष्ठानां स दृष्टः स्वामिनाशने ।
४ । कपोलाभ्यन्तरावर्त्तौ विद्येते । खः ।
५ । गलावर्त्तः । खः ।
६ । इन्द्रकाख्यौ । खः ।

## अथ चतुर्थोऽध्यायः ॥

आवर्त्ताः ।

आवर्त्ता विंशतिः प्रोक्ताः शालिहोत्रमहात्मना ।
गात्रस्थानविभागेन तेषां व्यक्तिर्मयोच्यते ॥ १ ॥
ललाटे मस्तके चैव ग्रीवायां हृदये तथा ।
पादे पृष्ठे मणीबन्धे नाभिदेशे विशेषतः ॥ २ ॥
स्कन्धे पार्श्वे[१] गले वक्त्रे कुक्षौ रंध्रे त्रिके तथा ।
आद्यास्त्रयोदशावर्त्ता[२] विज्ञेया वाजिपण्डितैः ॥ ३ ॥
नासिकाग्रे ललाटाग्रे शङ्खे कण्ठे च मस्तके ।
आवर्त्तो जायते येषां ते धन्यास्तुरगोत्तमाः ॥ ४ ॥
हृदि स्कन्धे गले चैव कटिदेशे तथैव च ।
नाभौ कुक्षौ च पार्श्वाङ्गे मध्यमास्ते प्रकीर्त्तिताः ॥ ५ ॥
ललाटे यस्य चावर्त्तो द्वितीयस्य स लिङ्गकः ।
मस्तके च तृतीयश्च पूर्णकुक्षिः स उत्तमः ॥ ६ ॥
पृष्ठवंशे तथावर्त्तो यस्यैकः संप्रजायते ।
स करोत्यश्वसंघातान् स्वामिनः सूर्यसंज्ञकः ॥ ७ ॥
कक्षायां जानुमेढ्रे च त्रिवलौ पुच्छसन्निधौ ।
पुच्छे गुह्ये वलावष्टावावर्त्ता अधमा हये ॥ ८ ॥

१ । ललाटाग्रे । खः ।
२ । आद्यन्ता द्वादशावर्त्ताः । खः ।

भस्माभं वाजिनं जह्यात् सुदूरेण नराधिपः।
यदि वाञ्छति[१] कल्याणं वाञ्छेच्च श्रीसमुद्भवम्॥ ११॥
यस्य[२] रोमविभेदेन जायन्ते रोमविन्दवः।
पुष्पाख्यः स परित्याज्यः सर्व्ववाजिभयावहः॥ १२॥
यस्य पादाः सिताः सर्वे तथा वक्त्रञ्च मध्यतः।
कल्याणपञ्चकः प्रोक्तः सर्व[३]कल्याणकृच्च सः॥ १३॥
विमिश्रवर्णकाः सर्वे प्रशस्ता वाजिनः स्मृताः।
कृष्णनीलस्य मिश्रत्वमेकं मुक्ता सुदूरतः॥ १४॥
यस्योत्कृष्टतरो वर्णो वृद्धिं याति शनैः शनैः।
नाशयति तथा नीचान् स करोति वहून् हयान्॥१५॥
यस्याधमेन वर्णेन छाद्यते[४] च प्रधानजः।
विवृद्धिं गच्छता[५] सोऽथ करोति हयसंक्षयम्॥१६॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते वर्णानाम तृतीयोऽध्यायः॥

---

१। कर्म्मणि वाञ्छाञ्च करोति श्रीसमुद्भवाम्। खः।
२। हयस्य वर्णभेदेन। खः।
३। सदा। खः।
४। सीद्यन्ते च प्रधानजाः। खः।
५। गच्छते। खः।

सितो रक्तस्तथा पीतः सारङ्गः पिङ्ग एवच ।
नीलः कृष्णोऽथ सर्वेषां श्वेतः श्रेष्ठतमः स्मृतः ॥ २ ॥
पट्टार्हो भूपतेर्वाजी सर्वश्वेतः प्रशस्यते ।
तदभावे यथा प्रोक्तास्तथा श्रेष्ठाः क्रमेण च ॥ ३ ॥
श्वेतः प्रालेयसङ्काशो रक्तः कुङ्कुमसन्निभः ।
हरिद्रासदृशः पीतः सारङ्गः कर्वुरः स्मृतः ॥ ४ ॥
पिङ्गः कपिलकाकारो नीलो दूर्वाग्रसंनिभः ।
कृष्णो जम्बूफलाकारः शास्त्रज्ञैः समुदाहृतः ॥ ५ ॥
पीताभः श्वेतपादोयस्तथा स्यात्सितलोचनः ।
चक्रवाकः स विज्ञेयो राजार्हो वाजिसत्तमः ॥ ६ ॥
सर्वश्वेतो हयो यस्तु भवेन्मेचककर्णकः[१] ।
सवाजी वाजिमेधार्हः श्यामकर्णः प्रकीर्त्तितः ॥ ७ ॥
मुखे चन्द्रकसंवीतो[२] जम्बूफलसमाकृतिः ।
श्वेतपादः स विज्ञेयो मल्लिकाख्यः स पूजितः ॥ ८ ॥
चत्वारोऽप्यसिताः पादाः सर्वश्वेतस्य वाजिनः ।
भवन्ति यस्य स त्याज्यो यमदूतः सुदूरतः ॥ ९ ॥
यस्य पादाः सिताः सर्वे पुच्छं वक्षो मुखं तथा ।
मूर्धजाश्च सिता यस्य तं विद्यादष्टमङ्गलम् ॥ १०॥

---

१ । श्यामैककर्णकः । खः ।
२ । सङ्काशः । खः ।

मधुजालं प्रकुर्वन्ति[1] तदाश्वान् घ्नन्ति कृत्स्नशः ॥ २३ ॥
तस्मात्सर्वप्रयत्नेन वाजिशालां प्ररक्षयेत्[2] ।
उपायेभ्यश्च[3] सर्वेभ्यो य इच्छेद्भूतिमात्मनः ॥ २४ ॥
ब्राह्मणान्वाचयेत्स्वस्ति नित्यं वेदविचक्षणान्[4] ।
तिलहोमस्तथा कार्य्यो जपश्च[5] शतरुद्रियः ॥ २५ ॥
मन्दुरान्ते सदा धार्य्यो रक्तवक्त्रो महाकपिः ।
सर्वपापविनाशाय वाजिनाञ्च विवृद्धये ॥ २६ ॥
शरघां रक्षयेद् यत्नात् प्रविशन्तीं हयालये ।
यदीच्छेच्छाश्वतीमृद्धिं तेषाञ्चैव तथात्मनः ॥ २७ ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते जात्यधिकारे द्वितीयोऽध्यायः ॥

## अथ तृतीयोऽध्यायः ।

### वर्णवर्णनं ।

वर्णाः सप्त भवन्तीह[6] सर्वेषां वाजिनां ध्रुवम् ।
तानहं कीर्त्तयिष्यामि भेदैर्जाताननेकधा ॥ १ ॥

---

१ । प्रबध्नन्ति । ख ।
२ । प्रलक्षयेत् । खः ।
३ । अपायानाञ्च सर्व्वेषां यदिच्छेत्त्राणमात्मनः । खः ।
४ । अर्चयेन्नित्यं तत्त्ववेदविचक्षणान् ।
५ । जयः स्यात्तत्र रुद्रतः । खः ।
६ । वर्णा भवन्ति येऽपीह । कः ।

जायते सङ्गरे प्राप्ते कर्करस्य च भक्षणे ॥ १४ ॥
प्रबुद्धाः कथयन्त्यश्वाः शुभं वा यदि वाशुभम् ।
स्वस्वामिनो निजैश्चिह्नैस्तद्विज्ञेयं विचक्षणैः ॥ १५ ॥
यः सन्नद्धो हयो रावमूर्ध्वमूर्ध्वं करोति च ।
खुराग्रेण लिखन् भूमिं स शंसति रणे जयम् ॥ १६ ॥
यः करोत्यसकृन्[1] मूत्रं पुरीषञ्चाश्रुमोक्षणम् ।
स शंसति पराभूतिं यश्चैवं[2] वर्त्तते हयः ॥ १७ ॥
निरामिषं निशीथे यो जागर्त्ति नृपतेर्हयः ।
स शंसति द्रुतन्तस्य स्थिरस्यापि[3] प्रयाणकम् ॥ १८ ॥
यदा व्याधिं विना वाजी ग्रासन्त्यजति दुर्मनाः ।
अश्रुपातञ्च कुरुते तदा भर्त्तुरशोभनम् ॥ १९ ॥
पुलकांकितपुच्छा ये जायन्ते भूपतेर्हयाः ।
निरीक्षन्तः[4] प्रभोर्नाशं ते वदन्ति निशागमे ॥ २० ॥
शरटं रक्षयेद्यत्नात्प्रविशन्तं हयालये ।
यदीच्छेच्छाश्वतीं वृद्धिं तेषाञ्चैव तथात्मनः ॥ २१ ॥
स्फुलिङ्गा यस्य दृश्यन्ते पुच्छदेशे च वह्निजाः ।
परचक्रागमाशंसी विज्ञेयो हयपण्डितैः ॥ २२ ॥
अश्वशालां समासाद्य यदान्त[5]र्मधुमक्षिकाः ।

---

१ । करोति सकृत् । खः ।
२ । यश्चैवोपहृतः । खः ।
३ । स्थितस्य । खः ।
४ । निर्गच्छतः । खः ।
५ । यदा च । कः ।

समीरप्रभवा[१] वैश्या एणोलूकाश्च शूद्रजाः।
विवेकी सद्गुणो विप्रस्तेजस्वी क्षत्रियो बली॥ ६॥
दुष्टभावस्तथा वैश्यः शूद्रो निःसत्वकातरः[२]।
ब्राह्मणः सामवाही च भेदवाही च क्षत्रियः॥ ७॥
उपादानेन वैश्यः स्याच्छूद्रो दण्डेन ताड़ितः।
पुष्पगन्धः[३] सदा विप्रः क्षत्रियोऽगुरुगन्धकः॥ ८॥
घृतगन्धः सदा वैश्यो मीनामोदी च शूद्रकः[४]।
विप्राह्वा वाजिनः सर्वे क्षत्रियो[५] भूपतेः सदा॥ ९॥
द्वौ वैश्यस्याथ शूद्रस्य शूद्र[६] एव सुखावहः।
केचिदिच्छन्ति भूपानां सर्वेऽश्वा वाहनोचिताः॥ १०॥
तदर्थं भूतले यस्माच्छालिहोत्रेण निर्मिताः।
ब्राह्मणाः क्षेमकृत्येषु सिद्धिं गच्छन्ति वाजिनः॥ ११॥
क्षत्रिया युद्धकार्येषु वैश्या वित्तार्ज्जने[७] सदा।
शूद्राश्चान्येषु कृत्येषु ज्ञात्वैवं वाजिनः सदा॥ १२॥
आरोहेत्सर्वकार्येषु यदीच्छेच्छाश्वतीं श्रियम्।
सदा शुभा भवन्त्येते वाजिनो यस्य भूतले॥ १३॥
सदैव निद्रावशगा निद्राच्छेदस्य सम्भवः।

---

१। प्रभञ्जनोद्भवा। खः।
२। कारकः। कः।
३। पुष्पगन्धसमः। खः।
४। चतुर्थकः। खः।
५। त्रयो भूमिपतेः। खः।
६। एकः। खः।
७। वृत्त्यर्ज्जने। खः।

ततःप्रभृति लोकेऽस्मिन् वाह्या जातास्तुरङ्गमाः ।
ततश्चिकित्सितं तेषां शालिहोत्रप्रभाषितम् ॥ २१ ॥

इति श्रीनकुलकृतेऽश्वचिकित्सिते प्रश्नोनाम प्रथमोऽध्यायः ।

---

## अथ द्वितीयोऽध्यायः ।

जाति ।

उत्तमा मध्यमा नीचाः कनीयांसस्तथापरे ।
चतुर्धा वाजिनो भूमौ जायन्ते देशसंश्रयात् ॥ १ ॥
ताजिकाः खुरशाणाश्च उत्तरा[१]श्चोत्तमा हयाः ।
गोजिकाणाश्च केकाणाः प्रौढ़ाहाराश्च[२] मध्यमाः ॥ २ ॥
भाण्डजाश्चोत्तमांसाश्च राजशूलाश्च मध्यमाः ।
गोह्वराः शावराश्चैव[३] सिन्धुपाराः कनीयसः ॥ ३ ॥
अन्यदेशोद्भवा ये च नीचनीचाश्च ते स्मृताः ।
वाजिनो जलजाः केचिद्वह्निजातास्तथापरे ॥ ४ ॥
समीरप्रभवाश्चान्ये उलूकमृगजास्तथा ।
जलोद्भवा द्विजातीयाः[४] क्षत्रिया वह्निसम्भवाः ॥ ५ ॥

---

१ । तुषाराः । खः ।
२ । पोषहाराः । खः ।
३ । सवरांसाश्च । कः ।
४ । द्विजा ज्ञेयाः । खः ।

अथासौ कृपयाविष्टस्तानुवाच सुदुःखितान्।
इन्द्रादेशात्कृतं[1] सर्वं भवतां पक्षपातनम्॥१३॥
तस्माद्वः प्रकरिष्यामि[2] भविष्यति यथा सुखम्।
पुष्टीरम्या[3] यथा देहे गौरवं च जगत्त्रये॥१४॥
यूयं शक्रादिदेवानां वाहनत्वं करिष्यथ[4]।
तथा भूमिपतीनाञ्च गौरवेण समन्विताः॥१५॥
| पटल ... ... ... | २०६ |
| पल ... ... ... | १०४ |
| पारसीक (अश्व) ... ... | ७१ |
| पार्थिवी (छाया) ... ... | ५६ |
| पिशाचसत्व ... ... | ५७ |
| पुटस्वेद ... ... ... | १७० |
| पुष्ड्रक ... ... ... | ३३ |
| पुलका (धारा) ... ... | ८२ |
| पुष्प ... ... ... | ३४ |
| पुष्पदण्डी (वल्गा) ... ... | ८३ |
| पुष्पधारी ... ... ... | ८३ |
| पूर्णकण्ठी (धारा) ... ... | ८२ |

# पारिभाषिकशब्दानां अकारादिक्रमेण सूचीपत्रम्।


अ

पृ

अकुल ... ... ... ७३
अण्डस्कन्द ... ... ... २८१
अधिदन्त ... ... ... ५०
अनवासन ... ... ... १६३
अर्द्दित ... ... ... ३०१
अष्टमङ्गल ... ... ... ४२

आ

आक्षेपक ... ... ... ३०१
आग्नेयी ... ... ... ५६
आढ़क ... ... ... १०४
आनूप ... ... ... ११०
आवर्त्त ... ... ... २२
आस्थापन ... ... ... १३२

इ

इन्द्रवृद्ध ... ... ... ५२

उ

उकनाह ... ... ... ४१
उत्कर्ण ... ... ... १९७
उत्पलपत्र ... ... ... १५५
उराह ... ... ... ४१

ऊ

ऊर्द्धग्रह ... ... ... ३०८
ऊर्द्धवर्त्ति ... ... ... २६२

ए

एकहस्ती (वल्गा) ... ... ८६
एकाङ्ग ... ... ... २००
एकाण्ड ... ... ... ५१

औ

पृ.

औनीत ... ... ... २८९

क

कञ्चकी ... ... ... ५१
कटपञ्चक ... ... ... ८८
कपोतनिपादी ... ... ३०१
कयाह ... ... ... ३९
करञ्जाद्यघृत ... ... १७७
कराली ... ... ... ४९
कर्ष ... ... ... १०४
काकुदी ... ... ... ४९
काच ... ... ... २०३
काचा ,, ... ... ६६
कालिका (रेखा) ... ... ६६
कामिग्रह ... ... ... ३०७
कीटारिष्ट ... ... ... १८८
कुड़व ... ... ... १०४
कुलराह ... ... ... ४२
कुलाह ... ... ... ४०
कृमिकोष्ठ ... ... ... २६८
केक्काण ... ... ... ७२
कोकाह ... ... ... ३९
कोकुराह ... ... ... ४२
कोङ्काण ... ... ... ७१
कौवेरग्रह ... ... ... ३०७

क्ष

क्षत्रियाश्व ... ... ... ७५
क्षौरव्यापत्... ... ... २१८

समा षष्टिदीर्घा मनुजकरिणां पञ्च च निशाः
हयानां द्वात्रिंशत् खरकरभयोः पञ्चकशतिः ।
पञ्चाब्दाख्यं वृषमहिषयोर्द्वादशाब्दं शुनः स्यात्
छागादीनां दशकसहिता ह्यायुषोऽयं प्रकारः ॥ ११० ॥

केस्यापि ।

व्योषाजातिविड़ङ्गहिङ्गुकुटजत्वक्केतकीसैन्धवम्
श्यामासर्षपदीप्यकाद्दशगुणं मांसं रसोनात्समम् ।
सन्धायाम्लरसैर्लभेत सततं यो विद्युदाख्यामिमां
सप्तिः सप्तगुणाब्दिको द्विदशनः स स्यादपास्यामयान् ॥ १११ ॥

इति विजुली नकुलस्य ।

दूर्व्वाहृतं यवा नीरं शिशिरं सर्व्वदा शुभम् ।
हरीतकी हिता नित्यं लवणानि दिनान्तरे ॥ ११२ ॥

अथाश्वानां परीक्षा ।

असितखुरचतुष्कः श्यामलग्रन्थिपादः
स्रवति करसमीपे मूत्रधारां सवेगम् ।
दशनचलखलीनः कुक्कुटस्कन्धबन्धः
किटिरिव कठिनोरूद्दूरगः स्यात्तुरङ्गः ॥ ११३ ॥
विकसदसितनेत्रः स्निग्धगम्भीरहेषः
त्वरितचतुरगामी वायुवेगः सु(स)त्वः ।
सवलविपुलकायो भर्तुरादेशवर्त्ती
समरविजयसम्पत्कारकः स्यात्तुरङ्गः ॥ ११४ ॥ शार्ङ्गधरस्यैते ।

(*) दन्तोद्भेदं प्रवक्ष्यामि वाजिनां मुख्यलक्षणम्।
येन विज्ञातमात्रेण वयोज्ञानं प्रतीयते ॥९९॥
षड्भिर्दन्तैः सिताभैर्भवति हयशिशुस्तैः काषायैर्द्विरब्दः
सन्दंशैर्मध्यमान्त्यैः पतितसमुदितैस्त्रिचतुःपञ्चवर्षाः।
सन्दंशानुक्रमेण त्रिकसमगुणिताः कालिकाः पीतशुक्लाः
काचं माक्षीकशंखा बकचलनमतश्चावपातं च विद्धि॥१००॥
लघुत्वं मातृदोषेण पितृदोषेण मन्दता।
दौर्ब्बल्यं स्वामिदोषेण स्वदोषो नास्ति वाजिनाम्॥१०१॥
महाघोणा महाकाया महोरस्का महास्वनाः।
स्निग्धाङ्गाः सर्व्वदा ये च तेषामायुर्भवेद्दृढ ॥१०२॥
कर्णाग्रे पीड़िते येषां सिन्दूराभस्य दर्शनम्।
शोणिताक्ता भवेज्जिह्वा ते वाहाश्चिरजीविनः॥१०३॥
स्निग्धा दीर्घाश्च बध्याश्च प्रोतस्था यस्य वाजिनः।
भवन्ति विपुला रेखास्तं विन्द्याच्चिरजीविनम्॥१०४॥
नभो जिघ्रन्ति ये वाहा भास्करार्पितदृष्टयः।
पृथुकुक्षिकटीकक्षाः सुनिद्राश्चिरजीविनः॥१०५॥
न विक्किरन्ति ये ग्रासं सुभक्षा ह्रस्वमेहनाः।
महाशिरोललाटाश्च वाजिनश्चिरजीविनः॥१०६॥
अर्द्धप्रोथस्थिता रेखा दृश्यन्ते यस्य वाजिनः।
तस्य मृत्युः समुद्दिष्टो दशमं प्राप्य वासरम्॥१०७॥
अङ्गुलानां दशार्द्धेन वर्षाणां तस्य जीवितम्।
जीवेत्त्रयोदशाब्दानि यस्य स्याच्चतुरङ्गुला॥१०८॥
विनतः पूर्व्वकायेन स्थूलजानुश्च यो हयः।
सूनाक्षिकूटस्तब्धाक्षः स्वल्पायुः स प्रकीर्त्तितः॥१०९॥

जयदेवस्यैते।

दुभययोरन्तरे कृते (४३००) वर्षा भवन्ति। सुतरामयमेव युधिष्ठिरादेरुत्पत्ति कालो भवितुमर्हति। अतस्तदूर्द्धतनः कालः शालिहोत्रस्याविर्भाव-मनुमापयति।

अपि च ग्रन्थेऽस्मिन् चतुर्थाऽध्याये शार्ङ्गधरधृतो जयदेवस्य वचनोल्लेखोऽपि दृश्यते। जयदेवौ तावद्द्वावास्तां एको गीतगोविन्दकारः, अन्यश्चिन्तामणेरालोक-कारः प्रसन्नराघवकारश्च। यदि गीतगोविन्दकारो(२) अश्वशास्त्रकृत् भवति तदा केषाञ्चिन्मते तस्याविर्भावकालो लक्ष्मणसेनस्य राजत्वसमये सम्भवति। तेन जयदेवस्य वर्त्तमानता चतुर्द्दशशताब्द्यामेव सम्भवति। केचित्तु त्रयोदशशताब्दीमाहुः। एतेन च जयदेवस्यानुमानिकसमय-निर्द्धारणेन तदधस्तनकालजीवित्वं जयदत्तस्य सम्भवति।

परन्तु यदि प्रसन्नराघवनाटकप्रणेता चिन्तामणेरालोककारः पक्ष-धरमिश्र इति प्रसिद्धो जयदेवो भवेत्, तदास्य जयदेवादप्यधस्तनसमय-जीवित्वसम्भवः। यद्यस्यैव जयदेवस्य वाजिशास्त्रकर्तृत्वं सम्भवति। तदास्य समयः पञ्चदशशताब्दीं प्राप्नोति। एतदधस्तनो जयदत्त इत्येवमनुमानं भवतीत्यलमधिकप्रलपितेन।

एतन्मुद्राङ्कनेच्छासमकालानन्तरमेव कलिकातागवर्णमेण्टसंस्कृतविद्या-लयाध्यक्षेण श्रीयुक्तमहेशचन्द्रन्यायरत्नमहोदयेनाभिहितां मम योग्यता-माकर्ण्य डाक्तारोपाधिकेन श्रीयुक्तराजेन्द्रलालमित्रमहामहोपाध्यायेनानु-कम्पयाशिआटिकसोसाइटीव्ययेन मयि अस्य मुद्राङ्कनभारः समर्पितः। अस्य च मुद्राङ्कने उल्लिखितडाक्तारमहोदयेन मम प्रभूतं साहाय्यं कृत-मिति चिरबाधितोऽस्मीत्यलम्।

---

(१) शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले।
कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः॥
इति राजतरङ्गिनी।

(२) गोवर्द्धनश्च शरणो जयदेव उमापतिः।
कविराजश्च रत्नानि समितौ लक्ष्मणस्य च॥

स्थानविशेषेषु कृता, तत्प्रमाणार्थं नकुलकृताश्ववैद्यकशुक्रनीत्यभिधानचिन्तामणिहारावलीप्रभृतिकमवलम्बितम्। घृततैलौषधपानादिनिर्णयश्च परिमाणपरिभाषानकुलाद्यनुसारेणैव प्रयोजनमनुरुध्य यथाशक्ति कृतः। यानि च जयदेवशार्ङ्गधरवचनानि (*) सङ्कलनार्थं मदाश्रिते क-नामकपुस्तके वर्त्तन्ते ख-ग-पुस्तकयोस्तददर्शनात् वस्तुतस्तेषां जयदत्तकृतत्वे सन्दिहानेन मया मूले न धृतानि, परन्तु स्वतन्त्रमस्यान्तिमे पृष्ठे प्रदत्तानि।

जयदत्तो हि विजयदत्ततनयः सामन्तनरपतिरासीत्। सम्प्रदायेन च शैवोऽसौ कस्मिन् जनपदे कुत्र वा नगरे जातस्तस्य न किमपि प्रमाणं लभ्यते। अतस्तन्निर्णयप्रयासः सुदूरपराहत इति विरतोऽस्मि।

असौ कदा प्रादुरासीत् तन्निर्णयोऽप्यतीव दुरूहः यतस्तत्समयप्रमापकं न किमपि विशिष्टं वचनं प्राप्यते। केवलमेवास्य शास्त्रस्य कतिपयाभ्यन्तरप्रमाणैस्तस्यानुमानिकसमयनिर्द्धारणे यथाशक्ति प्रयत्नः क्रियते। शास्त्रमिदं शालिहोत्रादिप्रणीताश्ववैद्यकशास्त्रादर्शेन संगृहीतमिति शालिहोत्रादीनामधस्तनेषु यः सर्व्वाधस्तनो भविष्यति तदधस्तनो जयदत्तो भविष्यतीति उत्तरोत्तरमधस्तादनुसन्धीयते।

शालिहोत्रवचनं हि नकुलेन स्वप्रणीताश्वचिकित्सायां समुद्धृतमिति तदूर्द्धतनस्तत्कालवर्त्ती वा शालिहोत्र इत्येवं प्रतीतिर्भवति। यतो नकुलो नाम यमजो युधिष्ठिरसहोदरो (१) गवाश्वचिकित्साशास्त्रप्रणेता इति चिरन्तनलोकप्रसिद्धिमनुसृत्य नकुलं युधिष्ठिरसहोदरं परिगणय्य युधिष्ठिरराजत्वकालात् पूर्व्वं तत्समकालं वा शालिहोत्रस्य प्रादुर्भावसम्भवः। युधिष्ठिरस्तावत् कलेः (६५३) अतीताब्दे जात इति राजतरङ्गिणी(२)वचनप्रामाण्यादुपलभ्यते। सम्प्रति तु कलेरतीताब्दाः (४९५३)। एत-

(१) युधिष्ठिरसहोदरनकुलस्य अश्ववैद्यकप्रणेतृत्वे परमपुरातनानुसन्धित्सूनां मतम्।

जयति च पाण्डवनाथो धर्म्मसनाथो युधिष्ठिरो नृपतिः।
भीमार्ज्जुनसहदेवास्तदनुचरो वाजितत्त्वज्ञः॥ २॥
दृष्ट्वा सम्यङ्नकुलः शास्त्रं कृत्स्नं च शालिहोत्रीयम्।
ब्रूते शास्त्रार्थमतं शास्त्रं कृत्वा समासेन॥ ३॥

दृश्यन्ते। अष्टशताधिकसहस्रश्लोकात्मकञ्चेदं शास्त्रमष्टषष्ट्यध्यायैर्विभक्तम्। परन्तु ग्रन्थेऽस्मिन् प्रथमाध्याये जयदत्तप्रतिज्ञातायामध्यायसङ्ख्यायां बहुविध-समन्वयेन लब्धायामपि तत्प्रतिज्ञाता श्लोकसङ्ख्या न प्राप्ता। अस्मिन् ग्रन्थे मुद्रणार्थं मदन्तिकस्थपुस्तकत्रयात् साकल्येन किञ्चिन्न्यूनाधिकषोड़शशत-श्लोकाः परिगणनया लब्धाः। अत्र कारणं लिपिकरप्रमादादिकं प्रतिभाति। अस्यच ग्रन्थस्य वर्णनीयविषयाः स्थूलतोऽष्टषष्टिधा अष्टषष्ट्यध्यायेषु विनि-र्णीताः। तेच तावद्विषयाः प्रदेशाङ्ग-लक्षण-जीवित-वयो-दशाक्षेत्र-जन्मदेश-विज्ञान-वाहन-बन्ध्याप्रसूताश्वस्यूपचार-द्रव्यमात्रा-निघण्टु-सर्व्वर्तूपचारक्षा-राग्निशस्त्रकर्म्म-शिरावेध-निरूहानुवासनकर्म्म-नस्य-स्वेद-स्नेहपान-घृततैल विधान-श्रमोपचारा-रिष्टत्रय-म्टगरोग-वातादिकोप-व्याधिनिर्द्देश-मुखा-क्षिशिरो-लङ्घित-कर्ण-कास-हिक्का-श्वास-व्रण-सिंघान-घृणि-पाद-ज्वरा-ती-सारा-जीर्ण-शूल-प्रस्कन्नो-दावर्त्त-कृमिकोष्ठ-श्लेष्मकोष्ठ-मूत्रग्रह-कुष्ठ-शोथ-मुष्कौनीतो-दरा-र्शो-त्कर्ण-वातव्याध्यु-न्माद-ग्रहग्रह-शोष-वातवलासक-लव-णादि-व्यापद्विषापस्मार-षट्पदीभक्षादिरोगनिर्णयचिकित्साः तथा साध्या-साध्य निर्णय-प्रकृतिज्ञान-रसोन-गुगुलु-रसायनकल्पाश्चेति।

ग्रन्थस्यास्य संस्कारो मया क-ख-ग-नामकपुस्तकत्रयादर्शदर्शनेन कृतः। तेषु कख-पुस्तके कलिकातासंस्कृतविद्यालयस्य, तयोः क-नामकमसम्पूर्णं मपरञ्च सम्पूर्णम्। ग-पुस्तकं महामहोपाध्यायेन डाक्तारोपाधिकेन श्रीरा-जेन्द्रलालमित्रेणानुगृह्य मम मुद्राङ्कणसाहाय्यार्थं सम्पूर्णमेव प्रदत्तम्। ख-ग-पुस्तकद्वयं सम्पूर्णाविशुद्धमपि तत्साहाय्येन सङ्कलनकार्य्यमवाधेनैव सुसम्पन्न-मासीत्। एतेषु पुस्तकेषु पाठवैषम्यं भूरिप्रदेशेषु दृश्यते क्वचिदध्यायानु-क्रमवैषम्यञ्च दृश्यते।

तानि च पाठवैषम्याणि प्रतिपृष्ठाधस्तादुद्धृतानि। यत्तु अध्यायानुक्रमवैषम्यं दृष्टं तत्समाधानं मया व्याधिनिर्द्देशाध्यायपर्य्यायानुसारेण कृतम्। ग-पुस्तके यदौनीताध्यायो नास्ति तत्र लेखकस्यानवधानतामेव कारणं प्रतीमः। यत्तु क्वचित् श्लोकपादच्युतिरस्ति तत् तथैव रक्षितम्, यातु मया संक्षिप्तटिप्पनी

अस्ति किल गान्धारजनपदासन्नवर्त्ति शालातुरं नाम नगरम्। तत्र शालिहोत्रनामा प्राचीनाश्ववैद्यः प्रादुरासीत्। तेनासौ शालातुर इति प्रदेशविशेषेषूच्यते इति केषाञ्चिद्विदुषां मतम्। अयमेव शालातुरीयः पाणिनिरिति केचित्। अन्ये तं धन्वन्तरिमाहुः। परन्त्वकारणमेवं विधानुमानमिति श्रीडाक्ताररराजेन्द्रलालः॥ *

केचित्तु तदसङ्गतं मन्यमाना एवमाहुः-यथा शालिहोत्रः श्रावस्तिनगरवासिनोऽश्वघोषाभिधानस्य(१) कस्यचिद्विप्रस्य तनय आसीत्। तथा तस्य महर्षेराश्रमश्च विदेहभूमिसमासन्नवर्त्तिचम्पकारण्याभिधाने कानने हिमवत्पाददेश आसीदिति। अत्र प्रमाणं शालिहोत्रोन्नयकारवचनं(२) समीचीनं प्रतिभाति।

मत्संस्कृतमिदमश्ववैद्यकं विजयदत्ततनयेन सामन्तोपाधिकेन श्रीमज्जयदत्तसूरिणा शालिहोत्राद्यश्ववैद्यकेभ्यः(३) समाकलय्य विरचितमासीत्। यस्य रचनाक्रमः शालिहोत्रानुसारीति विज्ञेयम्। परं क्वचित् क्वचित् क्रमभङ्गोऽपि पर्य्यालोचनया दृश्यते। अस्य च रोगादिलक्षणानि क्वचिदविकलशालिहोत्राद्युद्धृतानि क्वचिच्च नानासंग्रहसारसङ्कलनेन स्वरचितानि

---

* Dr. Mitter's Proceeding Asiatic Society Bengal 1885, July.

(१) येन ज्ञानवता हिमालयतरुच्छायासु विक्रीड़ितं
यः स्नातो हिमपुण्यवातशिशिरे गङ्गाजले पावने।
रेमे यस्तु तुरङ्गयूथजनितैर्नानाविधैर्हेषितैः
पायाद्वः स तुरङ्गघोषतनयः श्रीशालिहोत्रो मुनिः॥ नकुलः॥

(२) जाह्नव्या उत्तरे तीरे प्रालेयाद्रेस्तटान्तरे।
स्वाश्रमे चम्पकारण्ये वेदिकायां कुशासने॥
शालिहोत्रं सुखासीनं ऋषिभिः परिवेष्टितम्।
ब्रह्मसूर्य्याग्नितेजस्कं हयशास्त्रविशारदम्॥

इत्यादि Burnell's Catalogue of S. MSS. Part I.

(३) श्रीशालिहोत्रादिमुनिप्रणीतं, दृष्ट्वाश्वशास्त्रं बहुविस्तरञ्च।
स्वल्पप्रबोधं सफलं यथार्थं, कृतञ्च तद्वै जयदत्तकेन॥ इति जयदत्तं।

अथ तस्या एव मूलसंहितायाः शालिहोत्राभिधायाः समाकलय्य नकुलादीनामश्वचिकित्सासंग्रहा बहव एवासन् इति सम्भावना। ते च नामतो नकुलकृताश्वचिकित्सा शालिहोत्रोन्नयः सारसंग्रहः सारसिन्धुर्वा गणसङ्कलितः, भोजराजीयो भोजदेवसंगृहीतः, हयलीलावतीनामकसंग्रहो, जयदेवीयः, शार्ङ्गधरीयो जयदत्तीयश्चेति वाजिचिकित्सासंग्रहा दृश्यन्ते श्रूयन्ते च। परं शालिहोत्रं नामाश्ववैद्यकं नैतावन्तं कालमस्माभिदृष्टम्। केवलमेवाग्नेये पुराणे तस्यैव कतिपये अध्यायाः समुद्धृता दृश्यन्ते। दृश्यते च नकुलकृतचिकित्सासंग्रहोऽष्टदशाध्यायात्मकः। संस्कर्त्तव्यमेनच्चाश्वचिकित्सासंग्रहं जयदत्तीयमपहायावशिष्टा अश्ववैद्यकसंग्रहा नास्माभिर्दृष्टाः। केवलं तदुद्धृतवचनानि ग्रन्थान्तरेषु क्वचित् क्वचित् परिदृश्यन्ते। शालिहोत्रोन्नयनामा संग्रहो वर्णेलप्रणीतसंस्कृतपुस्तकसूच्यां दृश्यतेऽस्माभिः। तथैव भोजराजीया वाजिचिकित्सा गुर्जरदेशीयसंस्कृतपुस्तकानां सूचीपुस्तके दृष्टा। हयलीलावतीवचनानि च मल्लिनाथसूरिणोद्धृतानि दृश्यन्ते। तथा जयदेवीयवचनान्यपि जयदत्तीयेऽस्मिन् ग्रन्थे शार्ङ्गधरीये च समुद्धृतानि लक्ष्यन्ते।

---

छिन्नपक्षास्तु ते सर्व्वे गत्वा तमृषिमब्रुवन्।
दीनाः सुदुःखसम्पन्ना रुधिरेण परिप्लुताः॥
+ + + + + + +
भगवन् किं निमित्तं नः पक्षच्छेदः कृतस्त्वया।
अपराधविहीनानां नेदृगिच्छन्ति पण्डिताः॥
तस्माद्गतिर्भव प्राज्ञ सर्व्वेषामिह वाजिनाम्।
तथा स्यात् सर्व्वदा सौख्यं पुष्टिश्च मुनिपुङ्गव॥
अथासौ कृपयाविष्टस्तानुवाच सुदुःखितान्।
इन्द्रादेशात् कृतं सर्व्वं भवतां पक्षपातनम्॥
तस्माद्वः प्रकरिष्यामि भविष्यति यथासुखम्।
पुष्टी रम्या यथा देहे गौरवं च जगत्त्रये॥
+ + + + + +
एवं विसृज्य तान् सर्व्वान् शालिहोत्रस्तुरङ्गमान्।
चक्रे द्वादशसाहस्रीं तदर्थे संहितां सुधीः॥ इति।

# विज्ञापनम् ।

पुराकाले नरजातिषु भूरिशो रोगोपसृष्टदेहेषु तेषां व्याधिशान्त्यर्थं तदुपायभूतमायुर्व्वेदचिकित्साशास्त्रं यदा जगदुपकारैकनिरतैर्महर्षिभिः समुद्भावितमासीत् तदैव गवाश्वादीनामपि पशूनां व्याध्युपसृष्टदेहानामुपकारार्थमश्वचिकित्साशास्त्रं समुद्भावितमासीत् । यथा हि लोकानुरोधात् तदनुग्रहार्थं स्वनाम्ना प्रसिद्धा मूलसंहिता चरकेण सुश्रुतादिभिश्च सौश्रुतादिसंहिता विरचिता आसन्, तथैव वाजिनामनुरोधाच्छालिहोत्रस्य महर्षेः स्वनाम्ना प्रसिद्धा शालिहोत्रमित्यायुर्वेदसंहिता(१) अश्वजातेरुपकारार्थं प्रादुरासीदिति । एवमेवाधुनातनविदुषां परामर्श एवात्र प्रमाणम् ।

अपिच एवं किल पुरातनी किंवदन्ती लोकेषु गीयते यथादौ भगवान् शालिहोत्रो महेन्द्रादेशात् सपक्षानश्वानपक्षान् विधाय पक्षाभावाद्दुःस्थितानां शरणमभिप्रपन्नानां तेषामेवानुरोधात् वाजिहितार्थमष्टादशसाहस्रीमश्ववैद्यकसंहितां प्रथमं प्रणीतवानिति । (२)एवमेवास्योत्पत्तौ नकुलभाषितं प्रमाणम् ।

---

(१) ततश्चिकित्सितं तेषां शालिहोत्रप्रभाषितमिति नकुलः ।

(२) सपक्षा वाजिनः सर्व्वे सञ्जाता व्योमचारिणः ।
गन्धर्व्वेभ्यो यथाकामं गच्छन्ति च समन्ततः ॥
तान् दृष्ट्वा यवसम्पन्नानसह्यान् वाहनोहितान् ।
शक्रः प्रोवाच पार्श्वस्थं शालिहोत्रं मुनीश्वरम् ॥
नास्त्यसाध्यं मुने किञ्चिद्भवतो भुवनत्रये ।
तस्मादाशु कुरुष्व त्वं वाहनार्हान् हयोत्तमान् ॥
ये च मे युद्धकालेषु प्रवहन्ति रथं सदा ।
अशक्यं वारणेन्द्रैश्च दानवैर्बलवत्तरैः ॥
तेषां पक्षं समुत्सृज्य पक्षच्छेदं व्यधात्तदा ।
वाजिनां शक्रवाक्येन शालिहोत्रो महामुनिः ॥

६१ विषरोगाध्याये—

पृ० श्लो०।

" विषलक्षणचिकित्सितम्... .. ३१८—१

६२ अपस्माररोगाध्याये—

" अपस्मारलक्षणचिकित्सितम् .. ३२१—१

६३ षट्पदीभक्षाध्याये—

" षट्पदीभक्षलक्षणचिकित्सितम् ... ३२१—१

६४ साध्यासाध्यविवेकाध्याये—

" रोगाणामसाध्यलक्षणानि ... ३२२—१

" साध्यलक्षणानि ... ... ३२४—१६

६५ प्रकृतिज्ञानाध्याये—

" वातादिप्रकृतिलक्षणानि... ... ३२५—१

६६ रसोनकल्पाध्याये—

" रसोनप्रयोगव्यवस्था ... ... ३२६—१

६७ गुग्गुलुकल्पाध्याये—

" गुग्गुलुप्रयोगविधिः ... ... ३३०—१

६८ रसायनकल्पाध्याये—

" रसायनप्रयोगविधिः ... ... ३३३—१

५३ अर्शोरोगाध्याये—

पृ० श्लो०।

" अर्शोलक्षणम् ... ... २९५—१
" तच्चिकित्सा ... ... .. २९५—३

५४ उत्कर्णरोगाध्याये—

" उत्कर्णलक्षणचिकित्सितम् ... २९७—१

५५ वातव्याध्यध्याये—

" मन्यास्तम्भादिलक्षणानि ... ३००—१
" एषां चिकित्साः ... ... ३०२—१३

५६ उन्मादाध्याये—

" उन्मादनिदानलक्षणम् .. ... ३०३—१
" तच्चिकित्सा ... ... .. ३०३—५

५७ ग्रहगृहीताध्याये—

" ग्रहनामलक्षणानि .. ... ३०५—१
" तेषां शान्त्यादिचिकित्सा .. ३१०—३३

५८ शोषरोगाध्याये—

" वातादिशोषलक्षणानि ... ... ३११—१
" एतच्चिकित्साः ... ... ... ३१३—९

५९ वातबलासकाध्याये—

" वातबलासकलक्षणचिकित्सितम् ... ३१५—१

६० व्यापदध्याये—

" व्यापल्लक्षणचिकित्सितम्... ... ३१७ १

४८ कुष्ठरोगाध्याये—

पृ० श्लो०।

” कुष्ठरोगलक्षणचिकित्सितम् .. २७५—१

४९ शोथरोगाध्याये—

” वातादिशोथलक्षणम ... ... २७७—१

” वातशोथसाधारणचिकित्सा ... २७७—६

” वातशोथचिकित्सा ... ... २७८—१०

” पित्तशोथचिकित्सा ... ... २७९—१४

” श्लेष्मशोथचिकित्सा ... .. २७९—१७

५० मुष्करोगाध्याये—

” वाताण्डलक्षणचिकित्सितम् ... २८१—१

” पित्ताण्डलक्षणचिकित्सितम् ... २८३—१२

” श्लेष्माण्डलक्षणचिकित्सितम् ... २८४—१७

” पीताण्डलक्षणचिकित्सितम् ... २८६—२३

” रक्ताण्डलक्षणचिकित्सितम् ... २८८—३५

५१ औनीतरोगाध्याये—

” औनीतरोगलक्षणम् ... .. २८९—१

” तच्चिकित्सा .. ... .. २८९—५

५२ उदररोगाध्याये—

” अष्टविधोदरनामलक्षणानि ... २९१—१

” वातोदरचिकित्सा ... ... २९२—१२

” पित्तोदरचिकित्सा .. ... २९३—१८

” श्लेष्मोदरचिकित्सा ... ... २९३—२०

४१ अजीर्णरोगाध्याये—

पृ० श्लो०।

" अजीर्णलक्षणम् ... .. २५६—१

" तच्चिकित्सा ... ... ... २५७—३

४२ अतीसाराध्याये—

" वाताद्यतीसारलक्षणचिकित्सितम्... २५८—१

" पित्तातिसारचिकित्सा ... ... २६०—१२

" श्लेष्मातिसारचिकित्सा ... ... २६०—१५

" आमसन्निपातद्वन्द्वजातिसारचिकित्साः २६१—१८

४३ शूलरोगाध्याये—

" पञ्चविधशूलनिदानलक्षणानि ... २६१—१

" सौभिन्नविबन्धचिकित्साः ... २६३—७

४४ उदावर्त्तरोगाध्याये—

" उदावर्त्तलक्षणचिकित्सितम् ... २६५—१

४५ प्रस्कन्नरोगाध्याये—

" प्रस्कन्नरोगलक्षणचिकित्सितम् ... २६६—१

४६ क्रमिकोष्ठाध्याये—

" क्रमिकोष्ठनिदानचिकित्सितम् ... २६८—१

" श्लेष्मकोष्ठनिदानचिकित्सिते ... २७०—१७

४७ मूत्रग्रहरोगाध्याये—

" वातादिमूत्रग्रहलक्षणानि ... २७१—१

" वातमूत्रग्रहचिकित्सा ... २७२—५

" पित्तमूत्रग्रहचिकित्सा ... ... २७२—९

" श्लेष्ममूत्रग्रहचिकित्सा ... ... २७३—१३

## ३६ व्रणरोगाध्याये—

पृ० श्लो० ।

„ व्रणनिदानलक्षणानि ... ... २३४—१
„ व्रणचिकित्सा ... ... ... २३५—८

## ३७ सिंघानरोगाध्याये—

„ वातादिसिंघानलक्षणानि ... २३८—१
„ तच्चिकित्सा ... ... ... २३८—४
„ पैत्तिकद्वन्द्वजसिंघानकचिकित्साः ... २४०—१४

## ३८ घृणिरोगाध्याये—

„ घृणिरोगलक्षणम् ... ... २४२—१
„ घृणिचिकित्सा ... ... २४२—२

## ३९ पादरोगाध्याये—

„ पादरोगसंख्या ... ... २४४—१
„ पादरोगलक्षणानि ... ... २४५—६
„ एषां चिकित्सा ... ... २४७—२३

## ४० ज्वररोगाध्याये—

„ वातज्वरनिदानलक्षणानि ... २५१—१
„ वातज्वरचिकित्सा ... ... २५१—४
„ पित्तज्वरलक्षणम् ... ... २५२—८
„ पित्तज्वरचिकित्सा ... ... २५२—९
„ श्लेष्मज्वरनिदानम् ... ... २५४—१८
„ तच्चिकित्सा .. .. ... २५४—२०
„ सन्निपातज्वरलक्षणचिकित्साः ... २५५—२४
„ अभिघातज्वरलक्षणचिकित्साः ... २५५—२५

## ३१ शिरोरोगचिकित्साध्याये—

पृ० श्लो०।

„ वातिकशिरोरोगलक्षणम् .. २११—१
„ तच्चिकित्सा .. .. .. २११—४
„ पैत्तिकशिरोरोगलक्षणम् .. २१२—७
„ तच्चिकित्सा .. .. .. २१२—७
„ श्लैष्मिकशिरोरोगचिकित्सा .. २१३—१३
„ सान्निपातिकशिरोरोगचिकित्सा .. २१४—१८
„ रक्ताभिघातशिरोरोगचिकित्सा .. २१५—२३

## ३२ लङ्घितरोगाध्याये—

„ लङ्घितलक्षणम् .. .. २१७—१
„ तच्चिकित्सा .. .. .. २१८—४

## ३३ कर्णरोगाध्याये—

„ कर्णरोगनिदानचिकित्सिते ... २२४—१

## ३४ कासरोगाध्याये—

„ कासरोगनिदानलक्षणानि ... २२५—१
„ वातकासचिकित्सा ... ... २२७—६
„ पित्तकासचिकित्सा ... ... २२९—१७
„ श्लेष्मकासचिकित्सा ... ... २३०—२४

## ३५ हिक्काश्वासाध्याये—

„ हिक्काश्वासनिदानलक्षणम् ... २३१—१
„ हिक्काश्वासचिकित्सा .. ... २३२—५

## २७ वातादिकोपाध्याये—

पृ॰ श्लो॰ ।

„ प्रकोपनिदानलक्षणे .. .. १९१—१
„ वातादिप्रकोपकालकथनम् .. १९१—४

## २८ व्याधिनिर्द्देशाध्याये—

„ मुखरोगादिलक्षणान्तरोगनिर्द्देशः .. १९२—१

## २९ मुखरोगाध्याये—

„ मुखरोगनिर्व्वाचनम् .. .. १९३—१
„ मुखरोगनिदानलक्षणे .. .. १९४—४
„ मुखरोगचिकित्सा .. .. १९६—१९

## ३० अक्षिरोगाध्याये—

„ अक्षिरोगनिर्व्वाचनम् .. .. १९८—१
„ वातिकाक्षिरोगनिदानलक्षणानि .. १९८—५
„ तच्चिकित्सा .. .. .. १९९—९
„ पैत्तिकाक्षिरोगलक्षणानि .. २०१—२१
„ तच्चिकित्सितम् .. .. २०१—२४
„ प्रचारलक्षणचिकित्सितम् .. २०२—३१
„ काचलक्षणचिकित्से .. .. २०३—३७
„ रक्तजाक्षिरोगलक्षणानि .. २०४—४४
„ तच्चिकित्सा .. .. .. २०५—४७
„ पटललक्षणम् .. .. २०६—५४
„ तच्चिकित्सा .. .. २०७—५८
„ मुञ्जजालचिकित्सा .. .. २०८—६७
„ वर्त्मकुन्दचिकित्सा .. .. २१०—८०

२१ घृतविधानाध्याये—

पृ० श्लो०

„ करञ्जाद्यं घृतम् .. .. १७७—२

„ द्वितीयं पञ्चतिक्तं घृतम् .. .. १७८—५

२२ श्रान्तोपचाराध्याये—

„ श्रान्तोपचारकथनम् .. .. १७९—१

२३ स्वस्थारिष्टाध्याये—

„ भोजनारिष्टकथनम् .. .. १८०—२

„ छायाद्यरिष्टकथनम् .. .. १८१—३

„ दर्शनेन्द्रियारिष्टकथनम् .. .. १८२—१०

„ श्रवणेन्द्रियारिष्टकथनम् .. .. १८२—११

„ रसनेन्द्रियारिष्टकथनम् .. .. १८३—१६

२४ वेधारिष्टाध्याये—

„ वेधारिष्टनिदानलक्षणम् .. १८५—४

„ वेधाख्योपसर्गलक्षणम् .. .. १८५—४

„ वेधारिष्ट चिकित्सा .. .. १८६—१४

२५ कीटारिष्टाध्याये—

„ कीटनिदानलक्षणे .. .. १८८—१

„ तच्चिकित्सा .. .. .. १८८—४

२६ मृगरोगाध्याये—

„ मृगरोगलक्षणम् .. .. १८९—१

„ तच्चिकित्सा .. .. .. १९०—४

## १७ नस्याध्याये—

पृ० श्लो०।

,, नस्यविधिः .. .. .. १६७—१
,, वातादिरोगेषु विविधनस्यकथनम् .. १६८—६

## १८ स्वेदविधानाध्याये—

,, पुटस्वेदकथनम् .. .. १७०—१
,, शङ्करस्वेदकथनम् .. .. १७०—२
,, तुषस्वेदकथनम् .. .. १७०—५
,, कफादौ स्वेदकथनम् .. .. १७०—६
,, यत्र स्वेदनिषेधस्तत्कथनम् .. १७१—८

## १९ स्नेहप्रयोगाध्याये—

,, घृतपानकालकथनम् .. .. १७१—१
,, तैलपानकथनम् .. .. १७१—२
,, घृतादिपाननियमकथनम् .. १७२—५
,, सम्यक्स्निग्धगुणकथनम् .. १७२—८
,, अतिस्निग्धलक्षणं तत्प्रतीकारश्च .. १७२—९
,, अतिस्निग्धस्य भोजनविधिः .. १७३—१२

## २० तैलविधानाध्याये—

,, मधुकादितैलम् .. .. १७४—१
,, त्रिवृत्सर्पिः .. .. .. १७४—३
,, प्रसारणीतैलम् .. .. १७५—५

## २१ घृतविधानाध्याये—

,, पञ्चतिक्तघृतम् .. .. १७७—१

## १३ ऋतुविभागाध्याये—


पृ० श्लो०।

,, सर्वर्त्तूपचारे ऋतुविभागविवरणम् १३३—१

,, शालानिर्म्माणविवरणम् .. १३३—४

,, वर्षापोषणविवरणम् .. .. १३५—१५

,, शरत्पोषणविवरणम् .. .. १३८—२६

,, हेमन्तपोषणविवरणम् .. .. १४३—५३

,, शिशिरपोषणविधिः .. .. १४५—६५

,, वसन्तपोषणविधिः .. .. १४८—७५

,, ग्रीष्मपोषणविधिः .. .. १४६—८२

,, सर्वर्त्तुपोषणविधिः .. .. १५०—८४


## १४ क्षाराग्निशस्त्रविधानाध्याये—


,, क्षारदाहविधानम् .. .. १५२—१

,, लौहदाहविधानम् .. .. १५३—७

,, मेदोदाहविधानम् .. .. १५४—१३

,, दाहलक्षणम् .. .. १५५—२०

,, शस्त्रविधानम् .. .. १५५—२१


## १५ शिरावेधाध्याये—


,, शिरावेधकालनिरूपणम् .. १५६—१

,, शोणितविवरणम् .. .. १५७—६

,, वेधस्थानकथनम् .. .. १५८—१२


## १६ निरूहानुवासनाध्याये—


,, नेत्रनिर्म्माणविवरणम् .. .. १६२—१

,, अनुवासनविवरणम् .. .. १६३—६

,, निरूहविवरणम् .. .. १६४—१४

७ वाहनविधानाध्याये—

| | | पृ० श्लो० । |
|---|---|---|
| ,, | आदिवाहने तिथिनक्षत्रादिकथनम् | ८४—३७ |
| ,, | धूपादिविवरणम् .. .. | ८६—५६ |
| ,, | सादिकार्य्यविवरणम् .. .. | ६०—६३ |

८ वन्ध्योपचाराध्याये—

| | | |
|---|---|---|
| ,, | वन्ध्याया गर्भधारणे उपचारविवरणम् .. .. .. | ६२—२ |

६ गर्भज्ञानाध्याये—

| | | |
|---|---|---|
| ,, | सगर्भालक्षणकथनम् .. .. | ६६—१ |
| ,, | गर्भप्रथमादिमासलक्षणकथनम् .. | ६७—८ |

१० सूतिकोपचाराध्याये—

| | | |
|---|---|---|
| ,, | प्रसूतायामुपचारकथनम् .. | ६८—१ |
| ,, | क्षीरशोधनम् .. .. | १००—१२ |
| ,, | किशोरोपचारप्रकरणम् .. | १०२—१८ |

११ द्रव्यमात्राज्ञानाध्याये—

| | | |
|---|---|---|
| ,, | मानपरिभाषाकथनम् .. .. | १०४—२ |
| ,, | शुष्कादिद्रव्यमात्रा .. .. | १०५—५ |
| ,, | भोजने यवादिमात्राकथनम् .. | १०५—६ |
| ,, | नस्यधूपकर्णपूरणादिमात्रा .. | १०६—२४ |
| ,, | आनूपादिपशुमांसगुणकथनम् .. | ११०—३१ |

१२ निघण्ट्वध्याये—

| | | |
|---|---|---|
| ,, | द्रव्याणां पर्य्यायकथनम् .. | ११३—१-७७ |

## ५ दशाक्षेत्राध्याये—


| | | | | पृ० श्लो० । |
|---|---|---|---|---|
| ,, | दशविधदशाकथनम् | .. | .. | ६९—१ |
| ,, | दशापरिमाणकथनम् | .. | .. | ६९—२ |
| ,, | दशाक्षेत्रकथनम् | .. | .. | ६९—३ |


## ६ जन्मदेशाध्याये—


| | | | | |
|---|---|---|---|---|
| ,, | उत्तमाश्वसंख्या | .. | .. | ७०—२ |
| ,, | मध्यमाश्वसंख्यादि | .. | .. | ७०—३ |
| ,, | अधमाश्वसंख्या | .. | .. | ७१—४ |
| ,, | उत्तमताजिकाश्वलक्षणम् | | ... | ७१—५ |
| ,, | उत्तमपारसीकाश्वलक्षणम् | | ... | ७१—८ |
| ,, | मध्यमकेकाणाश्वलक्षणम् | | ... | ७२—९ |
| ,, | मध्यमतुरुष्काश्वलक्षणम् | | ... | ७२—११ |
| ,, | मध्यमभाखजाश्वलक्षणम् | | ... | ७२—१२ |
| ,, | सैन्धवाद्यश्वलक्षणम् | ... | ... | ७२—१३ |


## ७ वाहनविधानाध्याये—


| | | | | |
|---|---|---|---|---|
| ,, | विप्रादितद्वाहनविवरणम् | | .. | ७४—१ |
| ,, | विप्रादिजातिलक्षणम् | .. | .. | ७५—४ |
| ,, | विप्रादिवशीकरणम् | .. | .. | ७६—६ |
| ,, | सत्वशक्तितद्वाहनविवरणम् | | .. | ७६—८ |
| ,, | रङ्गभूमिविवरणम् | .. | .. | ७७—११ |
| ,, | दोषगुणताड़नविवरणम् | .. | .. | ७८—१३ |
| ,, | धारागतिविवरणम् | .. | .. | ८१—२४ |
| ,, | वल्गादिविवरणम् | .. | .. | ८३—३० |

## ३ सर्व्वलक्षणाध्याये—


| | | पृ० श्लो० । |
|---|---|---|
| ,, | जाताण्डलक्षणम् ... ... | ५१—१४६ |
| ,, | कञ्चुकिलक्षणम् ... ... | ५१—१४७ |
| ,, | मार्जारपादलक्षणम् ... ... | ५१—१४८ |
| ,, | त्रिसरिलक्षणम् ... ... | ५१—१४९ |
| ,, | द्विखुरिलक्षणम् ... ... | ५१—१५० |
| ,, | सञ्जातवृषणलक्षणम् ... ... | ५२—१५१ |
| ,, | स्तनिलक्षणम्... ... ... | ५२—१५१ |
| ,, | त्रिकर्णिलक्षणम् ... ... | ५२—१५२ |
| ,, | व्याघ्रवर्णलक्षणम् ... ... | ५२—१५२ |
| ,, | वामनयमजलक्षणम् ... ... | ५२—१५३ |
| ,, | मुषलिलक्षणम् ... ... | ५२—१५४ |
| ,, | इन्द्रवृद्धलक्षणम् ... ... | ५२—१५५ |
| ,, | एतद्दोषयुक्तघोटकरक्षणात् रावणाद्य- | |
| | शुभकथनम् ... ... ... | ५३—१५८ |
| ,, | उत्पातकथनम् .. .. | ५४—१६० |
| ,, | छायाकथनम् .. .. | ५५—१७१ |
| ,, | सत्वकथनम् .. .. | ५७—१८० |
| ,, | प्रमाणकथनम् .. .. | ५८—१८२ |


## ४ आयुर्वयोज्ञानाध्याये—


| | | |
|---|---|---|
| ,, | दीर्घायुर्लक्षणकथनम् .. .. | ६२—१ |
| ,, | स्वल्पायुर्लक्षणकथनम् .. .. | ६३—१२ |
| ,, | दन्तैर्वयोज्ञानकथनम् .. .. | ६५—१८ |
| ,, | कालिकादिरेखया वयोज्ञानम् .. | ६५—२० |
| ,, | पतितापतितोत्थदन्तलक्षणम् .. | ६७—२९ |

## ३ सर्व्वलक्षणाध्याये—

पृ० श्लो० ।

,, कयाहलक्षणम् ... ... ३९—१०१

,, सेराहलक्षणम् ... .. ३९—१०१

,, सुरूहकलक्षणम् ... ... ३९—१०१

,, नीलकलक्षणम् ... ... ३९—१०२

,, त्रियूहलक्षणम् ... ... ३९—१०२

,, खिलाहलक्षणम् ... ... ४०—१०२

,, हलाहखङ्गाहकुलाहलक्षणम् ... ४०—१०३

,, उराहलक्षणम् ... ... ४१—१०४

,, वेरुराहलक्षणम् ... ... ४१—१०५

,, उकनाहलक्षणम् ... ... ४१—१०६

,, पुण्ड्रकविशेषेण कोकाहादीनां संज्ञान्तर-
कथनम् ... ... ... ४२—१०७-११०

,, वाजिदेहगतवर्णानां शुभाशुभलक्षण-
कथनम् ... ... ...४३—१११-१२४

,, अष्टमङ्गललक्षणम् ... ... ४३—११३

,, मल्लिकाक्ष ... ... ... ४४—११५

,, पञ्चभद्रलक्षणम् ... ...४५—१२०-१२१

,, स्वरकथनम् ... ... ४६—१२५

,, महादोषकथने ... ... ४८—

,, काकुदीलक्षणम् ... ... ४९—१४०

,, करालीलक्षणम् ... ... ४९—१४१

,, हीनदन्तलक्षणम् ... ... ५०—१४१

,, अधिकदन्तलक्षणम् ... ...५०—१४२-१४५

,, एकाण्डलक्षणम् ... ... ५१—१४६

# अथाश्ववैद्यकस्य सूचीपत्रम्।


## १ उद्देशाध्याये—

पृ० श्लो०।

| | | |
|---|---|---|
| ,, | मङ्गलाचरणम् ... ... | १—१ |
| ,, | ग्रन्थकारप्रतिज्ञा ... ... | १—२ |
| ,, | ग्रन्थकारपरिचयः ... ... | २—४ |
| ,, | अध्यायसंख्यानिर्देशः ... ... | २—५ |
| ,, | श्लोकसंख्यानिर्देशः ... ... | २—५ |
| ,, | ग्रन्थप्रतिपाद्यकथनम् ... ... | ३—६ |

## २ प्रदेशाध्याये—

| | | |
|---|---|---|
| ,, | जिह्वादिसर्व्वप्रदेशकथनम् ... | ६—२ |

## ३ सर्वलक्षणाध्याये—

| | | |
|---|---|---|
| ,, | यत्र प्रदेशे यल्लक्षणं शुभं तत्कथनम् | १७—२ |
| ,, | अङ्गशुभलक्षणानि ... ... | १८—६ |
| ,, | शुभावर्त्तकथनम् ... ... | २२—२६ |
| ,, | अशुभावर्त्तकथनम् ... ... | २५—३६ |
| ,, | शुभपुण्ड्रककथनम् ... ... | ३२—७३ |
| ,, | अशुभपुण्ड्रककथनम् ... ... | ३३—७८ |
| ,, | स्थानविशेषेषु शुभाशुभपुष्पकथनम् | ३४—८२ |
| ,, | गतिकथनम् ... ... | ३६—६३ |
| ,, | वर्णकथने ... ... | ३८—६८ |
| ,, | कोकाद्यादिलक्षणम् ... ... | ३६—१०० |

श्रीशालिहोत्रादिमुनिप्रणीतं
　　हृष्टाश्वशास्त्रं बहुविस्तरञ्च।
स्वल्पप्रबोधं सफलं यथार्थं
　　कृतञ्च तद्वै जयदत्तकेन॥ १०॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे रसायनकल्पे अष्टषष्टितमोऽध्यायः।

इति श्रीमहासामन्तजयदत्तकृताश्ववैद्यकशास्त्रं समाप्तम्॥ शुभमस्तु॥

गुडूची[१]कल्कयोगेन शतावर्य्यश्वगन्धयोः ।
मूलकल्कः प्रदातव्यः कुक्कुट्याश्च[२] विशेषतः ॥ ३ ॥
पलानि पञ्च वाहस्य उत्तमस्य प्रदापयेत् ।
मध्यमं[३] पलचत्वारि अधमस्य पलत्रयम् ॥ ४ ॥
औषधी[४] न च दातव्या एषां श्लेष्मान्विते हये ।
वातिके पैत्तिके वापि विहिता शास्त्रवेदिभिः[५] ॥ ५ ॥
हरीतक्यामलाकल्कः प्रावृट्काले विधौ[६] स्मृतः ।
तेनात्र नो विनिर्द्दिष्टः पुनरुक्ताभिशङ्कया ॥ ६ ॥
एवं विरिक्तं शुद्धाङ्गं कृत्वा यत्नेन वाजिनम् ।
दद्यात् गोमूत्रसंयुक्तां सतैलाञ्च हरीतकीम् ।
नित्यं त्रिसप्तकं यावत् पलपञ्चप्रमाणतः ॥ ७ ॥
सौवर्च्चलं तथा हिङ्गु पुष्करं विड़दाड़िमम् ।
ग्रन्थिकं मेथिकाश्चैषां भिषक् पिण्डञ्च कारयेत् ॥ ८ ॥
रक्तपित्तं ज्वरं हन्ति कासं श्वासं तथा घृणिम् ।
विद्रधिं क्षयरोगञ्च नाशयेद्वाजिनां ध्रुवम् ॥ ९ ॥

---

३ । कुक्कुटी शाल्मलीवृक्षः । सुकर्णी इन्द्रवारुणी ।

---

१ । गुडूचीकल्कजं नस्यं कुर्य्यादश्वगन्धायाः । खः ।
२ । सुकर्ण्या । गः ।
३ । मध्यमस्याथ चत्वारि जघन्यस्य । गः ।
४ । औषधञ्च प्रदातव्य एषां श्लेष्मा निपातयेत् । खः ।
५ । हिता शास्त्रार्थशालिभिः । खः ।
६ । विशेषतः । खः ।

व्रणे[1] कुष्ठेषु खञ्जेषु त्रिफलाक्काथसंयुतः ।
मन्दाग्नौ शोथरोगे[2] च गवां मूत्रेण योजितः ॥ १७ ॥
वातपित्तोल्बणे व्याधौ गोक्षीरघृतसंयुतः ।
देयः कृशानां पुष्ट्यर्थं मांसैर्युक्तश्च भोजने[3] ॥ १८ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे गुग्गुलुकल्पे सप्तषष्टितमोऽध्यायः ।

---

## अथाष्टषष्टितमोऽध्यायः ।

### रसायनकल्पः ।

प्रकृष्टाय प्रदातव्यं गुडूच्याः पलपञ्चकम् ।
प्रभाते[4] घृतसंयुक्तं शरद्ग्रीष्मेषु वाजिनम्[5] ॥ १ ॥
रोगघ्नं पुष्टिदं वापि[6] बलतेजोविवर्द्धनम् ।
तमेव[7] मतिमान् दद्यात्[8] क्षीरयुक्तमथापि वा ॥ २ ॥

---

१ । व्रणेषु दुष्टमर्मेषु । गः ।
२ । रोगेषु । गः ।
३ । भोजनैः । गः ।
४ । दातव्यं । गः ।
५ । वाजिनाम् । गः
६ । चापि । गः ।
७ । तदेव । खः ।
८ । दत्वा । गः ।

स्वस्थानां वापि पुष्ट्यर्थं भोजने संप्रदापयेत् ॥ ११ ॥
त्रिषु दोषेषु दुष्टेषु रक्ते रिक्ते तथा व्रणे ।
खञ्जे च दुर्व्वले वापि एकस्मिन्नेव वासरे ॥ १२ ॥
प्रथमेऽह्नि पलं दद्यात् प्रतिकर्षं प्रवर्द्धते ।
पलानां पञ्चकं देयमेकस्मिन्नेव वासरे ॥ १३ ॥
उत्तमस्य तुरङ्गस्य मध्यमस्य चतुष्टयम्[१] ।
पलानि त्रीणि देयानि जघन्यस्य तथा विधिः[२] ॥ १४ ॥
अस्मात्[३] प्रमाणादधिको नैव देयः कदाचन ।
पानादूर्द्ध्वं[४] न दातव्यो भोजने वापि गुग्गुलुः ॥ १५ ॥
पलान्य[५]शीतिः प्रवरः प्रायोऽश्वस्य[६] प्रकीर्त्तितः ।
षष्टिर्मध्यः समुद्दिष्टश्चत्वारिंशतिरन्यतः[७] ॥ १६ ॥

---

१३ । प्रथमेऽह्नीति श्लोकः ख-पुस्तके नास्ति ।

---

१ । चतुष्टये । खः ।
२ । बन्धनञ्च यथाविधिम् । गः ।
३ । अस्य प्रमाणमधिकं नैव देयम् । गः ।
४ । पानादार्द्रं । खः ।
५ । एतानि । खः ।
६ । प्रयोगस्येति कीर्त्तितः । गः ।
७ । षष्टिर्मध्यस्य निर्द्दिष्टा चत्वारिंशत् कनीयसः । गः

अर्द्धप्रहरगे[१] सूर्य्ये गुग्गुलुं दापयेद्भिषक्।
अष्टभागावशिष्टेऽह्नि[२] भोजने संप्रदापयेत् ॥ ४ ॥
दत्वातु गुग्गुलुं पाने अनुपानं ततो बुधः।
न द्वितीये चतुर्थे वा गोक्षीरञ्च प्रदापयेत् ॥ ५ ॥
गुग्गुलुं पाययित्वातु भोजयेत्तुरगं भिषक्।
विकाले भोजयेद् भक्त्या भोजनैरक्षमाचकैः ॥ ६ ॥
शाल्यन्नं वातजे दद्यात् मांसानां रसकैर्युतम्।
पित्ते मुद्गं ससर्पिश्च भोजयेन्मधुना ततः ॥ ७ ॥
पञ्चतिक्तजले स्विन्नान् कटुकैरवचूर्णितान्।
तथा मुद्गान् कुलत्थांश्च कफे विद्वान् प्रदापयेत् ॥ ८ ॥
पीतगुग्गुलुके वाहे क्षुधार्त्ते दापयेत्ततः।
प्रहरं प्रहरार्द्धं वा नैव घासं प्रदापयेत् ॥ ९ ॥
शृतं शीतं जलं पाने घासे दूर्व्वा प्रकीर्त्तिता।
मुनिभिः शालिहोत्राद्यैः शास्त्रमार्गानुसारतः ॥ १० ॥
व्याधितेषु तुरङ्गेषु पाने देयस्तु गुग्गुलुः।

---

५। दत्वेत्यादिश्लोकचतुष्टयं ख-पुस्तके नास्ति।
९। प्रहरमितिश्लोको ग-पुस्तके न विद्यते।

---

१। प्रहरार्द्धगते। गः।
२। अर्द्धभागवशिष्टेऽह्नि भोजनेन। गः।

सप्ताहमेकं[1] द्विगुणं त्रिगुणं वा यथाविधि।
प्रयोगोऽस्य स्मृतः सम्यग् यथाशास्त्रं तपोधनैः ॥२२॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे रसोनकल्पे षट्षष्टितमोऽध्यायः।

---

## अथ सप्तषष्टितमोऽध्यायः।

---

गुग्गुलुकल्पः।

स्निग्धः काञ्चनसङ्काशः पक्वजम्बूफलोपमः[2]।
शोभनो गुग्गुलुः प्रोक्तः सुगन्धिर्यश्च पिच्छिलः ॥ १ ॥
शुष्को दुर्गन्धिकश्चैव वर्णान्यत्वसमन्वितः[3]।
पुराणः सतु विज्ञेयो नैव देयस्तु वाजिनः[4] ॥ २ ॥
विधिरस्य[5] द्विधा प्रोक्तः पूर्व्वशास्त्रविशारदैः।
एकः पाने[6] प्रयोगेण द्वितीयो भोजनेन तु ॥ ३ ॥

---

१। एतद् द्विगुणं प्रदद्याच्च यथाविधिम्। गः।
२। निभोपमः। गः।
३। वर्णान्यत्वमुपागतः। गः।
४। वाजिनाम्। गः।
५। विधिश्चास्य। गः।
६। एकं पानप्रयोगेण। गः।

कल्कप्रयोगेऽल्पगुणं तथा चात्ययवर्जितम्[1] ।
क्रियावसाने[2] दातव्यं शालिषष्टिकपायसम् ॥१६॥
त्रिरात्रं[3] पञ्चरात्रं वा शर्करासर्पिषान्वितम् ।
पुराणः स तु विज्ञेयो नैव देयस्तु वाजिनाम् ॥ १७ ॥
विधिरेष समुद्दिष्टः पूर्व्वशास्त्रविशारदैः ।
द्विगुणञ्चापि सप्ताहं तुरङ्गं[4] नैव वाहयेत् ॥ १८ ॥
स्वादुशीतोपचारश्च तत्र यावत्[5] प्रकीर्त्तितः ।
रसोने तु यदा स्वेदी[6] श्वासवान् जायते हयः ॥ १९ ॥
व्यापद्युक्तः स विज्ञेयस्तस्य कुर्य्याद्भिषक्[7] क्रियाम् ।
पित्तज्वरसमुद्दिष्टां[8] क्रियां सर्व्वां प्रयोजयेत् ॥ २० ॥
रसोनव्यापदाघाते तुरङ्गं मतिमान् भिषक् ।
वातभग्नास्थिगात्रेषु मारुताहतमूर्त्तिषु ॥ २१ ॥
वृद्धेषु च विशेषेण रसोनञ्च[9] प्रदापयेत् ।

---

१७ । पुराण इत्यादिश्लोकः ख-पुस्तके नास्ति ।

---

१ । स्मयवर्जितः । खः ।
२ । कृतावसाने । खः ।
३ । त्रिरात्रं पञ्चरात्रं वा शर्करा फाणितान्विता । गः ।
४ । द्विगुणं । गः ।
५ । यथावत् परिकीर्त्तितः । गः ।
६ । स्वादी स्वभावाज्जायते हयः । गः ।
७ । क्रियामिमाम् । गः ।
८ । समुद्दिष्टं विधिं सर्व्वम् । गः ।
९ । सरसोनं । गः ।

शरन्निदाघयोश्चापि नैव देयः कदाचन ।
प्रावृट्काले प्रदातव्यो जलपूर्णे महीतले ॥ ९ ॥
वातिकेषु विकारेषु तिलतैलेन योजितः[1] ।
क्षीरसर्पिःसमायुक्तः पित्ते वै शर्करान्वितः[2] ॥ १० ॥
कफे[3] कटुकतैलेन कटुकैरवचूर्णितः[4] ।
रसः प्रभाते दातव्यः सायं कल्कस्तु भोजने ॥ ११ ॥
पिण्डेनैव[5] प्रदातव्यो रसोनस्तु विजानता ।
वायौ प्रधानः पित्ते तु विषमस्तु कफे समः ॥ १२ ॥
वातश्लेष्मणि वाते वा कफे वा पानमिष्यते ।
रसं दद्यात्[6] प्रभाते तु स्तोकं वातं निवारयेत्[7] ॥१३॥
औदकं मधुरं[8] वापि दद्याद् घासं ततो बुधः ।
शीतलं विमलं तोयं स्थानं वापि सुखानिलम् ॥ १४ ॥
कल्कप्रयोगे विहितो विधिरेष शरद्वितः[9] ।
महागुणं स्मृतं पानं सकल्कञ्च[10] मनीषिभिः ॥१५॥

---

१२—१३। वातेति पादद्वयं ख-पुस्तके, वायाविति पादद्वयञ्च ग-पुस्तके नास्ति ।

---

१। मूर्च्छितः। गः।
२। युतः। गः।
३। सकफे। गः।
४। चूर्णितो रसः। गः।
५। पित्तेन। खः।
६। दत्वा। खः।
७। वारं न वारयेत्। खः।
८। मधुकं। खः।
९। विजानता। गः।
१०। पाने सत्ययञ्च। गः।

मातुलुङ्गरसोपेतं मांसानां रसकेन च[१]।
रसं दद्याद्रसोनस्य अन्यैर्वाम्लैः[२] समायुतम्॥ ३॥
प्रथमे दिवसे देयं[३] रसोनस्य पलद्वयम्।
एकैकपलवृद्ध्या तु दद्याद्[४] यावच्च विंशति॥ ४॥
उत्तमाश्वस्य मात्रैषा मध्यमस्य चतुर्द्दश।
जघन्यस्य[५] पलान्यष्टौ मात्रैषा न विरोधिनी॥ ५॥
हीनन्तु रसमात्रातो[६] भागेनैकेन बुद्धिमान्।
यवकल्केन[७] संपुष्टं मांसयुक्तं प्रदापयेत्॥ ६॥
प्रत्यहं दापयेत्तावद् यावन्मात्रा विवर्द्धते।
मात्रावृद्धिं भिषग्युक्त्या[८] दद्यादेकान्तरं ततः॥ ७॥
रसोनस्य प्रयोगश्च हेमन्ते शिशिरे तथा।
प्रावृट्काले वसन्ते च मध्यमः परिकीर्त्तितः॥ ८॥

---

८। रसोनस्येत्यादिश्लोकः ख-पुस्तके नास्ति।

---

१। माषानाञ्च रसेन वा। गः।
२। प्रत्यैः। गः।
३। दद्यात्। गः।
४। यावत् पूर्णाच विंशतिः। गः।
५। अधमस्य। गः।
६। रसमात्रायाः। गः।
७। यावचाटीयुतं। गः।
८। बुद्ध्या। खः।

पित्तप्रकृतिकश्चापि भवेत् स्वेदश्च जायते ।
श्लेष्मसुसंहताङ्गश्च क्षुत्तृट्संहरणे क्षमः ॥ ३ ॥
सङ्कीर्णप्रकृतिश्चापि[1] विद्यात् सङ्कीर्णलक्षणम् ।
प्रकृतिं सम्यगालोक्य भिषग्वातादिकामिमाम् ॥ ४ ॥
यथादोषं ततः कुर्य्याच्चिकित्सां शास्त्रसम्मताम् ।
वातश्लेष्म तथा पित्तं ज्ञात्वा कर्म्म प्रचक्रमेत् ॥ ५ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे प्रकृतिज्ञाने पञ्चषष्टितमोऽध्यायः ॥

---

## अथ षट्षष्टितमोऽध्यायः ।

रसोनकल्पः ।

रसोनस्य प्रवक्ष्यामि कल्पं[2] शास्त्रानुसारतः ।
[3]सम्पूर्णरसवीर्य्योऽसौ मासे संगृह्य फाल्गुने ।
गृहीत्वा स्थापयेत्तत्र यत्रस्थो[4] नैव नश्यति ॥ १ ॥
ततस्तस्य प्रयोगन्तु कुर्य्यान्मात्राप्रमाणतः ।

---

३ । प्रथमपादद्वयं ख-पुस्तके नास्ति ।

५ । अस्य तृतीयचतुर्थपादौ ख-पुस्तके न स्तः ।

---

१ । श्चापि । खः ।
४ । यत्रासौ । गः ।
२ । कल्कं । गः ।
३ । सम्पूर्णरसवीर्य्याभ्यां मासे ग्राह्यो तु फाल्गुने । गः ।

कायेन धनुते यस्तु लोड़तेऽतिशयं हरिः।
वड़वायां रतश्चैव सोऽपि साध्यः प्रकीर्त्तितः॥ २०॥
चक्षुषोः सुदीप्तिर्यस्य स्वेददोषी च यो हयः।
स्कंतुच्छ्र्दितेस्तुं (?) शिरा यस्य च वेधिता॥ २१॥
यस्त्वसाध्यः स्मृतो वाहः स कश्चिन्नैव साध्यते।
काले नोपेक्षिताः साध्या दुश्चिकित्स्याः प्रकीर्त्तिताः॥२२॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे साध्यासाध्यविवेके चतुःषष्टितमोऽध्यायः।

---

## अथ पञ्चषष्टितमोऽध्यायः।

वातादिप्रकृतिलक्षणानि।

धूमवर्णः कृशो रूक्षः शिरालो वेगवान्[1] हयः।
ऊर्द्धवर्त्तितजिह्वश्च[2] वातप्रकृतिरुच्यते॥ १॥
पित्तप्रकृतिकश्चापि[3] कृशतीक्ष्णतनुत्वचः।
नित्यं शीताभिलाषी च वह्वाशी पीतवर्णकः॥ २॥

---

२०। धनुते धनुराकारो भवति। लोड़ते मत्तो भवति।

---

१। शिरानद्धाङ्गवान्। गः।
२। ऊर्द्धवान्तो द्विजिह्वश्च। खः।
३। निसान्तजावतिसिद्धः प्रोक्तः। गः।

शूलाध्मानानिमेषाक्षः कृच्छ्रगामी च जायते।
कृच्छ्रञ्च कम्पते श्वासाध्मातश्च शूनमेहनः॥ १०॥
श्लेष्मा न पिच्छिलः सान्द्रः फेनिलः पाण्डुरस्तथा।
गलशुण्डा गले यस्य शोफो वा कठिनो भृशम्॥ ११॥
रुद्धो गलग्रहो वापि मन्या वापि सुदूषिता।
श्लेष्मा विविधवर्णश्च सान्द्रोऽतिपूतिगन्धवान्॥ १२॥
क्षयजः काशतो वापि हरेर्यस्य प्रवर्त्तते।
अतिसारेण क्षीणस्य यस्य शोथः प्रजायते॥ १३॥
पश्चात्तु मूत्ररोगश्च जायतेऽश्वस्य दारुणः।
न संवृणोति यो मेढ्रं वक्षःशोभाविवर्जितः॥ १४॥
गुर्वङ्गोऽतिशयं भूय आत्मानमभिवीक्षते।
भग्नग्रीवश्च यो वाहो व्रणैर्यश्च विशुष्यते॥ १५॥
विस्तीर्णा श्रोणिका यस्य श्वासः स्वेदश्च मूत्ररुक्।
बाह्वोरभ्यन्तरे यस्य द्रोणिका भिद्यतेऽपि च॥ १६॥
मण्डूकायाञ्च कीर्णायां नित्यस्रावी तलो भवेत्।
खुरश्च यस्य वाहस्य खिन्नश्चैव प्रजायते॥ १७॥
सर्व्वे पूर्व्वोदिता ह्येते नैव साध्याः प्रकीर्त्तिताः।
तथापि जीवमानस्य कुर्य्याद्वैद्यः प्रतिक्रियाम्॥ १८॥
प्रदीप्ताग्निर्भवेद्यस्तु प्रसन्नं रूपमीक्षते।
बहुपानरतो वाजी साध्यरोगः स उच्यते॥ १९॥

किञ्चित्साध्यं[१] तथासाध्यं लक्षणं च प्रकाशते ।
कृच्छ्रसाध्यः स विज्ञेयो याप्यो वाथ हयो भवेत्[२] ॥ ३ ॥
शुष्यते नेष्टगन्धश्च[३] सोऽप्यसाध्यः प्रकीर्त्तितः ॥ ४ ॥
सप्ताहात् क्रियमाणेऽपि भेषजे यस्य वाजिनः ।
विशेषो न भवेत्तस्य चिकित्सां न प्रयोजयेत् ॥ ५ ॥
दीप्ताग्नेस्तु प्रयोक्तव्या क्रिया हीनाग्नये तु न ।
निश्चेष्टोऽनिमिषाक्षश्च वालैर्वा यो न वीज्यते ॥ ६ ॥
लभते ताड़नं दाहं रूपैश्च परिवर्जयेत् ।
तनुः स्तब्धा श्लथा वापि जिह्वा चैव तथाविधा ॥ ७ ॥
स्थूलो वा यो निराहार आहारैर्वा न पुष्यति ।
पूर्व्वाङ्गं शूयते वामं दक्षिणं यस्य पश्चिमम् ॥ ८ ॥
सदाहगुरु एकाङ्गं शूयते यस्य वा हरेः ।
शीतं गुदञ्च नासास्यं शीतोच्छ्वासी च यो हयः ॥ ९ ॥

---

७ । तनुरित्यादि नैव साध्यः प्रकीर्तित इत्यन्तैः श्लोकैरसाध्यलक्षणानि प्रदर्शितानि ।

८ । वाहमित्यत्र वाममिति युक्तः पाठः ।

---

१ । इत्येवासाध्यतायाः । खः ।          ३ । नष्टगन्धी च । गः ।

२ । मतः । गः ।

ग्रासमध्यगतं[1] वाहा ये भक्षन्ति सुदारुणम् ।
तेषां शोषश्च मूर्च्छा च भ्रमः श्वासश्च[2] जायते ॥ ३ ॥
तेषु गव्यं घृतं पाने अभ्यङ्गश्च प्रशस्यते ।
सर्पदष्टचिकित्सायां कीर्त्तितं यच्च भेषजम् ॥ ४ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे षट्पदीभक्षचिकित्सिते त्रिषष्टितमोऽध्यायः ॥

---

## अथ चतुःषष्टितमोऽध्यायः ।

---

साध्यासाध्यविवेकः ।

अत ऊर्द्ध्वं प्रवक्ष्यामि साध्यासाध्यविनिश्चयम् ।
एकः प्रशाम्यते व्याधिः पुनरन्यः[3] प्रकुप्यति ॥
पुनरन्यः[4] पुनश्चान्यो यस्य तं परिवर्ज्जयेत् ॥ १ ॥
व्याधिनाढ्यस्य[5] वाहस्य प्रकृतिं याति[6] सर्व्वदा ।
यः स्वभावं[7] परित्यज्य दुश्चिकित्स्यः स उच्यते ॥ २ ॥

---

१ । पुनरित्येकस्य प्रशमनं अन्यस्य च प्रकोप इत्यर्थः ।
२ । अस्य श्लोकस्य द्वितीयपाठो न सङ्गच्छते ।

---

१ । ग्रासमध्यगता वाहा भक्षयन्ति । गः ।
२ । शोथः । गः ।
३ । अन्यस्यैव । गः ।
४ । पुनश्चान्यः । गः ।
५ । विपरीतस्य । खः ।
६ । प्रकृतिर्याच । खः ।
७ । स्ववाहन्तु । खः ।

## अथ द्विषष्टितमोऽध्यायः।

अपस्मारलक्षणचिकित्सितम्।

पतत्यकस्माद् यो भूमौ स्तब्धाक्षो गतचेतनः[१]।
स्वस्थाशयोऽपि[२] यः शीघ्रं सोऽपस्मारीति कीर्त्तितः॥ १ ॥
उन्मादोक्तक्रियां सर्व्वां ततः कुर्य्याद्विचक्षणः।
घृतस्यातिपुराणस्य तस्य पानञ्च शस्यते[३]॥ २ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे अपस्मार-चिकित्सिते द्विषष्टितमोऽध्यायः।

## अथ त्रिषष्टितमोऽध्यायः।

षट्पदीभक्षलक्षणचिकित्सितम्।

आपाण्डुवर्णा[४] कपिला हरिता च प्रजायते।
महोदरा च षट्पादी[५] ह्रस्ववक्त्रोत्तमाङ्गिका॥ १ ॥
षट्पदी नाम विख्याता तथा चाञ्जलिकारिका[६]।
गङ्गापतङ्गसंज्ञा[७] च भाषिता सा दुरासदा॥ २ ॥

१। कम्पवाहनः। गः।
२। पुनश्च योत्थितः। गः।
३। प्रशस्यते। गः।
४। ड्ड्वर्लाच। गः।
५। मन्दोदरी षट्पदीच। गः।
६। चाण्डालिकारिका। खः।
७। गाङ्गपाताङ्गसंज्ञा। खः।

एवं कृत्वा भिषक् चूर्णैः शीघ्रमुद्वर्त्तयेत्ततः।
शालिहोत्रादिभिः प्रोक्तैर्विषघ्नैर्वक्ष्यमाणकैः॥ ८॥
कुष्ठजीरक[1]दन्तीभिर्नैपाली[2]भद्रमुस्तकैः।
कट्फले[3]न्द्रयवागारधूमास्फोतकसैन्धवैः॥ ९॥
विड़ङ्गपिप्पलीक्षारशतपुष्पावचाजलैः[4]।
निशातेजोवतीपाठामरिचागारधूमकैः॥ १०॥
यथाप्राप्तः समस्तैर्वा एतैश्चूर्णीकृतैर्बुधः।
दष्टस्योद्वर्त्तयेद्देशं प्रस्थितश्चैव वाजिनः॥ ११॥
प्रलेपो वा प्रदातव्य एतैर्गोमूत्रपेषितैः।
ततः शान्तिं प्रयच्छन्ति तुरङ्गे विषदूषिते॥ १२॥
चन्दनागुरुकुष्ठैश्च लोध्रभार्गीफलीनखैः।
शिरीषदन्तीमूलैश्च दंशलेपो विषापहः॥ १३॥
दंशनार्त्तस्य वाहस्य दंशस्थानं विचक्षणः।
छिन्द्यात्तीक्ष्णेन शस्त्रेण मन्त्रैश्चैव विषं हरेत्॥ १४॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे विषचिकित्सिते एकषष्टितमोऽध्यायः॥

---

८। उद्वर्त्तयेत् घर्षयेत्।

९। आस्फोतः (हापरमाली)।

१३। फली प्रियङ्गुः।

---

[1] चित्रक। गः।
[2] पिप्पली। गः।
[3] कक्कोल। गः।
[4] मज्जैः। गः।

प्रस्वेदो रोमहर्षश्च अरुचिर्गात्रसादनम् ।
विवर्णमूत्रं लाला च भिन्नविड्‌वलमेव च ॥ २ ॥
लिङ्गान्येतानि वाहस्य सर्पदष्टस्य लक्षयेत् ।
स्थावरेऽप्येवमेवन्तु नो दंशस्तत्र केवलम् ॥ ३ ॥
कीटादिविषसंयुक्ते लालास्रावोऽपि जायते[1] ।
शोथो वाधप्रदेशे तु अन्यच्च सर्पदष्टवत्[2] ॥ ४ ॥
दत्वादौ[3] घृतपानन्तु जीवरक्षाविचक्षणः ।
ततः कुर्य्यात् क्रियां वैद्यः प्रच्छन्नोद्वर्त्तनादिकम् ॥ ५ ॥
तण्डुलीयकमूलन्तु मूलं विल्वकपित्थयोः ।
गोघृतेन समालोड्य सर्पदष्टे तु पाययेत् ॥ ६ ॥
सर्पदष्टस्य वाहस्य क्षिप्रं वस्त्रेण बुद्धिमान् ।
प्रच्छायेद्दंशदेशन्तु[4] शिरां तस्य च[5] वेधयेत् ॥ ७ ॥

---

४ । वाधेत्यत्र वेधेति पाठः साधुः ।
६ । तण्डुलीयकमूलं । (कांटानटेरमूल) ।
७ । प्रच्छायेत् परिच्छादयेदित्यर्थः ।

---

१ । कीटादिकविषे लाला स्रावो वाहस्य जायते । गः ।
२ । दंशप्रवेशेतु अन्यदा सर्पदंष्ट्रवत् । गः ।
३ । दत्वादौ । खः ।
४ । प्रच्छायेदंशदेशन्तु । खः ।
५ । वा तस्य । खः ।

सौभिक्षवर्त्तिविहितां कुर्य्यात्तस्य भिषक् क्रियाम्।
अनयापि[1] सुखी न स्यात् कुक्षौ दाहस्ततः[2] स्मृतः॥ ६॥
लवणव्यापदुक्तस्तु[3] विधिः सर्व्वः प्रकीर्त्तितः।
सुराव्यापत्परीतस्य मुनिभिः शास्त्रकोविदैः॥ ७॥
क्षीरव्यापद्गृहीतोऽश्वो मन्दं पिबति खादति।
निद्रालुर्वेदनार्त्तश्च ध्यायी गुरुशिरा भवेत्॥ ८॥
पिप्पल्या हस्तिपिप्पल्या तेजोवत्या तथैव च।
अतिविषेण शुण्ठ्या च युक्ता पाने सुरा हिता॥ ९॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे व्यापच्चिकित्सिते षष्टितमोऽध्यायः॥

---

## अथैकषष्टितमोऽध्यायः।

विषलक्षणचिकित्सितम्।

स्थावरं जङ्गमञ्चैव विषं द्विविधमुच्यते।
जङ्गमं प्राणिसम्भूतं स्थावरञ्चापि मूलजम्॥ १॥

---

९। हस्तिपिप्पली गजपिप्पली। तेजोवती वचा। एषां पलमात्रः कल्को देयः।

१। प्राणिसम्भूतमिति सर्पादिजनितम्। मूलजं कालकूटादिजम्।

---

१। यदि तया। गः।
२। तदा। गः।
३। लवणव्यापत्परीतस्य। गः।

## अथ षष्टितमोऽध्यायः ।

व्यापल्लक्षणचिकित्सितम् ।

प्रभूतं लवणं यस्य भोजने वाजिनो भवेत् ।
केवलं वा ततश्चास्य[१] व्यापत् सुमहती भवेत् ॥ १ ॥
लवणव्यापदार्त्तस्य स्वेदः श्वासश्च जायते ।
जलावगाहनं शस्तं तस्य कर्द्दमलेपनम् ॥ २ ॥
शर्करोदकपानञ्च हितं तस्मै[२] प्रकीर्त्तितम् ।
पयोऽनुवासनं वापि[३] विशेषेणैव जायते ॥ ३ ॥
लवणव्यापदार्त्तस्य पिष्ट्वालम्बुषया सह ।
आलोड्य तिलतैलेन ततः पानं प्रदापयेत् ।
हरीतकी कुष्ठकृतं दापयेत् पानमुत्तमम् ॥ ४ ॥
वहुभिः खादितैर्धान्यैर्धान्यव्यापदमादिशेत् ।
शूलचिह्नं[४] ततस्तस्य विह्वलत्वञ्च जायते ॥ ५ ॥

---

४ । लवणेत्यादि सार्द्धश्लोकः ख-पुस्तके नास्ति । अत्र तिल-तैलस्य प्रस्थार्द्धं ग्राह्यम् । अलम्बुषायाश्च पलम् ।

५ । धान्यव्यापदं धान्यभक्षणजनितव्याधिमित्यर्थः ।

---

१ । तस्य व्याधिश्च महती । खः ।

२ । तस्य क्षमात्रया । गः ।

३ । क्षीरस्यास्थापनं तस्य । गः ।

४ । शूलं चिह्नं । खः ।

पञ्चभिर्लवणैः सार्द्धं पाने दद्याद्भिषग्वरः ।
प्राज्ञः शोथं ततस्तैश्च मर्द्दयेद्भिषजां वरः ॥ ३ ॥
भग्नैः शंखकपालाद्यैः स्वेदैस्तं स्वेदयेद्भिषक्[१] ।
तैलयुक्तं जलं पाने ग्रासे दूर्व्वाञ्च दापयेत् ॥ ४ ॥
पञ्चमूलकषायेण क्षीरयुक्तेन वस्तयः[२] ।
सुखाय विहितास्तस्य पिप्पलीकल्कयोजिताः ॥ ५ ॥
चैट्टतेन[३] च तैलेन कुर्य्यात्तैलानुवासनम्[४] ।
अशान्तौ[५] वह्निना कर्म्म ततः सम्पद्यते सुखम् ॥ ६ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे वातवलासकचिकित्सिते एकोनषष्टितमोऽध्यायः ॥

---

३ । तैरिति उक्तवसातैलैर्लवणादिमिश्रैरित्यर्थः ।
५ । पञ्चमूलस्य पलदशकम् । चीरस्य चाढ़को वस्त्यर्थं ग्राह्यः ।

---

१ । स्वेद्यैः संस्वेदयेद्भिषक् । खः ।
२ । वस्तिना । गः ।
३ । तैवृताद्येन । गः ।
४ । तस्यानुवासनम् । गः ।
५ । असान्तौ । खः ।

श्लेष्मशोषातुरं[1] वाहं वीक्ष्य चाग्निबलं बुधः।
सन्निपातोद्भवे चापि कुर्य्याद् भेषजसङ्करम्॥ १७॥
चितायां दह्यमानायां तद्धूमेन विचक्षणः।
धूपयेत् सर्व्वशोषे तु तुरङ्गं शास्त्रकोविदः॥ १८॥
जलौकसाञ्च रक्तेन कुर्य्यान्नेत्राञ्जनं[2] भिषक्।
पिष्टाभिः सकलाभिर्वा ताभिः[3] शस्तमथाञ्जनम्॥ १८॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे शोषेऽष्टपञ्चाशत्तमोऽध्यायः॥

---

## अथ एकोनषष्टितमोऽध्यायः।

वातवलासकलक्षणचिकित्सितम्।

कफमारुतसम्भूतः स्थूरासन्धिसमाश्रितः।
शोथो वातवलासाख्यो मृदुश्चैव सवेदनः॥ १॥
तेनातिखञ्जतोऽश्वस्य स्तब्धं पर्व्व च जायते।
स्थोरकां[4] वेधयेत् सम्यग् वसातैलञ्च सर्पिषा॥ २॥

---

१। श्लेष्मपित्ताय चाश्वाय। गः।
२। तेनाञ्जनं। गः।
३। वातार्त्ते शस्तमञ्जनम्। गः।
४। वसातैलञ्च सर्पिश्च पञ्चभिर्लवणैः सह। दाते दद्यात् भिषक् प्रातः सच्छेद्रैश्च मर्द्दयेत्॥ गः।

विदद्भिः क्रियया वैद्यैः सम्यगेवं[1] प्रयुक्तया ॥ १२ ॥
दर्भमोरट[2]शालीनां तथाच नल[3]काशयोः ।
मूलान्यादाय सर्व्वेषां क्वाथयेन्मृदुनाग्निना[4] ॥ १३ ॥
मांसैस्तेन[5] कषायेण रसं कृत्वा विचक्षणः ।
यवान्नं भोजने दद्यात् सघृतं पित्तशोषिणम् ॥ १४ ॥
वासानिम्बकषायेण रसं कृत्वा विचक्षणः ।
जाङ्गलानां तथा मांसैर्मृगाणामथ पक्षिणाम् ॥ १५ ॥
कुलत्थं सुकृतं तेन[6] रसकेन समन्वितम् ।
भोजयेन्मधुना युक्तं तैलत्रिकटुकान्वितम्[7] ॥ १६ ॥

---

१३ । मोरट इक्षुमूलं । नलकाशयोरित्यत्र पाठान्तरे शणमूलम् । एषां मूलानां मिलिला पलं ग्राह्यम् ।

१४ । सघृतमित्यत्र घृतं पलचतुष्टयमितम् ।

१५ । जाङ्गलानामिति मृगविशेषणम् ।

१६ । सुकृतं सुसिद्धं । तेन रसकेनेति पूर्व्वोक्तकषायसिद्धमांसरसेनेत्यर्थः । श्लेष्मशोषातुरं भोजयेदित्यन्वयः ।

---

१ । चैवहि । गः ।
२ । दर्भशरेक्षु । गः ।
३ । शण । गः ।
४ । मृदुना चाग्निना शनैः । गः ।
५ । तेन सर्वकषायेण । गः ।
६ । क्वाथयेद्वैद्यः । गः ।
७ । मधुसंयुक्तांस्तान् तिक्तैश्च कटुकान्वितैः । खः ।

गात्रं[1] भवति दुर्गन्धि सर्व्वेषामेव शोषिणाम्।
अहन्यहनि चाङ्गानि हीयन्ते च विशेषतः॥ ८॥

एतच्चिकित्साः।

एषां चिकित्सां वक्ष्यामि मुनिभिः पूर्व्वनोदिताम्।
वातादिदोषजातानां[2] शोषाणामनुपूर्व्वशः॥ ९॥
पञ्चमूलकषायेण कृत्वा मांसरसं बुधः।
शाल्यन्नं[3] भोजयेत्तेन सतैललवणान्वितम्॥ १०॥
युक्त्या[4] संभोजितं पश्चात् सञ्जाताग्निबलं सुधीः।
प्रसारिण्यादिभिस्तैलैस्तत[5]श्चास्थापयेद् भिषक्॥११॥
कदाचिद्वातशोषार्त्तः सिद्धिं याति न वा[6] ह्ययः।

८। सर्व्वेषामेव शोषिणामिति वातादिचतुर्विधशोषिणामित्यर्थः। पाठान्तरे गात्रमित्यत्र मलम्। हीयन्ते क्षीणानि भवन्ति।

१०। पञ्चमूलस्य पादशिष्टकषायेण मांसं विपाच्य तेन सह शाल्यन्नं भोजयेदित्यर्थः। पञ्चमूलं पलमितम्। लवणस्य पलं तैलस्य च कुड़वः।

११। आस्थापयेत् आस्थापनकर्म्म कारयेदित्यर्थः। प्रसारिण्यादिभिस्तैलैरिति तैलाध्यायोक्तैरित्यर्थः।

१। मलं। गः।
२। वातादीनाञ्च दोषाणां शोषिणां। खः।
३। शाल्यन्नभोजनं तेषां। गः।
४। युक्ता। गः।
५। पश्चात्। गः।
६। अन्यथा क्षयः। गः।

आध्मातकुक्षेर्[1]यस्य स्याद् रूक्षः कार्श्यः कृशस्य च ।
मूत्रकृच्छ्रं ततश्चैव भिन्नफेनिलविह्वलम् ॥ २ ॥
प्रत्यहं हीयमानस्य मन्दग्रासस्य तस्य वै ।
भिषग् वातात्मकं शोषं चित्ररोम्णः[2] समादिशेत् ॥ ३ ॥
कार्श्यदौर्बल्यसंयुक्तस्तृष्णादाहसमन्वितः ।
सङ्कीर्णे रोमकेशे च पित्तशोषं विनिर्द्दिशेत् ॥ ४ ॥
भिन्नदीर्घाङ्गवालस्य मन्दग्रासस्य बुद्धिमान् ।
सततं हीयमानस्य भृशं कासार्द्दितस्य च ॥ ५ ॥
नित्यं शीतशरीरस्य निद्रातन्द्रान्वितस्य च ।
भिन्नचिह्नस्य वाहस्य शोषं श्लेष्मात्मकं वदेत्[3] ॥ ६ ॥
सर्व्वलिङ्गान्वितञ्चैव[4] जानीयात्सान्निपातिकम् ।
असाध्यं वाजिनां[5] शोषं कृच्छ्रसाध्यमथापि वा ॥ ७ ॥

---

४ । एषच श्लोकः ख-पुस्तके नास्ति ।

५ । पञ्चमस्य तृतीयतुर्थपदौ षष्ठस्य च प्रथमपादद्वयं ग-पुस्तके नास्ति ।

---

१ । आध्मातकुक्षिः । खः ।
२ । शोषरोगिणां तत् । खः ।
३ । भवेत् । खः ।
४ । सर्व्वलिङ्गान्वितं शोषं । गः ।
५ । वाजिनश्चैव । गः ।

जुहुयाद्‌घृतसंयुक्तं शुचिः स्नात्वा सुपूजितः ॥ ३४ ॥
शान्तिकं कारयेत् कर्म्म बलिञ्चापि प्रयोजयेत् ।
ग्रहदोषेषु[1] सर्व्वेषु शान्तिकर्म्माणि कारयेत् ॥ ३५ ॥
देवद्विजप्रव्रजितगुरुवृद्धान् यतीनपि ।
तोषयेद्भोजनैर्दानैर्वस्त्रगोकाञ्चनादिभिः ॥ ३६ ॥
रात्रौ शालासमीपे तु बलिं दद्याच्‌ चतुर्दिशम् ।
मत्स्यमांसैश्च पक्वान्नैः कृशरैः[2] पायसादिभिः ॥ ३७ ॥
त्रिरात्रं पञ्चरात्रं वा सप्तरात्रमथापि वा ।
नीराजनविधिं कृत्वा नयेदश्वान् पृथक् पृथक् ॥ ३८ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे ग्रहगृहीतचिकित्सिते सप्तपञ्चाशत्तमोऽध्यायः ।

---

## अथाष्टपञ्चाशत्तमोऽध्यायः ।

### वातादिशोषलक्षणानि ।

वातादिदोषजातानां शोषाणामनुपूर्व्वशः ।
लक्षणञ्च चिकित्सां प्रवक्ष्यामि समासतः ॥ १ ॥

---

१ । अयं श्लोको ग-पुस्तके नास्ति ।

---

१ । रोगेषु । गः ।     २ । कृशरा । खः ।

कम्पते[१] पूर्व्वकायेन स्वल्पपानाशनश्च यः।
शेते प्रसार्य्य गात्राणि शीताङ्गः सोमपीड़ितः॥ २७॥
रक्ताक्षः[२] शूनकण्ठश्च कम्पमानश्च श्वासयुक्।
फेनतीब्राङ्गखेदश्च[३] ग्रस्तः स्कन्दग्रहेण सः॥ २८॥
उदके[४] तत्समीपे वा प्रायो गृह्णाति दारुणः।
तुरङ्गं सत्वहीनन्तु षड्विधो वारुणग्रहः॥ २९॥
यज्ञभूमिचिताचैत्यशून्यवेश्मसुरालये[५]।
लोहिताक्षादयो रोषात्[६] ग्रहा गृह्णन्ति वाजिनः॥३०॥
एवंविधैर्निदानैस्तु ग्रहदोषं विनिर्द्दिशेत्।
वातपित्तकफानान्तु निदानैर्व्याधिमादिशेत्॥ ३१॥
एकाकारेण रोगेण म्रियते वा हयो यदा।
तुरङ्गानां तदा ज्ञेया उपसर्गाः सुदारुणाः॥ ३२॥
ग्रहदोषेषु सर्व्वेषु उपसर्गांस्तथैव च।
अथोक्ताञ्च महाशान्तिं गान्धर्व्वीञ्च प्रयोजयेत्॥ ३३॥
अश्वरक्षाविधानाय ऋक्षं सम्मान्य पावकम्।

---

१। स्तम्भते। गः।
२। रक्ताङ्गः सन्नकण्ठश्च कम्पकश्वासससंयुतः। गः।
३। फेनातिघ्राखान् वेदी। खः।
४। उदकस्य समीपे वा। गः।
५। यज्ञभूमिं विनिर्मित्य तच्चैव वुधदेवता। गः।
६। सर्व्वे ग्रहाः गृह्णन्ति वाजिनम्। गः।

सुविस्फुरितसर्व्वाङ्गः[१] सलिले निश्चलस्थितः।
ह्रेषते विस्वरं[२] वाजी वरुणग्रहपीड़ितः॥२२॥
मुहूर्त्तावस्थितस्तोये जानुभ्यां योऽवगच्छति[३]।
मुखपाकश्च[४] यस्यान्ते तं विन्द्यादुदकग्रहम्॥२३॥
उद्वर्त्तिताक्षः[५] खिन्नश्च संगृहीतहनुश्च यः।
कम्पमानश्च यो वाजी स रविग्रहपीड़ितः॥२४॥
स्तब्धग्रीवो न जानाति कशाघातं सुदुर्म्मनाः।
जलग्रहगृहीतोऽश्वो वामपार्श्वेन निश्चलः॥२५॥
शूनाक्षिकूटो रक्ताक्षः[६] कृशः स्खलति यो मुहुः।
बृहस्पतिगृहीतोऽसौ नैव जीवति तादृशः॥२६॥

---

२२। सुविस्फुरितसर्व्वाङ्ग अतिशयकम्पान्वितकलेवरः। खिन्न-स्फुरितर्व्वाङ्ग इति पाठे खिन्नं घर्म्माक्तं। विस्वरं विकृतस्वरं।

२३। मुखपक्वो मुखस्रावः। त्वचि पाक इति द्वितीयपाठे त्वचः पक्ववद्वेदनावत्वमित्यर्थः।

२४। संगृहीतहनुः स्तब्धहनुः।

---

१। भिन्नस्फुरितसर्व्वाङ्गः। गः।
२। निस्वलः। गः।
३। योऽवतिष्ठते। गः।
४। त्वचि पाकस्च यस्य स्यात्तं विन्द्यादुदकं ग्रहैः। गः।
५। ऊर्द्ध्वं वर्त्तितचक्षुस्तु खिन्नस्तब्धहनुश्च यः। गः।
६। शूनाक्षिपेद्वकृत्रस्य। खः।

नोद्विजेत्त्वाहतः[१] पृष्ठे कशया पाणिनापिवा ।
तं वै दीर्घस्वरग्रस्तं[२] दृष्ट्वैव परिवर्जयेत् ॥ १७ ॥
श्यामं[३] जिह्वामुखं यस्य नष्टदृष्टिस्मृतिर्भवेत् ।
ऊर्द्ध[४]ग्रहकृतं दोषं तस्य[५] दीनस्य निर्द्दिशेत् ॥ १८ ॥
तालुजिह्वे[६] च नेत्रे च वृषणौ मेढ्रमेव च ।
श्यावं रूपं च[७] यस्य स्याद् गात्रगौरवमेव च ॥ १९ ॥
तस्य स्वेदपरीतस्य बुद्धिमान्[८] वरुणग्रहैः ।
कृतं दोषं महाघोरं[९] स्तब्धाङ्गस्य विनिर्द्दिशेत् ॥ २० ॥
ह्रेषते[१०] सततं यस्तु हृष्टरोमा तुरङ्गमः ।
स्तब्धाक्षो जृम्भतेऽत्यर्थं तस्यापि सलिलग्रहः[११] ॥ २१ ॥

---

१७ । नोद्विजेत् न भीतो भवेत् । दीर्घस्वरग्रस्तमिति दीर्घेण स्वरेण रावेण ग्रस्तमाक्रान्तं । मृगग्रहग्रस्तमिति पाठे, तन्नामकेन ग्रहेण ग्रस्तम् ।

१८ । श्यावमिति पाठे कृष्णपीतं, जिह्वामुखकृष्णत्वं दर्शनस्मरण-नाशश्चेति सर्वं ऊर्द्धनामकग्रहजनितमित्यर्थः । दीनस्य भीतस्य स्तब्धाङ्गस्येति पाठे जड़ीभूतकलेवरस्य ।

---

१ । हतः । गः ।
२ । मृगग्रहग्रस्तं । गः ।
३ । श्यावं । गः ।
४ । ऊर्द्धं । गः ।
५ । स्तब्धाङ्गस्य । गः ।
६ । तालुजिह्वा च । गः ।
७ । श्यावं तपस्य । खः ।
८ । मेहमानस्य बुद्धिमान् । खः ।
९ । वरुणग्रहकृतं रोगं । खः ।
१० । ह्रेषते । गः ।
११ । सालिलग्रहः । गः ।

वलिग्रहगृहीतोऽसौ[1] स्तब्धकर्णशिरोधरः[2] ॥ १० ॥
अकस्माद् यस्य लोमानि शीर्य्यन्ते यश्च लङ्गति ।
शूनपश्चिमपादस्य[3] तस्य काशिग्रहं[4] वदेत् ॥ ११ ॥
सहसा कुपितो वाजी स्वानि गात्राणि खादति ।
प्रोथते सततञ्चैव संकाशिग्रहपीड़ितः ॥ १२ ॥
खिन्नाङ्गो[5] वेपमानश्च जानुभ्यां यश्च[6] तिष्ठति ।
कौवेरग्रहसंदुष्टं[7] तं विन्द्यात् कष्टजीवितम् ॥ १३ ॥
हेषते सततं यस्तु पश्चादात्मानमीक्षते[8] ।
सुसंस्थितग्रहाविष्टः[9] स विज्ञेयो मनीषिभिः ॥ १४ ॥
स्तब्धेन गुरुणा चैव वेपमानेन पण्डितः[10] ।
गात्रेण विद्याद् वाहं तु वैशाखग्रहसेवितम् ॥ १५ ॥
ग्रीवां चैव तथा जिह्वां परिवर्त्त्य मुहुर्मुहुः ।
जृम्भते पूर्व्वकायेन शीतोच्छासी विशोचनः[11] ॥ १६ ॥

---

१ । कलिग्रहगृहीतः । खः ।
२ । स्तब्धकर्णाश्रुताधरः । खः ।
३ । शूनपश्चिमकायस्य । गः ।
४ । सकाशीग्रहमादिशेत् । गः ।
५ । खिन्नाङ्गैः । गः ।
६ । योऽवतिष्ठते । गः ।
७ । कौवेरग्रहसंग्रस्तं विद्यात्तस्य च जीवितम् । गः ।
८ । आत्मनि लीयते । गः ।
९ । ग्रहैर्दृष्टः । गः ।
१० । पीड़ितः । गः ।
११ । विशोधनः । गः ।

सुसंस्थितश्च[1] कौवेरो वैशाखश्च मृदुग्रहः।
ऊर्द्धश्च दारुणश्चैव षड्विधो वरुणग्रहः॥ ३॥
बृहस्पतिश्च सोमश्च तथा[2] सूर्य्यग्रहोऽपरः।
एते प्रोक्ता ग्रहाः सर्व्वे दारुणा मुनिसत्तमैः॥ ४॥
एतैर्दृष्टाः स्फुटं वाहा नैव जीवन्ति सर्व्वदा।
चिह्नं सर्व्वं[3] प्रवक्ष्यामि यथा शास्त्रे व्यवस्थितम्॥ ५॥
कम्पते पूर्व्वकायस्तु निश्चलो यस्य पश्चिमः।
पश्चाल्लङ्गी सकम्पश्च खिद्यते हरिपीड़ितः॥ ६॥
भवन्ति विन्दवो रक्ता अकस्माद् यस्य चक्षुषः।
हरिताक्षगृहीतोऽश्वो ग्रासद्वेषी च जायते॥ ७॥
प्रस्विन्नगुरुगात्रश्च लुब्धचंक्रमणक्रियः।
मीलतोन्मीलता चाक्ष्णा स्वभावान्नित्यमेव च॥ ८॥
विरूपाक्षगृहीते तु कम्पः स्वेदश्च जायते।
उत्थितः सहसा यस्तु मूर्द्धा पतति भूतले॥ ६॥
स्तब्धाक्षो मुच्यते केशैस्तथा वालैः[4] खुरैरपि।

---

७। अत्र हरिताक्षस्थले लोहिताक्ष इति पाठो भवितुं युक्तः। भवन्तीत्यादयो यो भूतले इत्यन्ताः श्लोकाः ख० पुस्तके न सन्ति।

---

१। सुसंस्थितं। खः।
२। ततः। गः।
३। चिह्नमेषां। गः।
४। रोमखुरैरपि। गः।

अश्वगन्धावचाकुष्ठरोचनामधुसर्षपैः ।
रक्षार्थं पुटिका कार्य्या कण्ठे कर्पटवेष्टिता ॥ १४ ॥
गोमूत्रघृतदुग्धैश्च दध्ना च गोमयेन च ।
पञ्चगव्यं पचेत् सर्पिस्तस्य पानार्थमुत्तमम् ॥ १५ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे उन्माद-चिकित्सिते षट्पञ्चाशत्तमोऽध्यायः ।

---

## अथ सप्तपञ्चाशत्तमोऽध्यायः ।

### ग्रहनामलक्षणानि ।

दृश्यन्ते यानि लिङ्गानि ग्रहदोषेण वाजिनाम् ।
तानि सम्यक् प्रवक्ष्यामि ग्रहनामानि यानि तु[१] ॥ १ ॥
लोहिताक्षो विरूपाक्षो हरिर्वलिस्तथैव च ।
स काशी चैव विख्यातः संकाशी च परः स्मृतः ॥ २ ॥

---

चिकित्सैव कार्य्या केवलं कपोतकनिषीदे हरितादिपानविशेषः प्रयोज्य इत्यर्थः ।

१ । अयं ग्रहग्रहचिकित्साध्यायो गपुस्तके खण्डितोऽस्ति ।

---

१ । ग्रहाणां यानि यानि च । खः ।

निम्बपत्रवचाकुष्ठलाक्षालवण[1]हिङ्गुभिः ।
गोलोमखुरशृङ्गैश्च पीतसिद्धार्थकैर्यवैः[2] ॥ ८ ॥
उलूककाकपक्षैश्च भूतकेशैश्च पाण्डुभिः[3] ।
सर्पनिर्मोकसंयुक्तैः कुर्य्याच्चूर्णं विचक्षणः ॥ ९ ॥
अर्ककाष्ठाग्निनाधूमं तेन चूर्णेन दापयेत् ।
घृतयुक्तेन वाहानामुन्मादव्याधिशान्तये ॥ १० ॥
गोकुरङ्गकगोधानां[4] शिखिनः शशकस्य च ।
पित्तानि दापयेत् प्राज्ञो यथालब्धानि वा पुनः ॥ ११ ॥
रसोनहिङ्गुतगरान् कुष्ठसर्षपसैन्धवान्[5] ।
मनःशिलाञ्च संयुक्तां पित्तैः सार्द्धं प्रदापयेत् ॥ १२ ॥
महिषच्छागमूत्रेण[6] वर्त्तिं कृत्वा ततः पुनः ।
उन्मादितेषु[7] सर्व्वेषु तया कुर्य्यात्तथाञ्जनम् ॥ १३ ॥
तया छायां विनिष्कास्य जायते सुखमुत्तमम् ॥

---

९ । रजोवृतः रजोभिर्धुलिभिर्वृत इव ।

१३-१४ । मन्यास्तम्भादिषु सर्व्वेषु व्यातव्याधिषु उत्कर्णक-

---

१ । रसोन । गः ।

२ । तथा । गः ।

३ । उलूकस्य च पक्षैश्च भूतकेशिपलाण्डुभिः । गः ।

४ । गोकुरङ्गाभ्रलूकानां गोधानां । गः । पित्तमादाय सर्व्वेषां । गः ।

५ । सैन्धवसर्षपान् । गः ।

६ । भिषक् छागस्य मूत्रेण ।

७ । उन्मादितं तलं कृत्वा वर्त्त्यां छायाविशुध्या । खः ।

# अथ षट्पञ्चाशत्तमोऽध्यायः ।

उन्मादनिदानलक्षणम् ।

यद्युन्मादः[१] समुद्दिष्टः श्लेष्मपित्तसमुद्भवः ।
तथापि[२] न विना वातमुन्मादो जायते ध्रुवम् ॥ १ ॥
प्रकोपकारणैः प्रोक्तैः[३] कुपिते मातरिश्वनि ।
उन्मादो जायतेऽश्वस्य तस्य रूपञ्च वक्ष्यते ॥ २ ॥
यातुमिच्छति यः स्थित्वा रज्जुं दन्तैश्च खादति ।
खादत्यकस्माद् यवसं पुनश्चैव न खादति ॥ ३ ॥
कदाचिद्बुध्यते संज्ञां कदाचिच्च न बुध्यते ।
स्वभावान्यात्वसंयुक्तं तद्बुद्ध्वा कारयेत् क्रियाम् ॥ ४ ॥
हिङ्गुयुक्तं पुराणस्य सर्पिषः पानमुत्तमम् ।
उन्मादिनस्तुरङ्गस्य घृताभ्यङ्गस्तु सर्व्वदा ॥ ५ ॥
उत्कर्णकादिरोगेषु साग्निकर्म्माणि यानि तु ।
भोजनाभ्यङ्गपानानि निरूहास्थापनानि[४] च ॥ ६ ॥
तानि[५] चास्य प्रयोज्यानि बद्ध्वा चैव दृढं हयम् ।
अबद्धेषु क्रियां कर्त्तुं नैवोन्मादिषु शक्यते[६] ॥ ७ ॥

---

१ । यदि नाम । खः ।
२ । तथापित्तं विना वात उन्मादो वायुतो ध्रुवम् । गः ।
३ । सुप्ते । गः ।
४ । तानि सम्यक् प्रयोजयेत् । गः ।
५ । निपात्य भूमौ तुरगं बद्ध्वा चैव दृढं वधः । खः ।
६ । कारयेत् । गः ।

हनुद्वयस्य[1] विक्षेपाद्घोणाभेदाच्च बुद्धिमान्।
नासापुटविकाराच्च अर्द्दितं रोगमादिशेत् ॥ १२ ॥

एषां चिकित्साः।

एते वातात्मका रोगा मन्यास्तम्भादयः स्मृताः।
उत्कर्णकक्रियाः[2] सर्व्वा वाहानां तेषु कारयेत् ॥ १३ ॥
उत्कर्णकचिकित्सा च पानमेतद् विशिष्यते।
कपोतकनिषादस्य तद्विन्द्याद्वक्ष्यमाणकम्[3] ॥ १४ ॥
हरितान्[4] यावशूकांश्च पिष्ट्वालम्बुषया सह।
आलोड्य तिलतैलेन ततः पानं प्रदापयेत् ॥ १५ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे वातव्याधिचिकित्सिते पंचपञ्चाशत्तमोऽध्यायः।

---

१३। अयं सार्द्धश्लोको ग-पुस्तके नास्ति। बलवर्द्धनं कर्म्म बृंहणम्।

---

१। हनुद्वयं संप्रच्छिन्नं यस्य नासा च भिद्यते। नासापुटविकारैश्च अर्द्दितः परिकीर्त्तितः। खः।

२। उत्कर्णकां क्रियां सर्व्वां दाह्यितामेषु। खः।

३। दद्यात्तद्वक्ष्यमाणकम्। गः।

४। हरितं यवशूकञ्च काशश्चैव विशेषतः।

संचासी चैव यः पूर्व्व पुनः स्वस्थो भृशं भवेत्।
प्रस्विन्नाङ्गस्य तस्याशु मृगरोगं समादिशेत्॥ ६॥
मृगरोगी यदा वाजी जृम्भावान् जायते मुहुः।
मृगजृम्भं तदा तस्य व्याधिं समुपलक्षयेत्॥ ७॥
गत्वा यः पूर्व्वकायेन पुनः पश्चाच्च[1] गच्छति।
स्तब्धाङ्गो वेदनार्त्तश्च तस्याक्षेपकमादिशेत्[2]॥ ८॥
वक्रः पश्चिमकायेन मण्डलैर्यो विचेष्टते[3]।
मन्दश्वासश्च दीनश्च भ्रामिताक्षो रजोहतः[4]॥ ९॥
पश्चात्कायेन यो वाजी भूमिं गत्वा निषीदति।
खेदश्चाग्रिमकायेन स्वस्थश्च परिवर्त्तते[5]॥ १०॥
कृच्छ्रादुत्थापितश्चापि पुनर्यो याति[6] मेदिनीम्।
कपोतकनिषादीति स ज्ञेयः कृच्छ्रजीवनः॥ ११॥

---

६। प्रस्विन्नाङ्गस्य घर्म्माक्तकलेवरस्य।

---

१। पुनरश्वस्य। गः।
२। तस्याधिक्षेपमादिशेत्। गः।
३। विचेष्टयेत्। खः।
४। रुजान्वितः। गः।
५। तेनैव परिवर्द्धयेत्। गः।
६। पुनर्यो व्रणवेदनः। गः।

# अथ पञ्चपञ्चाशत्तमोऽध्यायः ।

वातव्याधौ

मन्यास्तम्भादिलक्षणानि ।

नमत्युन्नमति[१] ग्रीवा स्तब्धा च यस्य वाजिनः ।
मन्यास्तम्भं विजानीयाद्रोगं तस्य सुदारुणम् ॥ १ ॥
एवं विधायां ग्रीवायां स्फुरणं यस्य विद्यते[२] ।
मन्याचालीति[३] तं विद्यान्मन्दाहारं तुरङ्गमम् ॥ २ ॥
संगृहीतौ हनू यस्य[४] निश्चलौ यस्य वाजिनः ।
लाला स्रवति[५] चात्यन्तं विन्द्यात्तस्य हनुग्रहम् ॥ ३ ॥
स्तब्धं[६] पृष्ठोन्नतञ्चैव रन्ध्रौ क्षिप्तस्य यस्य च ।
तस्य पृष्ठग्रहं रोगमूर्द्धग्रीवस्य निर्द्दिशेत् ॥ ४ ॥
एकः प्रलम्बते कर्णः शरीरार्द्धञ्च शुष्यति ।
शूनो[७] भवति चाश्वश्च रोगे चैकाङ्गसंज्ञके ॥ ५ ॥

---

२ । एवं विधायां स्तब्धायामित्यर्थः । स्फुरणं कम्पनम् ।

---

१ । नचात्युन्नमति ग्रीवा तथा यस्य हि वाजिनः । गः ।
२ । दृश्यते । खः ।
३ । मन्यावनीति । गः ।
४ । हनुर्यस्य निश्चलो वापि वाजिनः । खः ।
५ । लालास्रावीति चात्यर्थं । गः ।
६ । तद्ध्यमानञ्च नष्टञ्च रन्ध्रं । गः ।
७ । शूनं भवतु । गः ।

पञ्चमूलकषायेण कृत्वा मांसरसं बुधः ।
यवागूं साधयेत्तेन तिलमिश्रैश्च तण्डुलैः ॥ ८ ॥
वसया[१] तिलतैलेन सर्पिषा चापि संस्कृतम् ।
भोजने तां भिषग्दद्यादुत्कर्णकनिवारणीम् ॥ ९ ॥
ग्रासार्थे दापयेद्दूर्व्वां पाने वोष्णजलं पिबेत्[२] ।
चित्रकाद्यैस्तथा तैलैः कर्णयोस्तस्य पूरणम् ॥ १० ॥
उत्कर्णको यदाश्वस्य क्रियया नोपशाम्यति ।
वह्निं प्रदापयेत् कुक्षौ[३] ललाटे कर्णयोस्तथा ॥ ११ ॥
ग्रासद्वेषी सदाध्मातः[४] कृच्छ्रमूत्रपुरीषकृत् ।
लालाव्रण[५]युतः श्वासी उत्कर्णी नैव जीवति[६] ॥ १२ ॥
स्वेदस्निग्धो निवातञ्च स्थानं प्रावरणानि च ।
पयांसि भोजने स्वादुकट्वम्ललवणानि च ।
बृंहणं सर्व्वथा वैद्यः कुर्य्यादुत्कर्णपीड़िते ॥ १३ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे उत्कर्ण-चिकित्सिते चतुःपञ्चाशत्तमोऽध्यायः ।

---

१० । कर्णपूरणे तैलस्य कुडवो मात्रा ।

---

१ । पयसा । गः ।
२ । यथा । गः ।
३ । पुच्छे । गः ।
४ । समाध्मातः । गः ।
५ । ललाटव्रणः । गः ।
६ । सिध्यति । गः ।

अतसीभिः शणै[१]र्माषैस्तिलधान्यैर्यवैस्तथा।
वस्त्रबद्धपुटः[२] स्वेदः शस्तः काञ्जिकसाधितैः॥ ३॥
जंघा भासस्य[३] सर्पस्य जाङ्गलैः साधितो[४] रसः।
तस्मै पाने हितो दृष्टः शाल्यन्नेन च भोजनम्॥ ४॥
शौकरैर्माहिषैश्छागैरसैर्वा तदभावतः।
पञ्चमूलकषायेण सिद्धस्तैलेन भावितः[५]॥ ५॥
गुड़तैलयुता वापि सुरा पाने प्रशस्यते।
शुनः छित्वा शिरो रक्तं गृहीत्वा दापयेत् ततः[६]॥ ६॥
छागमार्जारमेषाणां[७] रक्तं सद्यः[८] स्रुतं भिषक्।
दापयेत् पञ्चमूलस्य कषायेण समन्वितम्॥ ७॥

---

३। अतसी (मशिना)।

५। अयं पाठो ग-पुस्तके नास्ति। रसैरित्यत्र रस इति पाठः साधुः।

६। गुड़तैलयोर्यथाक्रमं पलाष्टकं प्रस्थार्द्धं च देयम्।

७। अयं पाठो ग-पुस्तके नास्ति।

---

१। सवर्णैर्माषैः। खः।

२। वस्त्रबद्धपुटस्वेदस्तप्तकाञ्जिकसाधितः। गः।

३। चर्म्म नागस्य। गः।

४। शास्त्रकोविदः। खः।

५। मूर्च्छितः। गः।

६। पुनः स्थित्वा ततो रक्तं गृहीत्वा दापयेत्सदा। गः।

७। मेषमार्जारछागानां। गः।

८। रक्तं दद्यात् स्रुतं। गः।

सप्त[1] पञ्च प्रदातव्यः त्रिफलाक्वाथयोजितः ।
ततो जातबलं बुद्धा[2] तुरगं भिषजांवरः ॥ १३ ॥
यथेष्टाहारचेष्टन्तु कारयेत् क्रमशः[3] पुनः ।
वातजं श्लेष्मजं बुद्धा साधयेदग्निना भिषक् ॥
पित्तजं सम्यगालोक्य[4] दहेत् क्षारेण बुद्धिमान् ॥ १४ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे अर्शश्चिकित्सिते त्रिपञ्चाशत्तमोऽध्यायः ।

---

## अथ चतुःपञ्चाशत्तमोऽध्यायः ।

### उत्कर्णलक्षणचिकित्सितम् ।

कर्णौ स्तब्धौ तथा पुच्छं स्तब्धं गात्रमकिञ्चन ।
वातात्मकेन वाहस्य भवेदुत्कर्णकेन हि ॥ १ ॥
वसया[5] घृततैलेन तस्याभ्यङ्गः प्रशस्यते ।
प्रसारण्यादिभिस्तैलैः कुर्य्याच्चैवानुवासनम् ॥ २ ॥

---

१३ । सप्त पञ्चेति सप्ताहं तथा पञ्चाहं द्वादशाहमित्यर्थः ।

१४ । वातजे श्लेष्मजे वा अग्निदाहः पित्तजे क्षारदाहः प्रयोज्य इत्यर्थः । क्रमणमिति पाठे पादचारणमर्थः ।

---

१ । सप्ताहकं । खः ।
२ । बद्धा । गः ।
३ । क्रमणं बुधः । गः ।
४ । वातजं ज्ञात्वा । गः ।
५ । पयसा । गः ।

एकच्छिद्रेण वै कर्म्म[१] कुर्य्याच्छेदादि[२]पूर्व्वकम् ।
पातितस्य सुबद्धस्य तुरगस्य[३] विचक्षणः ॥ ६ ॥
घृताभ्यक्ते गुदे क्षिप्त्वा युक्त्या यन्त्रं द्विछिद्रकम् ।
ततः सम्यक् समासेन अर्शस्तद्बुद्धिमान् भिषक् ॥ ७ ॥
यन्त्रं द्विछिद्रमाकृष्य प्रक्षिपेदेकरन्ध्रकम् ।
यन्त्रं छिद्रान्तरस्थन्तु अर्शः कृत्वा विचक्षणः ॥ ८ ॥
छित्त्वा तीक्ष्णेन शस्त्रेण दहेल्लौहशलाकया ।
सम्यग्दग्धं भिषग्बुद्ध्वा मधुयुक्तेन सर्पिषा ॥ ९ ॥
लेपयेद्व्रणदेशन्तु यन्त्रञ्चैवापकर्षयेत् ।
मुक्त्वा वाहं समुत्थाप्य वाजिं वातेषु चारयेत्[४] ॥ १० ॥
अतिशीतं जलं मूर्ध्नि चिके चापि प्रदापयेत् ।
तस्यां रात्रौ प्रदातव्यो घासो वाहस्य यत्नतः ॥ ११ ॥
त्रिफलाक्वाथसंयुक्तं प्रातर्दद्याच्च गुग्गुलुम् ।
शृतशीतं जलं पाने घासे[५] दूर्व्वा च शस्यते ॥ १२ ॥

---

६ । पातितस्य सुबद्धस्येति निपात्य सुयन्त्रितस्येत्यर्थः ।
१० । वाजिमितीकारान्तवाजिशब्दोऽप्रसिद्धः ।

---

१ । एकच्छिद्रे ततःकर्म्म । गः ।
२ । भेदादि । गः ।
३ । प्रतीतस्य । गः ।
४ । वाजिं प्रश्वास्य वाहयेत् । खः ।
५ । ग्रासे । गः ।

# अथ त्रिपञ्चाशत्तमोऽध्यायः।

अर्शोलक्षणम्।

कृशो रुक्षश्च मन्दाशी बलहीनशिरान्वितः[१]।
अर्शसा क्रियते वाजी गुदमार्गगतेन च ॥ १ ॥
जम्बू[२]वदरखर्ज्जूरफलरूपञ्च तद्भवेत्[३]।
गुदाभ्यन्तरजं मांस[४]मेकद्विबहुसंख्यकम् ॥ २ ॥

तच्चिकित्सा।

क्रियां तस्य प्रवक्ष्यामि यथाशास्त्रं समासतः।
येन शाम्यति[५] वाहानां भृशमर्शो विवर्द्धितम् ॥ ३ ॥
यन्त्रं षड़ङ्गुलं विद्वान् छिद्रं[६] पञ्चाङ्गुलं भिषक्।
अधोऽर्द्धाङ्गुलविस्तीर्णं[७] दैर्घ्येणाप्यङ्गुलत्रयम्[८] ॥ ४ ॥
उभयोः पार्श्वयोस्तस्य कुर्य्याच्छिद्रद्वयं बुधः।
अर्शस्तेन तु वाहस्य द्विच्छिद्रेण विलोकयेत्[९] ॥ ५ ॥

---

२। अर्शःसु मांसाङ्कुरा जम्बूफलाद्याकारा द्वित्र्यादिबहुसंख्यकाः गुदाभ्यन्तरे जायते इत्यर्थः।

---

१। शिरोद्भवः। खः।
२। जम्बूफलञ्च। खः।
३। यद्भवेत्। खः।
४। मूलम्। गः।
५। शाम्येत। गः।
६। शिरः। गः।
७। चतुरङ्गुलविस्तीर्णं। गः।
८। कुर्य्यात् पृष्ठाङ्गादिभिःक्षतम्। गः।
९। अवलोकयेत्। गः।

हृदयस्याधरे भागे ऊर्द्धभागे च नाभितः ।
अधोवा नाभितः कुर्य्याच्छेदनं चतुरङ्गुले ॥ २५ ॥
शस्त्रेणोत्पलपत्रेण वामभागे विचक्षणः ।
एकमेवाङ्गुलं शस्त्रं कुक्षौ चापि प्रवेशयेत् ॥ २६ ॥
वेधव्रणे ततस्तस्मिन् नालिकां वस्त्रवेष्टिताम् ।
प्रक्षिप्य गालयेद्वारि यावद्वै कोष्ठलाघवम् ॥ २७ ॥
स्वच्छतोयपरिस्रावे तदसाध्यं समादिशेत् ।
आलोहिते सरक्ते वा साध्यं विद्वान् समादिशेत् ॥ २८ ॥
आकृष्य नलिकां प्राज्ञः पट्टकेन तथा व्रणम् ।
घृतप्लुतेन बध्नीयाद्दत्वा कर्पटचीरकम् ॥ २९ ॥
मुक्ता चोत्थाप्य वाहन्तु वाग्भिः प्रसारयेद्भिषक् ।
कषायैः क्षीरवृक्षाणां व्रणञ्चाश्च्योतयेत्ततः ॥ ३० ॥
विद्धोदरस्य वाहस्य निर्वा .... .... .... ....।
उदकञ्चैव घासञ्च नो दद्याद्दिवसत्रयम् ॥ ३१ ॥
ततो दूर्व्वा प्रदातव्या उदकञ्चापि संस्कृतम् ।
क्वथितं क्षीरवृक्षाणां वल्कलैर्मधुयोजितम् ॥ ३२ ॥
ततो रूढ़व्रणं वुद्धा सञ्जातवलमेव च ।
एतान् वै खादने दद्याद् युक्त्या चैव सुसंस्कृतान् ॥३३॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे उदरचिकित्सिते द्विपञ्चाशत्तमोऽध्यायः ।

पीततैलं विरिक्तञ्च दूर्व्वाघासेन पोषयेत् ।
आध्मानादुदरस्यैव पुनः कुर्य्यात् क्रियामिमाम् ॥ १६ ॥
त्रिवृद्दन्ती वचा चैव कषायेण च साधितम् ।
वातोदरे घृतं शस्तं पाने युक्त्या प्रयोजितम् ॥ १७ ॥

पित्तोदरचिकित्सा ।

पिप्पलीशृङ्गवेरञ्च दन्त्यारग्वधचित्रकम् ।
दध्ना मूत्रन्ततस्तैलं पचेन्मृदग्निना बुधः ॥ १८ ॥
पित्तोदराभिभूतस्य पानमेतत् प्रदापयेत् ।
हिङ्गुयुक्तं तुरङ्गस्य यथाग्नि च यथाबलम् ॥ १९ ॥

श्लेष्मोदरचिकित्सा ।

वातोदरे समुद्दिष्टां श्लेष्मजे कारयेत् क्रियाम् ।
सन्निपातसमुत्थे तु कुर्य्यात् साधारणीं क्रियाम् ॥ २० ॥
पिण्डीकृतं त्रिकटुकं क्षारसैन्धवयोजितम् ।
दत्वानुपाययेन्मूत्रं माहिषं वाथ सौरभम् ॥ २१ ॥
प्रति प्रभाते कर्त्तव्यं तुरङ्गस्य यथाबलम् ।
प्लीहोदरविनाशाय विधिरेष विजानता ॥ २२ ॥
या क्रिया विहिता पूर्व्वं वातोदरचिकित्सिते ।
सैव बद्धगुदे कार्य्या स्रावे पित्तजेऽपि वा ॥ २३ ॥
बद्धा वाहं दृढं विद्वान् धरण्यां विनिपातयेत् ।
उदकोदरे ततः कर्म्म कुर्य्याद्भिषगतन्द्रितः ॥ २४ ॥

ष्ठीहोदरे विजानीयाद्देहे च कृशतां[1] तथा॥ ८॥
अल्पमल्पं पुरीषन्तु कृच्छ्रादातं[2] प्रमुञ्चति।
आध्मातकुक्षिर्यो वाजी तस्य बद्धगुदं वदेत्॥ ९॥
आध्मातकोष्ठः[3] कुरुते फेनिलं रक्तमेव च।
परिस्रावोदरी मूत्रं दाहरुग्वर्जितं[4] सदा॥ १०॥
अत्यन्ताध्मानकञ्चैव जलपूर्णमिवोदरम्।
कृशस्य यस्य[5] वाहस्य भवेत्तस्योदकोदरम्[6]॥ ११॥

वातोदरचिकित्सा।

पञ्चमूलकषायेण सहितां तैलसंयुताम्[7]।
यवागूं भोजयित्वा तु ततः स्नेहै[8]र्निरूहयेत्॥ १२॥
पिप्पलीलवणक्षारपाठाचित्रकहिङ्गुभिः।
कल्कीकृतैः पचेत्तैलं मूत्रैर्गोमाहिषादिभिः[9]॥ १३॥
तस्मिन्नेव त्रिवृच्चूर्णं स्नुहीदुग्धेन भावितम्।
पलार्द्धमात्रया क्षिप्त्वा पचेत्तैलं विचक्षणः॥ १४॥
बलं वीक्ष्य तुरङ्गस्य तैलपानं प्रदापयेत्।
अतिपानप्रयोगेण मृत्योर्गोचरमृच्छति॥ १५॥

---

१५। अतिपानादि श्लोकद्वयं -पुस्तके नास्ति।

---

१। तद्देहे कृशता तथा।
२। कृच्छ्रदारञ्च। गः।
३। आध्मातकोष्ठैः। खः।
४। रुजादाहविवर्जितम्। गः।
५। यत्तु। गः।
६। विन्द्यादुदरकोदरम्। गः।
७। साधितां वा प्रदापयेत्। गः।
८। तैलं। गः।
९। गोमूत्रैर्माहिषान्वितैः। गः।

## अथ द्विपञ्चाशत्तमोऽध्यायः ।

अष्टविधोदरनामलक्षणानि ।

अष्टभेदस्य वक्ष्यामि उदरस्य यथाक्रमम् ।
चिह्नं चिकित्सितञ्चैव यथा शास्त्रे व्यवस्थितम् ॥ १ ॥
वातजं पित्तजञ्चैव कफजं सन्निपातजम् ।
प्लीहोदरं बद्धगुदं परिस्राव्युदकोदरम् ॥ २ ॥
आध्मातमुदरं यस्य वाजिनो वेदनान्वितम् ।
वर्च्चसो रूक्षता चैव सशब्दश्चैव मारुतः ॥ ३ ॥
पुरीषे च कृते यस्य गुदं निर्यांति सर्व्वदा ।
क्षीणस्याल्पाशनस्यैव तस्य वातोदरं वदेत् ॥ ४ ॥
हारिद्रविण्महाकुक्षिः कृशः स्वेदी महाशनः ।
उष्णनिःश्वाससंयुक्तो भवेत् पित्तोदरी हयः[1] ॥ ५ ॥
उदरं वर्द्धते यस्य मन्दाग्नेः शोथसंयुतम्[2] ।
अलसस्य[3] कृशस्यैव विन्द्यात् श्लेष्मोदरं भिषक् ॥ ६ ॥
वातपित्तकफानान्तु रूपं यस्य च दृश्यते ।
सन्निपातसमुत्थानं तद् विन्द्यादुदरं महत्[4] ॥ ७ ॥
वर्णान्यत्वं महत्वञ्च काठिन्यञ्च विशेषतः ।

---

२ । परिस्राव्युदकोदरमिति परिस्राव्युदरं दकोदरञ्च ।

५ । हारिद्रविट् पीतपुरीषः । महाकुक्षिरिति कुक्षेर्महत्वमुक्तम् ।

---

१ । भवेत् पित्तोदराक्रयः । गः ।    ३ । सालसस्य । खः ।
२ । शोथसंयुतम् । घः ।    ४ । ततः । गः ।

क्षारतैलं जलं कोष्णं पानार्थञ्च प्रदापयेत् ।
खदिरक्षीरिणां क्वाथः सुखोष्णो व्रणधावनः ॥ ६ ॥
तिलक्षारैः पयःस्विन्नैः ससर्पिष्कैः प्रलेपनम् ।
धूपनं कटुमध्वाज्यैरारालापीलुदारुभिः ॥ ७ ॥
सप्तसप्तपचसल्लक्या धवस्यारग्वधस्य च ।
कुटजस्य त्वचश्चैव चूर्णिता व्रणरोपणाः ॥ ८ ॥
लवङ्गानि हरिद्रे च सूर्य्यवल्ली सरोचना ।
अरुष्करोऽग्निकदरः त्रिफलानिकुटत्वचः ॥ ९ ॥
एभिस्तैलं सगोमूत्रं साधितं व्रणरोपणम् ।
भोजयेत्तिक्तमुद्गांश्च मधुतैलकणान्वितान् ॥ १० ॥

इति श्रीमहासामन्तजयदत्तविरचितेऽश्वशास्त्रे श्रीनीतरोगचिकित्सिते एकपञ्चाशत्तमोऽध्यायः ।

---

७ । अराला सर्जरसः । पीलुः स्वनामख्यातः फलविशेषः । धवो (धाओया) इति प्रसिद्धः ।

९ । सूर्य्यवल्ली अर्कपुष्पीलता । अरुष्करो भल्लातः । अग्निर्निम्बूकः । कदरः श्वेतखदिरः । निकुठः अक्षोटः ।

## अथैकपञ्चाशत्तमोऽध्यायः ।

औनीतरोगलक्षणम् ।

गुरुभिर्भोजनैर्ग्रासैरभिष्यन्दकरैस्तथा ।
अष्टस्याकर्म्मिणोऽश्वस्य हयीमनभिगच्छतः ॥ १ ॥
स्वस्थानात् प्रच्युतं शुक्रं मेहने प्रतिहन्यते ।
तेन शुक्राभिघातेन मूत्रकृच्छ्रं प्रजायते ॥ २ ॥
ततो रक्तप्रकोपेण शूलं भवति मेहने ।
प्रक्लिन्नं प्रबलं पक्वं कण्डूमत्पिड़कान्वितम् ॥ ३ ॥
स्वस्थाने प्रविशेन्नैव मक्षिकाभिः समावृतम् ।
औनीताख्यं तमातङ्कं निर्द्दिशेत्तस्य वाजिनः ॥ ४ ॥

चिकित्सा ।

उपाण्डञ्चैव कोष्ठञ्च मात्रायान्तु विरेचयेत् ।
प्रच्छयेन्मूत्रकोपञ्च स्नानं वाज्येन सेवयेत् ॥ ५ ॥

---

१ । एष अध्यायो ग-पुस्तके न धृतः । ख-पुस्तकानुसारेणाय-मध्यायो गृहीतः । अष्टस्येति आकुञ्चनोत्क्षेपणप्रसारणगमनक्षेपण विरेचनवस्तिनस्यानीति अष्ट कर्म्माणि । तदकर्म्मिण इत्यर्थः ।

२ । प्रक्लिन्नादिकं मेहनविशेषणम् । स्वस्थानात् शुक्राधारात् ।

३ । तत इति मूत्रकृच्छ्रात् स्वस्थाने नैव प्रविशेत् मेहनमिति शेषः ।

५ । प्रच्छयेत् शान्तयेदित्यर्थः ।

रक्ताण्डलक्षणचिकित्सितम् ।

स्पर्शतः कठिनौ रूक्षौ रूपतश्चैव यौ मृदू ।
वृषणौ यस्य वाहस्य स रक्ताण्डः प्रकीर्त्तितः ॥ ३५ ॥
तस्मिन् सर्व्वाः प्रयोक्तव्याः क्रियाः पोताण्डवोधिताः ।
क्षिप्रं सिद्धिर्भवत्येव वैद्यानां शास्त्रशालिनाम् ॥ ३६ ॥
उच्चाण्डवान् प्रयुञ्जीत दुष्टानां मुष्ककालनम् ।
भ्रमणञ्च विशेषेण तेषां कुर्य्याद्दिसप्तकम् ॥ ३७ ॥
भ्रमतामेव दातव्यं जलं ग्रासास्तथैव च ।
घृताभ्यङ्गं च सततं व्रणे गात्रे च वाजिनाम् ॥ ३८ ॥
दातव्यो गुग्गुलुस्तावत् त्रिफलाक्वाथयोजितः ।
रूढ़ं यावद् व्रणं तेषां जायते निरुपद्रवम् ॥ ३९ ॥
स्वादकः खादकश्चैव विरोधी च विशेषतः ।
मुष्कयोर्लागनं वाजी प्रतिहन्ता च सिध्यति ॥ ४० ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे मुष्करोग-चिकित्सिते पञ्चाशत्तमोऽध्यायः ।

---

३७ । उच्चाण्डवानिति पादद्वयं न लगति ।

४० । अस्य श्लोकस्य शेषपादद्वय न सम्यक् लगति ।

वह्नितप्तेन शस्त्रेण तद्व्रणेन सुनिश्चितम् ।
रक्तमेवं तुरङ्गस्य प्रशमं नैव गच्छति[१] ॥ २९ ॥
अग्निवर्णेन येनैव[२] छिन्द्याच्छस्त्रेण दुर्बुधः[३] ।
अबद्धा[४] सुदृढं नाड़ीं तस्य कर्म्म न सिध्यति ॥ ३० ॥
आकृष्याण्डं भिषङ् मुष्कं पूरितं मधुसर्पिषा ।
क्षीरवृक्षकषायेण व्रणवत् समुपाचरेत् ॥ ३१ ॥
प्रशस्तं गुग्गुलोः पानं त्रिफलाक्वाथयोजितम् ।
तच्चंक्रमणशीलस्य घृताभ्यक्तस्य वाजिनः ॥ ३२ ॥
निपात्य भूमौ तुरगं बद्धा चैव दृढ़ं बुधः ।
उत्तानस्य विनिःक्षिप्य पृष्ठं गर्त्तिस्तथैव च ॥ ३३ ॥
पातनादि ततः कर्म्म कुर्य्यात्तुच्छाण्डरोगिणः ।
दृढ़कर्म्मा प्रगल्भश्च शास्त्रविच्च भिषग्वरः ॥ ३४ ॥

---

२९ । श्लोकोऽयं न संगच्छते । सुवर्त्तितेन सुवृत्तेन ।

३२ । प्रशस्तमित्यादिः विरोधी च विशेषत इत्यन्तः पाठो ग-पुस्तके न दृश्यते ।

---

१ । त्वरमेव प्रगच्छति । गः ।
२ । यो नैव । गः ।
३ । दुर्मतिः । गः ।
४ । सुवद्धा । खः ।

पोताण्डलक्षणचिकित्सितम्।

शूनौ पक्वौ तुरङ्गस्य मुष्कौ यस्य सवेदनौ।
त्रिकस्तम्भेन युक्तस्य तस्य पूताण्ड[1]मादिशेत्॥ २३॥
वाताण्ड[2]विहितस्तत्र शिरावेधः प्रशस्यते।
घृताभ्यङ्गश्च कर्त्तव्यो मुष्कयोस्तस्य वाजिनः॥ २४॥
पिप्पलीलोध्रयष्ट्याह्वैरेलवालुकसंयुतैः।
पानं तस्मै हितं दृष्टं सिन्धुमध्वा समन्वितम्[3]॥ २५॥
वर्षाभूसरला[4]श्यामालोध्रचन्दनपद्मकैः।
तोयपिष्टैः प्रलेपस्तु मुष्कयोः परिकीर्त्तितः॥ २६॥
अनया वाजिनो रोगः क्रमया शान्तिमृच्छति।
विपाट्य मुष्कौ शस्त्रेण तदाण्डमपकर्षयेत्॥ २७॥
हस्तेनाकृष्य मुष्काण्डं नाड़ीं बद्धा दृढ़ं भिषक्।
सुवर्त्तितेन सूत्रेण तच्छिन्द्याच्च विचक्षणः॥ २८॥

---

२४। पूताण्डं पोताण्डं पुच्छाण्डमिति च त्रिविधः पाठो पुस्तकद्वये दृश्यते, तेषु पूताण्डं पोताण्डमित्युभयमेव साधु न पुच्छाण्डमिति।

२६। वर्षाभूः पुनर्नवा शुण्ठी वा।

२८। तदाण्डमपकर्षयेदित्यादि वर्त्तितप्तेन शस्त्रेणेत्यन्तः पाठो ग-पुस्तके न दृश्यते।

---

१। पुच्छाण्डम्। गः।
२। वाताण्डे। गः।
३। सीधुमध्वासवान्वितम्। खः।
४। वर्षाभूरमला। खः।

श्लेष्माण्डः स तु[1] विज्ञेय श्चापाण्डीं वेधयेच्छिराम्।
निरूहं[2] कटुतैलेन चाङ्गे[3] स्वेदं च कारयेत्॥१८॥
कुष्ठैलातिविषा[4]लोध्रवचाव्योषहरेणुभिः।
पानं[5] कल्कीकृतैः शस्तं सुरामध्वासवान्वितम्॥१९॥
पञ्चतिक्तकसंसिद्धैः कुर्य्यान्मांसैश्च भोजनम्।
पिप्पलीक्षौद्रसंयुक्तैस्तैलशुण्ठीसमन्वितैः।
व्योषक्षौद्रसतैलै(श्च) कुलत्थैर्वापि भोजयेत्॥२०॥
भ्रामणञ्च[6] तुरङ्गस्य सायं प्रातः शनैर्हितम्।
शुष्को घासः प्रदातव्यः सृतशीतं[7] जलं तथा॥२१॥
किराततिक्तकच्छूनामार्द्रकाणां समायुतम्।
पिण्डं वा देयमश्वस्य श्वयथुव्याधिशान्तये॥२२॥

---

१९। अतिविषा (आतइच्)।

२०। पिप्पलीत्यादिपाठः ख-पुस्तके नास्ति। व्योषेत्यादि पादद्वयं ग-पुस्तके नास्ति।

२२। किरातेत्यादिः श्लोकः ख-पुस्तके नास्ति। कच्छुः कपिकच्छुः।

---

१। श्लेष्माण्डं तस्य। खः।
२। निरूहेत्। गः।
३। चाङ्गस्वेदविचक्षणाः। खः।
४। पिप्पली। गः।
५। पाने। गः।
६। भ्रमणां। खः।
७। सृतं शीतं। गः।

शिरावेधस्तथाभ्यङ्गो[१] वाताण्डे यः प्रकीर्त्तितः।
कर्त्तव्यः स तु[२] पित्ताण्डे यदन्यच्च प्रचक्षते ॥ १३ ॥
कङ्कोलमुस्तकाश्मर्य्यवाजिगन्धेक्षुसाधितः[३]।
क्वाथः पाने हितस्तस्मै शर्करामधुमूर्च्छितः ॥ १४ ॥
पञ्चवल्कस्य कल्कश्च सर्पिषा सह योजितः।
प्रदातव्यः प्रलेपाय गोक्षुरञ्च निरूहणे[४] ॥ १५ ॥
मुस्तवालकधन्याकं[५] क्वथितं शीतलीकृतम्[६]।
तोयं पाने प्रदातव्यं ग्रासे दूर्व्वा च शस्यते ॥ १६ ॥

श्लेष्माण्डलक्षणचिकित्सितम्।

शूनौ तु कठिनौ रूक्षौ वृषणौ मन्दवेदनौ।
कृच्छ्रमूत्रस्य वाहस्य मूत्रकोशश्च शूयते[७] ॥ १७ ॥

---

१३। पित्ताण्डस्य चिकित्सामाह। शिरेति।

१४। योगान्तरमाह। कङ्कोलेत्यादि। कङ्कोलादीनां मिलितं पलं शर्करामधुनोश्च प्रत्येकं कुड़वः।

१५। निरूहणे गोक्षुरं, पञ्चवल्कस्य कल्कः सर्पिषा सह प्रलेपार्थं देयः।

१७। मूत्रकोषश्च शूयते स्फीतो भवति।

---

१। तथास्यैव। गः।
२। कर्त्तव्यं स्याच्च। गः।
३। वाजिगन्धेन साधितः। खः।
४। प्रलेपार्थे प्रयोक्तव्यो गोक्षीरन्तु निरूहयेत्। गः।
५। मुस्तवालकधान्याकैः। गः।
६। शीतलं कृतम्। गः।
७। जायते।

सघृतं कुष्ठसंयुक्तं दापयेत्तद्बुधो भिषक् ।
निहन्त्यामयमण्डानां सप्तकं वा द्विसप्तकम् ॥ ८ ॥
कुलत्थयवकोलानां पञ्चमूल्यास्तथैव च ।
क्वाथेन तैलयुक्तेन[१] निरूहं संप्रयोजयेत्[२] ॥ ९ ॥
मांसानां रसकैः स्निग्धैर्भोजनं तत्र[३] शस्यते ।
ग्रासे दूर्व्वार्जुनौ वापि जलं कूपात्समुद्धृतम् ॥ १० ॥
ग्रासप्रतिहता यस्तु कृच्छ्रमूत्रपुरीषयोः ।
तत्र पृष्ठे समाध्मातो न स शक्यश्चिकित्सितुम् ॥ ११ ॥

पित्ताण्डलक्षणचिकित्सितम् ।

शूनता मुष्कयोश्चैव रक्तता[४] कृष्णतापि वा ।
भवेत् पित्तेन दुष्टेन पिड़कानाञ्च[५] सम्भवः ॥ १२ ॥

---

१० । पथ्यमाह । मांसेत्यादि ।

११ । असाध्यत्वमाह ग्रासेत्यादि । तस्य लक्षणञ्च कृच्छ्रमूत्रपुरीषत्वादिकं ज्ञेयम् । ग्रासेत्यादिश्लोको ग-पुस्तके नास्ति । कृच्छ्रमूत्रपुरीषयोरित्यत्र कृच्छ्रमूत्रपुरीषक इति पाठो युक्तः । तत्रेत्यत्र यस्येति पाठः साधुः ।

१२ । पित्ताण्डलक्षणमाह । शूनतेति । पिड़कानां व्रणानाम् ।

---

१ । तिलतैलेन । गः ।
२ । संप्रदापयेत् । गः ।
३ । तस्य । खः ।
४ । रक्ताकृष्टासितापिच । गः ।
५ । पिड़कानां समुद्भवः । गः ।

अापाण्डीं[1] वेधयेत्तस्य शिरां पूर्व्वं[2] विचक्षणः ।
अभ्यङ्गञ्च भिषक् कुर्य्यान्मुष्कयोः सर्पिषा ततः ॥ ५ ॥
सुखोष्णैरोदनं शस्तं[3] क्षीरैर्गव्यादिभिस्तथा ।
अनुवासनञ्च कर्त्तव्यं तैलैस्तृहृतपूर्व्वकैः ॥ ६ ॥
हयगन्धस्य वृक्षस्य मूलमुत्कृत्य पेषयेत् ।
सघृतं दापयेद्वाहे वातार्त्तस्तेन सिध्यति ॥ ७ ॥
सौवर्च्चलं रसोनञ्च हिङ्गुसौवर्च्चलान्वितम् ।

---

५ । वाताण्डचिकित्सामाह । वाताण्डे खञ्जताद्युपद्रवे सति तदुपशमार्थं पूर्व्वं अण्डशिरां वेधयेत् संवेध्य च शोणितमोक्षणं कारयेदित्यर्थः । सर्पिषा मुष्काभ्यङ्गञ्च वेदनाशान्त्यर्थमित्यर्थः । कुर्य्यात् ।

६ । पथ्यञ्च सुखोष्णपायसोदनं देयम् ।

८ । हयगन्धस्येत्यादि द्विसप्तकमित्यन्तः पाठः ख-पुस्तके नास्ति । कुलत्थेति । कुलत्थाः ( कुड़ुतिकड़ाइ ) । यवाः प्रसिद्धाः । कोलाः बदराः (कुल) तेषां । पञ्चमूल्या इति विल्वश्योणाकगाम्भारी-पाटलागणिकारिकाणञ्च मिलित्वा अष्टौ पलानि वारि च विंशति-पलमितं गृहीत्वा पादशेषः कर्त्तव्यः । स्नेहद्रव्यञ्च क्वाथचतुर्थांशं ग्राह्यम् । निरूहद्रव्यमाने वाभटः । "क्वाथे तु विंशतिपले द्रव्य-स्याष्टौ पलानि च । ततः क्वाथाच्चतुर्थांशं स्नेहं वाते प्रकल्पयेत्," इति ।

---

१ । अपाण्डीं । खः ।
२ । पूर्व्वां । खः ।
३ । ओदनैः शस्तं क्षीरं । गः ।

## अथ पञ्चाशत्तमोऽध्यायः ।

मुष्करोगे
वाताण्डलक्षणचिकित्सितम् ।

प्रकोपान् मारुतादीनां कारणैः पूर्व्वचोदितैः ।
अण्डस्कन्द[1] स्तुरङ्गानां जायते बहुसंज्ञकः ॥ १ ॥
तस्य रूपं चिकित्साञ्च भेदञ्चैव समासतः ।
प्रवक्ष्यामि यथायोगं वाजिनां हितकाम्यया ॥ २ ॥
वृषणौ दूषयेद्वायुः श्लेष्मणा यस्य संयुतः[2] ।
तस्य मुष्कश्वलत्येको रोगो वाताण्डसंज्ञकः ॥ ३ ॥
यदण्डं कम्पतेऽश्वस्य तेन पादेन[3] खंजति ।
स्तब्धपृष्ठस्य[4] तस्याशु वेदना मुष्कयोर्भवेत् ॥ ४ ॥

१ । सम्प्रति त्रिविधाण्डस्कन्दरोगस्य निदानचिकित्सिते विवक्षुराह प्रकोपादिति। पूर्व्वचोदितैः वातादिप्रकोपकथनाध्याये कथितैः कारणैरित्यर्थः । मारुतादीनां वातपित्तकफानामित्यर्थः । प्रकोपः अण्डेषु स्कन्दइव अण्डस्कन्दो जायते। बहुसंज्ञक इति वातपित्तकफात्मकः ।

२ । यथायोगमिति योगमनतिक्रम्य यस्मिन्नधिकारे यो योगः तदनुसारेणेत्यर्थः ।

१ । अण्डसूनं । गः ।
२ । पोषितः । गः ।
३ । तेन गात्रेण । गः ।
४ । यस्य च पृष्ठवाहस्य । गः ।

सुस्विन्ना भोजने शस्ताः कुलत्थास्तैलयोजिताः[1] ॥१९॥
क्रिया सधारणी कार्य्या सन्निपातसमुद्भवे ।
द्वन्द्वजा द्विविधाः प्रोक्ताः शालिहोत्रादिभिः पुरा ॥२०॥
रक्तजे पित्तजोद्दिष्टा चिकित्सा परिकीर्त्तिता ।
अभिघातोद्भवे शोथे हितं यत्तद्विवक्ष्यते[2] ॥ २१ ॥
पञ्चवल्कलकल्केन सघृतेन मुहुर्मुहुः ।
औदुम्बरेण वा विद्वांस्तद्विलेपं प्रदापयेत् ॥ २२ ॥
पूर्व्वोद्दिष्टेन विधिना मोक्षयेत्तस्य शोणितम् ।
एवमागन्तुना वाहः शोथेनाशु प्रमुच्यते ॥ २३ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे शोथचिकित्सिते एकोनपञ्चाशत्तमोऽध्यायः ॥

---

१९ । सुस्विन्ना अग्नौ वारिणा सिद्धा इत्यर्थः ।
२०-२१ । क्रियादिश्लोकद्वयं ग-पुस्तके नास्ति ।

---

१ । तैलमिश्रिताः । खः ।
२ । उद्भिदं तच्च कथ्यते । ग० ।

पित्तशोथचिकित्सा ।

मञ्जिष्ठाधातकीलोध्रसारिवानन्तपद्मकैः ।
प्रलेपाः पित्तशोथेषु क्षीरवस्तिश्च कीर्त्तितः ॥ १४ ॥
कुशकाशनलेक्षूणां मूलक्वाथः सशर्करः ।
शस्तः पाने प्रभाते तु मधुमाचासमन्वितः ॥ १५ ॥
पञ्चतिक्तकसंसिद्धैर्गव्यसर्पिःसमन्विःतै ।
भोजनं विहितं मुद्गैः शालिभिर्वा[1] पयोऽन्वितैः ॥ १६ ॥

श्लेष्मशोथचिकित्सा ।

रूक्षः स्वेदः प्रदातव्यः इष्टकासिकतापुटैः ।
श्लेष्मशोथे प्रलेपश्च[2] कर्त्तव्यो यस्तु वातजे ॥ १७ ॥
वचाव्योषविडङ्गैलाकुष्ठजीरकसैन्धवैः ।
गोमूत्रपिष्टैः सुरया[3] प्रतिपानञ्च कीर्त्तितम् ॥ १८ ॥
शुण्ठीमरिचसंयुक्ताः पिप्पलीक्षौद्रमिश्रिताः[4] ।

---

१७ । इष्टकासिकतापुटैः खर्परवालुकापुटैः । वातजोक्तलेपश्च अत्र प्रयोज्य इत्यर्थः ।

१८ । वचादीनां पलं गोमूत्रपिष्टं सुराप्रस्थेन देयम् ।

---

१ । शालिखड्डीसमन्वितैः । ग० ।
२ । श्लेष्मशोथप्रलेपः । ग० ।
३ । सुधिया । ग० ।
४ । योजिताः । ख० ।

प्रच्छन्नेन जलौकाभिः शिरावेधेन वा भिषक्।
सर्व्वेषामेव शोथानां रक्तमाकृष्य बुद्धिमान्॥ ८ ॥
पूर्व्वशास्त्रसमुद्दिष्टां ततः कुर्य्यात् क्रियामिमाम्।
भेषजैः सघृतैः सम्यक् शोथरोगोपशान्तये ॥ ९ ॥
शोथे वातसमुद्भूते तैलाभ्यङ्गः प्रशस्यते।
स्वेदो गोमयपिण्डेन पुटैश्चैरण्डपत्रकैः ॥ १० ॥
पिप्पलीशुण्ठिवर्षाभूदेवदार्व्वर्कशिग्रुभिः।
तुरङ्गानां स्मृतो लेपः शोथे वातसमुद्भवे ॥ ११ ॥
गोधावतीमहाकाली[१]वरुणालम्बुषोद्भवैः॥
मूलैर्गोमूत्रसंपिष्टैः प्रलेपस्तस्य शस्यते ॥ १२ ॥
पञ्चमूलकषायस्तु तिलतैलेन योजितः।
प्रातः पाने प्रयोक्तव्यो भोजने च रसौदनः ॥ १३ ॥

---

८। प्रच्छन्नेन परिच्छन्नेन।

१०। शोथादीति श्लोकद्वयं ख-पुस्तके नास्ति।

१२। गोधावती (गोयालिया लता)। महाकाली लताविशेषः। माकाल् इति प्रसिद्धा। महाजालीति पाठोऽप्यस्ति। महाजाली पीतघोषा। अलम्बुषा लज्जालुका लता।

---

१। महाकल। खः।

## अथकोनपञ्चाशत्तमोऽध्यायः।

वातादिशोथलक्षणचिकित्साः।

शोथे चिकित्सां वक्ष्यामि वातपित्तकफान्विते।
सन्निपातसमुत्थेच रूपं पञ्चैव कीर्त्तितम्[१] ॥ १ ॥
वेदनास्थौल्यसंयुक्तं मृदुस्पर्शञ्च शीतलम्।
शोथं वातात्मकं विद्याद्वाजिदेहसमुद्भवम् ॥ २ ॥
रक्तपित्तेन शोथः स्यात् कृष्णपाकेन संयुतः।
वेदनोष्मसमायुक्तो नात्यन्तोच्छूनकस्तथा ॥ ३ ॥
कठिनत्वमहत्वाभ्यां युक्तं रुग्दाहवर्ज्जितम्।
श्लेष्मशोथं विजानीयाद्रक्तजं पित्तलक्षणम्[२] ॥ ४ ॥
सर्व्वलिङ्गं विदुर्वैद्याः सन्निपातसमुद्भवम्।
द्विचिह्नं द्वन्द्वजं प्राहुर्मुनयः शास्त्रकोविदाः ॥ ५ ॥
शोथानां मारुतादीनां सर्व्वदोषापकर्षणम्।
एकतश्च क्रियाः सर्व्वा रक्तमोक्षणमेकतः ॥ ६ ॥
अनुलेपसहस्राणि अनुलेपशतानि च।
रक्तविन्दुविमोक्षस्य कलां नार्हन्ति षोड़शीम् ॥ ७ ॥

---

१। चैव यथाक्रमम्। खः।

२। रक्तोद्भवो रक्तपित्तेन शोथः स्यात् पाकसंयुतः। गः।

कृत्वा कषायं मतिमान् कुष्ठरोगेषु दापयेत् ।
पानाय मधुना सार्द्धं सिद्धं भोजनमुत्तमम् ॥ ६ ॥
लोहितं चन्दनं दूर्व्वामूशीरं कटुरोहिणीम् ।
पिष्ट्वा निम्बपटोलञ्च ब्रणे कुष्ठे प्रलेपयेत्[1] ॥ ७ ॥
अर्काश्वमारयोः पत्रं सर्षपं पिप्पलीं वचाम् ।
मरिचं शृङ्गवेरञ्च दन्तीमूलं सचित्रकम् ॥ ८ ॥
गवां मूत्रेण संपिष्य लवणैः सह योजयेत् ।
संलिप्य तेन कुष्ठानि ब्रणहीनानि मर्द्दयेत् ॥ ९ ॥
ब्रणेषु चैव सर्व्वेषु तैलं सर्षपजं हितम् ।
कल्केनानेन संयुक्तमभ्यङ्गे मर्द्दने सदा ॥ १० ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे कुष्ठचिकित्सितेऽष्टचत्वारिंशोऽध्यायः ।

---

५—७ । पाटलेत्यादिलोहितान्तः पाठो ग-पुस्तके नास्ति ।
१० । कल्केनानेनेति उपर्य्युक्तेन अर्कादिकल्केनेत्यर्थः ।

---

१ । प्रयोजयेत् । गः ।

अयमेव विधिः कार्य्यः शुक्रमेहेऽपि वाजिनः।
वड़वां वाहयेद्वापि दृष्टकर्म्मा भिषग्वरः॥ २३॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे मूत्रग्रह चिकित्सिते सप्तचत्वारिंशोऽध्यायः।

---

## अथाष्टचत्वारिंशोऽध्यायः।

### कुष्ठरोगलक्षणचिकित्सितम्।

अलोमिकां ग्रन्थिमतीं तथा वै व्रणसंयुताम्।
त्वचं कुष्टमहारोगः करोत्यश्वस्य दारुणाम्॥ १॥
गवां मूत्रपुरीषाभ्यां स्वेदस्तु व्रणिनो हितः।
कुष्ठरोगेषु सर्व्वेषु समीपे वेधयेच्छिराम्॥ २॥
निम्बपत्रं पटोलञ्च त्रिफला खदिरं तथा।
तत्क्वाथं पाययेद्वाहं सुतरक्तं[१] विचक्षणः॥ ३॥
त्र्यहमेतत् प्रदातव्यं पानं कुष्ठप्रशान्तये।
ततः परं प्रयोक्तव्यं पानं यद्वक्ष्यमाणकम्॥ ४॥
चित्रकाञ्च हरिद्राञ्च मदनं कटुरोहिणीम्।
पाटलां त्रिफलां दन्तीं निम्बं मूर्व्वां तथा वचाम्॥ ५॥

---

१। सुतरक्तं क्षतरक्तस्रावं।

शर्कराणां प्रपातस्तु स ज्ञेयो मूत्रशर्करी ।
कुष्ठशिग्रुविडङ्गानि हिङ्गुतुम्बुरुकं तथा ॥ १८ ॥
सैन्धवञ्चाश्मभेदञ्च कल्कं कृत्वा विचक्षणः ।
तत्कल्कं यवभक्तञ्च सुरया सह मर्द्दयेत् ॥ १९ ॥
मूत्रशर्करिणो दद्याद् भोजने सततं बुधः ।
रजनीक्षारवद्भस्म गालयित्वा पलाशजम् ॥ २० ।
गृहीत्वा तज्जलं प्राज्ञः पुनः कृत्वा पयःस्रुतम्[1] ।
ब्रह्मापामार्गसूक्ष्मैलाकुलत्थाष्टकवर्गकैः ॥ २१ ॥
सुपिष्टं तेन तोयेन पानं शर्करिणो[2] हितम् ॥
शुक्रं मेहति यो वाजी शुक्रमेहीति तं विदुः ॥ २२ ॥

१८ । तुम्बुरुः (धने) ।

१९ । सुराप्रस्थेन सैन्धवादीनां पलम् ।

२०—२२ । रजनी हरिद्रा लाक्षा वा । तस्याः क्षारं पलाशजं क्षारञ्च समभागं वारिणा गोलयित्वा दोलायन्त्रेण परिस्राव्य तेन तोयेन ब्रह्म्यादिकल्कं संमिश्र्य पाययेत् । "जीवकर्षभकौ मेदे काकोल्यावृद्धिवृद्धिकौ । अष्टवर्गोऽष्टभिर्द्रव्यैः कथितश्चरकादिभिः" । इति ॥

१ । पटस्रुतं । गः ।
२ । पानं शर्करिणां । गः ।

चिके धाराजलं देयं कर्द्दमालेपनं तथा ।
शीतं स्थानं हितं प्रोक्तं प्रवातं व्यजनानिलम्[१] ॥ १२ ॥

श्लेष्ममूत्रग्रहचिकित्सा ।

श्वदंष्ट्रां शृङ्गवेरञ्च पूतिकं[२] पिप्पलीं तथा ।
श्लेष्मजे मूत्ररोगे तु लाजमण्डेन दापयेत् ॥ १३ ॥
कौलत्थं पाययेद् यूषं तिक्तमुद्गैश्च भोजनम् ।
तैलाभ्यङ्गो भवेद्वस्तौ माषस्वेदः कफात्मके ॥ १४ ॥
श्वदंष्ट्रा शृङ्गवेरञ्च पूतीकं पिप्पली तथा ।
पित्तमूत्रग्रहप्रोक्तां क्रियां सर्व्वां प्रयोजयेत् ॥ १५ ॥
वस्तौ प्रक्षालिते वैद्यस्तुरङ्गानां विचक्षणः ।
हितं वलितवस्तिभ्यो[३] लाक्षापत्राङ्गचूर्णकम् ॥ १६ ॥
मधुना सह संयुक्तं पाने गोपयसा युतम् ।
मूत्रेण सह यस्य स्याद्वेदनार्त्तस्य वाजिनः ॥ १७ ॥

---

१२ । त्रिके पृष्ठवंशाधोभागे ।

१३ । श्वदंष्ट्रा गोक्षुरं । शृङ्गवेरं शुंठी । पूतिकं पूतिकरञ्जं ।

१६ । वलितवस्तिभ्यः सम्पादितवस्तिकर्म्मभ्य इत्यर्थः । पत्राङ्गं (वकम्काष्ठ) । रक्तचन्दनं वा ।

---

१ । प्रवातव्यजनानिलैः । खः ।
२ । पूतिकां । गः ।
३ । हितं प्रक्षाल्यते वैद्यः । गः ।

एरण्डमूलं वर्षाभूरनन्ताच शतावरी ॥ ६ ॥
कषायं वारिणा कृत्वा यवानां तण्डुलैर्भिषक् ।
साधयित्वा ततो मण्डं पाययेद्वातमूत्रिणम् ॥ ७ ॥
एतेनैव कषायेण मिश्रितं वा सुखावहम् ।
भवेद्भासश्च पानं वा वातिके मधुमूर्च्छितम् ॥ ८ ॥

पित्तमूत्रग्रहचिकित्सा ।

एर्व्वारुकस्य[1] वीजानि त्रपुषस्यतु[2] पित्तजे ।
पिष्ट्वा शर्करया सार्द्धं दद्यात्तण्डुलवारिणा ॥ ९ ॥
शृतं कशेरुशालूकै[3]स्तथा शृङ्गाटकेन च ।
पाने शस्तं स्मृतं क्षीरं शर्करेक्षुरसान्वितम् ॥ १० ॥
नलकाशेक्षुदर्भाणां क्वाथं पाने प्रदापयेत् ।
पित्तमूत्रग्रहे वैद्यः क्षीरवस्तिञ्च बुद्धिमान् ॥ ११ ॥

---

एषां समभागं पलं जलाढ़के पक्वा पादशिष्टः क्वाथो ग्राह्यः । तेन क्वाथेन मण्डो देयः ।

९ । एर्वारुकस्य कर्कटीविशेषस्य । त्रपुषस्य शसा इति प्रसिद्धस्य । तण्डुलवारि प्रस्थमितं ।

१० । कशेरुः (केशुर) ।

११ । नलादीनां पलं । जलाढ़के पादशिष्टं देयम् । क्षीरवस्तौ दुग्धस्याढ़कोः ग्राह्यः ।

---

१ । कर्कटीकस्य । गः ।
२ । त्रिपुसी चापि । गः ।
३ । कषेरुकैश्च । गः ।

## अथ सप्तचत्वारिंशोऽध्यायः।

वातादिमूत्रग्रहलक्षणानि।

स्तोकं स्तोकं सफेनञ्च कृच्छ्रान्मूत्रं करोति यः।
तस्य वातसमुत्थन्तु विद्यान्मूत्रग्रहं बुधः॥ १॥
दाहोच्छ्वासयुतः पित्तान्मूत्ररोगः प्रजायते।
वाजिनः पीतमूत्रस्य मूत्ररोगः प्रजायते॥ २॥
वाजिनः पीतमूत्रस्य अथवा रक्तमूत्रिणः।
कफजे मूत्ररोगे तु सान्द्रमूत्रं सपिच्छिलम्॥ ३॥
स्तोकं स्तोकञ्च कुरुते वेदनार्त्तस्तुरङ्गमः।
एकधा नोदयस्तेषां जायते सन्निपातजः॥ ४॥
अत्र साधारणीं कुर्य्यात् चिकित्सां वक्ष्यमाणिकीम्।
मेढ्राभ्यासे तथा वस्तिं घृतेनाभ्यज्य वातिके।
मर्द्दयेत्तदनुस्रोतो लघुहस्तैः शनैः शनैः॥ ५॥
पाषाणभेदकं शुण्ठी गोक्षूरं वृहतीद्वयम्।

---

२। दाहोच्छ्वासयुत इति दाहो ज्वाला उच्छ्वासः अन्तर्मुखनिःश्वासस्तु तेन युतः।

४। तेषां वातादिमूत्रग्रहलक्षणानाम्। एकधा उदयो न जायते अपितु अनेकधा विविधप्रकारमित्यर्थः। उदय आविर्भावः।

५। अनुस्रोतः स्रोतोऽनुलोमत इत्यर्थः।

६। पाषाणभेदः। (पातर् कुचा)। वर्षाभूः (श्वेतपुनर्नवा)।

पटोलं निम्बपत्रञ्च वचां चित्रकमेव च ।
पिप्पलीशृङ्गवेरञ्च चूर्णमेकत्र कारयेत् ॥ १० ॥
एतत्पानं[१] प्रदातव्यं सुरया कृमिनाशनम् ।
चूर्णपानप्रयोगोऽयं[२] श्लेष्मकोष्ठे प्रशस्यते ॥ ११ ॥
मन्दाग्निदीपनोऽत्यन्तं शालिहोत्रेण कीर्त्तितः ॥ १२ ॥

श्लेष्मकोष्ठनिदानचिकित्सिते ।

श्लेष्मकोष्ठी समुद्दिष्टो मन्दाहारस्तुरङ्गमः ।
कृमिकोष्ठोदितां कुर्य्यात् श्लेष्मकोष्ठेऽपि च क्रियाम् ॥१३॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे कृमिकोष्ठ-श्लेष्मकोष्ठचिकित्सिते षट्चत्वारिंशोऽध्यायः ।

---

११ । "स्नुहीक्षीरं सकर्चूरं कूपोदकविभावितम् । पिण्डोऽयं हन्ति मध्यस्थान् उदरस्थान् कृमिव्रणान्" इति नकुलः । परिभाषा नियमेन घृतमिदं साधयित्वा पाययेत् ।

---

१ । एष पाने प्रदातव्यः । खः ।

२ । प्रयोगस्य । गः ।

तत्रादौ क्रमिकोष्ठस्य क्रियां वक्ष्यामि तत्त्वतः ।
आज्यमस्मै प्रदातव्यं मांसक्षीरेण साधितम् ॥ ४ ॥
षष्टिकान्नं तिलाः[१] क्षीरं गुड़ञ्च दधिमिश्रितम् ।
क्रमिकोष्ठाय दातव्यं भोजनं तावदग्रतः[२] ॥ ५ ॥
विड़ङ्गं चित्रकं पाक्या दन्ती च[३] निचुलं तथा ।
कम्पिल्लकञ्च तुल्यांशं कषायं कारयेद्बुधः ॥ ६ ॥
कम्पिल्लकस्य कल्केन कषायेणाम्बुनैव[४] तु ।
विड़ङ्गचूर्णसंयुक्तं सिद्धं सर्पिः प्रदापयेत् ॥ ७ ॥
घृतं विड़ङ्गसंयुक्तं सिद्धसर्पिः प्रदापयेत् ।
दन्तीकषायकल्केन साधितञ्च प्रदापयेत् ॥ ८ ॥
घृतं विड़ङ्गसंयुक्तं दृष्टकर्म्मा विचक्षणः ।
द्वे हरिद्रे विड़ङ्गानि तथा लवणपञ्चकम् ॥ ९ ॥

---

६ । विड़ङ्गादिघृतमाह विड़ङ्गमित्यादि । पाक्यो यवक्षारः । कम्पिल्लकं (कमलागुँड़ि) ।

८ । श्लोकोऽयं ग-पुस्तके नास्ति ।

---

१ । षष्टिकान्नतिलं । गः ।

२ । चक्रमः । खः ।

३ । श्यामा द्रवन्ती दन्ती च । खः ।

४ । चम्बुनैव । खः ।

हेमन्ते क्षारसंयुक्तो देयः प्रस्कन्नपीड़िते ॥ ९ ॥
यदि सिद्धिर्भवेन्नैव भेषजानामुपक्रमैः।
ततो वह्निः प्रदातव्यो वाह्वोर्वक्षसि कूर्चके ॥ १० ॥
दग्धाग्नेर्गुग्गुलुः शस्तो वाहस्य चिफलायुतः।
भ्रामणञ्चैव वाहानां प्रस्कन्नव्याधिशान्तये ॥ ११ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे प्रस्कन्नचिकित्सिते पञ्चचत्वारिंशोऽध्यायः।

---

## अथ षट्चत्वारिंशोऽध्यायः।

कृमिकोष्ठनिदानचिकित्सितम्।

कृशस्य यस्य वाहस्य जन्तुभिः परिवेष्टितम्।
पुरीषं जायते भिन्नं तं विन्द्यात् कृमिकोष्ठकम् ॥ १ ॥
श्लेष्मकोष्ठी समुद्दिष्टो मन्दाहारस्तुरङ्गमः।
दुर्ब्बलो भिन्नरोमा च गुरुगात्रस्तथैव च ॥ २ ॥
पुरीषं श्लेष्मणा मिश्रं पिच्छिलं तस्य सर्व्वदा।
निद्रा च जायतेऽत्यर्थं तन्द्रा चैव समन्विता ॥ ३ ॥

---

९। तिलतैलस्य कुडवः। क्षारस्य पादोनं पलं देयम्।

श्रोरसीं पादिकीं तस्य तलजां कूर्चजामपि ।
पूर्व्वकाये शिराशस्त्रे भेषजं तद्विचक्षणः ॥ ४ ॥
श्रोपाण्डीं पश्चिमे काये ख्यौरिकीं कूर्चजां तथा ।
विध्यात् शिराशस्त्रमुखे देयं कर्द्दमलेपनम् ॥ ५ ॥
विद्धं न चारयेद्दाहमेकरात्रं विचक्षणः ।
वक्ष्यमाणं ततः पानमपरेऽह्नि प्रदापयेत् । ६ ॥
त्रिफलाक्वाथसंयुक्तस्तथा क्षौद्रसमन्वितः ।
गुग्गुलुः प्रतिपानाय देयः प्रस्कन्ननाशनः ॥ ७ ॥
ग्रासार्थे दापयेद्दूर्व्वाः पाने चैव मधूदकम् ।
अथवा पिप्पलीतोयं प्रशस्तं तस्य वाजिनः ॥ ८ ॥
पञ्चमूलकषायस्तु तिलतैलेन योजितः ।

---

४-५। शिरावेधः कुत्र कर्त्तव्य इत्याह। पूर्व्वकाये श्रोरस्यादिकूर्चजान्ताः शिरा विध्यात्। शिराशस्त्रे तच्छिराक्षतमुख इत्यर्थः। कर्द्दमालेपनं देयम्। तथा पश्चिमे काये श्रोपाण्ड्यादिकूर्चजान्ताः शिरा विध्यात् तथा शिराक्षतमुखे कर्द्दमालेपनं देयमित्यर्थः। तत इत्यादि एकरात्रं विचक्षण इत्यन्तः पाठो ग-पुस्तके नास्ति।

७। अत्र त्रिफलापलसिद्धः कषायप्रस्थः। मधुनः पलं गुग्गुलोश्च पलं ग्राह्यम्।

८। समधुपलं वारिणः पलषष्टिकं देयम्।

आरग्वधकषायेण मूर्च्छितं[1] घृतयोजितम्।
यावकं भोजने तस्मै स्नेहवस्तिञ्च दापयेत्॥ २॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे उदावर्त्त-चिकित्सिते चतुश्चत्वारिंशोऽध्यायः॥

---

## अथ पञ्चचत्वारिंशोऽध्यायः।

प्रस्कन्नरोगलक्षणचिकित्सितम्।

गुरुर्यस्य भवेद्वक्षः स्तब्धगात्रपरिक्रमः।
कुब्जीभूतेन पृष्ठेन यो वाजी याति बद्धवत्॥ १॥
प्रस्कन्नरोगसन्तप्तं[2] विद्याद्बुद्ध्या च तं भिषक्।
चिकित्सां तस्य वक्ष्यामि भाषितां मुनिसत्तमैः॥ २॥
आज्यं त्रिकुटकोपेतं पाययेत्तं विचक्षणः।
ततः स्निग्धस्य कर्त्तव्यः शिरावेधो यथोदितः॥ ३॥

---

२। यावकं कुलत्थं घृतभर्जितं दापयेदित्यर्थः। गुरुर्यस्येति यः पाठः पुस्तकद्वयेऽपि दृश्यते स न साधुः। गुरु यस्येत्येव साधुः पाठो वक्षसः क्लीवत्वात्।

३। घृतस्य प्रस्थः। त्रिकटुकस्य च पादोनं पलम्।

---

१। मूर्च्छितां घृतयोजिताम्। याविकां। खः।
२। प्रस्कन्दरोगसन्तप्तं। खः।

स्वकूलं प्रेक्षते वाजी उत्थानपतनैर्मुहुः।
कुञ्चितेन च गात्रस्य शूलं स्पष्टं करोत्यलम्॥ १८॥
श्यामजिह्वा समाध्माता ध्यायेन्निश्चलवालधिः।
रक्तमूत्रातत: शूली नच शक्यश्चिकित्सितुम्॥ १९॥

इति श्रीमहासामन्तजयदत्तविरचितेऽश्वशास्त्रे शूल-चिकित्सिते त्रिचत्वारिंशोऽध्यायः।

---

## अथ चतुश्चत्वारिंशोऽध्यायः।

### उदावर्त्तलक्षणचिकित्सितम्।

पुरीषं वर्त्तितं यस्य कृच्छ्रं निर्याति वा पुनः।
वेदनार्त्तस्य वाहस्य तस्योदावर्त्तमादिशेत्॥ १॥

---

१८। स्वकूलमिति पाठो न सङ्गच्छते। स्वकूलस्थाने सङ्कुल मित्येव पाठोऽनुमीयते।

१९। श्यामजिह्वासमाध्मात इत्यत्र श्यामजिह्वः समाध्मात इति पाठः साधुर्लक्ष्यते। समाध्मात उदराध्मानविशिष्ट इत्यर्थः।

१। वर्त्तितं प्रवर्त्तितमपीत्यर्थः। पुरीषमित्यादिः श्लोकः ख-पुस्तके नास्ति।

आमं विना यदा शूलो वाताद्भवति दारुणः।
अनुवासने[१] ततस्तैलं दातव्यं पूर्व्वनोदितम्॥ १२॥
दुर्गन्धं पिच्छिलं[२] भिन्नं पुरीषं श्लेष्मणावृतम्।
आमं भवति वाहस्य पक्वञ्चैव विवर्जयेत्॥ १३॥
आमं[३] नैव प्रशंसन्ति वाजिशास्त्रविशारदाः।
दौर्मनस्यारुचिग्लानिविण्मूत्रग्रहकारकम्॥ १४॥
दत्तानुवासने वाहे शुद्धकोष्ठे विचक्षणः।
अपरेऽहनि भुञ्जीत प्रतिपानमिदं ततः॥ १५॥
हरेणुकाञ्च कुष्ठञ्च भार्गीं दन्तीञ्च चित्रकम्।
लवणं व्योषचूर्णञ्च सुरया पाययेद्भिषक्॥ १६॥
घासार्थं दापयेच्चूर्णं पानं कोष्णं जलं तथा।
एवं यदि सुखी न स्याद्दाहः कुक्षौ तदा भवेत्॥ १७॥

---

१२। पूर्व्वनोदितमित्यत्र पूर्वनोदिते इति पाठोयुक्तः।

१६। अत्र हरेणुकादिचूर्णस्य मिलितं पलं। सुरायाश्च प्रस्थो देयः। हरेणुकां (रेणुक)। अपरेऽहनीत्यादि शेषं यावत् ख-पुस्तके नास्ति।

१७। घासार्थं दापयेच्चूर्णमिति घासचूर्णं दापयेत् परिपाक करणासामर्थ्यादिति भावः।

---

१। अनुवासनेन तैलन्तु। गः।
२। पित्तभिन्नं। गः।
३। आमेनैव। गः।

सौभिक्तविबन्धचिकित्साः।

सौभिक्ते च विबन्धे च कृत्वा स्वेदं विचक्षणः।
वक्ष्यमाणां ततः प्राज्ञः कुर्य्याद्वर्त्तिक्रियामिमाम्॥ ७॥
आगारधूमं सुरसं पिप्पलीं सर्षपं वचाम्।
सिन्धुवारीञ्च शुण्ठीञ्च तथा लवणपञ्चकम्॥ ८॥
सुचूर्ण्य[1] च ततो वर्त्तिं कुर्य्यात्तप्तगुड़ेन तु।
दैर्घ्यमष्टाङ्गुलं तस्याः स्थौल्यञ्चाङ्गुष्ठसम्मितम्[2]॥ ९॥
प्रक्षिपेत्तां गुदेऽस्वस्य व्योषचूर्णावचूर्णितम्।
सैन्धवक्षौद्रलिप्तान्तु मलप्रच्युतिकारिणीम्[3]॥ १०॥
वर्त्त्यापहृतदोषस्य[4] वर्त्त्युक्तै[5]र्भेषजैस्ततः।
सुराकाञ्जिकगोमूत्रैः प्रयुञ्जीतानुवासनम्[6]॥ ११॥

---

८-१०। सुरसं गन्धतृणं। सिन्धुवारीं मोचरसं। लवणपञ्चक-मुक्तं। इयमागारधूमादिवर्त्तिः कथ्यते।

११। शूले पिण्डमाह नकुलः-"सैन्धवं नागरं श्यामा गुड़ूची सितसर्षपाः। अम्लवेतससंयुक्तः पिण्डोऽयं शूलनाशनः" इति॥ वस्त्यधिकारकथितौषधिमिश्रैः सुरादिभिरनुवासनवस्तिं प्रदद्यादित्यर्थः॥

---

१। संचूर्णितैस्तु। गः।
२। स्थौल्येनाङ्गुलिसम्मितं। गः।
३। सैन्धवं क्षौद्रलिप्ताङ्गं मलप्रच्युतिकारणम्। गः।
४। वर्त्तिप्रहृतदोषस्य। गः।
५। वस्त्युक्तैः। खः।
६। अनुवासनं प्रयुञ्जीत सुरागोमूत्रकाञ्जिकैः। गः।

गुरुभिः खादितै[1]र्नित्यं तथा स्नेहाति[2]योगतः।
सौभिक्षो जायतेऽश्वस्य आमविड्वेगलक्षितः ॥ २ ॥
यवसं खादनञ्चैव[3] यो वाजी खादितं पुनः।
मुखेन प्रोज्झिरत्याशु तं विद्यादूर्द्ध्ववर्त्तिनम् ॥ ३ ॥
अतीसारेण संयुक्तं शूलं यस्योपजायते।
भिन्नवर्त्तीति तं विद्यात्तुरङ्गं दीनचेष्टितम् ॥ ४ ॥
नोत्सृजेद्यः पुरीषं तु सानाहः शूलपीड़ितः।
विबन्धवर्त्तिः सास्याहुस्तं विद्यात्कष्टजीवितम् ॥ ५ ॥
भिन्नं स्निग्धं पुरीषञ्च जायते यस्य वाजिनः।
स्नेहातियोगात्तस्याशु स्नेहवर्त्तिं समादिशेत् ॥ ६ ॥

---

२। स्नेहातियोगतः घृताद्यधिकभोजनादित्यर्थः। आमविड्वेगलक्षित इति आमविट् अपक्कमलं तस्या वेगेन लक्षितः अनुमितः। प्रधानतोऽपक्कमलवेगेन सौभिक्षशूलमनुमीयते इत्यर्थः। लक्षणमिति पाठे स एवार्थः।

३। ऊर्द्ध्ववर्त्तिशूललक्षणमाह यवसमिति। यवसं घासः।

४। दीनचेष्टितं मन्दचेष्टम्।

५। सानाह आनाहेन विण्मूत्रसङ्गेन सह वर्त्तमानः। श्लोकोऽयं ग-पुस्तके लिपिकरप्रमादात् पतित इव लक्ष्यते।

---

१। खादनैः। गः। २। स्नेहादियोगतः। गः।
३। खादने चैव। गः।

अनेनैव कषायेण साधितं यवतण्डुलैः ।
मधुसैन्धवसंयुक्तां यवागूं भोजयेत्ततः[१] ॥ १७ ॥

आमसन्निपातद्वन्द्वजातिसारचिकित्साः ।

पिप्पल्या लवणं शुण्ठी मरिचं चित्रकं वचा ।
आमातीसारिणे देयं सुरया पानमुत्तमम् ॥ १८ ॥
सन्निपातसमुत्थे तु कार्य्या साधारणी क्रिया ।
द्विरूपे द्विविधा चैव चिकित्सा परिकीर्त्तिता ॥ १९ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रेऽतीसार-चिकित्सिते द्विचत्वारिंशोऽध्यायः ।

---

## अथ त्रिचत्वारिंशोऽध्यायः ।

पञ्चविधशूलनिदानलक्षणानि ।

सौभिक्ष्यश्चोर्द्ध्ववर्त्तिश्च[२] भिन्नवर्त्तिस्तथैव च ।
विबन्धस्नेहवर्त्तिश्च कुक्षौ शूलञ्च पञ्चधा ॥ १ ॥

---

१८ । अत्र सुराप्रस्थः । पिप्पल्यादिचूर्णं षट्तोलकं ग्राह्यम् ।

१ । विबन्धस्नेहवर्त्तिरिति विबन्धवर्त्तिः स्नेहवर्त्तिश्च ।

---

१ । भिषक् । गः ।
२ । सुभिक्षश्चोर्द्ध्ववर्त्तश्च भिन्नवर्त्तस्तथैव च । विविधस्नेहवर्त्तश्च । गः ।

यवागूं साधयेद्दद्यान्तु दृहत्यादिरुदाहृता ॥ १० ॥
क्वाथः पाने प्रदातव्यो वातातीसारशान्तये ॥ ११ ॥

पित्तातिसारचिकित्सा ।

जम्वाम्रदाड़िमानान्तु क्वाथयित्वा त्वचं वुधः ।
मधुना प्रतिपानाय दद्यात्पित्तातिसारिणे ॥ १२ ॥
चूर्णं वा मधुसंयुक्तं तैलयोगेन[1] दापयेत् ।
जम्वादीनां[2] प्रयोगेण पाठा[3] वा कुटजान्विता ॥ १३ ॥
अनेनैव कषायेण साधितां मधुसंयुताम् ।
यवागूं भोजयेद्वाहं[4] रक्तशालेस्तु तण्डुलैः[5] ॥ १४ ॥

श्लेष्मातिसारचिकित्सा ।

वीजं कुटजवृक्षस्य त्वक्चूर्णं दाड़िमाम्रयोः ।
मातुलुङ्गरसोपेतं सैन्धवेनावचूर्णितम् ॥ १५ ॥
लेहयेन्मधुसंयुक्तं श्लेष्मातीसारशान्तये ।
एतेषां वा कषायन्तु मधुना प्रतिपाययेत् ॥ १६ ॥

---

१२ । जम्वादीनां त्वचः पलं जलाढके पाच्यम् ।
१३ । जम्वादीनां चूर्णं पलं ग्राह्यम् ।
१५–१६ । कुटजवीजादिचूर्णं पलम् ।

---

१ । दलैर्युक्तेन । गः ।
२ । गन्धादीनां । खः ।
३ । पानं वा कुटजान्वितम् । गः ।
४ । वाहे । गः ।
५ । रक्तशालेश्च तण्डुलैः । गः ।

स्वेददाहपरीतानां[१] लक्षयेन्मतिमान् भिषक् ।
स्रावेण नीलरक्तेन विस्रगन्धेन[२] पित्तजम् ॥ ४ ॥
मन्दाहार[३]स्तथा वाहो हृष्टरोमातिपीड़ितः ।
श्यामैः सपिच्छिलैर्भिन्नै र्विद्यात् श्लेष्मसमुद्भवम् ॥ ५ ॥
सन्निपातात्मकञ्चैव सर्व्वेषां लक्षणैर्युतम् ।
द्विरूपं द्वन्द्वजं ज्ञेयमतीसारं विचक्षणैः ॥ ६ ॥
अतीसाराः समुद्दिष्टाः शालिहोत्रादिभिः पुरा ।
एषां चिकित्सां वक्ष्यामि यथाशास्त्रानुसारतः ॥ ७ ॥
येन शाम्यन्ति वाहानामतीसाराः सुदारुणाः ।
वृहतीं शालिपर्णीञ्च पृश्निपर्णीं निदिग्धिकाम् ॥ ८ ॥
विल्वं शुण्ठीं कपित्थञ्च क्वाथयेत्सचिकण्टकम् ।
एतेन[४] साधयेत् प्राज्ञो यवागूं शालितण्डुलैः ॥ ९ ॥
दध्ना[६]म्लेन तु संयुक्तां दद्यात्तां भोजने[७] भिषक् ।

---

८ । ९ । पृश्निपर्णीं (चाकुले) । निदिग्धिकां कण्टकारीं । अत्र यवागवर्थे शालितण्डुलस्य प्रस्थः । वृहत्यादीनां पलं जलद्रोणे पक्वार्द्धशिष्टः क्वाथो ग्राह्यः । अथ तेन क्वाथेन यवागूं पाचयेत् । इयं वृहत्यादिर्नाम यवागूः ।

---

१ । स्वेददाहोपजातानां । खः ।
२ । विषगन्धेन । गः ।
३ । मन्दाहारे तथा वाहे । खः ।
४ । तुर्णा । खः ।
५ । तेन संसाधयेत् । खः ।
६ । अम्लदध्ना च । गः ।
७ । भोजयेत् । गः ।

पिण्डं हृद्ध्तुरङ्गस्य सायं मध्ये न दापयेत् ।
कटुकापिप्पलीशुण्ठीवचारामठसैन्धवैः ॥ ७ ॥
अशुद्धे गुग्गुलुर्देयः पूर्व्वोक्तेनैव कर्म्मणा ॥ ८ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रेऽजीर्णचिकित्सिते एकचत्वारिंशोऽध्यायः ।

---

## अथ द्विचत्वारिंशोऽध्यायः ।

वाताद्यतीसारलक्षणचिकित्सितम् ।

अनिलेनाथ पित्तेन श्लेष्मणा चापि[1] वाजिनः ।
अतीसारस्तथाचान्यः सन्निपातेन जायते ॥ १ ॥
सङ्कोचिताङ्गः स्वानेन सकफं[2] योऽतिसार्य्यते ।
अल्पं तनु सशब्दञ्च पुरीषं बहु[3] वा हयः ॥ २ ॥
तस्य वातात्मकं विन्द्याद[4]तीसारं विचक्षणः ।
पित्तजञ्चैव वक्ष्यामि श्लेष्मजञ्च समासतः ॥ ३ ॥

---

७ । पिण्डश्च कटुकादिभिः षट्पलमितः कार्य्यः । पिण्डेत्यादि सार्द्धश्लोको ग-पुस्तके नास्ति ।

---

१ । वापि । खः ।
२ । सफेनं । खः ।
३ । बहु वाहयेत् । गः ।
४ । विद्यात् । खः ।

यदि शोथो न जंघाभ्यामातुरस्य[1] न वा ब्रणम् ।
अभिघातश्च नो कश्चित् तदाजीर्णेन खञ्जति ॥ २ ॥

तच्चिकित्सा ।

उपवासो हितस्तस्मै तावद्यावत्तु लङ्घति ।
अतिलङ्घं[2] त्र्यहादूर्द्ध्वमस्तब्धमपि वारयेत् ॥ ३ ॥
कृतोपवासे[3] वाहेतु यथा तु प्रतिपानकैः ।
प्रतिपानं वारुणीयं त्र्यहं पञ्चाहमेव च ॥ ४ ॥
अशुद्धे चारिते वाहे तथा जातबले भिषक् ।
सप्तरात्रात्परं विद्वान् शिरावेधं प्रयोजयेत्[4] ॥ ५ ॥
उरसा खञ्जतोऽश्वस्य औरसीं वेधयेत् शिराम् ।
जंघायां जांघिकीञ्चैव कूर्चजाः कूर्चलङ्गिते[5] ॥ ६ ॥

---

२। अजीर्णज्ञानं कथं भवति तदाह—। शोथव्रणाभिघातं विनापि यदा खञ्जता वाजिनो दृश्यते, तदाजीर्णं जानीयादित्यर्थः ।

३। वारयेदित्यत्र चारयेदिति पाठो युक्तः । चारयेत् स्तोकं स्तोकं भ्रामयेदित्यर्थः । अशुद्धमिति अकृतशिरावेधादिकम् ।

४। विस्रगन्धेन आमगन्धेन ।

६। इदं पादद्वयं ख-पुस्तके नास्ति ।

---

१। खुरस्यास्यः । खः ।
२। ग्लानिं त्र्यहादूर्द्ध्वं चैव । गः ।
३। कृतो व्यवासो वाहस्य यथार्थं । खः ।
४। प्रकल्पयेत् । खः ।
५। कूर्चं यस्यापि लङ्गति । गः ।

पञ्चवल्कलकल्केन घृतयुक्तेन वाजिनः।
लेपयेत्तस्य गात्राणि सशिरस्कानि बुद्धिमान्॥ २६ ॥
चन्दनोशीरमञ्जिष्ठावलामधुकपद्मकैः।
पयसा साधितं सर्पिस्तस्य पाने प्रशस्यते॥२७॥
अनुवासनं निरूहञ्च भोजनञ्चैव पण्डितः।
पित्तज्वरसमुद्दिष्टं कुर्य्याद्बुद्धिमतांवरः॥ २८ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे ज्वररोगे चत्वारिंशोऽध्यायः।

---

## अथैकचत्वारिंशोऽध्यायः।

---

अजीर्णलक्षणम्।

अजीर्णेन[1] भवेद्वाजी मन्दग्रासश्च[2] दुर्म्मनाः।
खञ्जपाणिश्च[3] जंघाभ्यां कृच्छ्रमूत्रपुरीषकृत्॥ १ ॥

---

२७। वला वाट्यालकं। मधुकं यष्टिमधु।
१। जंघाभ्यां सह खञ्जपाणिः।

---

१। अजीर्णतः। ख।
२। मन्दग्राससुदुर्म्मनाः। ख।
३। खुन्दत्यग्रिमजङ्घाभ्यां। ख।

पिप्पलींचैव शुण्ठींच गुड़ूचीं चव्यकं वचाम्॥२०॥
वारिणा क्वाथयित्वा तु पादशेषं समाहरेत्।
कषाय एष दातव्यः पाने क्षौद्रेण योजितः॥२१॥
पञ्चतिक्तकसिद्धांश्च मुद्गांस्त्रिकटुकान्वितान्।
भोजयेन्मधुसंयुक्तान् सुखोष्णांश्चैव बुद्धिमान्॥२२॥
वालुकापुटकैः स्वेदो गात्रे मूर्द्ध्नि च दापयेत्।
शंखजाञ्च शिरां तस्य मन्याजाञ्चैव वेधयेत्॥२३॥

सन्निपातज्वरलक्षणचिकित्सा।

सर्व्वेषां चैव रूपाणि कुरुते सान्निपातिकः।
असाध्यः सतु विख्यातस्तस्य साधारणी क्रिया॥२४॥

अभिघातज्वरलक्षणचिकित्सा

कासः स्तम्भश्च[1] मूर्च्छा च सशोणितकफोद्गमः।
अभिघातसमुत्थे तु ज्वरे जृम्भा च जायते॥२५॥

---

२०—२१। मरीचादीनां पलं जलाढके पक्त्वा पादशेषः क्वाथो मधुकुड़वेन देयः।

२२। पञ्चतिक्तादीनां मिलितेन पलेन मुद्गस्य प्रस्थत्रयं प्रस्थं वा चतुर्गुणे वारिणि साधयित्वा मधुकुड़वेन कवोष्णं देयम्।

२५। स्तम्भो निश्चेष्टता।

---

१। कासश्शोणितमूर्च्छास्य सशोणितकफोद्भवः। गः।

सर्पिषा सहितं तस्मै[1] यवान्नं भोजने[2] हितम् ।
शीतलञ्च जलं पाने ग्रासे दूर्व्वाच शस्यते ॥ १५ ॥
पित्तज्वरसमाकारौ रोगशेषौ निरामकौ ।
रोगे पित्तज्वरे प्रोक्ता तयोस्तां[3] कारयेत् क्रियाम् ॥१६॥
क्रोधादिभिः श्रमाच्चैव कट्वम्ललवणाशनात् ।
अनयोः सम्भवः प्रोक्तो ग्रीष्मवातोपसेवनात्[4] ॥ १७ ॥

श्लेष्मज्वरनिदानं ।

हेतुभिः श्लेष्मजननैः सेवितैः श्लेष्मसम्भवः ।
तेन तन्द्रा भवत्यस्य अरुचिर्गात्रसादनम् ॥ १८ ॥
उष्माभिलाषो वाहानां नासास्रावश्च जायते ॥ १९ ॥

तच्चिकित्सा ।

मरिचञ्चैव पाठाञ्च मुस्तकं कटुरोहिणीम् ।

---

१६ । पित्तज्वरो निरामज्वरश्चेत्युभावेव क्रोधादिसम्भवौ अत-श्चिकित्सापि निरामज्वरस्य पित्तज्वरोक्ता एव ज्ञेया ।

१८ । श्लेष्मजननैः स्वाद्वादिद्रव्यातिशयभोजनरूपैरित्यर्थः ।

१९ । गात्रसादनं शरीरावसादः ।

---

१ । तस्मिन् । गः ।
२ । भोजयेत् । गः ।
३ । तयोः कुर्य्यात् क्रियां बुधः । खः ।
४ । निर्वातसेवनात् । गः ।

वदरीपत्रफेनेन तस्य गात्रं प्रलेपयेत् ।
वीजयेत्तोयसिक्तैश्च[१] तालवृन्तैर्भिषग्वरः ॥ १० ॥
अवगाहे जलेचैव स्नापयित्वाच तं हयम् ।
मस्तके दापयेत् प्राज्ञःशीतं धारजलं तथा ॥ ११ ॥
तस्याङ्गं सेचयेद्दध्ना काञ्जिकेन च बुद्धिमान् ।
क्षीरपानञ्च दातव्यं शर्करेक्षुसमन्वितम् ॥ १२ ॥
सकाशदूर्व्वेक्षुकुशैः[२] क्षीरपिष्टैः सितोत्पलैः ।
घृतयुक्तः प्रलेपश्च तस्य गात्रे प्रशस्यते ॥ १३ ॥
कुशकाशेक्षुमुस्तानां कल्कयुक्तः सपद्मकैः ।
क्षीरवस्तिः स्मृतस्तस्य मञ्जिष्ठाशर्करान्वितः ॥ १४ ॥

---

१० । वदरीपत्रफेनेनेति कोमलवदरीपत्राणां जलमर्द्दनोत्थेन फेनेनेत्यर्थः ।

११ । उक्तञ्च "ज्वरितानां तुरङ्गानां पयसैव क्रियाक्रमः" इति ।

१२ । अत्र दुग्धस्य प्रस्थः, इक्षोरसस्यार्द्धाढकः शर्करायाश्च पलाष्टकमुत्तमाश्वाय देयम् ।

१३ । काशः (केशेमूल) । इक्षुः (कृष्णेक्षुमूल) सिता शर्करा । उत्पलं (नीलशुद्धि) । एषां समो भागो ग्राह्यः ।

१४ । अत्र क्षीरवस्तौ दुग्धस्याढकः । कुशादिकल्को मिलित्वा दशपलमितः । पद्मकं (पद्मकाष्ठ) ।

---

१ । वीजयेत्तालवृन्तैश्च तोयसिक्तैश्च बुद्धिमान् । गः ।
२ । कासदूर्व्वेक्षुरसैश्च । गः ।

अप्राप्तौ चिष्टतादीनां तैलयुक्तेन सर्पिषा ॥ ५ ॥
वसायुक्तेन[1] चाभ्यङ्गं तिलतैलेन कारयेत् ।
कषायः पञ्चमूलस्य सुरागोमूत्रसंयुतः[2] ॥ ६ ॥
निरूहः पिप्पलीकल्कयुक्तोऽतीव प्रशस्यते ।
तैलैर्वातहरैः सम्यक् हितं तस्यानुवासनम् ॥ ७ ॥

पित्तज्वरचिकित्सा ।

भोजनं[3] विहितं तस्य स्निग्धैर्मांसरसोदनैः ।
निदानैः पित्तजननैः[4] सेवितैः पित्तजो ज्वरः ॥ ८ ॥
स्वेददाहौ[5] वपुःशोषो रक्तनेत्रश्च जायते ॥ ९ ॥

---

५ । अप्राप्ताविव्येको योगः ।

६ । वसायुक्तेनेत्यपरो योगः । पञ्चमूलस्य पलदशकं वारिणः आढ़कचतुष्टयं पक्का पादशिष्टः कषायो ग्राह्यः । अथ तत्र पिप्पली-कल्कस्य पलं सुरागोमूत्रयोः पलं पलं मिश्रयित्वा निरूहो देयः ।

७ । अत्रानुवासने तैलस्य प्रस्थो ग्राह्यः ।

८ । भोजने मांसरसो वारिजानूपशूकरमहिषादिमांसैः सा-धनीयः ।

९ । पित्तजनकैः कट्वम्लादिभिरित्यर्थः ।

---

१ । रसाभ्यङ्गेन चाभ्यङ्गं । गः ।
२ । योजितः । गः ।
३ । विहितश्चास्य रोगस्य । गः ।
४ । पित्तकरणैः । गः ।
५ । स्वेददाहयुतः शोषा । गः ।

## अथ चत्वारिंशोऽध्यायः ।

वातज्वरनिदानलक्षणानि ।

कारणैः पूर्व्वमुद्दिष्टैः कुपिते मातरिश्वनि ।
ज्वरो वातात्मिकोऽश्वस्य तदा भवति दुःसहः ॥ १ ॥
गुरुत्वञ्चोष्णता चैव मस्तकस्योपजायते ।
शीतता पर्व्वसन्धीनां चलनञ्चैव शंखयोः ॥ २ ॥
स्तब्धाङ्गस्य तुरङ्गस्य ग्रासद्वेषेण बुद्धिमान् ।
वातज्वरं विदित्वा तु ततः कुर्य्यात् प्रतिक्रियाम् ॥ ३

चिकित्सा ।

चित्रतेन प्रसारिण्या अन्यैर्वातविनाशनैः ।
तैलैरभ्यङ्गिभाङ्गस्य कर्त्तव्ये स्वेदमर्द्दने[१] ॥ ४ ॥
लंघनं कारयेत्तावद् यावन्मुक्तज्वरो भवेत् ।

---

१ । पूर्व्वमुद्दिष्टैः कारणैरिति सप्तत्रिंशत्यध्यायनिर्द्दिष्टैः तिक्तरूक्षक-षनिराहारश्रमादिभिरित्यर्थः,। मातरिश्वनि वायौ ।

३ । स्तब्धाङ्गस्य निश्चलकायस्य ।

४ । अन्यैरिति प्रसारण्यादिभिरित्यर्थः ।

---

१ । उपजङ्घि । गः ।

प्रधानो गुग्गुलुर्दृष्टस्तथा दाहश्च वाजिनाम् ॥ ३६ ॥
आमर्द्दकं पाटयित्वा दग्ध्वा तत्क्षणमेव च ।
गुग्गुलुं पाययेत्तावद् यावद्दृढ़ं व्रणं भवेत् ॥ ३७ ॥
माषपर्णीर्यवांश्चैव न दद्यात्तस्य वत्सरम् ।
खादनाय समुद्दिष्टा यवा दूर्व्वा मनीषिभिः ॥ ३८ ॥
आमर्द्दकविधिः सर्व्वः कर्त्तव्यः पाटनं विना ।
प्रपोटकेऽपि वाहस्य छित्वा चैव कदम्बकैः ॥ ३९ ॥
शिलासदृशकाठिन्यः शोथो जंघव्यवस्थितः ।
अध्यस्थिसंज्ञितं विन्द्यान्मृदुश्चैवोपजंघिकम् ॥ ४० ॥
अग्निं दत्वा ततो वैद्यः कुर्य्यादामर्द्दकक्रियाम् ।
शिरावेधो विशेषेण उपजंघेषु कीर्त्तितः ॥ ४१ ॥
एतेन यदि चारेण क्रियमाणेन शाम्यति ।
पादरोगे तदा वैद्यः कुर्य्यात्कर्म्म पुनः पुनः ॥ ४२ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे पादरोगे एकोनचत्वारिंशोऽध्यायः ।

---

३६ । त्रिफलाक्काथः प्रस्थद्वयमितः । गुग्गुलोश्च पलम् ।

३९ । कदम्बकैरित्यत्र कदम्बकमिति साधु मन्महे । एवं शिलासदृशकाठिन्य इत्यादावपि द्वितीयान्तः पाठो भवितुं युक्तः ।

४२ । चारेण उपचारेणेत्यर्थः ।

तत्र रोगेषु सर्व्वेषु अयमेव क्रियाक्रमः ।
कर्त्तव्यः सर्व्वदा वैद्यैः शास्त्रमार्गानुसारिभिः ॥ ३० ॥
छिन्द्याद्व्रणं ग्रन्थिपुरं रोमान्तादिव्यवस्थितम् ।
प्रयच्छेदविशुद्धन्तु औषधैर्वा विदारयेत् ॥ ३१ ॥
स्नुह्यर्ककरवीराणां चित्रकस्य तथैव च ।
मूलान्युद्धृत्य सर्व्वेषां गवां मूत्रेण पेषयेत् ॥ ३२ ॥
एतेन लेपयेदुष्णं व्रणं वाहस्य बुद्धिमान् ।
परिशुद्धन्तु विज्ञाय रोपणीयैरुपक्रमेत् ॥ ३३ ॥
दन्तीचित्रकमूलन्तु स्नुह्यर्कपयसा सह ।
भल्लातकास्थिकाशीषं लेपच्छिद्येच्छलिलामपि ॥ ३४ ॥
एवं यदि सुखी न स्यादग्निकर्म्म ततःपरम् ।
दग्ध्वा तं पूर्व्ववद्वाहं गुग्गुलं पाययेद्भिषक् ॥ ३५ ॥
त्रिफलाक्वाथयुक्तस्तु सर्व्वेषां पादरोगिणाम् ।

---

३० । तत्रेति खुरतले ।

३३ । रोपणीयैः रोपणाय हितैरौषधैरिति शेषः ।

३४ । रोपणौषधान्याह । दन्तीत्यादि । अर्कः (आकन्द) । भल्लातकास्थि ( भेलारसुटि ) । स्नुही (सिज्) । काशीषं (हिराकस्) । अयं पाठो ग-पुस्तके नास्ति । अस्य चतुर्थपादो न लगति ।

३५ । अग्निकर्म्म चतुर्दशाध्योयोक्तमित्यर्थः ।

अभिघातात् खुरतले व्रणं यस्योपजायते।
दुष्टकर्द्दमसङ्गाद्वा तस्य कुर्य्यात् प्रतिक्रियाम्॥ २४॥
छच्छादनकपात्रेण[1] मण्डूक्यां[2] तस्य शोधयेत्।
अतितीक्ष्णेन शस्त्रेण क्लिन्नमांसञ्च कर्त्तयेत्[3]॥ २५॥
तलजाञ्च[4] शिरां विद्धा रोमान्ताञ्च विचक्षणः।
मोचयेच्छोणितं दुष्टं कषायैश्चोपनाहयेत्॥ २६॥
गुग्गुलुं पाययेदश्वं त्रिफलाक्वाथयोजितम्[5]।
एवं यदि न सिध्येत तदा वह्निं प्रदापयेत्॥ २७॥
दग्ध्वा तमेव पानाय गुग्गुलुं पाययेद्भिषक्।
सप्ताहं षोड़शाहं वा द्वादशाहमथापि वा॥ २८॥
खादनं नैव[6] दातव्यं दूर्व्वा च यवसे हिता।
शृतशीतञ्च पानाय उदकं तस्य कीर्त्तितम्॥ २९॥

---

२४। मण्डूकतापादिचिकित्सामाह अभिघातेत्यादिभिः।

२५। छच्छादनकपात्रेणेति पाठः पुस्तकद्वये साधुर्न लभ्यते। परन्तु छच्छादुत्पलपत्रेणेति पाठोऽत्रानुमीयते।

२६। अत्र केचिद्बहुवचनं पठन्ति।

२७। अयं श्लोकः ग-पुस्तके नास्ति।

---

१। कूच्चांदनकवक्त्रेण। खः। २। मण्डूकां। खः।
३। सङ्कीर्णान्तु दृढ़ं बुधः। गः।
४। तलजं शोणितं दुष्टं कषायैश्चापि वाहयेत्। गः।
५। गुग्गुलुं पाययेद्वैद्यः शास्त्रोक्तया ज्ञाननिश्चयात्। गः।
६। चैव। गः।

रोमान्तः शूयते यस्य समन्तान्नैव पच्यते।
क्लेदश्च पिच्छिलो यस्य[1] पिच्छपादीति तं विदुः॥१८॥
प्रावृट्काले व्रणं यस्य जङ्घायामुपजायते।
स्थाणुरोगः स विज्ञेयो[2] दुष्टशोणितसम्भवः॥१९॥
ऊर्द्धभागे च कूर्चस्य मृद्वी या[3] गुटिका भवेत्।
आमण्डकाभिधो नाम्ना[4] जङ्घापार्श्वसमुद्भवः॥२०॥
प्रपोटकं विजानीयाद् ग्रन्थिभिः कूर्चसम्भवैः।
आमलक्यस्थिसङ्काशैः ग्रन्थिभिश्चातिकण्टकैः॥२१॥
कदम्बफलमात्रस्तु मण्डूकीमध्यसंस्थितः।
मांसाङ्कुरः कदम्बाख्यः श्लेष्मशोणितसम्भवः॥२२॥

अथ चिकित्सा।

सर्व्वेषां पादरोगाणां शिरावेधः प्रशस्यते।
तलजायाश्च रोमान्त्याः कूर्चजायास्तथैव च॥२३॥

---

१८। शूयते स्फीतो भवति।

२०। गुटिका ग्रन्थिः। (गुटलि)। आमण्डक आमर्द्दकश्च इत्युभय एव पाठस्तुल्यः।

२३। पादरोगेषु तलजादिशिरावेधः कर्त्तव्य इत्यर्थः।

---

१। योऽति। गः।　　३। मृद्वीका। गः।
२। विख्यातः। खः।　　४। आमर्द्दकाभिधानः सः। खः।

पार्ष्णिजाः[१] पिण्डिका यस्य दृश्यन्ते तीव्रवेदनाः।
तस्य विन्द्याद्भिषग्व्याधिं घोरं पादविरालिकम् ॥१२॥
प्रसरन्ति[२] खुरा यस्य अथवा पादुकोपमाः[३]।
पुनःखुरीति तं विद्यादश्वं विह्वलगामिनम्[४] ॥ १३ ॥
ऊर्म्मिकश्चोर्म्मिसंस्थानैर्वलिभिः खुरसम्भवैः।
विन्द्या[५]च्छिन्नखुरं चैव यस्यान्यो जायते खुरः॥ १४ ॥
बहुमांसखुरश्चैव ज्ञेयो मांसखुरो हयः।
मृदुखुरश्च विख्यातो मृदुर्यस्य खुरो भवेत् ॥ १५ ॥
क्लिद्यन्ते[६] वलयो यस्य खुरसन्धिसमुद्भवाः।
अक्लिन्ना वाथ सरुजस्तं विन्द्याच्चक्रवालिकम् ॥ १६ ॥
कूर्च्चमावृत्य[७] यः शोथो जङ्घायामुपजायते।
उलूकपादो विज्ञेयो[८] न च शक्यश्चिकित्सितुम् ॥ १७ ॥

१२। पार्ष्णिजा इत्यत्र पार्ष्णिः (गोरारि)।

१३। एते पुनः-खुरादिचक्रवालिकान्ता रोगाः खुरसम्भवा ज्ञेयाः।

१४। ऊर्म्मिसंस्थानैर्वलिभिस्तरङ्गसदृशैर्भङ्गिभिरित्यर्थः।

१७। कूर्चं किणानन्तरवर्त्तिप्रदेशम्।

१। पार्ष्णिका। गः।
२। प्रस्रवन्ति। गः।
३। अत्यर्थं पाण्डुकोपमाः। गः।
४। विकलगामिनम्। गः।
५। विद्यात्। गः।
६। क्लिद्यन्ति। खः।
७। आश्रित्य। खः।
८। विख्यातः। खः।

एषां लक्षणानि ।

मण्डकतापो मण्डूक्यां व्रणेनाश्वस्य जायते ।
अभिघातसमुत्थेन दुष्टकर्द्दमकेन च ॥ ६ ॥
पांशुभिः शर्कराभिश्च पूर्य्यते यस्य कोटरम् ।
तले तस्य विजानीयाद्रोगं पांशुखुरं भिषक् ॥ ७ ॥
घृष्टं भूमौ तलं यस्य ताम्रीभवति वाजिनः ।
तस्य घृष्टतलो नाम पादरोगः प्रकीर्त्तितः ॥ ८ ॥
आस्राविणं विजानीयात् क्लेदस्रवतलं हयम् ।
सूक्ष्मचूर्णतलश्चैव चूर्णकीलः प्रकीर्त्तितः ॥ ९ ॥
केशाकाराणि मांसानि यस्य स्युस्तलजानि च ।
मांसकेशीति तं विद्यात्तलं वाहस्य बुद्धिमान् ॥ १० ॥
मण्डूक्या विवरं यस्य दर्भमुञ्जकरं[१] भवेत् ।
तस्य दर्भक इत्युक्तो व्याधिः कष्टचिकित्सितः ॥ ११ ॥

---

६ । मण्डूके वाजिखुरतलस्थप्रदेशे अभिघातजो दुष्टकर्द्दमजो वा यो व्रणस्तेन यस्तापो ज्वाला स मण्डूकतापः ।

७ । यस्याश्वस्य तले कोटरं पादतलस्थकोटरमित्यर्थः । शर्कराभिर्वालुकाभिः । पांशुखुरादिर्मांसकेशान्ताः पादतलस्था रोगा ज्ञेयाः ।

९ । क्लेदस्रवतलं पूयादिस्राविपादतलमित्यर्थः । अयमपि पादतलस्थो रोगः ।

११ । दर्भमुञ्जनिभमिति मुञ्जसदृशं दर्भसदृशञ्च ।

---

१ । मुक्तदर्भनिभं । खः ।

# अथैकोनचत्वारिंशोऽध्यायः ।

पादरोगसंख्या ।

अत ऊर्द्ध्वं प्रवक्ष्यामि पादरोगविनिश्चयम् ।
लक्षणञ्च चिकित्साञ्च यथाशास्त्रानुसारतः ॥ १ ॥
मण्डूकतापः[१] पांशुखुरस्तथा चैव पुनःखुरः ।
आस्रावी चूर्णिकोऽध्यस्थि ऊर्म्मिकश्चक्रवालिकः[२] ॥ २ ॥
उलूक[३]पादसंस्थानं तदा पादविरालिका[४] ।
आमण्डकोपजंघौ[५] च दर्भकश्च[६] प्रप्रोटकः ॥ ३ ॥
कदम्बको घृष्टतलस्तथा भिन्नखुरोऽपरः ।
मृदुमांसखुरौ द्वौ तु पिच्छपादसकेशिनौ[७] ॥ ४ ॥
एते पादगता रोगास्तुरङ्गानां प्रकीर्त्तिताः ।
एषां चिकित्सां वक्ष्यामि शालिहोत्रादिसम्मताम् ॥ ५ ॥

१—५ । मण्डूकतापादिकदम्बकपदान्ता विंशतिविधाः पादरोगाः । एषां लक्षणचिकित्सितानि क्रमेणोच्यन्ते । अध्यस्थीति अस्थ्यधिकत्येत्यर्थः । उलूकपादसंस्थानं तदेत्यत्र उलूकपादः सस्थाणु स्तथेति पाठो भवितुं युक्तः । आमण्डकोपजंघावित्यत्र आमण्डक उपजंघाविति एवं पाठो भवितुं युक्तः ।

१ । मण्डूकता पांशुखुरः । खः ।
२ । चक्रवाकिकः । खः ।
३ । उदकः पाकसंस्थानम् । खः ।
४ । पदाविराड़िका । गः ।
५ । आमर्द्दकोपजंघा च । खः ।
६ । गर्द्दभश्च । गः ।
७ । पिच्छपादस्तथैव च । खः ।

गुग्गुलुं पाययेत्तच्च त्रिफलाक्वाथयोजितम्।
दूर्व्वाञ्च यवसं दद्यात्तत्शीतं जलं तथा ॥ ६ ॥
निम्बपत्रं जलोत्स्विन्नं भोजयेन्[1]मधुसर्पिषा ।
अन्यैर्वा तिक्तकैः सिद्धान्[2] मुद्गान् हरितपीतकान् ॥७॥
लोहितं चन्दनं लोध्रं मधुकं हरितालकम्।
कालेयं लवणं[3] लाक्षामजाक्षीरेण साधयेत् ॥ ८ ॥
कल्केनानेन सिद्धञ्च तिलतैलेन मिश्रितम्[4] ।
नस्यार्थञ्च कृतं तैलं छर्दिरोगेषु चोत्तमम् ॥ ९ ॥
नावनं[5] कृतमश्वानां नासाव्रणविशोधनम् ॥ १० ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे छर्दिरोगचिकित्सिते अष्टत्रिंशोऽध्यायः ।

---

६। त्रिफलाक्वाथस्य प्रस्थः गुग्गुलोश्च कर्षद्वयम्। शीतलवारिणः षष्टिपलानि।

७। निम्बपत्राणां पलं जलाढ़के पक्वा पादशेषं कृत्वा देयम्।

८। कालेयं कृष्णागुरु।

१०। नावनं नस्यम्।

---

१। भोजनं। गः।
२। सार्द्धं मुद्गात् साधिकान्वितान्। खः।
३। सारिवा। खः।
४। तिलतैलैर्जलेनतु। खः।
५। नावनीकृतम्। खः।

## अथाष्टत्रिंशोऽध्यायः ।

घ्रणिरोगचिकित्सा ।

नासिकाभ्यन्तरे यस्य पिड़कानां समुद्भवः ।
व्रणं वा यदि वा शोथः तस्य विद्याद् घ्रणीरुजम् ॥ १ ॥
शोथजां वेधयेत्तस्य शिरां शोथे विचक्षणः ।
अथवा शोणितं दुष्टं कर्षयेच्च जलौकसा ॥ २ ॥
धरण्यां पातयित्वा तु दृढ़ं बद्धा तुरङ्गमम् ।
नासापुटं ततः शस्त्रैः पाटयित्वा विचक्षणः ॥ ३ ॥
उत्कृत्य पिड़काग्रन्थिं दहेल्लोहशलाकया ।
उत्थिते तु[१] ततो वाहे घृताभ्यङ्गः प्रशस्यते ॥ ४ ॥
शीतेनाश्च्योतयेद्वैद्यः पञ्चवल्कलवारिणा ।
मुहुर्मुहुर्व्रणं प्राज्ञो घृतयुक्तेन वाजिनः ॥ ५ ॥

१ । घृणिर्नाम नासिकाभ्यन्तरस्थरोगविशेषः ।

२ । जलौका । (जोँक्) । अथ वेत्यादि सार्द्धश्लोको ग-पुस्तके नास्ति ।

४ । घृताभ्यङ्गो घृतमर्द्दनम् ।

५ । आश्च्योतयेत् आसेचयेत् ।

१ । उद्धृते च । खः ।

एवं श्लेष्मा विनिर्याति तस्य नासान्तरोद्भवः।
प्रतिप्रभातं[1] कुर्व्वीत क्रियामेतां समाहितः ॥ १८ ॥
तारयेद्वा जलं निम्नं[2] प्रोथयेद्वा विचक्षणः[3]।
नासाछिद्रे विनिःक्षिप्य सूक्ष्मैलां[4] चूर्णितां मनाक् ॥१९॥
गुडूच्यास्त्रिफलायाश्च निम्बवासकयोस्तथा।
क्वाथे मुद्गान् समुत्स्विद्य सुखोष्णान् स्थापयेत्ततः॥२०॥
पञ्चमूलकषायेण रसैर्मांसस्य साधितैः।
मर्द्दयित्वा ततस्तैलं दत्वा मधु च भोजयेत् ॥ २१ ॥
श्लेष्मजे वातजे चैव कटुचूर्णं प्रदापयेत्।
तिक्तमुद्गा घृताभ्यक्ताः पित्तसिङ्घानके हिताः ॥ २२ ॥
न दद्यात् पित्तजे तैलं केवलं विहितं घृतम्।
द्वन्द्वजे च भिषग्विद्वान् कुर्य्यात्साधारणीं क्रियाम्[5] ॥२३॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे सिंघानचिकित्सिते सप्तत्रिंशोऽध्यायः।

१। प्रभातं प्रति। गः।
२। चित्रं। गः।
३। तु ततः परम्। गः।
४। सुसूक्ष्मां कूर्चिकां मनाक्। खः।
५। द्वन्द्वजे द्विविधां कुर्य्यात् त्रिविधां सान्निपातिके। खः।

पुनर्नवा विडङ्गञ्च सरलं देवदारु च ।
रजनी चैव वाराही वलामूलं तथैव च ॥ ११ ॥
एतानि समभागानि कल्कं कृत्वा विचक्षणः ।
पञ्चमूलकषायेण पाचयेत्तैलमुत्तमम् ॥ १२ ॥
तेन नस्यं प्रदातव्यं वातश्लेष्मसमुद्भवम्[१] ।
सिंघानके तुरङ्गानां कटुचूर्णावचूर्णितम् ॥ १३ ॥

पैत्तिकद्वन्द्वजसिङ्घानकचिकित्सा ।

मञ्जिष्ठा मधुकं लोध्रं पिप्पली रजनीद्वयम् ।
नस्यं क्षीरेण दातव्यं पित्तसिंघानकापहम् ॥ १४ ॥
लोध्रं[२] प्रपौण्डरीकञ्च मधुकञ्चोत्पलन्तथा ।
कल्कं कृत्वा पचेत्तैलं पयसा वारिणा सह ॥ १५ ॥
पित्तसिङ्घानकार्त्तस्य तैलेनानेन बुद्धिमान् ।
नस्यं दद्याद् यथायोगं तेन सम्पद्यते सुखम् ॥ १६ ॥
दत्तनस्यं ततो वाहं बद्धा जङ्घाद्वयेऽग्रिमे ।
पृष्ठे च[३] ताड़यित्वा तु भ्रामयेत् प्रेरयेत्ततः[४] ॥ १७ ॥

---

११ । वाराही वाराहीकन्दः ।

१५ । अत्र वारिपयसी स्नेहचतुर्गुणे देये ।

---

१ । तिक्तमुद्गैस्च भोजनम् । गः । ३ । पृष्ठतः । खः ।

२ । लोध्रकं पौण्डरीकञ्च । गः । ४ । भ्रामयेत्तं विचक्षणः । खः ।

सिंघानकेषु सर्व्वेषु शङ्खयोस्तालुके तथा ।
शिरावेधं प्रशंसन्ति मुनयः शास्त्रकोविदाः ॥ ५ ॥
गोमूत्रेण च संपिष्य वृहतीगौरसर्षपान् ।
तिक्तवार्त्ताकवीजानि[१] तैलेनालोड्य दापयेत् ॥ ६ ॥
नस्यं सिंघानके प्राज्ञो वातिके श्लैष्मिके तथा ।
घासार्थं[२] विहिता दूर्व्वा पाने चाल्पजलं तथा ॥ ७ ॥
नाड़िकाग्रे व्योषचूर्णं दद्यात्[३] नासापुटान्तरे ।
पश्चिमे नाड़िकाच्छिद्रे मुखवातं प्रपूरयेत्[४] ॥ ८ ॥
एष प्रधमनो नाम विधिः श्लेष्मापकर्षणः ।
सिंघानके प्रयोक्तव्यं[५] शिरसश्च विरेचनम् ॥ ९ ॥
व्योषचूर्णं[६] विधानेन अन्यैर्वा कटुचूर्णकैः ।
दापयेत् श्लेष्मशमनं[७] नस्यं तैलञ्च साधितम् ॥ १० ॥

---

८ । नाड़िकाग्रैः नेत्राग्रभागैः ।

---

१ । तिक्तवार्त्ताकवीजञ्च । खः ।
२ । घासेतु विहिता दूर्व्वा । खः ।
३ । दत्वा । खः ।
४ । प्रदापयेत् । खः ।
५ । प्रकर्त्तव्यं शिरसाम् । गः ।
६ । विषचूर्णं विधानेन अन्यान् कटुकचूर्णकान् । गः ।
७ । श्लेष्मनाशाय । खः ।

अवगाढं चिरोद्भूतं मांसमज्जास्थिसंस्थिरम्[१] ।
कृच्छ्रसाध्यमसाध्यं वा व्रणं विद्यात् समाहितः[२] ॥ २३ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे व्रणरोगे षट्त्रिंशोऽध्यायः ।

---

## अथ सप्तत्रिंशोऽध्यायः ।

वातादिसिंघानलक्षणानि ।

वातिके पैत्तिके चैव श्लैष्मिके सान्निपातिके ।
सिंघानके प्रवक्ष्यामि लक्षणं भेषजं तथा ॥ १ ॥
तनुस्रावं सफेनञ्च वातिकं तत् प्रकीर्त्तितम् ।
रक्तपीतासितैः[३] स्रावैर्विन्द्यात् पित्तसमुद्भवम् ॥ २ ॥
घनेन दधिवर्णेन कफजञ्चैव निर्द्दिशेत् ।
नानावर्णेन जानीयादसाध्यं सान्निपातिकम् ॥ ३ ॥

तच्चिकित्सा ।

शिरसः स्वेदनं कुर्य्याद् वातिके श्लैष्मिके तथा ।
प्रियङ्गुचन्दनोशीरैः शिरोलेपस्तु पित्तजे ॥ ४ ॥

---

२३ । अवगाढं न सम्यगुत्थितं । चिरोद्भूतं चिरजातम् ।

---

१ । समस्नायुं स्थिरत्वचम् । गः ।
२ । विद्वान् समादिशेत् । गः ।
३ । रक्तपित्तासितैः । गः ।

नाड़ीव्रणो यदा शुद्धिं भेषजेन[1] न गच्छति।
तदा वह्निः प्रदातव्यस्तथाच पित्तजे व्रणे ॥ १८ ॥
सरक्ते[2] तत्क्षणोद्भूते व्रणे आगन्तुके भिषक्।
मूलकादिभिरम्लस्थैः कुर्य्यात् स्वेदं विचक्षणः ॥ १९ ॥
ततो मधुककल्कन्तु दद्यात्[3] क्षौद्रघृतान्वितम्।
बध्नीयाद्वस्त्रपट्टेन मुहुः सिञ्चेच्च सर्पिषा ॥ २० ॥
पञ्चवल्कलकल्केन सघृतेन प्रलेपयेत्।
शुष्कग्रासं[4] भिषग्दत्वा पाने[5] स्तोकं जलं तथा ॥ २१ ॥
पूयभावे[6] गते तस्मिन् पूर्व्वोक्ताः शोधनादिकाः[7]।
दोषजोक्ताः क्रियाः सर्व्वाः[8] कर्त्तव्याः सावसानिकाः ॥ २२ ॥

---

१९। मूलकादिभिरम्लस्थैरिति अम्लसंयुक्तैरित्यर्थः।
२२। अस्य उत्तरार्द्धं गपुस्तके नास्ति।

---

१। भेषजेनैव गच्छति। गः।
२। सरक्तलक्षणोद्भूते। खः।
३। दत्वा। खः।
४। शुष्कघासं। गः।
५। स्तोकं पानेन बुद्धिमान्। गः।
६। पयाभावे। गः।
७। शोधनक्रियाः। गः।
८। सर्व्वाश्चैव प्रवर्त्तव्या वैद्येनच वसादिकाः। गः।

दाड़िमामलकागस्तिकपित्थानां विचक्षणः ।
त्वक्चूर्णं दापयेत् शुद्धे व्रणे चोत्तानके भिषक् ॥ १२ ॥
व्रणे रूढे प्रदातव्यं रोमसंजननं परम् ।
चूर्णं मुनिमुखोद्गीर्णं वक्ष्यमाणमिदं ततः ॥ १३ ॥
खुरचर्म्मास्थिबालञ्च दन्तशृङ्गनखं तथा ।
गवादीनां यथालाभं कटाहं कच्छपस्य च ॥ १४ ॥
गृहीत्वा कारयेद्भस्म अन्तर्दग्धं विचक्षणः ।
तद्दद्याद्घृततैलाभ्यां रोम्णां संजननं परम्[१] ॥ १५ ॥
अश्वमारकदल्यर्कस्नुहीहाटकचित्रकैः ।
पचेत्तैलं सभल्लातं नाड़ीव्रणहरं परम् ॥ १६ ॥
आगारधूमं संपिष्य गोमूत्रेण विचक्षणः ।
नाड़ीं प्रपूरयेद्युक्त्या तदुपद्रवशान्तये ॥ १७ ॥

---

१२ । अगस्तिर्वकवृक्षः । उत्तानके अगम्भीरे ।

१४—१५ । गवादीनां पशूनां खुरचर्म्मादिकं यथालाभं अन्तर्धूमे भस्मीकृत्य घृततैलाभ्यां मर्द्दयित्वा प्रयोज्यम् । अस्य श्लोकस्य तृतीय-चतुर्थपादौ ग-पुस्तके न स्तः ।

१६ । नाड़ीव्रणचिकित्सामाह । अश्वेति । अश्वमारः करवीरः । हाटकं धुस्तूरः ।

१७ । आगारधूमं (झुल) । तदुपद्रवशान्तये नाड़ीव्रणशान्तये ।

---

१ । रोमपोषणमुत्तम् । गः ।

दुष्टं संशोधयेत्प्राज्ञः शुद्धञ्चापि प्ररोहयेत् ।
आनुपूर्व्व्या यथायोगं व्रणं शास्त्रविशारदः ॥ ६ ॥
उत्सन्नञ्चैव दुर्गन्धि स्फुटितं पिड़कान्वितम् ।
अशुद्धं निर्द्दिशेद्वैद्यो व्रणं शुद्धं विपर्य्यये[1] ॥ ७ ॥

व्रणचिकित्सा ।

दन्तीमूलं हरिद्रे द्वे चित्रकं विश्वभेषजम् ।
रसोनं सैन्धवञ्चापि तक्रकाञ्जिकयोजितम्[2] ॥ ८ ॥
दुष्टव्रणानां[3] सर्व्वेषां शोधनाय प्रकीर्त्तितम् ।
तिलशक्तुकपिण्डञ्च[4] दधियुक्तञ्च सैन्धवम् ॥ ९ ॥
निम्बपत्रयुतं पिण्डं तिलकल्कस्य बुद्धिमान् ।
मधुसैन्धवसंयुक्तं दद्याद्व्रणविशुद्धये ॥ १० ॥
मधुसैन्धवहीनोऽयं पिण्डो निम्बतिलोद्भवः ।
प्रवरो रोपणीयानां व्रणे शुद्धिसमन्विते ॥ ११ ॥

---

६ । प्ररोहयेत् रोपयेत् ।

७ । उत्सन्नमुत्सेधयुक्तं ।

९ । तिलशक्तुकपिण्डं पलमितम् ।

---

१ । अशुद्धञ्चैव निर्व्विष्टं व्रणं शुद्धं विवर्जयेत् । गः ।

२ । पेषितम् । खः ।

३ । मृदुव्रणानाम् । खः ।

४ । तिलशक्तुकपिण्डीं वा । खः ।

## अथ षट्त्रिंशोऽध्यायः ।

व्रणनिदानलक्षणानि ।

आगन्तुकं दोषजञ्च व्रणं विविधमुच्यते ।
लक्षणञ्च चिकित्साञ्च तस्य वक्ष्यामि शास्त्रतः ॥ १ ॥
दोषजं शोथपाकोत्थं व्रणं विद्याद्विचक्षणः[१] ।
शस्त्रघातादिजञ्चैव[२] ज्ञेयमागन्तुकं तथा ॥ २ ॥
चिरपाकं[३] चिरस्पर्शं ज्ञेयं वातात्मकं वुधैः ।
पित्तजं शीघ्रपाकञ्च कण्डूदाहसमन्वितम्[४] ॥ ३ ॥
घनञ्चोत्सेधसंयुक्तं[५] श्लैष्मिकं मन्दवेदनम् ।
व्रणं चिरविपाकञ्च श्वेतवर्णं समादिशेत् ॥ ४ ॥
सर्व्वरूपैस्तु संयुक्तं विज्ञेयं सन्निपातजम् ।
द्विरूपं द्वन्द्वजञ्चापि कीर्त्तितं मुनिसत्तमैः ॥ ५ ॥

---

३ । यन्न शीघ्रं पाकं यातीत्यर्थः । अतएव चिरस्पर्शसहिष्णु-मित्यर्थः ।

४ । अयं श्लोको ग-पुस्तके नास्ति ।

---

१ । विद्वान् । गः ।
२ । सम्यक् चैव । खः ।
३ । क्षिप्रपाकम् । गः ।
४ । दाहपाकसमन्वितम् । गः ।
५ । चेत् शोफसंयुक्तम् । खः ।

उशीरं पद्मकं मूर्व्वा काश्मर्य्याश्च फलं सितम् ।
शीतेन वारिणा दद्यात् पानं क्षौद्रेण योजितम् ॥ १० ॥
पक्षनाड़ीं मयूरस्य जंघां वा चर्म्म वा भिषक् ।
दग्ध्वा लेहं प्रकुर्व्वीत घृतेन मधुना सह ॥ ११ ॥
मयूरनाड़ीकल्केन शलाकां शल्लकस्य च ।
दद्यादस्थीनि वा प्राज्ञः पित्तश्वासोपशान्तये ॥ १२ ॥
वार्त्ताकयूषः पानाय तिलतैलेन योजितः ।
श्वासे कफात्मके देयस्तिक्तमुद्गांश्च[1] भोजयेत् ॥ १३ ॥
द्वन्द्वजे द्विविधो देयः सङ्कीर्णः सान्निपातिके ।
श्वासोक्ता याः क्रियाः सर्व्वा स्नेहपानादिपूर्व्विकाः ।
प्रयोक्तव्यास्तु हिक्कायां वाजिनां हितमिच्छता ॥ १४ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे हिक्काश्वासे पञ्चत्रिंशोऽध्यायः ।

---

१० । सितं रक्तचन्दनम् ।

११ । पक्षादीनामन्यतमं भस्मीकृत्य घृतमधुभ्यां लेहयेत् ।

१२ । शल्लकस्य शलाका (शजारुर कांटा) ॥

१३ । वार्त्ताकस्य पलं । जलस्याढ़कः । तैलस्य प्रस्थार्द्धम् । द्वन्द्वज इत्यादिपाठो ग-पुस्तके नास्ति ।

---

१ । तिक्तमुद्गैश्च भोजनम् । खः ।

श्वासचिकित्सा ।

पञ्चमूलकषायेण कृत्वा मांसरसं भिषक् ।
वातश्वासे प्रदातव्यं शाल्यन्नेन च भोजनम् ॥ ५ ॥
निस्तुषा जलकुम्भस्थाः खादने विहिता यवाः ।
पित्तश्वासार्द्दिते वाहे[१] पानलेपौ च शीतलौ ॥ ६ ॥
इक्षोः शरस्य[२] काशस्य नलवेतसयोस्तथा ।
मूलक्काथः प्रदातव्यः पाने क्षौद्रसितान्वितः[३] ॥ ७ ॥
वस्तिश्चैव[४] जलक्षीरैः पित्तश्वासे प्रकीर्त्तितः ।
मुहुर्मुहुश्च पङ्केन[५] प्रलेपश्च हितस्तथा ॥ ८ ॥
रास्ना[६]गोक्षीरपानञ्च शर्करामधुमूर्च्छितम् ।
पञ्चतिक्तेन[७] सिद्धस्य अक्षपानञ्च सर्पिषा ॥ ९ ॥

---

५ । वातकाशे पञ्चमूलकषायसाधितं मांसरसं शाल्यन्नेन सह भोजनं देयम् । पञ्चमूलस्य पलं मांसस्य च प्रस्थः १८० पलमिते वारिणि पाच्यः । तण्डुलस्यार्द्धाढकः ।

६ । अत्र यवस्य प्रस्थत्रयं वारिपर्य्युषितं देयम् ।

८ । अत्र क्षीरजलयोः आढको ग्राह्यः ।

९ । रास्नायाः पलं । गोक्षीरस्य प्रस्थः । शर्करामधुनोः प्रत्येकं कुड़वः । अक्षपानं कर्षपरिमितपानम् ।

---

१ । देयौ च । गः ।
२ । तृष्णाकुलस्य । खः ।
३ । क्षौद्रसमन्वितः । गः ।
४ । वस्तितुल्यमजाक्षीरं । गः ।
५ । कर्द्दमेन । गः ।
६ । शस्तम् । खः ।
७ । पञ्चतिक्तकसुद्धस्य । गः ।

दन्तीमूलं हरिद्रा च हिङ्गु च[1] बृहतीफलम्।
एतैस्तु धूपयेत्कासे नासिकायां कफात्मके ॥ २७ ॥
क्षतजे क्षयकासे च पित्तकासो[2]दितां क्रियाम्।
कुर्य्यान्मतिमतां श्रेष्ठो वाजिनां हितकाम्यया ॥ २८ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे कासरोगचिकित्सिते चतुस्त्रिंशोऽध्यायः।

---

## अथ पञ्चत्रिंशोऽध्यायः।

### हिक्काश्वासनिदानलक्षणम्।

मुखेन नासया चैव यः श्लेष्माणं विमुञ्चति।
वातिकं शिशिरे काले तस्य श्वासं विनिर्द्दिशेत् ॥ १ ॥
शरन्निदाघयोश्चैव श्वासः पित्तेन जायते।
तृष्णादाहपरीतस्य स्विन्नगात्रस्य वाजिनः ॥ २ ॥
मुखेन नासया चैव कफो यस्य प्रवर्त्तते।
प्रावृट्काले वसन्ते वा[3] श्वासस्तस्य कफात्मकः ॥ ३ ॥
दृष्ट्वा लक्षणसांकर्य्यमादिशेत् सन्निपातजम्[4]।
द्वन्द्वजञ्च[5] तथा द्वाभ्यां दोषाभ्यां जनितं[6] बुधः[7] ॥ ४ ॥

---

१। हिङ्गुञ्च। खः।
२। कृत्वा चैवोदितां क्रियाम्। गः।
३। वापि। खः।
४। सान्निपातिकम्। खः।
५। द्वन्द्वजञ्च। गः।
६। जनितो बुधैः। गः।
७। बुधः। खः।

पिप्पलीचूर्णसंयुक्तं सर्पिषा सह साधयेत् ।
तं[१] लेहं दापयेद्वाहे पिण्डं वा भोजयेत्ततः[२] ॥ २२ ॥
फलचूर्णञ्च[३] काश्मर्य्या एवं दद्याद्विचक्षणः ।
लोध्रचन्दनयष्ट्याह्वपद्मकैर्घृतयोजितैः ।
धूपो नासाग्रतः[४] कार्य्यः शास्त्रदृष्टेन कर्म्मणा ॥ २३ ॥

श्लेष्मकासचिकित्सा ।

चित्रकं त्रिफलाचूर्णं मुस्तकं कटुकत्रयम् ।
मधुना दापयेल्लेहं श्लेष्मकासार्द्दिते हये ॥ २४ ॥
पञ्चतिक्तसुसंसिद्धं तिक्तमुद्गञ्च भोजयेत् ।
मधुना तिलतैलेन युक्तास्त्रिकटुकेन च ॥ २५ ॥
गवां मूत्रेण सुस्विन्नास्तिलतैलेन मर्द्दिताः ।
व्योषचूर्णसमायुक्ताः कुलत्था भोजने हिताः[५] ॥ २६ ॥

---

२२ । निम्बामृतवृषपटोलनिदिग्धिकानां पलं तिक्तमुद्गस्य च प्रस्थत्रयं ४ जलाढके पक्वा मधुकुड़वेन तैलकुड़वत्रयेण त्रिकटुकचूर्ण-पलेन च एकत्र भोजयेत् । एषा मात्रा उत्तमे ज्ञेया ।

२३ । एवं कुलत्थभोजनेऽपि मात्रां जानीयात् । अत्र ग-पुस्तके द्वितीयान्तः पाठो दृश्यते ।

२४ । दन्तीमूलादीनां कर्षत्रयं घृतस्य च कर्षो धूपे ग्राह्यः ।

---

१ । तल्लेहं । खः ।
२ । भिषक् । खः ।
३ । फलस्य चूर्णं काश्मर्य्याः । गः ।
४ । नासागतः । गः ।
५ । कुर्य्याद्वै भोजयेद्धितान् । गः ।

पित्तकासचिकित्सा ।

गृहीत्वा गोमयरसं पिप्पलीचूर्णसंयुतम् ।
मधुना सर्पिषा चैव लेह्यं[१] कासे सपैत्तिके ॥ १७ ॥
पायसं यवचूर्णेन छागक्षीरेण साधितम् ।
धात्रीमागधिकाचूर्णं भोजयेन्मधुसर्पिषा ॥ १८ ॥
पिप्पलीमधुकाभ्यान्तु वलारोचनया युतम्[२] ।
पिप्पलीचूर्णसंयुक्तं छागक्षीरं सशर्करम् ॥ १९ ॥
एतत्पानं प्रदातव्यं वातकासप्रशान्तये ।
पटोलपत्रनिःक्वाथे[३] सुस्विन्नान्[४] भोजयेत्ततः ॥ २० ॥
मुद्गान् मागधिकायुक्तान् मधुयुक्तेन सर्पिषा ।
चूर्णमामलकानान्तु वंशरोचनया युतम् ॥ २१ ॥

---

२१ । चित्रकादीनां चूर्णं समभागं पादोनपलमितं मधुना कुड़व-मितेन मिश्रयित्वा लेहयेत् ।

---

१ । लेह्यनीयस्तु पैत्तिके । गः ।
२ । पिप्पलीमधुकाभ्यान्तु क्षीरं छागं सशर्करम् । क्षौद्रं पाने प्रदातव्यं वातकासप्रशान्तये । खः ।
३ । पञ्चतिक्तकनिःक्वाथे । खः ।
४ । स्विन्नान्नम् । खः ।

वंशरोचनया युक्तं चूर्णं गोधूमजं ततः ।
तेन कल्केन संनीय क्षीरेण विधिवत्पचेत् ॥ १२ ॥
ततो गुड़ेन संयोज्य भोजयेत् सर्पिषा सह ।
घृतेन मधुना युक्तं पायसञ्च प्रदापयेत् ॥ १३ ॥
वार्त्ताकानां फलैः क्वाथः[1] शुण्ठीमागधिकान्वितः ।
मूर्च्छितस्तिलतैलेन पाने दत्तः सुखावहः ॥ १४ ॥
मूलकस्य रसञ्चैव[2] वार्त्ताकक्वाथवद्भिषक् ।
वातिके दापयेत्पानं कासे तैलेन मिश्रितम् ॥ १५ ॥
कुलत्थदर्भमूलन्तु घृतगोमेदसा युतम् ।
धूपोऽनेन[3] प्रदातव्यो नासिकाविवरेण तु ॥ १६ ॥

---

१२—१३ । तेन कल्केन दुरालभादिकल्केन पलमितेनेत्यर्थः । वंशलोचनागोधूमचूर्णं मिलितं पलं । क्षीरस्याढको गुड़स्य पलाष्टकं घृतस्य च पलचतुष्टयम् । एतानि एकत्र पक्वा भोजयेत् । घृतेन पलचतुष्टयेन मधुना कुड़वमितेनेत्यर्थः ।

१४ । अत्र क्वाथादिद्रव्यमानं पूर्व्ववत् ज्ञेयम् ।

१५ । मूलकरसस्य प्रस्थार्द्धं वार्त्ताकक्वाथस्य च प्रस्थद्वयं एकत्र तैलस्य प्रस्थार्द्धेन सह पाययेत् ।

१६ । कुलत्थदर्भचूर्णं मिलित्वा षट्तोलकं घृतगोमेदसोश्च कर्षौ धूपमात्रा ।

---

१ । क्वाथं समं मागधिकान्वितम् । गः ।
२ । रसे चैव वार्त्ताकं क्वाथयेद्भिषक् । गः ।
३ । धूपस्तेन । गः ।

प्रसारयति यो गात्रं[१] ग्रीवाञ्चापि विशेषतः ।
कासमानो हयो दीर्घं[२] भिन्नरोमा[३]तिदुर्ब्बलः ॥ ७ ॥
दुर्गन्धिपूयसङ्काशं यश्चैव कफमुद्गिरेत् ।
तस्य[४] विद्याद्बुधः कासं हयस्य क्षतसम्भवम् ॥ ८ ॥

वातकासचिकित्सा ।

वातकासाभिभूतस्य[५] पानं दद्याद्विचक्षणः ।
पञ्चमूलकषायेण कृत्वा मांसरसं बुधः ॥ ९ ॥
गोक्षीरं शर्करायुक्तं पिप्पलीनागरान्वितम्[६] ।
तिलतैलेन संयोज्य भोजयेल्लवणान्वितम् ॥ १० ॥
दुरालभां कण्टकारीं वृहतीं कटुरोहिणीम् ।
पिष्ट्वा वार्त्ताकुयूषेण तैलसिद्धेन पण्डितः ॥ ११ ॥

---

९ । पञ्चमूलस्य मिलितं पलं वारिण आढकः । पादावशिष्टः क्वाथो ग्राह्यः ।

१० । अत्र दुग्धस्य प्रस्थः, शर्करा कुड़वमिता, पिप्पलीशुण्ठ्यो-र्मिलितं पादोनं पलं, तैलस्य च प्रस्थार्द्धम् ।

११ । दुरालभादीनां पलं । वार्त्ताकूनां शुष्कानां पलं, पाकार्थं वारि आढ़कमितं अर्द्धावशिष्टं कार्य्यम् । सन्तलनार्थं तैलस्य च कुड़वत्रयम् ॥

---

१ । गात्राणि । गः ।
२ । दीनः । गः ।
३ । तीक्ष्णरोमा । खः ।
४ । तन्तु विन्द्याद्बुधः कासं वाहस्य । गः ।
५ । वातकासाभियोऽन्यस्तु । गः ।
६ । पिप्पलीधूमजं ततः । गः ।

रूक्षो यस्य भवेत् कासः श्लेष्मस्राव[1]विवर्जितः ।
क्षीणस्य[2] वर्द्धते चापि वातिकं तस्य निर्द्दिशेत् ॥ २ ॥
दाहस्वेदयुतः कासो नीलपीतकफान्वितः ।
विच्छिन्नश्च[3] तुरङ्गानां विज्ञेयः पित्तसम्भवः ॥ ३ ॥
अधिकं कासते यस्तु हृष्टरोमाः सुदुर्म्मनाः ।
गुरुगात्रशिरा वाजी मन्दग्रासविचेष्टितः ॥ ४ ॥
दधिकुन्देन्दुसंकाशं[4] श्लेष्माणं यो विमुञ्चति ।
ग्रासाभावे सुखी यश्च[5] तस्य विद्यात् कफात्मकम् ॥ ५ ॥
सर्व्वेषां लक्षणैर्युक्तं जानीयात् सान्निपातिकम् ।
कषायेण च रक्तेन श्लेष्मा[6] क्षतजसम्भवः ॥ ६ ॥

---

२ । रूक्षः शुष्क इत्यर्थः ।

४ । गुरुगात्रशिरा इति गात्रस्य शिरसश्च गुरुत्ववान् । मन्दग्रासविचेष्टित इति ग्रासे शष्पादिभक्षणे विचेष्टिते शरीरचेष्टायां च मन्दता शैथिल्यं तद्वानित्यर्थः ।

५ । दधिकुन्देन्दुसंकाशं तद्वत् शुभ्रमित्यर्थः । ग्रासाभावे सुखीति ग्रासस्य कवलग्रहणस्य अभावे सुखी भोजनग्रहणे अनिच्छुरित्यर्थः ।

६ । कषायेण कषायवर्णेन रक्तेन च युक्त इति शेषः ।

---

१ । कास । गः ।
२ । क्षीरेण वहते वापि । गः ।
३ । पिच्छिलश्च । खः ।
४ । कुन्देन्दुदधिसङ्काशम् । खः ।
५ । सुखासीनः । गः ।
६ । श्लेष्मणा क्षतजो भवेत् । गः ।

पिष्ट्वा कुटजवीजन्तु यष्टीमधुसमन्वितम् ।
घृतेनालोड्य[1] मतिमान् कुर्य्याद्वस्त्रपरिस्तुतम् ॥ ५ ॥
पूरयेत्तेन कर्णन्तु सुखोष्णेनैव बुद्धिमान् ।
रसेन च कपित्थस्य युक्तेन मधुसर्पिषा ॥ ६ ॥
त्वक्पत्रे क्षीरवृक्षस्य सर्पनिर्मोकमेव च ।
गोलोम गुग्गुलुं कुष्ठं मेषोर्णां च मनःशिलाम् ॥ ७ ॥
घृतेन मर्द्दयित्वा तु धूपं कर्णे प्रदापयेत् ।
भोजयेत्[2] पिप्पलीयुक्तान् मुद्गांश्च क्षौद्रयोजितान् ॥ ८ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे कर्णरोगे त्रयस्त्रिंशोऽध्यायः ।

---

## अथ चतुस्त्रिंशोऽध्यायः ।

### कासरोगनिदानलक्षणानि ।

त्रयो वातादिभिर्दोषैः सन्निपातेन चापरः ।
क्षतक्षयसमुत्थौ द्वावेवं कासस्तु षड्विधः ॥ १ ॥

---

५-६ । कुटजवीजस्य इन्द्रयवस्य यष्टीमधुनश्च कर्षः घृतस्य च पलं एकत्र समालोड्य कवोष्णं कर्णे पूरयेत् ॥

---

१ । आलोड्यमानन्तु । गः ।

२ । भोजने पिप्पलीयुक्तमुद्गाः क्षौद्रेण योजिताः । खः ।

## अथ त्रयस्त्रिंशोऽध्यायः।

कर्णरोगनिदानचिकित्सिते।

दोषैः संदूषिते रक्ते अथवाप्यभिघाततः।
वाजिनां कर्णरोगस्तु क्लेदशोथान्वितो भवेत्॥ १॥
पूयस्रावेण जानीयात् शोथमभ्यन्तरोद्भवम्[१]।
पिचुना वेष्टयित्वा तु शलाकाग्रं समाहितः॥ २॥
तेन कर्णान्तरे पूयं कर्षयित्वा विचक्षणः।
पातितस्य सुवद्धस्य[२] पूरयेन्मधुसर्पिषा॥ ३॥
कुष्ठं[३] मागधिका लोध्रं मधुकं चन्दनं तथा।
एभिः सिद्धं घृतं[४] दृष्टं कर्णपूरणमुत्तमम्॥ ४॥

१। क्लेद शोथान्वित इत्यत्र क्लेदः पूयादिकम्।

२। पिचुना तूलकेन।

४। कुष्ठं (कुड़)। मागधिका (पिपुल)। एषां समभागकल्कः कुड़वमितः। घृतस्य च प्रस्थः। पाकार्थं जलं स्नेहचतुर्गुणं दत्वा पाच्यम्। पूरणमात्रा कुड़वमिता ग्राह्या।

१। अभ्यन्तरे भवेत्। गः।
२ सुवेधस्य। गः।
३। यष्टिकाच कणा। गः।
४। हितं। गः।

पश्चात्पादं खुराग्रेण भूमौ भ्रश्य तु गच्छति ।
तदाकिञ्चन-वाहो वा न योज्यो वाजिकर्म्मणि ॥ ३० ॥
प्रध्यायमानो यः पश्चाद्रज्जुमाकृष्य सर्व्वदा ।
वातक्षुग्नकटिर्व्वाजी स विज्ञेयो ह्यकिञ्चनः ॥ ३१ ॥
उत्तिष्ठत्यग्रकायेन यो लुठित्वाग्रतो[1] हयः ।
पश्चात् पश्चिमकायेन सोऽपि वातहतः स्मृतः ॥ ३२ ॥
वाहितं सुदृढ़ं वाहं स्नातं पीतोदकं तथा ।
वारितञ्च सुखासीनं ध्यायन्तञ्च निरूहयेत् ॥ ३३ ॥
त्रिरात्रं पञ्चरात्रं वा सप्तरात्रमथापिवा ।
निरूहयेत्तुरङ्गन्तु त्रिकलिंगिकशङ्कया ॥ ३४ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे लङ्गिते द्वात्रिंशोऽध्यायः ।

---

३१। वातभुग्नकटिमाह ।

---

१ । लुठित्वात्वग्रतो हयः। गः ।

चिपाच्च यः स्थितो भूमिं खुराग्रेण स्पृशेद्यदि ।
ध्यायते निश्चलो यश्च तं हयं शुद्धमादिशेत् ॥ २३ ॥
अग्रकायेन यो याति स शुद्धः परिकीर्त्तितः ।
पश्चात्कायोत्थितश्चाग्रे दृढ़ः प्रोक्तो मनीषिभिः ॥ २४ ॥
निद्रायमाणो यो वाजी निम्नोरस्को भवेद् यदि ।
अङ्गुलं द्व्यगुलं वापि स तु ग्राह्यो विचक्षणैः ॥ २५ ॥
अत ऊर्द्ध्वं न गृह्णीयाद् वायोर्वलसमन्वितम् ।
अथवाप्यंसकूटेन द्वाभ्यामेकेन वा पुनः ॥ २६ ॥
वेगेन गतिभिश्चैव तुल्यो भवति यो हयः ।
स वै वातकटिर्ज्ञेयो न ग्राह्यो वलवानपि ॥ २७ ॥
पुलिनश्चैव यो वाजी गच्छन्नुद्वहते कटिम् ।
सोऽपि वाताभिभूतोऽश्वो न योज्यो वाजिकर्म्मणि ॥२८॥
उरो रक्षति वाहस्य वर्ज्या दृष्ट्वाभिकुञ्चनम् ।
कर्णयोर्व्यस्तसंन्यस्तो वाजी वातहतः स्मृतः ॥ २९ ॥

---

२३। लिङ्गिते शुद्धलक्षणमाह ।

२७। वातकटिलक्षणमाह । न ग्राह्य इति न चालनीय इत्यर्थः ।

२९। वातहताश्वमाह । कर्णयोर्व्यस्तसंन्यस्त इति व्यस्तसंन्यस्त-कर्ण इत्यर्थः ।

कपिकच्छुवलावालपारिभद्रकसैन्धवैः।
कपिकच्छुकवाथ्यालं पादशेषव्यवस्थितम्॥ १६॥
आर्द्रसिन्धुहरिद्राणां चूर्णं दत्वा तु बुद्धिमान्।
तैलन्तु व्योषचूर्णेन रसवर्जन्तु दापयेत्॥ १७॥
तस्मिन् दिने भोज्यपानं दापयेन्न मनागपि।
पश्चात्काये[1] लिङ्गितेतु अनुवासस्तु केवलः॥ १८॥
सर्व्वाः प्राक्कायिकाश्चापि[2] चिकित्साः परिकीर्त्तिताः।
सर्व्वेषु चैव लङ्गेषु अनुवासस्तु केवलः॥ १९॥
सर्व्वेषु चैव लङ्गेषु समीपे वेधयेत् शिराम्।
उरोलङ्गो[3]चिताश्चैव क्रियाः सर्व्वाः प्रकीर्त्तिताः॥ २०॥
त्रिकलिङ्गीति यः प्रोक्तो हरिर्वातकटिस्तु सः।
आपाण्डी[4] वैधयित्वा तु शिरास्तस्य विचक्षणः॥ २१॥
भोजनञ्च निरूहञ्च सम्यगेव प्रदापयेत्।
तैलै[5]र्वातहरैर्वैद्यस्तथा चाभ्यङ्गमेव च॥ २२॥

---

१६। निरूहमाह कपिकच्छ्वित्यादि।

---

१। पश्चात्कायेन लम्वेतु। खः।
२। अभिघातलङ्के नस्यं हि हितं प्रोक्तायसम्भवम्। खः।
३। उरोलङ्गादिका चैव क्रियाः शेषाः। गः।
४। अपाण्डीः। खः।
५। तिक्तैः। गः।

अभिघातसमुद्भूते क्रियां वक्ष्यामि साम्प्रतम् ॥१०॥
लङ्घिते मुनिभिः प्रोक्तं वाजिनां हितकाम्यया।
उरसोऽभ्यञ्जनं कार्य्यं शतधौतेन सर्पिषा ॥ ११ ॥
पञ्चवल्कलकल्केन लेपं दद्यान्मुहुर्मुहुः।
एवं प्रतिदिनं कुर्य्यात् सप्ताहञ्चापि[1] सप्तकम् ॥ १२ ॥
निश्चलस्य तुरङ्गस्य पञ्चाहं वा चतुर्गुणम्।
भ्रामयित्वा समं वैद्यस्ततः[2] सम्यक् निरूपयेत् ॥ १३ ॥
तृतीये सप्तके पूर्णे तुरङ्गं शास्त्रकोविदः।
अशुद्धौ पूर्व्वमुद्दिष्टं शिरावेधादिकक्रमम् ॥ १४ ॥
कुर्य्याद्घृष्टतले वाहे वह्निदाहावसानिकम्[3] ।
अभिघातलङ्घिते वै न हितं क्रमणं भवेत् ॥ १५ ॥

---

११। अभिघातोत्थचिकित्सितमाह। अभिघातेत्यादि।

१२। लेपं दद्यात् लङ्घितावयवे इति शेषः।

१३। चतुर्गुणं पञ्चाहं विंशतिदिनमित्यर्थः।

१४। शिरावेधादिकं क्रमं शिरावेधप्रभृति अनुष्ठानं तदध्यायोक्तमित्यर्थः।

१५। घृष्टतले वाहे सुयन्त्रिते अश्वे इत्यर्थः। वह्निदाहावसानिकं अग्निदाहपर्य्यन्तम्।

---

१। सप्तकञ्चाह्नि सप्तकम्। गः।
२। महावैद्यः। गः। ३। वह्निदाहोवसानिकाम्। खः।

शीतकाले प्रदातव्यं प्रतिपानं प्रदापयेत्[१] ।
हरिद्रातिविषालोध्रपिप्पल्या च महौषधैः ॥ ५ ॥
त्रायमाणावचाकुष्ठमुस्ताकट्फलसैन्धवैः ।
प्रतिपानं हितं[२] दृष्टं सुरया सीधुनापि च ॥ ६ ॥
तीक्ष्णशीतं समालोक्य कालं शास्त्रविशारदः ।
एवं प्रतिदिनं कुर्य्यात् त्र्यहं सप्ताहमेव[३] च ॥ ७ ॥
अनन्तां[४] वेधयेद्वैद्यः शिरां शस्त्रेण चौरसीम् ।
शिरास्रावे[५] कृते चापि यदि नो जायते सुखम् ॥ ८ ॥
तदा वह्निः प्रदातव्यो यथाशास्त्रं विचक्षणैः ।
शिंशपापाठमूलैश्च वल्कलैः क्वथितैर्जले ॥ ९ ॥
सर्पिस्तैलसमायुक्तो गुग्गुलर्लङ्घिने हितः ।

---

दीनां पलेन प्रतिपानं दद्यादित्यर्थः । एतत्सर्व्वं चिकित्सितं दोष-सम्भूत एव लङ्घिते ज्ञातव्यम् ।

६ । सुरया गौड्याद्यन्यतमया, सीधुना सुराभिन्नया मदिरया वा ।

९ । सिंशपा शाकतरुः, पाठा अविद्धकर्णा (आकनादि) । एतयोर्मूलानि वल्कलानि च जलाढ़के पक्वा पादशिष्टः क्वाथो ग्राह्यः । गुग्गुलोश्च पलं ग्राह्यम् ।

---

१ । तदा तं प्रतिपाययेत् । खः ।
२ । भिषक् दद्यात् । खः ।
३ । पश्चाद्दम् । गः ।
४ । अ‌सिद्धो वेदयेत् । खः ।
५ । शिरावेधे । गः ।

चिकित्साञ्चैव[1] वक्ष्यामि संक्षेपेण यथाक्रमम् ।
पारम्पर्य्येण शास्त्राणां यथा दृष्टं तपोधनैः ॥ २ ॥
उरसा बाहुना[2] चाश्वो जानुजंघात्रिकेण च ।
कूर्च्चेन च खुराग्रेण मण्डूक्या चापि लङ्गति[3] ॥ ३ ॥

चिकित्सा ॥

अभिघातं विना वाजी[4] यदा दोषेण लङ्गति[5] ।
उपवासैस्तु संशोध्य घृतं वै सुरयान्वितम् ॥ ४ ॥

---

१ । लङ्गितं लङ्गितनामकपादरोगः। (लेङ्‌ड़ा) इति प्रसिद्धः। पुस्तकद्वये लङ्गितं लिङ्गितमिति च यो दृश्यते पाठः स उभयविध एव साधुः। लगद्द खञ्जे इति लगि-धातोः क्तप्रत्ययेन निष्पन्नं लङ्गितम् । लिङ्गितमिति च रिङ्गधातोः क्तप्रत्ययेन निष्पन्नम् ।

४ । दोषेण वातादिना । उपवासैः संशोध्य बलाद्यविरोधि-लङ्घनेन दोषसंशोधनं कृत्वेत्यर्थः । अतिलङ्घितस्य बहुदोषस्मरणात् । तदुक्तं चक्रदत्तेन । "प्राणाविरोधिना चैनं लङ्घनेनोपपादयेत् । वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे ॥ हृदयोद्‌गारकण्ठास्यशुद्धौ तन्द्राक्लमे गते । कृतं लङ्घनमादेश्यं निर्व्यथे चान्तरात्मनि" ॥ इत्यादि । शीतकाले सुरान्वितं घृतं संभोज्य सुराप्रस्थेन हरिद्रा-

---

१ । चापि । गः ।
२ । बाहुकेनाश्वः । खः ।
३ । लिङ्गितम् । खः ।
४ । वापि । खः ।
५ । लिङ्गितः । खः ।

तेन नस्यं प्रदातव्यं तिक्तमुद्गैश्च भोजनम्।
सुखोष्णं तस्य कर्त्तव्यं विडङ्गं घृतयोजितम्॥ ३२॥
विडङ्गं लसुनं लोध्रं वृहतीनां फलानि च।
कल्कीकृत्य गवां मूत्रैस्तैलं तेनैव पाचयेत्[१]॥ ३३॥
नस्यं दद्यात् सुखोष्णेन तेन तैलेन[२] बुद्धिमान्।
भोजयेत्तिक्तमुद्गैश्च विडङ्गघृतयोजितैः॥ ३४॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे शिरोरोग एकत्रिंशोऽध्यायः।

## अथ द्वात्रिंशोऽध्यायः।

लङ्घितलक्षणम्।

लङ्घितं द्विविधं प्रोक्तं मुनिभिः शास्त्रशालिभिः।
एकं वातादिभिर्दोषैर्द्वितीयञ्चाभिघातजम्॥ १॥

---

३३। तैलस्य प्रस्थं विडङ्गादीनां कुड़वमितकल्केन सह स्नेहचतुर्गुणेन गोमूत्रेण पाचयेत्।

---

१। क्षीरे विपाचयेत्। गः।
२। तिलतैलेन। खः।

स्तब्धकर्णो गुरुशिरा भवेद्वाजी सुदुर्म्मनाः ॥ २६ ॥
पित्तजे या क्रिया प्रोक्ता शिरावेधादिका मया ।
रक्तजे सा प्रयोक्तव्या तथा चैवाभिघातजे ॥ २७ ॥
प्रोथतेऽन्तःशिरो यस्य यस्य नासासमुद्भवाः ।
दृश्यन्ते कृमयश्चापि कृमिजं तस्य निर्द्दिशेत् ॥ २८ ॥
त्रिकटुञ्च विडङ्गञ्च वार्त्ताकीनां फलानि च ।
सुरया मर्द्दयित्वा तु नस्यं तैलेन दापयेत् ॥ २९ ॥
फलानि वृहतीनाञ्च तिक्तवार्त्ताकुमेव च ।
पिष्टाच छागक्षीरेण नस्यं तेनैव दापयेत् ॥ ३० ॥
नागरं शतपुष्पञ्च तगरञ्च हरेणुकम् ।
कल्कं कृत्वा गवां मूत्रे तैलं तेनैव पाचयेत् ॥ ३१ ॥

---

२८ । कृमिजशिरोरोगमाह प्रोथत इति । यस्यान्तःशिरः प्रोथते कृमिपूर्णं भवतीत्यर्थः । प्रोथ ऋ ञ पर्य्यापणे । पर्य्यापणं परिपूर्णता ।

२९ । कृमिजशिरोरोगचिकित्सामाह षड्भिः श्लोकैः त्रिकट्विन्त्यादिभिः । त्रिकट्वादीनां मिलितः कर्षः सुरातैलयोश्च कुड़वार्द्धम् ।

३० । वृहती तिक्तवार्त्ताकुफलं कर्षमितं छागदुग्धेन पिष्ट्वा कुड़वार्द्धेन छागदुग्धेन नस्यं देयम् ।

३१ । नागरादीनां कुड़वः । तैलस्य च प्रस्थः तैलचतुर्गुणे गोमूत्रे मृदुपाकेन साध्यः । नस्यपरिमाणं कुड़वार्द्धं ग्राह्यम् ॥ भोजनञ्च सुखोष्णविड़ङ्गघृतयुक्तं भाव्यम् ॥

शिरावेधं प्रकुर्व्वीत पूर्व्वोक्तं तत्र पण्डितः ।
प्रतिपानञ्च दातव्यं सुरया वक्ष्यमाणकम् ॥ १९ ॥
सुरदारु हरिद्रे द्वे पिप्पली शृङ्गवेरकम् ।
प्रपौण्डरीकं मधुकं पत्राणि सुरसस्य च ॥ २० ॥
श्रीवासकं सर्ज्जरसं त्वचं कुष्ठं हरेणुकम् ।
घृतेन योजयित्वातु नासाधूमं प्रदापयेत् ॥ २१ ॥
भोजनं[१] तिक्तमुद्गैश्च पूर्व्वोक्तैर्मधुसर्पिषा ।
असाध्योऽयं[२] प्रवक्तव्यो विधिरश्वहितैषिणा ॥ २२ ॥

रक्ताभिघातशिरोरोगचिकित्सा ।

कटुकैर्लवणैरम्लैरसैरत्यन्तसेवितैः ।
रक्तं कुपितमश्वस्य शिरोरोगाय जायते ॥ २३ ॥
शूननासाक्षिकूटस्तु रक्तनेत्रः सुदुर्म्मनाः ।
कदाचिद्दृश्यते तस्य रक्तं नेत्राद्विनिर्गतम्[३] ॥ २४ ॥
रक्तजं तस्य जानीयात् शिरोरोगं विचक्षणः ।
अभिघातसमुत्थस्य लक्षणं प्रवदाम्यहम् ॥ २५ ॥
काष्ठलोष्टप्रहारैस्तु शिरो यस्याभिहन्यते ।

---

२० । प्रतिपाने सुराप्रस्थः । सुरदार्व्वादिसुरसान्तानां मिलितं पलं कल्कीकृतं सुरायां देयम् ॥

---

१ । योजयेत्तिक्तमुद्गांश्च पूर्व्वोक्तान् । खः ।
२ । असाध्योऽपि प्रकर्त्तव्यो बुद्धिसन्देहबुद्धिमान् । गः ।
३ । विचक्षणः । गः ।

तस्य विद्यात् कफोत्थन्तु शिरोरोगं विचक्षणः ।
तालुकं वेधयेत्तस्य शिरां शंखादिकान्तथा ॥ १४ ॥
विड़ङ्गं कटुचूर्णञ्च तिक्तवार्त्ताकुमेव च ।
पिष्ट्वा[1] क्षीरेण छागेन नस्यं तेनैव दापयेत् ॥ १५ ॥
नागरं शतपुष्पञ्च तगरञ्च हरेणुकम् ।
कल्कं कृत्वा गवां मूत्रे पचेत्तैलं विचक्षणः ॥ १६ ॥
तेन नस्यं प्रदातव्यं निम्बमुद्गस्य[2] भोजनम् ।
सुखोष्णं तस्य कर्त्तव्यं क्षौद्रं त्रिकटुकान्वितम् ॥ १७ ॥

सान्निपातिकशिरोरोगचिकित्सा ।

सङ्कीर्णलक्षणं विद्यात् सन्निपातसमुद्भवम् ।
असाध्यं तं विजानीयात् कृच्छ्रसाध्यमथापिवा ॥ १८ ॥

---

१५ । कटुचूर्णं त्रिकटुचूर्णं । एषां मिलितं कर्षद्वयं नस्यार्थे देयम् ।

१६ । नागरं शुण्ठी । शतपुष्पं (शुलका) । तगरं (तगरपादुका) । हरेणुकं (रेणुक) । एषां कल्केन कुडवमितेन । गोमूत्रेण स्नेहचतुर्गुणेन तैलप्रस्थं पाचयेत् । तस्य कुडवार्द्धं नस्यार्थे ग्राह्यम् ।

१८—१९ । सङ्कीर्णलक्षणं वातादिसाधारणलक्षणं । पूर्व्वोक्तं शिरावेधमिति तालुमन्यादिशिरावेधमित्यर्थः ।

---

१ । मथ्वा । गः । तस्य नेत्रं प्रदापयेत् । गः ।
२ । निम्बमुद्गैस्च । गः ।

शंखादिकं शिरावेधं पूर्व्वोक्तञ्चैव कारयेत्।
शिरोऽभ्यङ्गो हितस्तस्मै[1] शतधौतेन सर्पिषा ॥ ९ ॥
प्रपौण्डरीकं मधुकं चन्दनोशीरपद्मकैः।
एभिः कल्कीकृतैस्तस्य शस्तं मूर्द्ध्नि प्रलेपनम् ॥ १० ॥
क्षीरेण साधितं सर्पिर्मधुकोशीरपद्मकैः।
एभिः कल्कीकृतैर्देयं तस्य नासावसेचनम् ॥ ११ ॥
तिक्तमुद्गान् घृतान् भक्तान् भोजनं तस्य दापयेत्।
ग्रासे दूर्व्वार्ज्जुनौ वापि तथा शालेश्च पल्लवान् ॥ १२ ॥

श्लैष्मिकशिरोरोगचिकित्सा।

मुखेन नासयोर्वापि[2] यः श्लेष्माणं प्रमुञ्चति।
दीनोऽतीव गुरुशिरा मेदसा शूनतालुकः ॥ १३ ॥

---

९। शंखादिकमित्यत्र आदिपदेन तालुमन्यागते शिरे ज्ञेये। वेधश्चोत्पलपत्रव्रीहिमुखयोरन्यतरेण शस्त्रेण कार्य्यः। शतधौतं घृतं प्रसिद्धम्।

१०। अत्र प्रपौण्डरीकादीनां समभागं पलं वारिणा पिष्ट्वा शिरसि लेपो देयः।

११। घृतस्य प्रस्थः। मधुकादीनां कल्कः कुड़वमितः। क्षीरञ्च स्नेहाच्चतुर्गुणं ग्राह्यम्।

---

१। शिरोरोगे ततस्तस्मै। गः।
२। नासया चैव। गः।

स्पन्दमानेन शिरसा जानीयाद्वातसम्भवम्।
स्पन्दमानं शिरस्तच्च हस्तस्पर्शेन[१] लक्षयेत्॥ ३॥
शंखतालुकयोश्चैव शिरामन्यागतां तथा।
वेधयित्वा ततः कुर्य्यात् पश्चे तैलावसेचनम्॥ ४॥
अतिविषया पिप्पल्या वचया लवणेन च।
सुरसायाश्च[२] पत्रेण प्रतिपानं सुरान्वितम्॥ ५॥
हितं तस्मै प्रदातव्यं भोजनञ्च रसोदकम्।
तिलतैलेन संयुक्तं स्वल्पं त्रिकटुकान्वितम्[३]॥ ६॥

पैत्तिकशिरोरोगचिकित्सा।

श्वासस्तृष्णा तथा स्वेदः शूनभावोऽपि[४] वर्त्मनोः।
अत्युष्णता गुरुत्वञ्च शिरसो यस्य जायते॥ ७॥
अधोमुखस्य वाहस्य निद्रालस्यं तथा नृणाम्।
पित्तोद्भवं शिरोरोगं जानीयान् मतिमान् भिषक्॥८॥

---

४। तैलावसेचनं वातरोगोक्ततैलसेकं कुर्य्यादित्यर्थः॥

५। सुरसा श्वेता त्रिवृत्। तस्याः पत्रेण। अतिविषादीनां चूर्णं पलमितम्।

६। तिलतैलस्य कुड़वत्रयं। त्रिकटुकस्य च षट्तोलकं देयम्।

७। शूनभावः स्फीतिः।

८। अधोमुखत्वं पित्तजन्यस्य विशेषलक्षणं शिरोगुरुत्वात्॥

---

१। सम्यक् हस्तस्पर्शं न लक्षयेत्। खः।
२। सुरसस्य च। गः।
३। कटुकसंस्कृतम्। खः।
४। स्रूनताचापि। खः।

शंखे चैवाश्रुपाते च ललाटे वेधयेच्छिराम्॥ ८१॥
त्रिफलायाः कषायेण लोध्रयुक्तेन सेवितम्।
सेचयेत् सततं वैद्यः प्रलेपञ्चैव कारयेत्॥ ८२॥
पञ्चवल्कलकल्केन क्षौद्रयुक्तेन बुद्धिमान्॥ ८३॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे नेत्ररोगे त्रिंशोऽध्यायः।

---

## अथ एकत्रिंशोऽध्यायः।

वातिकशिरोरोगचिकित्सा।

वातात्पित्तात् कफाच्चैव सन्निपाताच्च लोहितात्।
अभिघाताच्च निर्दिष्टः शिरोरोगस्य सम्भवः॥ १॥
अधोमुखस्य दीनस्य[1] मन्दाहारस्य वाजिनः।
सततं प्रोथमानस्य हृष्टरोमस्य[2] बुद्धिमान्॥ २॥

---

८२। त्रिफलायाः पलदशकं। वारि चतुराढ़कमितं पादशिष्टं कार्य्यम्। लोध्रचूर्णस्य पलम्॥

१। लोहितात् शोणितात्। वातादिषट्कारणसम्भवत्वात् षड्विधः शिरोरोगः। तल्लक्षणादिकं क्रमेणोच्यते।

---

१। वाहस्य। गः।
२। दृष्टग्लानस्य। गः।

मुञ्जकोक्तविधिः सर्व्वो मुञ्जजाले विशस्यते ।
रूढ़व्रणे ततः कुर्य्यात्पूर्व्वोक्तां पटलक्रियाम् ॥ ७६ ॥
प्रपौण्डरीकं मधुकं तथा लोहितचन्दनम् ।
एभिः कल्कीकृतैस्तैलं पाचितं त्रिफलाम्भसा ॥ ७७ ॥
नस्यं देयमशुद्धे तु तथा चैवोपतर्पणम् ।
पिप्पली सैन्धवं शुण्ठी गैरिकं वरुणत्वचः ॥ ७८ ॥
गवोष्ट्रदशना श्चैव फेनश्चौदधिकस्तथा ।
क्षौद्रपिष्टैः समैरेभिरञ्जनं मुञ्जनाशनम् ॥ ७९ ॥

वर्त्मकुन्दचिकित्सा ।

विभीतकास्थि सारेण[१] मधुयुक्तेन चाञ्जनम् ।
चक्षुषो यस्य वाहस्य पूयस्रावो विजायते[२] ॥ ८० ॥
वर्त्मकुन्देति[३] यस्य स्यात्तस्य कुर्य्यात् क्रियामिमाम् ।

---

७७ । तैलस्य प्रस्थः । प्रपौण्डरीकादीनां कल्कः पलचतुष्टयमितः त्रिफलाक्वाथेन पाच्यः ॥ प्रपौण्डरीकं पुण्डरियेति लोके प्रसिद्धम् ।

७८—७९ । फेनेत्यादि । औदधिकः फेन इति उदधिसम्बन्धीयः फेनः (समुद्रफेना) ।

८१ । वर्त्मकुन्दे आदौ शंखादिशिरावेधः, ततो नेत्रधावनं । अथ प्रलेपश्च प्रयोज्यः ।

---

१ । विभीतकास्थिरेणुभ्यां । खः ।
२ । ततोभवेत् । गः ।
३ । वर्त्मकोऽपि । खः ।

तच्चिकित्सा ।

पातयित्वा हयं[1] भूमौ कृत्वा चैव सुयन्त्रितम् ।
वर्त्मनी वेधयेत् सूच्या सूत्रे नेत्रं प्रसारयेत् ॥ ७० ॥
कर्पटेनाश्रुवेगन्तु शुष्केनैवापकर्षयेत् ।
स्थापयेद्वाजिनं तन्तु प्रत्यादित्यं विचक्षणः ॥ ७१ ॥
शस्त्रं सूत्रेण संवेष्ट्य तीक्ष्णमात्रन्तु[2] कारयेत् ।
कृष्णशुक्लाम्बर[3]धरो वेधयेद्वाजिलोचने ॥ ७२ ॥
अङ्गुष्ठेन ततो नेत्रं पीडयित्वा समाहितः ।
मुञ्जकं कर्षयित्वा तु जले क्षिप्रं प्रकाशयेत् ॥ ७३ ॥
मुञ्जमुद्धृत्य नेत्रन्तु गोमूत्रेणाऽवसेचयेत् ।
क्षौद्राज्यं पूरितं कृत्वा श्लथवस्त्रेण वेष्टयेत्[4] ॥ ७४ ॥
वहिःप्रलेपं कुर्व्वीत पञ्चवल्कलकेन तु ।
कल्केन घृतयुक्तेन त्र्यहात्पट्टं विमोक्षयेत्[5] ॥ ७५ ॥

---

७१ । कर्पटेन लक्तकेन। प्रत्यादित्यमादित्याभिमुखम् ।

७२ । शस्त्रं उत्पलपत्रं ब्रीहिपत्रं वा सूत्रेण संवेष्ट्य तीक्ष्णमात्रं धारामात्रावशिष्टं कारयेदित्यर्थः ॥

७३ । मुञ्जनिष्काशनानन्तरं औषधमाह क्षौद्रेत्यादि ।

---

१ । ततः । गः ।
२ । नित्यमात्रम् । गः ।
३ । कृष्णशुक्लान्तरे चैव । गः ।
४ । विशोधयेत् । खः ।
५ । त्र्यहादूर्द्ध्वं प्रमोचयेत् । खः ।

वर्त्तिं कृत्वा ततश्चैव शोधयेत्तां विनातपम्[१] ।
ततस्तां सलिलैः पिष्ट्वा अञ्जयेत् पटलं भिषक् ॥६४॥
त्रिफलां सघृताञ्चैव रक्तपित्तसमुद्भवे ।
पटले पाययेदश्वं[२] त्रिकाले चैव बुद्धिमान् ॥ ६५ ॥
वर्त्मजं मांसकीलञ्च पिडकञ्चैव शस्त्रकैः[३] ।
उत्कृत्य[४] लोध्रचूर्णेन अञ्जयेत् सैन्धवेन च ॥ ६६ ॥

मुञ्जजालचिकित्सा ।

एकेन मुञ्जमाख्यातं[५] बहुभिर्मुञ्जजालकम्[६] ।
कृमिभिः पटलान्तःस्थैर्विन्द्या[७]न्नेत्ररुजाद्वयम् ॥ ६७ ॥
प्रथमं तैलवर्णाभं द्वितीयं स्फटिकप्रभम् ।
रक्ताभञ्च तृतीयञ्च चतुर्थं तैलमुच्यते ॥ ६८ ॥
प्रथमं पटलं साध्यं द्वितीयञ्च तथा भवेत् ।
तृतीयं कृच्छ्रसाध्यं स्याच्चतुर्थं नैव सिध्यति ॥ ६९ ॥

---

६५। अत्र त्रिफलायाः पलं घृतस्य च तथा एकत्र पाययेदित्यर्थः ।

---

१। दिनात्यये। खः।
२। दापयेत्। ग०।
३। शास्त्रतः। खः।
४। प्रोच्छयेत्। खः।
५। मुञ्जिकाख्या तु। खः।
६। मुञ्जकालकम्। खः।
७। विद्यात्। गः।

कृष्णञ्च रक्तजं विद्यात् पटलं शास्त्रकोविदः।
अत ऊर्द्धं प्रवक्ष्यामि यथायोगं चिकित्सितम्॥५७॥

तच्चिकित्सा।

पटलेषु च सर्व्वेषु शिरावेधः प्रशस्यते।
अश्रुपाते प्रपाणे च ललाटे चैव शंखयोः॥५८॥
श्लेष्मजस्य हितं दृष्टमञ्जनं मधुसैन्धवम्।
पटलस्य गवां मूत्रं क्षौद्रयुक्तञ्च सैन्धवम्॥५९॥
तुत्थुकं[१] सैन्धवं चैव हरितालं मनःशिलाम्।
गवां मूत्रेण संपिष्य मरिचञ्च विचक्षणः॥६०॥
अञ्जयेत् कफजां प्राज्ञो मधुना पटलं भिषक्।
पटले मांसकीले च चूर्णमेतत् प्रदापयेत्॥६१॥
एष एव प्रदातव्यो वातिके घृतसंयुतः।
पैत्तिके रक्तजे चैव[२] अत ऊर्द्धं क्रियां शृणु॥६२॥
प्रपौण्डरीकं मधुकं शंखं मुक्ता प्रवालकम्।
एतानि समभागानि जले पिष्ट्वा विचक्षणः॥६३॥

६२। एष योगः इत्यर्थः।
६३। शंखादीनां भस्म ग्राह्यम्।

१। गोदन्तं। खः।
२। चञ्जयेच्चैव तदूर्द्धं। गः।

एतानि समभागानि क्षौद्रेण सह योजयेत् ।
हन्याद्दाहञ्च रक्तञ्च वर्त्तिरेषा जलान्विता ॥ ५१ ॥
मञ्जिष्ठां हरितालञ्च लोध्रं वालकमेव च ।
रेणुकञ्च तथा कुष्ठमूशीरञ्च मनःशिलाम् ॥ ५२ ॥
पेषयित्वोदकेनैव[1] छायायां परिशोषयेत् ।
जलघृष्टेयमश्वस्य वर्त्तिर्नेत्ररुजापहा ॥ ५३ ॥

पटललक्षणम् ।

अधस्तादुपरिष्टाद्वा पटलं यस्य जायते ।
रुणद्धि नयने सद्यः तथा नैव[2] क्रमेण च ॥ ५४ ॥
हरितं नीलकं पित्ताद् वाताद्वा[3] लोहितं भवेत् ।
ईषत्पीतं घनं शुक्लं[4] पटलं श्लेष्मसम्भवम् ॥ ५५ ॥
सङ्कीर्णवर्णं विज्ञेयं सन्निपातसमुद्भवम् ।
असाध्यं तं विजानीयात् कृच्छ्रसाध्यमथापि वा ॥ ५६ ॥

---

५४ । पटलं नेत्ररोगविशेषः । स च चतुर्विधो दृष्टेरावरकच्छ-दिरूपः । तेषु प्रथमं वाह्यं पटलं रसरक्ताश्रयं । द्वितीयं मांसाश्रयं । तृतीयं मेदःसंश्रितं चतुर्थञ्च कालकास्थिसंश्रितम् । तदुक्तं सुश्रुते । "तेजोजलाश्रितं वाह्यं तेष्वन्यत् पिशिताश्रितं । मेदस्तृतीयं पटल-माश्रितं त्वस्थि चापरम्" इति ॥

५६ । सङ्कीर्णवर्णं हरितादिमिश्रवर्णमित्यर्थः ।

---

१ । पेषयेत्तूदके चैव । गः ।
२ । चैव । खः ।
३ । वाताल्लोहितकं भवेत् । गः ।
४ । शुभ्रं । खः ।

अभिघातोद्भवोऽश्वस्य[१] नेत्ररोगः प्रकीर्त्तितः ।
शिरःशस्त्राभिघातश्च[२] रक्तसन्धिश्च षण्डकः ॥ ४६ ॥

तच्चिकित्सा ।

चिकित्साञ्चैव वक्ष्यामि यथादृष्टां[३] समासतः ।
येन शाम्यन्ति वाहानां रक्तजाश्चक्षुषो रुजः[४] ॥ ४७ ॥
ऐन्द्रीं तालीशपत्रञ्च मञ्जिष्ठां मधुकं निशाम् ।
कालानुसारिवां मूर्व्वां वारिणा सह साधयेत् ॥ ४८ ॥
तेन शीतेन सिद्धेन[५] नेत्रमाश्च्योतयेद् भिषक् ।
वर्त्त्यञ्जनमिदं कुर्य्याद् यथादृष्टमतन्द्रितः[६] ॥ ४९ ॥
विभीतकफलं लोध्रं काश्मर्य्याश्च फलं तथा ।
मधुकं शर्कराचैव गैरिकं[७] सरसाञ्जनम् ॥ ५० ॥

---

४८ । ऐन्द्री (राखालशशामूल) । कालानुसारिवा (शिउलि-क्षोप) वा (तगरपादुका) ।

४९ । आश्च्योतयेत् आसेचयेत् ।

५० । काश्मरी (गाम्भारी) ।

---

१ । अभिघातो भवेद् यस्य नेत्ररोगः प्रवर्त्तते । गः ।
२ । शिरोरोगाभिघातस्य रक्तं श्रवति चक्षुषः ॥ खः ।
३ । यथोद्दिष्टं । खः ।
४ । गदाः । गः ।
५ । तेन घृतेन शुद्धेन । खः ।
६ । वर्त्त्यञ्जनं ततः कुर्य्यादयदुद्दिष्टमिदंबुधैः । खः ।
७ । तथाचैव रसाञ्जनम् । खः ।

कटुतैलं कषायेण पाचितं चाम्बुनैव तु ।
विडङ्गकल्कसंयुक्तं नस्यार्थे च प्रकीर्त्तितम् ॥ ४० ॥
गैरिकं शृङ्गवेरञ्च अञ्जनं वृहतीफलम् ।
मरिचं पिप्पलीचैव विडङ्गं सैन्धवन्तथा ॥ ४१ ॥
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत् ।
संस्थाप्य भाजने ताम्रे गवां मूत्रेण भावयेत् ॥ ४२ ॥
बहुशो भावयित्वा तु पुनः श्लक्ष्णं प्रपेषयेत् ।
चूर्णाञ्जनमिदं श्रेष्ठं नेत्ररोगे कफात्मके ॥ ४३ ॥

रक्ताक्षिरोगलक्षणानि ।

रक्ताभिष्यन्दिनोऽश्वस्य नेत्रं भवति लोहितम् ।
सर्व्वं त्रिभागमर्द्धं वा श्रावरुग्दाहपीड़ितम् ॥ ४४ ॥
रक्तस्रावोऽथवा यस्य वाजिनो[1] लोचनाद्भवेत् ।
रक्तस्रावाभिधानन्तु नेत्ररोगं समादिशेत् ॥ ४५ ॥

---

४० । कषायेणेति पूर्व्वोक्तपिप्पल्यादिकषायेण । अत्र विड़ङ्ग-कल्कस्य स्नेहपादिको देयः ।

४१ । अञ्जनं सौवीराञ्जनं रसाञ्जनं वा ।

४४ । श्रवमुद्गाहपीड़ितमिति न साधुः ॥

---

१ । अथ वाहस्य वाजिनः । गः ।

ततस्तीक्ष्णेन शस्त्रेण छिन्द्यात्प्रावरकं बुधः।
तारकस्य यथा पीड़ा जायेत न मनागपि ॥ ३३ ॥
शुद्धं तत् पूरयेन्नेत्रं मधुना सैन्धवेन वा।
प्रक्षाल्य चोत्थाप्य ततः शंखजां वेधयेच्छिराम् ॥ ३४ ॥
कुष्ठेन वचया चव्या तथा त्रिकटुकेन च।
प्रतिपानं प्रदातव्यं सुरया लवणैः सह ॥ ३५ ॥
निर्व्वातं विहितं स्थानं ग्रासे दुर्व्वा च पूजिता।
गुरु भक्ष्यं न दातव्यं मधुरञ्च विशेषतः ॥ ३६ ॥

काचलक्षणचिकित्सा।

श्लेष्माभिष्यन्दिनोऽश्वस्य शूनं साश्रु विलोचनम्।
काचः संजायतेऽश्वस्य पाण्डुता चापि चक्षुषः[१] ॥ ३७ ॥
पिप्पलीञ्चैव लोध्रञ्च तथा कटुकरोहिणीम्।
त्रिफलां पिचुमर्द्दञ्च गवां मूत्रेण साधयेत् ॥ ३८ ॥
तेन पादावशेषेण क्षौद्रयुक्तेन बुद्धिमान्।
गालितेन सुखोष्णेन सेचयेद्वाजिलोचनम् ॥ ३९ ॥

---

३५। अत्र कुष्ठादीनां चूर्णं मिलितं पलं। सुरायाः प्रस्थः। सैन्धवस्य च पलम्। एकत्र प्रतिपानं देयम्॥

३६। गुरुभक्ष्यमिति गुरुपाकं भोज्यद्रव्यम्॥

३८—३९। पिप्पल्यादीनां पलं गोजलाढ़के पक्त्वा पादशेषः कार्य्यः। पिचुमर्द्दो निम्बः।

---

१। वातचक्षुषा। गः।

आमलक्या रसेनैतत् समभागं तथैव च।
शिलामालिप्य संशोष्य तत्कल्कं चूर्णयेद्‌बुधः ॥ २७॥
स्रोतोऽञ्जनं समं दद्यात्तत्पित्ताय न मारयेत्।
जम्बूककुभशाखानामामलक्या वटस्य च ॥ २८॥
पुष्पाण्युद्धृत्य सर्व्वेषां यथाप्राप्तानि वा पुनः।
फलानि वा समाहृत्य कल्कं कृत्वा विचक्षणः ॥ २९॥
भोजयेद्‌घृतमध्वाक्तं कटुकाम्लञ्च वर्ज्जयेत् ॥ ३०॥

प्रचारलक्षणचिकित्सितम्।

प्रच्छादयति यद्‌दृष्टिं मांसं पर्य्यन्तवर्द्धितम्[1]।
प्रचारकाख्यं तं विन्द्यान्नेत्ररोगं कफात्मकम् ॥ ३१॥
क्षितौ निपात्य तुरगं ततो नेत्रं प्रसारयेत्।
कृतकर्म्मा भिषग्विद्वान्[2] वड़िशेनाक्षिवर्त्मनि ॥ ३२॥

---

२६—२८। गैरिकं (गिरिमाटि)। शङ्खं (शंखचूर्ण)। स्रोतोऽञ्जनं नदीजमञ्जनं। "स्रोतोऽञ्जनं नदीजञ्च वाह्लीकञ्च जयामलम्"॥ इति परिभाषा॥

२८—३०। जम्वादीनां पुष्पाणां फलानां वा चूर्णं मिलितं पलं। जम्बूः (जाम्)। ककुभोऽर्ज्जुनः।

---

१। पर्य्यानुवर्द्धितम्। खः।
२। विद्यात्त्वरितेनाक्षिवर्त्मना। गः।

पैत्तिकाक्षिरोगलक्षणानि।

अधोमुखस्तु यो वाजी मिलिताक्षस्तथैव च।
अनाभ्याञ्चैव नेत्राभ्यामुष्णमश्रु विमुञ्चति ॥ २१ ॥
लोचनं काचसङ्काशं यस्याकस्मात् प्रजायते।
काचं पित्तात्मकं रोगं तस्य विद्वान् समादिशेत् ॥ २२ ॥
लोहितं पित्तकञ्चैव हरितं नीलकन्तथा।
पित्तनिष्यन्दिनोऽश्वस्य नेत्रमाशु प्रजायते ॥ २३ ॥

तच्चिकित्सितम्।

प्रपौण्डरीकं मधुकं चन्दनं लोध्रमेव च।
एकीकृत्य जले न्यस्तं नेत्रस्योत्तानमुत्तमम् ॥ २४ ॥
यष्टीमधुकयुक्तञ्च परिषेकाय गोपयः।
चन्दनोशीरतोयैश्च पानं दद्यात् सयष्टिकैः ॥ २५ ॥
अश्रुपाते शिरावेधो हितश्चापि हि कीर्त्तितः।
गैरिकं मधुकं शङ्खं लोध्रमुत्पलमेव च ॥ २६ ॥

---

२४। प्रपौण्डरीकं (पुण्डरिया)। चन्दनं रक्तचन्दनं। एषां पलिको भागो जलस्य चाढ़को ग्राह्यः। उत्तानमिति उद्गतः स्तानो विस्तारो यस्मात् सः। नेत्रविस्तारकारीत्यर्थः। गोपयो गोमूत्रं।

२५। गोमूत्राढ़के यष्टिमधुकपलं दत्वा तेन वारिणा नेत्रसेकः कर्त्तव्य इत्यर्थः। परिषेकाय सेचनाय। चन्दनादीनां पलं। वारिण आढकः पादशेषः कार्य्यः।

तोयस्रावस्य वाहस्य प्रसन्नान्धस्य वा पुनः ।
एतदेवाञ्जनं श्रेष्ठं तिमिरे यत्प्रकीर्त्तितम् ॥ १५ ॥
रसाञ्जनं गुड़ञ्चैव मधुकं क्षौद्रमेव च ।
रजन्या सहिता वर्त्तिर्नक्तान्धस्याञ्जनं परम् ॥ १६ ॥
सप्त कृत्वाष्ट कृत्वा वा शोषयित्वा पुनः पुनः ।
भावयेत्कर्पटं क्षौमं[१] क्षीरेणाज्येन बुद्धिमान् ॥ १७ ॥
सुरामण्डेन तद्भूयो भावयित्वा विचक्षणः ।
वर्त्तिं कृत्वा घृताभ्यक्तां घृतदीपे प्रदापयेत् ॥ १८ ॥
प्रच्छन्ने ताम्रपात्रेण तं दीपं छादयेन्मनाक् ।
तस्मात्कज्जलमादाय ताम्रपात्राद्विचक्षणः ॥ १९ ॥
तोयस्रावं प्रसन्नान्धं नक्तान्धं तिमिरन्तथा ।
अञ्जयेन्मतिमान् वैद्यः शीषकस्य शलाकया ॥ २० ॥

---

१६ । मधुकं (यष्टिमधु) । रजन्या हरिद्रया । रसाञ्जनादिकं समभागं ग्राह्यम् ।

१७ । कर्पटो लक्तकं (लाताकानी) । एतं कर्पटं दुग्धघृतेन सप्तवारमष्टवारं वा भावयित्वा शोषयेत् । अथ सुरामण्डेन संमर्द्य वर्त्तिः कार्य्या ।

१८ । सुरामण्डः सुराभागः सुराग्रभागो वा । "सुरामण्डः प्रसन्नः स्यात्" इति परिभाषा ।

---

१ । क्षौमम् । गः ।

तच्चिकित्सा ।

घृतं पक्वं प्रदातव्यं देयञ्च त्रिफलान्वितम् ।
सन्तर्पणञ्च कुर्वीत नेत्रयोस्तदनन्तरम् ॥ ९ ॥
निपात्य भूमौ तुरगं दृढं बद्धा सुयन्त्रितम् ।
माषचूर्णस्य कल्केन परिवार्य्याक्षि[१] सर्व्वतः ॥ १० ॥
घृतेन पयसा वापि पूरयेत्तं विचक्षणः ।
विधिरेष समुद्दिष्टो नेत्रसन्तर्पणः सदा[२] ॥ ११ ॥
अपरश्च सुखोपायो विधिः सन्तर्पणः[३] स्मृतः ।
तूलं[४] स्नेहेन सम्भाव्य[५] नयनाभ्यन्तरे क्षिपेत् ॥ १२ ॥
तस्योपरि श्लथं पट्टं बध्नीयाद्वा[६] दृशोपरि ।
बद्धपट्टं पुनर्नेत्रं मुहुः स्नेहेन सेचयेत् ॥ १३ ॥
उत्पलं चन्दनञ्चैव तथा सौवीरकाञ्जनम् ।
वर्त्तिं कृत्वा ततः प्राज्ञस्तिमिरं नित्यमञ्जयेत् ॥ १४ ॥

९ । नेत्रसन्तर्पणद्वयमाह । घृतमिति ।

१२ । द्वितीयं सन्तर्पणमाह । अपर इति ।

१४ । उत्पलं नीलोत्पलं । (नीलशुन्दि)। चन्दनं रक्तचन्दनम् । एषां समभागं पयसा पिष्ट्वा वर्त्तिः कार्य्या । सौवीरकाञ्जनं नीलवर्णाञ्जनविशेषः । तदुक्तं "सौवीरकं पार्व्वतेयं मेचकं नीलमञ्जनम्" इति मुक्तावली ॥

१ । परिव्याप्याक्षि । खः ।
२ । नेत्रसन्तर्पणे तदा । खः ।
३ । सन्तर्पणे । खः ।
४ । चूर्णं । गः ।
५ । संप्राप्य । गः ।
६ । बध्नीयाद्वाससो भिषक् । खः ।

## अथ चिंशोऽध्यायः।

अक्षिरोगः।

अथातः संप्रवक्ष्यामि नेचरोगविनिश्चयम्।
पूर्व्वशास्त्रानुसारेण मुनिभिः कीर्त्तितं यथा ॥१॥
तोयस्रावः प्रसन्नान्धो नक्तान्धस्तिमिरस्तथा।
मुञ्जको मुञ्जजालञ्च पटलं वुद्बुदस्तथा ॥२॥
पूयश्रावश्च काचाक्षो रक्तस्रावस्तथैव च।
चिपिटो वर्त्मरोगश्च अभिष्यन्दस्तथैव च ॥३॥
वातपित्तकफैर्दुष्टैर्नेचरोगा भवन्त्यमी।
लिङ्गं चिकित्सितं तेषां प्रवक्ष्याम्यनुपूर्व्वशः ॥४॥

वातिकाक्षिरोगनिदानलक्षणानि।

अजस्रं पश्यतां व्यश्रु स्वच्छं स्रवति चक्षुषः।
तोयस्रावीति तं विन्द्याद्विकारं मारुतात्मकम् ॥५॥
शुद्धन्तु चक्षुषा रूपं नैव पश्यति यो ह्ययः।
प्रसन्नान्धः स विज्ञेयो नतु शक्यश्चिकित्सितुम् ॥६॥
दिवा पश्यति यः स्वच्छं राचौ चैव न पश्यति।
नक्तान्ध इति तं विद्याद्विकारं पवनोद्भवम् ॥७॥
कदाचिद्वीक्षते रूपं कदाचिच्च न वीक्षते।
तिमिरं तं विजानीयाल्लिङ्गेनानेन बुद्धिमान् ॥८॥

सुरया दापयेत् सम्यग् घासं शुष्कं तथैव च ॥ २३ ॥
करञ्जनिम्बपत्राणां क्वथितञ्च सुसंस्कृतम् ।
भोजयेत्तिक्तमुद्गांश्च तैलत्रिकटुकान्वितान् ॥ २४ ॥
मृदुभिर्दन्तकाष्ठैश्च कटुचूर्णावचूर्णितैः ।
गवां मूत्रेण तेषान्तु मुखप्रक्षालनं हितम् ॥ २५ ॥
शृङ्गवेरेण पिप्पल्या वचया सर्षपार्द्रकैः ।
हितं प्रलेपं कुर्व्वीत शोथेषु च विचक्षणः ॥ २६ ॥
त्रिफलाक्वाथयुक्तस्य हितं पानञ्च गुग्गुलोः ।
यवांश्च खादने दद्यान्माषादींश्च विवर्जयेत् ॥ २७ ॥
अधिदन्तन्तु सन्दंशैः कर्षयित्वा विचक्षणः ।
चिकित्सां पूर्व्वमुद्दिष्टां कुर्व्वीत तदनन्तरम् ॥ २८ ॥
कृमिभिर्भक्ष्यमाणानां दन्तानामुपकर्षणम् ।
अधिदन्तेच कुर्व्वीत आलेपञ्च विचक्षणः ॥ २९ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे मुखरोगे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

---

२२। प्रतिपानं न दापयेदिति पूर्व्वेणान्वयः ।

स्फुटितः कठिनश्चैव ओष्ठरोगोऽभिधीयते ॥ १६ ॥
गलाभ्यन्तरशोथेन[१] ग्रासमुद्गिरते हयः।
गलशालूकिनं विन्द्यात् काशार्त्तञ्च तुरङ्गमम् ॥१७॥
सर्व्वेषां मुखरोगानां सम्भवः श्लेष्मशोणितम्[२]।
चिकित्सां तेषु वक्ष्यामि येन शाम्यन्ति वाजिनाम् ॥१८॥

मुखरोगचिकित्सा।

विध्यात्तालुशिरां पूर्व्वं तुरङ्गस्य विचक्षणः।
अधिमांसं ततो विध्याद्व्यावृत्तास्यस्य शस्त्रकैः ॥ १९ ॥
जिह्वास्तम्भे तु जिह्वायाः प्रक्षालं कारयेद्भिषक्।
प्रतिसार्य्याश्वजिह्वान्तु लवणैः षट्चूर्णकैः ॥ २० ॥
वेधकालात् समारभ्य रात्रिमेकां न दापयेत्।
वासयन्तेन वाहस्य निवातस्थस्य बुद्धिमान् ॥ २१ ॥
प्रतिपानं प्रभाते तु पिप्पलीशृङ्गवेरकैः।
पुनर्णवावचाशिग्रुकरञ्जान्निम्बपत्रकान् ॥ २२ ॥
त्रायमाणाविडङ्गैश्च किञ्चिल्लवणसंयुतैः।

---

१९। शस्त्रकैरिति उत्पलपत्रेण व्रीहिपत्रेण वा शस्त्रेणेत्यर्थः।
२०। प्रक्षालमिति मार्जनम्। षड़ित्यत्र कट्विति पाठो युक्तः।

---

१। गलाभ्यन्तरतो यो वै। गः।
२। श्लेष्मशोणितात्। खः।

श्यावौष्ठतालुवक्त्रे[1] वा मन्दाहारे तथैव च ।
संशीर्णे दन्तमांसे च प्रशूनं व्याधिमादिशेत् ॥ ९ ॥
हन्वोश्चैव तथा गण्डे श्वयथुर्यस्य जायते ।
जिह्वामूले गले चापि तस्य विन्द्याद्गलग्रहम् ॥ १० ॥
सृक्कौष्ठतालुदेशेषु व्रणं यस्योपजायते ।
विवर्णन्तु मुखं दुष्टं मुखपाकं तमादिशेत् ॥ ११ ॥
दन्तानामुपरिष्टात्तु यदा दन्तस्य सम्भवः ।
अधिदन्तः स विख्यातो मन्दाहारस्य वाजिनः ॥ १२ ॥
यस्य शूनाक्षिकूटस्य गले शोथः प्रलम्बते ।
यवसद्वेषिणोऽश्वस्य रोहिणीरोगमादिशेत् ॥ १३ ॥
अधस्तादथ जिह्वायाः श्वयथुर्यस्य जायते ।
तं विन्द्यादुपजिह्वाख्यं मुखरोगन्तु वाजिनाम् ॥ १४ ॥
अधिजिह्वाभिधानन्तु उपरिष्टाद् विनिर्दिशेत् ।
गण्डाभ्यन्तरगो[2] गण्डो गण्डरोग इति स्मृतः ॥ १५ ॥
सव्रणः पिड़काकीर्ण ओष्ठ[3] उच्छून एव च ।

---

९ । श्यावौष्ठतालुवक्त्रमित्यत्र श्यावः कृष्णवर्णः ।

१३ । शूनाक्षिकूटस्य स्फीताक्षिकोटरस्य ।

---

१ । श्यावौष्ठतालुवक्त्रं वा मन्दाहारं तथैव च ।

२ । गण्डाभ्यन्तरयोः । गः ।

३ । ओष्ठयोः स्थूल एव च । गः ।

मुखपाकोऽधिदन्तश्च रोहिणी चोपजिह्विका ।
गण्डरोगौष्ठरोगौ च गलशालूक एव च ॥ २ ॥
इत्येते वाजिनां रोगा मुखजाः परिकीर्त्तिताः ।
एषां निदानं वक्ष्यामि चिकित्साञ्च यथाक्रमम् ॥ ३ ॥

मुखरोगनिदानलक्षणे ।

समेभ्यो दन्तमांसेभ्यो यस्य निर्य्याति शोणितम् ।
चलदन्तस्य[1] वाहस्य विद्यादुपकुशं भिषक् ॥ ४ ।
हनुदेशे यदा दन्तो भवत्यभ्यन्तराश्रयः ।
आलेश[2] इति तं विद्यात् श्लेष्मरक्तसमुद्भवम् ॥ ५ ॥
तेनाश्वो दुर्म्मनात्यर्थं मन्दं पिवति खादति ।
जर्जरं कासते चैव वलाच्च परिहीयते ॥ ६ ॥
शूना[3] यस्य भवेज्जिह्वा वाजिनः स्फोटकैर्युता ।
प्रक्लिन्ना वापि यस्यैव जिह्वा स्तम्भीति तं विदुः ॥ ७ ॥
मुखं दुर्गन्धिकं चैव तालुकः शूनको भवेत् ।
ग्रासविद्वेषिणोऽश्वस्य रोगं विद्यादलावुकम्[4] ॥ ८ ॥

---

७। शूना स्फीता ।

---

१। जातदन्तस्य । खः ।
२। आलोरान्नवितं । गः
३। श्वेताः । गः ।
४। स्यादन्ततालुकम् ।

उत्कर्णकोऽर्दितश्चैव मन्यास्तम्भो हनुग्रहः ।
आक्षेपो मृगजृम्भश्च मन्याचालीमृगस्तथा ॥ ४ ॥
कपोतको निषादश्च तथाचैकाङ्गसंज्ञकः ।
रोगः पृष्ठग्रहो नाम भ्रामिताक्षस्तथैव च ॥ ५ ॥
उन्मादो ग्रहदोषश्च शोषो वातवलासकः ।
व्यापदो लवणैर्धान्यैः सुरया पयसा तथा ॥ ६ ॥
विषापस्मारदोषौ च षट्पादी लक्षणान्तथा ।
इत्ययं व्याधिनिर्देशः कृतः शास्त्रार्थतत्त्वतः ॥ ७ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे व्याधि-निर्देशोऽष्टाविंशोऽध्यायः ॥ २८ ॥

---

## अथैकोनत्रिंशोऽध्यायः ।

### मुखरोगः ।

उपकुशस्तथा लेशो जिह्वास्तम्भस्तथैव च ।
अलावूकः प्रस्रनश्च दन्तरोगो गलग्रहः ॥ १ ॥

---

४-५ । अर्दितादिभ्रामिताक्षान्ता वातव्याधिरोगविशेषाः । एषां लक्षणादिकं वातव्याध्यधिकारे द्रष्टव्यम् ।

शिशिरे च वसन्ते च भुक्तवत्सु च तत्क्षणात्।
वाजिनः श्लेष्मणः कोपः प्रभाते च प्रकीर्त्तितः॥ ६॥
विपर्य्ययं निदाघस्य वातादीनां विचक्षणैः।
हानिर्वाच्या सदा वैद्यैः शास्त्रमार्गानुसारिभिः॥ ७॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे वातादिप्रकोपे सप्तविंशोऽध्यायः॥ २७॥

## अथाष्टाविंशोऽध्यायः।

व्याधिनिर्द्देशः।

मुखरोगोऽक्षिरोगश्च शिरोरोगश्च[१] लिङ्गितः।
कर्णरोगश्च कासश्च श्वासो हिक्का व्रणस्तथा॥ १॥
सिंघाणः कोष्ठरोगश्च पद्रोगो ज्वरस्तथा।
अजीर्णश्चातिसारश्च शूलोदावर्त्त एव च॥ २॥
प्रस्कन्नः कृमिकोष्ठश्च मूत्ररुङ्मलरुक् तथा।
कुष्ठरोगश्च शोथश्च अण्डौनीतोदरार्शसः॥ ३॥

१। लिङ्गितो नामाश्वानां गतिवैकल्यजनको रोगविशेषः। लगड़ खञ्जे। (खोड़ान)।

२। सिंघानं (सिक्नि)। तत्स्रावकनासारोगविशेषः।

३। प्रस्कन्नोऽपि कुब्जताजनकरोगविशेषः। अस्य लक्षणादि प्रस्कन्नचिकित्सिते द्रष्टव्यम्।

१। शिरोजस्तायमङ्गिनः। खः।

# अथ सप्तविंशोऽध्यायः ।

वातादिकोपः ।

प्रकोपनिदानलक्षणे ।

तिक्तरुक्षकषायाणां द्रव्याणामुपयोगतः ।
निराहाराच्[१] श्रमाद्भारात् प्रकोपो मातरिश्वनः ॥ १ ॥
सन्तापाच्च श्रमाच्चापि कट्वम्ललवणाशनात् ।
प्रकोपं याति पित्ताख्यो दोषो देहव्यवस्थितः ॥ २ ॥
गुरुभिर्मधुरैः स्निग्धैरभिष्यन्दकरै रसैः ।
सेवितैः श्लेष्मणां वृद्धिर्भवेच्चापि श्रमं विना ॥ ३ ॥
प्रावृट्काले विकाले च हेमन्ते च विशेषतः ।
वायोर्वृद्धिः समुद्दिष्टा जीर्णे चैवाशने तथा ॥ ४ ॥
शरत्काले निदाघे च जीर्य्यमाणे च भक्षिते[२] ।
मध्याह्ने चार्द्धरात्रे च पित्तोद्रेकं समादिशेत् ॥ ५ ॥

---

१। वातप्रकोपशमनयोगमाह नकुलः,—"तमालं पुष्करं लोध्रमपामार्गं सतिन्दुकम्। पयसा पिण्डमेतद्धि वातकोपः प्रशाम्यति"—इति ।

३। अभिष्यन्दकरैरिति आस्रावजनकैः श्लेष्मवर्द्धकैरित्यर्थः।

५। भक्षिते भुक्तद्रव्ये।

---

१। निरन्तरग्रासात् । गः ।   २। भक्षते पक्तिमेव च । गः ।

बहुदुःखो[१] भवेदश्वो मृगरोगप्रपीड़ितः।
यावदुच्छ्सते जन्तुस्तावत् कुर्य्यात् प्रतिक्रियाम् ॥ ३ ॥

चिकित्सा।

कदाचिद्दैवयोगेन विनष्टश्चापि जीवति।
पञ्चमूलस्य निःक्वाथे[२] जाङ्गलैः साधितो रसः ॥ ४ ॥
रसः पाने प्रदातव्यः शालिभक्तञ्च भोजनम्।
कदाचिद्दैवयोगेन भर्त्तुः पुण्यफलेन वा ॥
प्रशमं याति वाहानां मृगरोगः सुदारुणः ॥ ५ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे मृगरोगे षड्विंशोऽध्यायः ॥ २६ ॥

---

४। पञ्चमूलस्य पलं। जलस्याढ़कः पादावशिष्टः। शालिभक्तञ्च यथोक्तमात्रं देयम् ॥

---

१। परलोकं प्रयात्यश्वः। गः।
२। पञ्चमूलञ्च निःक्वाथ्य। गः।

तस्मिन्नेव दिने पिण्डं दद्याद्बुद्धिमतां वरः।
अनुपानं तदा दद्याद् द्रवं रोहिणिकोद्भवम्॥ ५॥
एवं कीटा न जायन्ते हयानामुदरे ध्रुवम्॥ ६॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे कीटारिष्टे पञ्चविंशोऽध्यायः॥ २५॥

---

## अथ षड्विंशोऽध्यायः।

### मृगरोगः।

नासासन्धान[1]संयुक्ता जायन्ते भूर्य्युपद्रवाः।
नित्यं घासाभिलाषी च हीयते बलमांसयोः॥ १॥
मृगरोगः स विख्यातो व्याधिः कष्टचिकित्सितः।
षण्मासाभ्यन्तरे वाथ परलोकं[2] प्रयाति च॥ २॥

---

५। रोहिणिकोद्भवमिति कटुरोहिणीसम्भूतम्। कटुकायाः पादोनं पलं जलाढ़के पक्का पादावशिष्टं देयम्॥

---

१। सिंघाण। गः।
२। वत्सराभ्यन्तरेऽपि वा। गः।

# अथ पञ्चविंशोऽध्यायः ।

कीटारिष्टः

कीटनिदानलक्षणे ।

कीटवेधं प्रवक्ष्यामि यथाशास्त्रं समासतः ।
शरन्निदाघयोश्चैव वाहानां घर्म्मसेवनात् ॥ १ ॥
वाजिनां कीटवेधस्तु[1] भवेन्निरुपचारतः ।
घनकाले च तोयानां सेवनाच्छालया विना ॥ २ ॥
कीटकाण्डास्तदाश्वानां भवन्ति जठरे[2] स्थिराः ।
ज्यैष्ठशुक्लद्वितीयायां तेभ्यः कीटा भवन्ति च ॥ ३ ॥

चिकित्सा ।

तेषाञ्च प्रतिघाताय कुर्य्याद्विद्वान् प्रतिक्रियाम् ।
महानिम्बपलाशानां वीजैः सक्तमिशचुभिः ॥ ४ ॥

---

२ । निरुपचारत उपचाराभावात् ।

३ । कीटकाण्डाः कीटगुच्छाः तदाशय इत्यर्थः ।

४ । महानिम्बादीनां चूर्णं मिलितं पलपरिमितं घृतेन पिण्डं दद्यात् ॥

---

१ । वेधकीटः । खः ॥ २ । पिठरे । गः ॥

अथर्व्वविहितां शान्तिं गान्धर्व्वीं वा प्रयोजयेत्।
नदीपारञ्च नीत्वाश्वान् स्थापयेच्च पृथक् पृथक्।
कदाचिद् दैवयोगेन शान्तिकर्म्म-फलेन वा ॥१७॥
प्रशमं यान्ति वाहानां उपसर्गाः सुदारुणाः।
तैलपानं तथाभ्यङ्गं घृतपानं तथैव च ॥१८॥
सप्ताहञ्चाहरेद्‌यस्तु स जीवेन्नात्र संशयः।
शिंशपासारनिर्यासमष्टवर्गास्तथैव च ॥ १९ ॥
द्वौ क्षारौ कटुका चोग्रा लवणं गजपिप्पली।
त्रिकटु त्रिफला चैव त्रिजातं हिङ्गुरेव च ॥ २० ॥
एतानि समभागानि पिष्ट्वा पिण्डं प्रदापयेत्।
दीप्यते तस्य कायाग्निर्वैधश्चैवोपशाम्यति ॥ २१ ॥
उत्क्षिप्तवंक्षणः स्तब्धश्वासमन्दाग्निरश्रुवान्।
दुर्गन्धो मक्षिकाक्रान्तो ध्यायी चाश्वो[१] न जीवति॥२२॥
जीवेत् पक्षन्तु तुरगो बली मासञ्च जीवति।
जीवेत् संवत्सरं वापि न तु रोगात् प्रमुच्यते ॥ २३ ॥
प्रावृषः पूर्व्वकाले तु सद्यो दद्याद्विचक्षणः।
नोचेज्ज्वरातुरोह्यश्वः कार्त्तिके मासि जायते ॥ २४ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे वेधारिष्टे चतुर्विंशोऽध्यायः ॥ २४ ॥

---

१। धार्य्यावासः। खः॥

स्तब्धाङ्गा विकृताः क्षामाः पीड़ार्त्ताश्वासमूत्रिणः ।
आमावृतपुरीषाश्च[1] तथा शुष्कपुरीषिणः ॥ ८ ॥
अतिसारं सरक्तञ्च कदाचित् कुरुते[2] हयः ।
शूनाः पश्चिमपादाश्च शूनाश्च वृषणोदराः ॥ ९ ॥
सतिग्ममनसो जातु दुर्मनसो भवन्ति च ।
धृतिं नैवाधिगच्छन्ति स्थाने वा शयनेऽपि वा ॥१०॥
भोजनं यवसं तोयं नैवाश्नन्ति च खादनम् ।
कीर्य्यन्ते[3] मक्षिकाभिश्च साश्रुनेत्रा भवन्ति च ॥११॥
मन्दाग्नयश्च जायन्ते बलतेजोविवर्जिताः ।
न सहन्त्यातपं सौरं हयाश्छायानिषेविणः ॥१२॥
चन्द्रे प्रकाशमाने तु हयान् मुक्त्वातु[4] रक्षयेत् ।
आतपाशङ्कया छायां सवेधो याति निश्चयम् ॥१३॥

वेधारिष्टचिकित्सा ।

एतानि लक्षणान्येव सवेधानां भवन्ति वै ।
उपसर्गे तु सञ्जाते शक्तिकर्म्मणि कारयेत् ॥१४॥
नीराजनविधानन्तु कर्त्तव्यं पूर्व्वनोदितम् ।
अश्वरक्षाविधानाय[5] ऋचा साम्ना च पाठकः ॥१५॥
जुहुयाज्ज्वलनं विप्रस्तुरङ्गानां हितेच्छया ।

---

१ । अपावृत्तपुरीषाः । गः ॥ ३ । प्रेषते । खः ॥
२ । कुर्व्वते हयाः । खः ॥ ४ । मुक्त्वा निरीक्षयेत् । गः ॥
५ । अश्वरक्षाविधानन्तु नीराजाभाषपाठकः । गः ॥

## अथ चतुर्विंशोऽध्यायः ।

वेधारिष्टः ।

अकस्माद् यदि वाहानामेकरूपा भवेद्रुजा ।
म्रियते च यदा क्षिप्रमुपसर्गं तदादिशेत् ॥ १ ॥
निदानञ्चैव चिह्नञ्च वक्ष्ये तस्य यथाक्रमम् ।
शरत्काले शुचौ वापि ऋतुसन्धौ च[१] जायते ॥ २ ॥
कदाचित् कस्मिन्देशे सविषो वहति मारुतः ।
तस्मादपि च वाहानामङ्गेभ्यस्तु[२] प्रजायते ॥ ३ ॥

निदानलक्षणम् ।

निदानेभ्यः समासेन वक्ष्यामस्तानि सांप्रतम् ।
शरत्काले तथा ग्रीष्मे वाहानां रवितापतः[३] ॥ ४ ॥
उपसर्गश्च वेधाख्यो जायते नात्र संशयः ।
शालाभावे च वाहानां प्रावृषि जायते मलात् ॥ ५ ॥
मशदंशकदोषाच्च चिन्तादेरुपयोगतः ।
उपसर्गस्तु वेधाख्यो जायतेऽश्वस्य दारुणः ॥ ६ ॥
उपसर्गे समुत्पन्ने एतद्भवति लक्षणम् ।
अधोमुखाश्च दीनाश्च सज्वराः श्वासकासिनः ॥ ७ ॥

---

१ । ऋतुसन्ध्यावसानके । गः ।     २ । मनोभ्यस्तु ।
३ । प्रतिपानतः । गः ।

नेत्रैश्चैव विवर्णैश्च[1] सप्तरात्रन्तु जीवति ।
रक्तवर्णं भवेदेकं द्वितीयं नीलवर्णकम् ॥ २० ॥
पुटान्ते लोचने[2] यस्य मासायुः स प्रकीर्त्तितः ।
स्यातां नीले हि नेत्रान्ते लेखे द्विमासजीविनः ॥ २१ ॥
नीलपीते च नेत्रान्ते स्यातां त्रिमासजीविनः ।
चतुर्मासायुषो लेखा[3] नेत्रान्ते बहुवर्णकाः ॥ २२ ॥
षण्मासजीविनोऽश्वस्य नेत्रान्ते बहुविन्दवः ।
सप्तमासायुषो नीले नेत्रे स्यातां हि वाजिनः ॥ २३ ॥
दशमासायुषोऽश्वस्य नेत्रयोर्वर्णव्यत्ययः[4] ।
नासानिकटनेत्रान्ते प्रसार्य्याश्वस्य लक्षयेत्[5] ॥ २४ ॥
दृष्टी रूक्षा सिता वातात् पित्तात् पीतारुणप्रभा ।
कफात् श्वेता जलार्द्रा च पीताभा च[6] ज्वरागमे ॥२५॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे स्वस्थारिष्टे त्रयोविंशोऽध्यायः ।

---

कोली चीरकाकोली जीवकर्षभकौ मेदमहामेदौ ऋद्धिर्वृद्धिश्च । द्वौ चारौ साचिचारयवचारौ । कटुका (कटुकी) । उग्रा वचा, लवणं सैन्धवं । गजपिप्पली प्रसिद्धा । त्रिकटु शुण्ठीपिप्पलीमरिचानि । त्रिजातं मुस्तचित्रकविड़ङ्गानि । एतेषां चूर्णानि समभागानि पलमितानि पिण्डार्थं ग्राह्याणि ।

---

१ । नेत्रै विविधवर्णैश्च । गः ।
२ । लोचनं । खः ।
३ । चतुर्मासायुषोऽश्वस्य । गः ।
४ । यस्य नेत्रान्ते व्यक्तवर्णकः । गः ।
५ । लक्ष्यते । खः ।
६ । पीताच्छत्वं ज्वरागमे । गः ।

मुखेन स्रवते लाला प्रस्वेदो यस्य लेपवत् ॥ १३ ॥
तालुकं स्फोटकाकीर्णं नेत्रे कान्तिविवर्जिते ।
स्नाने पाने विरक्तश्च निद्राहीनोऽवघूर्णते[१] ॥ १४ ॥
यस्यैकैकं भवेच्चिह्नं मासान्तं तस्य जीवितम् ।
रोगीभूतस्य वाहस्य क्रियया वर्जितस्य च ॥ १५ ॥
यस्यैकैकं भवेच्चिह्नं पञ्चाहाभ्यन्तरे मृतिः[२] ।
जिह्वाग्रे[३] पिड़का यस्य दृश्यते[४] च तथाधरे ॥ १६ ॥
मूत्रं करोति रक्ताढ्यं सप्तमासान् स जीवति ।
यस्य श्वासो भवेदुष्णः शरीरं पुलकाङ्कितम् ॥ १७ ॥
जिह्वा हिमसमाकारा स्वल्पायुः[५] परिकीर्त्तितः ।
रक्तमश्रु च नेत्रान्ते पाण्डुरे च गतायुषः ॥ १८ ॥
स्विन्ने मांसान्विते नेत्रे रक्ताभे रक्तवाजिनः[६] ।
कृष्णपीतविचित्रैश्च सप्तमे स्वल्पजीविनः ॥ १९ ॥

---

१६ । रसनेन्द्रियारिष्टमाह नकुलः,—"जिह्वा च कठिना लब्धा सोऽपि शीघ्रं विनश्यति" ।

१९—२१ । वेधशमनपिण्डमाह, शिंशपेत्यादि ॥ शिंशपा (शिशु) । सारनिर्यासः शालनिर्यासः (धुना) । अष्टवर्गमिति । का-

---

१ । विना निद्रांच घूर्म्मति । खः ।
२ । म्रियेत् । गः ।
३ । ग्रीवाग्रे । खः ।
४ । श्वेते चैव । खः ।
५ । गतायुः सम्प्रकीर्त्तितः । गः ।
६ । खिन्नमांसनिभे नेत्रे रक्तपीते च वाजिनः । खः । विन्दुभिः कृष्णपीतैश्च व्याप्ते वा स्वल्पजीविनः ॥

नासामेढ्राक्षिपायुभ्योऽकस्माद् यस्य च शोणितम्।
सपित्तं जायते यस्य श्वासार्त्तोऽप्यतिमूत्रवान्॥ ८॥
शूनोदरगुदमेढ्रो यश्चैते विगतायुषः।
पूतिगन्धं भवेद्यस्य दुर्गन्धं मूत्रविट् तथा॥ ९॥
दृष्ट आकम्पते[१] यश्च ग्रासमुद्गिरते यदि।
मक्षिकै[२] र्भक्षितः पश्चात् निमिषे यस्य लोचने॥ १०॥
न शृणोति च कर्णाभ्यां स्पष्टं दृष्टं न बुध्यते।
न चालयति लाङ्गूलं स्तब्धकर्णश्च जायते॥ ११॥
श्रवणे पाण्डुरा रक्ता शिरा यस्य च वेधिता।
मस्तके तालुके कण्ठे हृदि मुष्के च जायते॥ १२॥
श्वयथुः कठिनोऽत्यर्थं रक्तहीनाश्च वाजिनः।

९। दर्शनेन्द्रियारिष्टमाह नकुलः,—"दृश्यते चाक्षिणी यस्य पटलाभे इवाश्रिते। विमुक्तबन्धने चैव विच्छिन्ने च समन्ततः॥ अप्रसन्ने च विवृते सोऽपि शीघ्रं विनश्यति। कुञ्चितं यस्य दृष्टं तु प्रस्तब्ध इव लक्ष्यते॥ पुण्डरीकग्रहे वापि विवृत्ते यस्य लोचने। तिमिरे तु प्रदृश्येते सोऽपि शीघ्रं विनश्यति" इति॥

११। श्रवणेन्द्रियारिष्टे नकुलः,—"कर्णौ यस्य प्रदृश्येते स्तब्धाविव समुच्छ्रितौ। श्रवणे पाण्डुरा रक्ता शिरा यस्य स वेधिता॥ विनश्यति हयः क्षिप्रमेतैर्लिङ्गैर्न संशयः" इति।

१। दृष्टोवा कम्पते। गः।
२। माक्षिके वेष्ठिते यत्रश्चानिमेषस्य लोचने। खः।

पराङ्मुखी भवेद्यस्य छाया चैव न दृश्यते।
द्विगुणा वा सच्छिद्रा वा गतायुः सोऽपि कथ्यते[१] ॥३॥
ललाटे पुच्छमूले वा श्वयथुर्यस्य जायते।
यस्य रोमाणि[२] स्निग्धानि तैलाक्ता इव केशराः ॥४॥
असाध्य[३] इति जानीयात् सप्ताहं तस्य जीवितम्।
मेढ्रं निष्क्राम्य यो वाजी शार्दूलवन्निषीदति ॥५॥
विवर्णा दशना यस्य सहसा वा पतन्ति च[४]।
श्यावौष्ठतालुजिह्वाश्च तेऽपि यातायुषो मताः ॥६॥
स्नातस्य यस्य वाहस्य[५] पूर्व्वं क्रोड़ं[६] विशुष्यति।
मासेन मरणं तस्य निर्दिष्टं शास्त्रकोविदैः ॥७॥

---

३। अत्र नकुलः,—"छाया यस्य तिरस्कार्य्या तिमिरे यदि दृश्यते। अतिदीर्घातिह्रस्वा वा अचिरेण विनश्यति॥ यस्य प्रमाणतोऽश्वस्य भवेच्छाया पराङ्मुखी। द्विगुणा वापि यस्यैव सोऽपि वाजी परासुगः॥ वराहस्य तथोष्ट्रस्य सहसा सदृशी तु वा। अन्यस्वरूपविकृता छाया यस्य प्रदृश्यते॥ दीर्घकाले तथा ह्रस्वः सोऽपि शीघ्रं विनश्यति। आशु यस्य प्रसन्नासु छायास्वस्य न दृश्यते। सेव्यते मक्षिकाभिश्च अभीक्ष्णं घोरवेदनः॥ एवंविधस्ततो वाजी सोऽपि शीघ्रं विनश्यति"—इति॥

७। "स्नातस्य सहसा पूर्व्वं क्रोड़ोहि च विशुष्यति"—इति नकुलः।

---

१। कीर्त्तितः। गः॥
२। शीर्य्यन्ते यस्य रोमाणि। खः॥
३। अध्माति च। खः॥
४। ये। गः॥
५। विवर्णं दशनं यस्य सहसा। खः॥
६। विमुच्यते। खः॥

एता एव क्रिया वैद्यः पञ्चरात्रं प्रयोजयेत् ।
मांसानां रसकैर्युक्तं यवान्नं भोजयेद्भिषक्[१] ॥ ६ ॥
प्रथमे दिवसे दद्यात् कम्पनाय च वाजिने ।
मांसानां रसकं पाने मारुतोद्भवशान्तये ॥ ७ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे श्रान्तोपचारे द्वाविंशोऽध्यायः ।

---

## अथ त्रयोविंशोऽध्यायः ।

---

स्वस्थारिष्टः ।

अथातः संप्रवक्ष्यामि स्वस्थारिष्टस्य लक्षणम् ।
शालिहोत्रादिभिः पूर्व्वमृषिभिः कीर्त्तितं यथा ॥ १ ॥
दुर्म्मना हीनवर्णश्च दत्तं नैव[२] च खादति ।
विना रोगमकस्माद्यो गतायुः स प्रकीर्त्तितः ॥ २ ॥

---

६ । मांसानामित्यादि मांसरसयुक्तं यवान्नं यथोक्तपरिमाणं दापयेदित्यर्थः ॥

१ । स्वस्थारिष्टमिति । स्वस्थस्य सुस्थदेहस्य अरिष्टं मृत्युलक्षणम् ।

२ । एवं नकुल आह,—"यस्याविकारिणोऽश्वस्य शरीरं परिहीयते । विमना ध्यानशीलस्तु अचिरात् स विनश्यति" ॥ इति ।

---

१ । ततः । खः ।　　२ । दत्तं चैव न खादति । खः ।

## अथ द्वाविंशोऽध्यायः ।

श्रान्तोपचारः ।

श्रमो भवति रोगाय वाहानामतिवाहनात् ।
श्वासिनः स्रस्तदेहाश्च दीनास्तेन भवन्ति वै[१] ॥ १ ॥
श्रान्तस्य मदिरान्दत्वा[२] गुड़युक्तां विजानता ।
पश्चाद्वासः प्रदातव्यो जलपानं भवेत्ततः ॥ २ ॥
गोमयं लवणं मूत्रं क्वथितं मृत्समन्वितम् ।
सर्व्वाङ्गलेपनं प्रोक्तं मुनिभिः श्रमशान्तये ॥ ३ ॥
मर्द्दयेत् सर्व्वगात्राणि गोमयेनाथवा पुनः ।
क्षीरोदकेन वस्तिञ्च दद्यात् सेकञ्च मूर्द्धनि ॥ ४ ॥
सर्व्वकायिकमभ्यङ्गं सर्पिषा चैव कारयेत् ।
श्वोभूतजलकुम्भस्थान् संस्कृतान् दापयेद् यवान् ॥ ५ ॥

---

३ । मूत्रं गोमूत्रम् । श्रमशान्तये पिण्डमाह नकुलः,—"मद्यं मरिचसंमिश्रं लशुनं नागकेशरम् । द्विगुणं मेषमांसञ्च पिण्डो दत्तो जयेच्छ्रमम्"—इति ॥

५ । श्वोभूतजलकुम्भस्थानिति पूर्व्वदिने वारिपर्य्युषितानित्यर्थः ॥

---

१ । स्रस्तदेहाश्च दीना अश्वा भवन्ति ते । खः ॥
२ । मदिरा देया गुड़युक्ता । गः ॥

द्वितीयं पञ्चतिक्तं घृतम् ।

पटोलं वासकं निम्बं गुडूची कण्टकारिका ।
एषां दशपलान् भागान् जलद्रोणे विपाचयेत् ॥ ५ ॥
त्रिफलायाः पलान्यष्ट तत्रैव[1] दापयेद्भिषक् ।
चतुर्भागावशेषन्तु कषायमवतारयेत् ॥ ६ ॥
घृतप्रस्थं प्रदातव्यं चूर्णस्य पलद्वयम् ।
कासे श्वासे च हिक्कायां गलगण्डार्दितेषु च ॥ ७ ॥
ये चान्ये कफजाः केचित् रोगा वातप्रकोपजाः ।
पैत्तिका द्वन्द्वजाश्चापि तथा वै सन्निपातजाः ॥ ८ ॥
एतानपि निहन्त्याशु पञ्चतिक्तमिदं घृतम् ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे घृतविधाने एकविंशोऽध्यायः ॥

---

च पद्माख्यं नागकेशरम् । लाक्षाप ञ्चकमूलञ्च निम्बद्वयसमन्वितम् ॥ घृतं समांशकं देयं सप्तविंशतिकं विदुः”—इति ॥

---

१ । चूर्णं तत्रैव दापयेत् । गः ॥

# अथैकविंशोऽध्यायः।

घृतविधानः।

पञ्चतिक्तघृतम्।

वासानिम्बकरञ्जानां सप्तपर्णीपटोलयोः।
साधयेत् क्वाथकल्काभ्यां पञ्चतिक्तघृतं बुधः॥१॥

करञ्जाद्यं घृतम्।

करञ्जोशीरमधुकैः श्यामाचन्दनपद्मकैः।
त्रायमाणा शटी मूर्व्वा पटोलातिविषैः समैः॥२॥
एतैः सर्व्वैस्तथा सार्द्धं त्रिचतुःपञ्चसम्मितैः।
कल्कीकृतैः पचेत् सर्पिस्त्रिफलाया रसेन तु॥३॥
पित्तदोषापहं हृद्यं बलतेजोविवर्द्धनम्।
करञ्जाद्यभिधानन्तु जीवनं बृंहणं भिषक्[1]॥४॥

---

१। कल्कार्थं वासादीनां प्रत्येकं पलं, क्वाथार्थं च प्रत्येकमष्ट-पलम्। वारिः ३२ शरावाः। स्नेहस्य च प्रस्थः॥

२—४। घृतस्य प्रस्थः। क्वाथार्थं त्रिफलायाः शरावचतुष्टयं, वारि च (३२ श)। पादावशेषेण क्वाथेन सह करञ्जादीनां मिलित्वा पलच-तुष्टयं कल्कीकृत्य घृतं पाच्यम्॥ त्रायमाणा बलालता। अतिविषं (आतइच्)। नकुलोऽप्यत्र सप्तविंशतिकं घृतमाह,—"शिलाजतुविशाला

---

१। जीवयेत्तु हृयं भिषक्। गः॥

पचेत् प्रसारणीतैलं भिषग्विद्वान् समाहितः।
वातरोगेषु[1] सर्व्वेषु हितं भेषजमुत्तमम्॥ ९॥
दशमूलस्य कल्केन तत्कषायाम्लकाञ्जिकैः।
लवणैः संयुतं तैलं पचेद्वातविनाशनम्॥ १०॥
तुल्याभ्यां घृततैलाभ्यां चिद्दतोक्तैश्च भेषजैः।
मिश्रकं साधयेत्तैलं वसातैलेषु[2] मध्यमम्॥ ११॥
अपक्वं यमकं[3] प्रोक्तं घृतं तैलसमीकृतम्।
पाने वस्तौ तथाभ्यङ्गे वातरोगेषु शस्यते॥ १२॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे तैलविधाने विंशोऽध्यायः॥२०॥

---

कुट्टितेन कल्केन च सह तैलं साधयेत्। पाकप्रणाली-आदौ तैलं मूर्च्छयित्वा प्रसारण्यादीनां प्रत्येकं क्वाथेन सह कल्कं भोजयेत्। ततः क्षीरादीनि भोजयित्वा पाकशेषं कुर्य्यात्। क्षीरे द्विरात्रं सरसे त्रिरात्रं तक्रारणालादिषु पञ्चरात्रमिति नियमात् क्षीरं भोजयित्वा द्विरात्रं दधिमस्त्वारणालञ्च भोजयित्वा पञ्च पञ्च वासरान् संस्थापयेत्। अष्टवर्ग इति जीवकर्षभककाकोलीक्षीरकाकोलीमेदमहामेदर्द्धिवृद्धिकानि अष्टौषधानि। तदुक्तं,—"जीवकर्षभकौ मेदे काकोल्यावृद्धिवृद्धिके। अष्टवर्गोऽष्टभिर्द्रव्यैः कथितश्चरकादिभिः"—इति परिभाषा॥

---

१। रोगेषु चैव सर्व्वेषु। गः॥
२। सिद्धं तैलेन मध्यमम्। गः॥
३। मध्यम्। गः॥

दशमूलकषायेण तत्कल्कैः पाचयेद्भिषक् ॥ ३ ॥
मृदग्निना हृष्टताख्यं नस्यपानादिकामिकम् ।
वातव्याधिविनाशाय कीर्त्तितं यत्तपोधनैः ॥ ४ ॥

प्रसारणीतैलम् ।

शतं शतं पलानान्तु प्रसारण्यश्वगन्धयोः ।
दशमूलशतञ्चैव क्वाथयित्वा विचक्षणः ॥ ५ ॥
माषपर्ण्याः पलं वापि मुद्गपर्ण्याः पलं तथा ।
सैन्धवस्य पले द्वेतु[1] चित्रकस्य तथैव च ॥ ६ ॥
पिप्पलीनां तथामूलं प्रसारण्याश्च बुद्धिमान् ।
यवक्षारञ्च गृह्णीयाद् वुधो द्विपलिकं तथा ॥ ७॥
पलैकं[2] चाष्टवर्गन्तु कल्कार्थे संप्रयोजयेत् ।
पूर्व्वोक्तेन कषायेण दधिक्षीरतुषोदकैः ॥ ८॥

---

कुड़वमितः। दशमूलस्य क्वाथ्यस्य मिलितं शरावद्वयं। क्वाथार्थं वारि (३२ शराव) पदावशिष्टं कर्त्तव्यम्। अथ कल्केन सहैकत्र पाचयित्वा स्नेहपाकविधानेन साध्यम् ॥

५—८। तिलतैलं शरावचतुष्टयं (४ से)। क्वाथ्यद्रव्यं—प्रसारण्यादीनां त्रयाणां प्रत्येकं पलशतं। अथ क्वाथार्थं वारि प्रत्येकं ४०० पलं। पादावशिष्टं कृत्वा तेन क्वाथेन पृथक् पृथक् पाच्यं। तथा दध्ना दधिमस्तुना, क्षीरेण, तुषोदकेन च प्रत्येकं तैलसमानेन माषपर्ण्यादीनां

---

१। दलद्वेतु। खः॥　　२। पलिकं। खः॥

मन्दकोष्ठानले वाहे स्थूले चातिकृशे तथा।
स्नेहपानं न दातव्यं व्यायामेन च योजिते॥२०॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे स्नेहप्रयोगे एकोनविंशोऽध्यायः॥ १९॥

---

## अथ विंशोऽध्यायः।

---

### तैलविधानः।

#### मधुकादितैलम्।

मधुकोशीरयष्ट्याह्वरक्तचन्दनपद्मकैः।
श्रीपुष्पधातकीलोध्रमञ्जिष्ठाचन्दनैः समैः॥ १ ॥
कल्कीकृतं पचेत्तैलं गोक्षीरेण समन्वितम्।
पित्तदोषविनाशाय मधुकाद्यभिधानकम्॥ २ ॥

#### त्रिवृत्सर्पिः।

सर्पिस्तैलं वसां चैव एकीकृत्य विचक्षणः।

---

१। मधुकं (मौल)। ऊशीरं (गन्धवेणा)। यष्ट्याह्वं (यष्टिमधु)। पद्मकं (पद्मकाष्ठ)। श्रीपुष्पं (लवङ्ग)। धातकी (धाइफुल)। अत्र चन्दनं श्वेतचन्दनं। तैलस्य प्रस्थः। मधुकादीनां मिलित्वा कुडवः। दुग्धं च तैलसमं देयम्॥

३—४। सर्पिस्तैलवसानां मिलित्वा प्रस्थः। दशमूलस्य कल्कः

अतिस्निग्धस्य वाहस्य कुर्य्याच्चैव विचक्षणः ।
भोजनैः प्रतिपानैश्च वक्ष्यमाणैरनन्तरम् ॥ १२ ॥
सुरालवणसंयुक्तं प्रातर्दद्याद्विचक्षणः ।
यवागूभोजनञ्चैव विकाले तक्रसंयुतम्[१] ॥ १३ ॥
मुद्गाश्च भोजने देयास्तक्रेणाम्लेन मर्द्दिताः ।
एतत्त्र्यहं प्रकर्त्तव्यं पञ्चाहं वा भिषग्वरैः ॥ १४ ॥
एवं विरूक्षितानान्तु शुष्कघासैकवर्त्तिनाम् ।
कायाग्नेर्जायते वृद्धिः स्वल्पाश्मश्चापि वाजिनाम् ॥ १५ ॥
तैलं क्षारेण संयुक्तं प्रावृट्काले प्रदापयेत् ।
क्षीरयुक्तं शरत्काले हेमन्ते सुरया युतम् ॥ १६ ॥
शिशिरे लवणैर्युक्तं वसन्ते त्रिफलान्वितम् ।
वारिणा द्विगुणेनैव ग्रीष्मकाले[२] प्रशस्यते ॥ १७ ॥
अपक्वं नैव दातव्यं पाने स्वस्थेषु वाजिषु ।
समीक्ष्य दोषं पक्वञ्च तैलं दद्याद्विचक्षणः ॥ १८ ॥
आमं दत्तं गुदे तैलमभिष्यन्दाय जायते ।
तस्माद्दद्याद्विशेषेण स्नेहं[३] वस्तौ विपाचितम् ॥ १९ ॥

---

१६ तैलं पलाष्टकम् । चारस्य च षट्तोलकं मात्रा ॥
१७ । लवणस्य पलं । त्रिफलायाश्च मिलितं पलम् ॥

---

१ । तक्रसंस्कृताम् । खः ॥
२ । ग्रीष्मेचापि । गः ॥
३ । स्नेहवस्तिविपश्चितः । गः ॥

अश्वपानाच्च[1] दातव्यमर्द्धं स्नेहस्य पण्डितैः ।
प्रभाते वा विकाले वा पिण्डं दद्याद्भिषक् तथा ॥ ४ ॥
एकेनाह्ना न दातव्यं प्रस्थादूर्द्ध्वं घृतं वुधैः ।
आढ़कादपरो नैव प्रयोगस्तस्य शस्यते ॥ ५ ॥
त्रिरात्रं पञ्चरात्रं वा सप्तरात्रमथापि वा ।
दशाहं द्वादशाहं वा दद्यात् स्नेहं निरन्तरम् ॥ ६ ॥
क्षुधिते यवसं दूर्व्वां तस्मै दद्याद्विचक्षणः ।
सुखोष्णं सलिलञ्चैव प्रशस्तं परिकीर्त्तितम् ॥ ७ ॥
स्निग्धता सर्व्वगात्राणां वर्च्चः स्निग्धमसंहतम् ।
सम्यक्स्निग्धस्य वाहस्य उत्साहश्चैव जायते ॥ ८ ॥
अरुचिर्दीनता चैव पादानां श्वयथुस्तथा ।
अतिभिन्नपुरीषञ्च अतिस्निग्धस्य लक्षणम् ॥ ९ ॥
अस्निग्धस्य[2] भवेद्वर्च्चो रुक्षवर्त्तितमेव[3] च ।
तस्मै वातो भिषक् प्राज्ञः पुनः स्नेहं प्रदापयेत् ॥ १० ॥
सम्यक्स्निग्धं प्रशंसन्ति मुनयः शास्त्रकोविदाः ।
अतिस्निग्धश्च रुक्षश्च द्वावेतौ निन्दितौ स्मृतौ ॥ ११ ॥

---

४ । अश्वपानाच्चेत्यत्र अश्वपानायेति पाठः साधीयान् ।

५ । यस्मिन्दिने घृतप्रस्थो दीयते तस्मिन्दिने द्रव्यान्तराणा माढ़कादूर्द्ध्वं न देयमित्यर्थः ॥

---

१ । स्वच्छमानाच्च । गः ।
२ । अतिस्निग्धं । खः ॥
३ । रुक्षचर्चितम् । गः ॥

वातश्लेष्मणि वाते वा कफे वा स्वेद उच्यते ॥ ७ ॥
पित्तरोगातुरः श्रान्तः क्षुधार्त्तश्च पिपासितः ।
अस्वेद्यः कीर्त्तितो वाजी वड़वा चैव गर्भिणी ॥ ८ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे स्वेदविधानेऽष्टादशोऽध्यायः ॥

---

## अथैकोनविंशोऽध्याय ।

### स्नेहप्रयोगः ।

स्नेहप्रयोगो द्विविधः पिण्डः पेयश्च[१] वाजिनाम् ।
पिण्डो भोजनसंयुक्तः पाने पेयः स उच्यते ॥ १ ॥
शरत्काले प्रधानस्तु प्रयोगः सर्पिषो मतः ।
हेमन्ते शिशिरे चैव तैलस्य समुदाहृतः ॥ २ ॥
पलपञ्चकमारभ्य चीणि चीणि विवर्द्धयेत् ।
पूर्णः प्रस्थो भवेद्यावदश्वपाने[२] त्वयं विधिः ॥ ३ ॥

---

३ । प्रथमदिने पलपञ्चकमारभ्य प्रतिदिनं यावत्-प्रस्थपूरणं पल-त्रयमात्रं वर्द्धयेत् । अश्वपान इति वाजिघृतपानविषये ॥

---

१ । पानश्च । खः ।  २ । अच्छपाने । गः ॥

## अथाष्टादशोऽध्यायः ।

स्वेदविधानः ।

यत्र क्वाथेन यः स्वेदो गुरुः स्वेदः स उच्यते ।
वालुकापुटकैः स्वेदः पुटस्वेद उदाहृतः ॥ १ ॥
शकृता महिषाश्वानां गोमयेन तथैव च ।
अग्नितप्तेन यः स्वेदः शङ्करस्वेद उच्यते ॥ २ ॥
अतसीभिः शणैर्माषैर्वीजैः काश्मर्य्यसम्भवैः ।
गोधूमैस्तिलयवैश्चैव कुलत्थैर्धान्यसम्भवैः ॥ ३ ॥
वर्षाभूगोक्षुरैरण्डैर्धान्याम्लक्वथितैः समैः ।
सर्व्ववातहरः स्वेदः पुटाख्यो गात्रसम्भवः ॥ ४ ॥
सुतप्तकाञ्जिकैः स्विन्नं वुषं बद्धा पुटं भिषक् ।
तुषस्वेदं तुरङ्गस्य धान्यैर्वापि प्रदापयेत् ॥ ५ ॥
कफे रुक्षं प्रशंसन्ति स्वेदं शास्त्रविदो जनाः ।
आभाज्य वाते तैलेन सर्पिषा वा प्रदापयेत् ॥६॥

---

३ । अतसी ( मसिना ) । काश्मर्य्यसम्भवैः गाम्भारीजातैः वीजैरिति शेषः । (गामारवीज) । वर्षाभूः पुनर्नवा (श्वेतपुन्या) । धान्याम्लक्वथितैः काञ्जिकपाचितैः । अतस्यादीनां समो भागो ग्राह्यः ॥

स्वादुशीतं भवेन्नस्यं पित्तरोगविनाशनम्।
वार्त्ताकव्योषकल्केन निर्गुण्डीस्वरसेन वा ॥ ९ ॥
रूक्षं तीक्ष्णं सगोमूत्रं नस्यं प्रोक्तं कफापहम्।
सन्निपाते प्रयोक्तव्यं स्निग्धशीतलतीक्ष्णकैः ॥ १० ॥
द्विरूपे द्विविधं कार्य्यं नस्यं मतिमतांवरैः ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे नस्यविधाने सप्तदशोऽध्यायः ॥

---

९। निर्गुण्डी (निशिन्दा)।

१०। कफनस्ये नकुलः,—"धातकी गण्डकी चैव गोमूत्रं लवणं तथा। नस्ये दत्तं कफं हन्ति तमः सूर्य्योदये यथा"—इति॥ सन्निपातेऽपि नस्यमाह स एव,—"गुडूची शुण्ठी मुस्ता च तगरं सितसर्षपम्। सन्निपाते तु नस्योऽयं वारिणा क्रमकारकः॥ कुंकुमं सघृतं चैव माक्षिकं सितसर्षपाः। सन्निपाते सपित्तेऽयं नस्यः स्याज्जीवरक्षकः॥ अभया पुत्रिणी एला एला लाक्षा शतावरी। सन्निपातेऽनिलाधिक्ये नस्योऽयं क्षेमकारकः॥ मरिचं पिप्पलीमूलं वचासारङ्गिकाम्भसः। सन्निपाते कफाधिक्ये नस्यं सप्तेः सुखप्रदम्"—इति॥

शरत्कालोचिताः कार्य्याः स्नानपानादिपूर्व्विकाः ॥५॥
क्रियाः सर्व्वाः समासेन वाजिनां हितमिच्छता ।
वाते स्निग्धं कफे चोष्णं पित्ते वै स्वादुशीतलम् ॥ ६ ॥
कफे रूक्षञ्च तीक्ष्णञ्च नस्यं प्रोक्तं तपोधनैः ।
त्रिवृच्चूर्णं तथा तैलसर्पिषा वसया तथा ॥ ७ ॥
स्निग्धमेतत् स्मृतं नस्यं वाते वापि प्रशस्यते ।
जीवनीयौ समधुकौ शर्कराक्षीरवारिणा ॥ ८ ॥

---

५। शरत्कालिकं नस्यमाह नकुलः,—"शिलाचन्दनतोयादि-शिक्क्वाचाणि? वाजिनां। शर्करामाक्षिकं सैरं पटोलं पलसम्मितम् ॥ नस्यं शरदि सप्तीनां जायते रोगशान्तये"—इति।

६। नकुलोऽपि वाताद्यधिके स्निग्धादिनस्यमाह,—"देयं वाताधिके स्निग्धं रौक्षं तिक्तं कफाधिके। पित्ताधिके तु मधुरं तुरङ्गे संप्रयोजितम्"॥ एषां द्विपञ्चाशत् श्रेष्ठं, अष्टोत्तरविंशति मध्यमं, षड्विंशत्यधमं नस्यं नकुलेन प्रयोजितम् ॥

७। वाते स्निग्धं नस्यमाह त्रिवृदिति। त्रिवृच्चूर्णस्य कर्षः तैलघृतवसानां कुड़वार्द्धं संमिश्र्य देयम्। वातेऽपि नस्यमाह नकुलः,—"शुण्ठी घृतञ्च दुग्धञ्च रजःसारं तथैव च। वातदोषविनाशाय नस्यमेतत् प्रयोजयेत्"—इत्यादि ॥

८। पित्ते नस्यमाह जीवनीयाविति। जीवकर्षभकौ मेदमहामेदे च। मधुकं (यष्टिमधु)। अत्रापि नकुलः,—"माक्षिकं शर्करामिश्रं चन्दनं केसराणि च। नस्योऽयं वारिणा सद्यः पित्तनाशकरः सदा"॥

# अथ सप्तदशोऽध्यायः ।

नस्यविधिः ।

ऊर्द्ध[१] वक्‌त्रस्य दोषोऽस्ति[१] तथाचाधोमुखस्य च ।
तस्मान्नस्यं तुरङ्गस्य ईषदुन्नाम्य दापयेत् ॥ १ ॥
वामाङ्गुष्ठेन संपीड्य एकं नासापुटं वुधः ।
दद्यान्नस्यं तुरङ्गस्य लघुहस्तः सुमात्रया ॥ २ ॥
नाद्यातिश्लक्ष्णया[२] वैद्यो यथा नोद्विजते हयः ।
अन्यथा जायते शीघ्रं नाड़ीव्यापत् सुदारुणा ॥ ३ ॥
तीक्ष्णैर्वा पूरये[३]न्नाद्या देयं नस्यं विजानता ।
चन्दनोशीरयष्ट्याह्वक्षीरतोयैः सशर्करैः[४] ॥ ४ ॥
नस्यं दद्यात् भिषक् प्राज्ञो नाद्या दोषहिताय वै ।

---

१ । नासाग्राह्यं यदौषधं तन्नस्यं । तच्च द्विविधं रेचनं स्नेहनञ्च । तयोः रेचनं कफादीनां कर्षणम् । स्नेहनं वृंहणञ्चेति । तदुक्तं परिभाषायां "नस्यभेदो द्विधा प्रोक्तो रेचनं स्नेहनं तथा । रेचनं कर्षणं प्रोक्तं स्नेहनं वृंहणं मतम् ॥ नस्यं तत्कथ्यते धीरैः नासाग्राह्यं यदौषधम् । नावनं नस्यकर्म्मेति तस्य नामद्वयं मतम्"—इति ॥

२ । अथ कथं नस्यं प्रयोज्यं तदाह । वामाङ्गुष्ठेनेति । सुमात्रया कर्षमितेनेत्यर्थः ।

---

१ । ऊर्द्धं वक्त्रे च दोषः स्यात् । खः ।
२ । दद्यात् श्लक्ष्णतया वैद्यः । गः ।
३ । परया । खः ।
४ । क्षीरतोयैस्तु दापयेत् । गः ।

चतुर्वर्षस्य वाहस्य गुदे नेत्रं प्रवेशयेत् ।
चतुरङ्गुलं भिषक् प्राज्ञो वाजिशास्त्रविशारदः ॥ २४ ॥
द्वे च[1] द्विवर्षजातस्य त्रिवर्षे चाङ्गुलत्रयम् ।
षाण्मासिके[2] वर्षजाते एकमेवाङ्गुलं भवेत् ॥ २५ ॥
उदङ्मुखं प्राङ्मुखं वा कृत्वा वाहं सुयन्त्रितम् ।
घृताभ्यक्तेन हस्तेन पुरीषमपकर्षयेत् ॥ २६ ॥
स्वयं[3] कृत्वा पुरीषे वा दद्याच्चैवानुवासनम् ।
निरूहश्च प्रदातव्यः पुच्छं नीत्वा प्रदक्षिणम् ॥ २७ ॥
दद्रुशोफकफश्वासग्रहणीकुष्ठरोगिणाम् ।
तृषार्त्तस्य[4] च गर्भिण्याः कृशवृद्धस्य वाजिनः ॥ २८ ॥
क्षुत्तृष्णाश्रमयुक्तानां मद्यं पीतवतामपि ।
वर्जितो वाजिनां वस्तिस्तथाश्वे व्याधिपीड़िते ॥ २९ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे निरूहानुवासने षोड़शोऽध्यायः ।

---

२४-२५। अश्वानां वयोविशेषेण नेत्रप्रवेशननियममाह चतुर्वर्षस्येत्यादि ।

२६—२७। कथं निरूहयेत्तदाह उदङ्मुखमित्यादि ।

२८-२९ । येषां निरूहनिषेधस्तदाह दद्रित्यादि ।

---

१। द्वये। गः।
२। षण्मासे वर्षाजाते च। खः।   ३। स्वायं। खः।
४। विषार्त्तवृद्धगर्भिण्याः कृद्धदृद्धप्रवासिनाम्। खः।

कषायं रसकञ्चैव गोमूत्रं काञ्जिकन्तथा ।
कल्कञ्चैव प्रदातव्यं भेषजैर्वक्ष्यमाणकैः ॥ १८ ॥
त्रिफला मधुकं रास्ना मदनं गौरसर्षपाः ।
एला त्रिकटुकं कुष्ठं शतपुष्पा हरेणुकम् ॥ १९ ॥
हरिद्रे द्वे समञ्जिष्ठे[1] तथा लवणपञ्चकम् ।
यथाप्राप्तं समस्तं वा वर्गमेतं प्रदापयेत् ॥ २० ॥
कफोल्वणेषु रोगेषु तथा वातोल्वणेषु च ।
निरूहः संप्रदातव्यस्तुरङ्गस्य विपश्चिता ॥ २१ ॥
कषाये कल्कमालोड्य निरूहं संप्रदापयेत् ।
नैवात्यन्ततनुं[2] धीमान् नैवात्यन्तघनं तथा ॥ २२ ॥
पित्ते निरूहः कर्त्तव्यः क्षीरेणेक्षुरसेन वा ।
सिन्धुसर्पिःसमायुक्तः शर्करामधुसंयुतः ॥ २३ ॥

---

१८। तुरङ्गानां कफोल्वणेषु वातोल्वणेषु वा रोगेषु एष निरूहो देयः। त्रिफलादीनां समस्तानां यथालब्धानां वा कषायार्थं दशपलानि कल्कार्थञ्च पलं यथासंख्यं ग्राह्यम्। अथ चतुराढ़के जले पक्वा पादावशिष्टे कषाये उक्तं कल्कं मिश्रयित्वा निरूहो देयः। एवञ्च स्वरसगोमूत्रकाञ्जिकानां प्रत्येकमाढ़के प्रत्येकं त्रिफलादि कल्कपलं मिश्रयित्वा निरूहो देयः। एष चतुर्विधो निरूहः ॥

२३। पित्ते निरूहमाह पित्तइत्यादि। इक्षुरसस्य क्षीरस्य वाढ़कं सैन्धवस्य पलं घृतस्य च प्रस्थः। मधुनः शर्करायाश्च पलं पलम् ॥

---

१। द्वे च मञ्जिष्ठा। गः।		२। नैवात्यन्तं ततो। गः।

स्तोका दूर्व्वा क्षुधार्त्ताय तस्यां रात्रौ हिता स्मृता ।
त्र्यहं वापि हितं दृष्टं भोजनं सानुवासनम् ॥ १२ ॥
यथाकालं यथाव्याधि भोजनं संप्रदापयेत् ।
एवं रोगाः प्रशाम्यन्ति वाजिनां देहसम्भवाः ॥ १३ ॥

निरूहविवरणम् ।

पञ्चमूलद्वयं दन्ती कुष्ठञ्चैव शतावरी[१] ।
अनन्ता त्रिवृता श्यामा वल्ले द्वे च पुनर्णवा ॥ १४ ॥
गुडूची गोक्षुरं विम्बी कुक्कुटैरण्डवासकाः ।
यवाः कुलत्था वदरं तथारग्वधशिग्रुकम् ॥ १५ ॥
एतान्यादाय सर्व्वाणि यथालब्धानि वा पुनः ।
मूलानि सलिले क्षिप्त्वा क्वाथयित्वा विचक्षणः ॥ १६ ॥
पादशेषं कषायेण निरूहं संप्रदापयेत् ।
द्विपञ्चमूलीनिःक्वाथः सः प्रधानो निरूहणे ॥ १७॥

१४-१७। पञ्चमूलद्वयं विल्वादिदशमूलं। अनन्ता (अनन्तमूल) श्यामा (श्यामालता) त्रिवृत् (तेउड़ी) वल्ले द्वे इति श्वेता पीता च (वेलेड़ा)। विम्बी (तेलाकुचा)। कुक्कुटा (छिपकली)। एषां पञ्चमूलद्वयादिशिग्र्वन्तानां समस्तानां यथालब्धानां वा द्रव्याणां मूलानि मिलित्वा दशपलानि चतुराढ़कमिते जले पक्त्वा पादशेषः क्वाथः कर्त्तव्यः। एतस्याढ़केन कषायेण निरूहयेत्।

१। पाठा दन्ती चैव शतावरी। खः।
२। द्विपञ्चमूली निःक्वाथ्य सप्रधाना। खः।

अनेनास्थापनं कुर्य्यादनुवासनमेव च ।
यथायोग्यं[1] भिषक् प्राज्ञः सर्व्वरोगोपशान्तये ॥ ५ ॥

अनुवासनविवरणम् ।

त्रिरात्रं पञ्चरात्रं वा सप्तरात्रमथापि वा ।
भोजयित्वा हयं प्राज्ञो रसकस्नेहभोजनैः ॥ ६ ॥
भोजितं भोजनोक्तेन दिनान्ते चानुवासयेत् ।
निरूहयेदनाहारमपराह्णे विचक्षणः ॥ ७ ॥
त्रिभिर्वारैः प्रदातव्यो निरूहः शास्त्रकोविदैः ।
ईषत्तीक्ष्णः प्रयोक्तव्यः[2] प्रथमं पुटकोविदैः[3] ॥ ८ ॥
द्वितीयश्च तृतीयश्च तीक्ष्णौ चैव प्रकीर्त्तितौ ।
एवमास्थापिते वाहे निवृत्ते च निरूहणे ॥ ९ ॥
क्षीरस्य पुटकं पश्चादेकं दद्याद्विचक्षणः ।
ततो विस्रावयेद्वैद्यस्त्वेकवारं तुरङ्गमम् ॥ १० ॥
विस्रावितं स्नापयित्वा पायसैर्भोजयेत्ततः[4] ।
स्नेहानुवासनं तस्य विकाले[5] च प्रदापयेत् ॥ ११ ॥

---

५ । आस्थापनम् आस्थापनवस्तिम् ।

७ भोजनोक्तेन द्रव्येणेति शेषः ।

८ । पुटकः । (पिच्किरि)।

---

१ । यथायोगं । खः ।
२ । प्रदातव्यः । खः ।
३ । पुटको वुधैः । गः ।
४ । भोजयेत्पाययेत्ततः । गः ।
५ । द्विकाले । गः ।

हयस्य वमनं नास्ति तथा चैव विरेचनम्।
वमनं रेचनं नास्ति रक्तस्रावणमुत्तमम्॥ ३७॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे शिरावेधे पञ्चदशोऽध्यायः।

---

## अथ षोड़शोऽध्यायः।

नेत्रनिर्म्माणविवरणम्।

अथानुवासनविधिस्तथैवास्थापनस्य च।
प्रवक्ष्यामि यथायोगं शास्त्रदृष्टेन वर्त्मना॥१॥
काष्ठैर्दण्डैरयोभिश्च शृङ्गवंशनलादिभिः।
द्वादशाङ्गुलदीर्घन्तु परिणाहे षड़ङ्गुलम्॥ २॥
कोलास्थिमात्रच्छिद्रन्तु कुर्य्यान्नेत्रं विचक्षणः।
मूलादनुक्रम[१]श्लक्ष्णमसृणन्तु विशेषतः॥ ३॥
त्यक्त्वाङ्गुलानि चत्वारि कर्णिकान्तस्य[२] कारयेत्।
पुटकस्य प्रबन्धाय मूले द्वे चापि कर्णिके॥ ४॥

---

४। कर्णिकान्तस्य नेत्रपुष्करप्रान्तस्य मूले चत्वारि अङ्गुलानि त्यक्त्वा पुटकस्याच्छादनस्य प्रबन्धाय बन्धनाय द्वे कर्णिके च कारयेत्॥

---

१। अनुक्रमे दृढो मसृणन्तु। गः। २। ग्रन्थिकान्तस्य। गः।

गुरुलाघवदोषेण बहु चैवाल्पमेव च ॥ २८ ॥
वामाङ्गुष्ठेन संपीड्य सिरां शस्त्रेण ताड़येत् ।
श्रान्तं भीतं कृशं वृद्धं बालञ्चैव न वेधयेत् ॥ २९ ॥
प्रदेशे लोमशे नित्यं लोमान्युत्पाट्य[१] वेधयेत् ।
प्रमाणार्थञ्च पात्रेण रक्तं गृह्णाति बुद्धिमान् ॥ ३० ॥
तालुशंखहनुप्रोथललाटस्तनकर्णजाः[२] ।
कृत्वा यवसमं शस्त्रं शिरा विस्रावयेद्बुधः ॥ ३१ ॥
उरोजां पोत्रिकाञ्चैव कूर्चजां कोष्ठजां तथा ।
अर्द्धाङ्गुलेन शस्त्रेण तलजाञ्चैव ताड़येत् ॥३२ ॥
औपाण्डीं[३] स्थौरिकीं वापि कक्षकोष्ठभवां तथा ।
पूर्व्वोक्तेनैव शस्त्रेण पुच्छजामपि ताड़येत् ॥ ३३ ॥
अङ्गुलं प्रक्षिपेच्छस्त्रं पृष्ठजायां तथैव च ।
बाहुजायाञ्च मन्यायां वेधकाले विचक्षणः ॥३४ ॥
सूचकेण[४] च संवेक्ष्य मुखं शस्त्रस्य बुद्धिमान् ।
यथाप्रमाणं संस्थाप्य ततो विस्रावयेत् शिराम् ॥ ३५ ॥
असम्यक् ताड़िते भीते वाहे वा विषमस्थिते ।
क्षीणासृक्-शिशिरे तोयादुत्थिते[५] च विशेषतः ॥३६॥
न वहन्ति सिरा ह्येवं तस्मात् कार्य्या[६] प्रतिक्रिया ।

---

१ । उत्कृत्य । खः ।
२ । स्तुवकर्णजाः । खः ।
३ । अपाण्डीं । खः ।
४ । माषकेण च । गः ।
५ । तोये दुःस्थिते । गः ।
६ । कर्म्मणा । खः ।

वेधव्या चैव मन्या तु ग्रीवामध्यगता शिरा ॥ १९ ॥
ऊर्द्ध्वं कूर्च्चात्तु वेधव्या ईषिका चतुरङ्गुले।
अङ्गुलैः षट्प्रमाणैस्तु[1] अधस्ताच्चैव जानुनः ॥ २० ॥
षड़ङ्गुलं खुरादूर्द्ध्वं कूर्चजां वेधयेच्छिराम्।
रोमान्त्या[2] चैव वेधव्या द्यङ्गुले खुरसन्धितः ॥ २१ ॥
मण्डूकाग्रञ्च संशोध्य तलजां वेधयेद्बुधः।
कक्षजा चैव वेधव्या कक्षातश्चतुरङ्गुले ॥ २२ ॥
वामदक्षिणभागेतु नाभिजा[3]ष्टाङ्गुलान्तरे।
कोष्ठजां ताड़येद्वैद्यः शिरां शस्त्रेण बुद्धिमान् ॥ २३ ॥
पृष्ठजामासनाभ्यासे द्यङ्गुलेनैव पार्श्वयोः।
बद्धा कर्पटकं यच[4] शिरां विस्रावयेद्बुधः ॥ २४ ॥
ऊरुसन्धेरधस्तात्तु विसृज्य चतुरङ्गुले।
ऊरुकाभ्यन्तरे चैव अपाण्डीं वेधयेच्छिराम् ॥ २५ ॥
ऊर्द्ध्वसन्धेरधश्चैव स्थौरिकीं चतुरङ्गुले।
द्यङ्गुले पुच्छमूलाच्च पुच्छजां ताड़येच्छिराम् ॥ २६ ॥
पश्चात्कायसमुत्थानां शिराणां जानुनोरधः।
तलजानाञ्च कर्त्तव्यं प्राक् प्रयुक्तञ्च वेधयेत् ॥ २७ ॥
सर्व्वेषां शोणितप्रस्थं गालयेच्छास्त्रकोविदः।

---

१। अङ्गुलैकप्रमाणैः। ख।
२। रोमान्त्यस्त्रैव वेध्यः स्यात्। खः।
३। नाभितः। खः।
४। यन्त्रं। गः।

शंखजा चैव विस्राव्या अपाङ्गाद्‌द्व्यङ्गुलान्तरे[1]।
अश्रुपातगता चैव त्र्यङ्गुले चक्षुषोरधः ॥ १३ ॥
कण्ठे बद्ध्वा दृढं प्राज्ञः शिरां विस्रावयेत्ततः।
नासिकाया अधस्ताच्च द्व्यङ्गुले प्रोथजां शिराम् ॥ १४ ॥
ऊर्द्ध्वन्तु द्व्यङ्गुले चापि बाहुसन्धेर्विचक्षणः।
उरसश्चाधरे[2] भागे तथा वै चतुरङ्गुले ॥ १५ ॥
ग्रीवामुत्क्षिप्य दूरन्तु उरो निःसार्य्य वाजिनः।
औरसीं वेधयेद्वैद्यः शिरां संलक्ष्य तत्त्वतः ॥ १६ ॥
किणजाभ्यन्तरे विद्वान् पारकीमुपलक्षयेत्।
किणाधो द्व्यङ्गुले तान्तु त्र्यङ्गुले चापि वेधयेत् ॥ १७ ॥
ऊर्द्ध्वञ्चैवाक्षिकूटात्तु लालाटीं वेधयेत् शिराम्।
स्तुवजा चैव वेध्या स्याद्‌द्व्यङ्गुले स्तुवसन्धितः ॥ १८ ॥
द्व्यङ्गुले कर्णमूलात्तु[3] कर्णजान्ताडयेद्भिषक्।

---

१३। एतत्तु नेत्रशिरावेधनं सर्वविधपटलमुञ्जकादिनेत्ररोगशान्त्यर्थम् ॥

१६। उरोगतरक्तदोषशान्त्यर्थं औरसीशिरावेधनम्। एवं स्तुवमन्येषिकाकूर्चतलकचकोष्ठपृष्ठापाण्डंसुरपुच्छादिशोणितजनितपीड़ाशान्त्यर्थं तत्तत्स्थानीयशिरावेधः क्रमेणोक्तः ॥

१७। पारकीमिति पाठो न सङ्गच्छते।

---

१। वंशाद्वै द्व्यङ्गुलान्तरे। खः ॥
२। आवर्त्तादधरे भागे ॥ खः।
३। कर्णमूलन्तु। गः।

शरावशकलं दत्वा शस्त्रवेधमुखे बुधः[१] ।
कर्पटेन दृढं वद्धा रुधिरं संनिवारयेत् ॥ ९ ॥
अतिवेगात्[२] प्रवृत्तन्तु यद्येवं नैव तिष्ठति ।
शिरावेधं तदा प्रज्ञो माषकल्केन लेपयेत् ॥ १० ॥
महावेगं यदारक्तमनेनापि न तिष्ठति ।
ततः शस्त्रमुखं प्राज्ञो दहेल्लोहशलाकया ॥ ११ ॥

वेधस्थानकथनम् ।

वामे वा दक्षिणे वापि देशे चैवाङ्गुलान्तरे ।
अग्रे वलिचयं त्यक्त्वा वेधव्या तालुकी शिरा ॥ १२ ॥

---

संपीड्यते हयः । तदा कण्डूतिमासाद्य कर्षते सततं पुनः । छायां वाञ्छति यत्नेन विशेषेण जलाश्रयाम्"—इत्यादि ।"पित्तासृग्दूषितो वाजी यदि चाश्रूणि मुञ्चति । नेत्रान्ते पाण्डुरत्वञ्च सद्यो मृत्युमवाप्नुयात् । श्लेष्मरक्तप्रकोपेण यथा संपीड्यते हयः । अधोवक्त्रो भवेन्नित्यं काशते च मुहुर्मुहुः"—इत्यादि ।

९—११ । अतिस्रावनिवारणोपायमाह । शरावशकलमिति ॥ शरावशकलं शरावखण्डं (खोलाकुचि) ।

१२ । अथ शिरावेधनस्थानानि निर्दिशन् शिरावेधमुपदिशति । वामे वेति ॥ वलिचयं तालुस्थमित्यर्थः । एतत्तालुशिरावेध उपकुशादिमुखरोगशान्तये ज्ञेयः ।

---

१ । मुखे नतु । खः । २ । अचिरेण । गः ।

शिशिरे च वसन्ते च स्वेदं कृत्वा विचक्षणः ।
शीतकाले[1] च मध्याह्ने शिरावेधं प्रयोजयेत् ॥ ५ ॥

शोणितविवरणम् ।

शब्दवत्फेनिलं यच्च तद्रक्तं वातजं[2] स्मृतम् ।
श्यावञ्च नीलकं वापि ज्ञेयं पित्तेन दूषितम् ॥ ६ ॥
सान्द्रञ्च पिच्छिलं पाण्डु श्लैष्मिकं परिकीर्त्तितम् ।
द्विरूपं द्वन्द्वसम्भूतं सङ्कीर्णं सन्निपातजम् ॥ ७ ॥
शशशोणितसङ्काशं यच्च सिन्दूरसन्निभम् ।
तद्विशुद्धं भवेद्रक्तं शिरावेधविनिर्गतम् ॥ ८ ॥

---

४—५ । शिरावेधकालमाह शरदित्यादि । शरद्ग्रीष्मयोः विकाले, वर्षासु अमेघाच्छन्नदिनेषु शीतादौ च मध्याह्ने शिरावेधः कार्य्यः । उक्तञ्च नकुलेन,—"आषाढ़समये प्राप्ते शिरामोक्षञ्च कारयेत् । तेन संशोध्यते रक्तं वाजिनां दोषसम्भवम्" इत्यादि ॥

६—८ । पित्तादिदूषितरक्तानां लक्षणमाह शब्दवदित्यादि । एतदप्रतीकारे दोषं रोगसम्भवञ्चाह नकुलः,—"यदि रक्ताधिको वाजी शस्यं नाश्नाति कर्हिचित् । रक्तात्संजायते पित्तं ततो नाशमवाप्नुयात् ॥ रक्ताधिकश्वासपुटः स्नेहाद्यैः शस्यमत्ति चेत् । संप्राप्य श्लेष्ममचिराद्भूयो नाशमवाप्नुयात् ॥ तत्रेदं लक्षणं प्रोक्तं रक्तकोपसमुद्भवं । धातूनामपि सर्व्वेषां ज्ञेयं चिह्नं विचक्षणैः ॥ पित्तरक्तप्रकोपेण यदा

---

१ । समे काले । खः ।  २ । वातिकं । खः ।

## अथ पञ्चदशोऽध्यायः ।

शिरावेध-कालनिरूपणम् ।

अतःपरं प्रवक्ष्यामि शिरावेधविनिश्चयम् ।
प्रधानं वाजिनामेतद्भेषजं गदितं[1] बुधैः ॥ १ ॥
औषधैर्नैव[2] सिध्यन्ति रोगा रक्तसमुद्भवाः ।
यतो वेधेन सिध्यन्ति स्निग्धस्विन्नस्य वाजिनः ॥ २ ॥
देहस्य रुधिरं मूलं तदालम्बं हि जीवितम्[3] ।
तस्मान्नवाहयेच्छुद्धं दुष्टञ्चैव न धारयेत् ॥ ३ ॥
शरत्काले निदाघे च विकाले[4] वेधयेच्छिराम् ।
अदुर्दिने च वर्षासु शीते मध्यन्दिने तथा ॥ ४ ॥

२। स्निग्धस्विन्नस्येति पूर्वदिने पायितघृतस्य, स्विन्नस्य दत्तधूपस्येत्यर्थः ॥

३। देहस्य रुधिरमूलत्वाज्ज्वरदादिषु च पित्तादिप्रकोपेण रुधिरदोषजननाद्दुष्टादुष्टरक्तज्ञानपुरःसरं शिरावेधविधानमाह । अत्र नकुलः,—"रक्तदोषात्तदा वाजी प्राप्नोत्येव महामयान् । तस्मात् सर्वप्रयत्नेन रक्तं ज्ञेयं विचक्षणैः"—इति ॥

१। तूदितं । गः ।
२। औषधैस्तु । गः ।
३। जीविनाम् । गः ।
४। विकाशे ।

तुरङ्गाङ्गे ततो दण्डं विद्वानुपरि धारयेत्।
द्रुताया वह्नितापेन वर्त्त्याश्छिद्रान्तरे गतैः॥ १८॥
विन्दुभिर्दाहयेदश्वं सुवद्धं पातितं क्षितौ।
पश्चात्-कायसमुत्थेन वायुनैवं विमुच्यते॥१९॥

दाहलक्षणम्।

विल्व[1]मध्यसवर्णन्तु पक्कतालनिभं तथा।
सम्यग्दग्धं विजानीयाद् विपरीतं विवर्जयेत्॥ २०॥

शस्त्रविधानम्।

अर्द्धाङ्गुलन्तु विस्तीर्णं कुर्य्याच्छस्त्रं षड़ङ्गुलम्[2]।
नाम्ना ब्रीहिमुखं सम्यक् तथा चोत्पलपत्रकम्॥२१॥
त्यङ्गुलं वृद्धिपत्रञ्च क्षुराकारं प्रकीर्त्तितम्।
पक्कशोथादिषु प्राज्ञः पाटनं तेन कारयेत्॥२२॥
शस्त्रेणोत्पलपत्रेण ब्रीहिपत्रेण वा भिषक्।
शिरावेधविधिं सम्यग् दृष्टकर्म्मा प्रयोजयेत्॥२३॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे क्षाराग्नि-शस्त्रविधाने चतुर्दशोऽध्यायः।

---

२१। ब्रीहिमुखं ब्रीहिमुखसदृशत्वात्। उत्पलपत्रमपि उत्पल-दलाकारत्वात्। तथा वृद्धिपत्रं नाम क्षुरसदृशं। एतानि सुश्रुतोक्त-विंशतिविधशस्त्राणामन्यतमानि। तेषु केन किं साधनीयमित्याह। ब्रीहिमुखं व्यधने वृद्धिपत्रमुत्पलपत्रञ्च छेदने भेदने च व्यवह्रियते॥

---

१। चित्त। खः।　　२। षड़ायतम्। खः।

दहेत् प्रथमया लोम[1] चर्म्म चैव द्वितीयया ।
मांसं तृतीयया सम्यग् दहेद्विद्वा शलाकया ॥ १० ॥
समांसलेषु देशेषु काले[2] वह्निं प्रदापयेत्।
रेखाभिर्विन्दुभिश्चैव तथा काकपदादिभिः ॥ ११ ॥
दहेद्देशं सम्यगेवं वाजिनोऽङ्गं शलाकया।
दग्ध्वा मधुककल्केन घृतमिश्रेण लेपयेत् ॥ १२ ॥

मेदोदाहविधानम्।

गुग्गुलाक्षामधूच्छिष्टसर्जश्रीवेष्टकैः समैः ।
मनःशिलागुड़ोपेतैर्वर्त्तिमष्टाङ्गुलायताम् ॥ १३ ॥
कृत्वाष्टाङ्गुलविस्तारां[3] शूकरादिवसान्विताम्।
घृतप्लुतेन संवेष्ट्य कर्पटेन विनिःक्षिपेत् ॥ १४ ॥
अधोभागे दृढं विद्ध्वा[4] सुशिरे वेणुदण्डकैः ।
प्रक्षिप्य छिद्रं कुर्व्वीत अधोभागे विचक्षणः[5] ॥ १५ ॥
कोलास्थिमात्रदण्डस्य द्विहस्तस्य विचक्षणः ।
यस्मिन् स्थाने स्थिता वर्त्तिस्तत्र दण्डं प्रवर्त्तयेत् ॥ १६ ॥
अधोभागे घृताक्तेनालक्तकेनाङ्गुलाष्टकम्।
यस्मिन् कृत्वा ततो वह्निं भृशं प्रज्वालयेद्बुधः ॥ १७ ॥

---

१० । पुस्तकान्तरे लोमस्थाने लोहमिति पाठः ॥

---

१ । लोहं । गः ।
२ । काले । गः ।
३ । द्व्यङ्गुलविस्तारम् । खः ।
४ । अधोभागं दृढ़ं बद्धं । गः ।
५ । विचेष्टयेत् । खः ।

मृद्वग्निना पचेन्मूत्रं ततो दर्व्वीविघट्टितम्।
भेषजानि क्षिपेत्तस्मिन् दर्व्वीलेपत्वमागते॥ ३॥
हिङ्गु टङ्कं यवक्षारं पञ्चैव लवणानि च।
क्षिप्त्वैतानि पचेत्तावद् यावत्तच्चूर्णतां[१] गतम्॥ ४॥
तच्चूर्णन्तु भवेत् सिद्धं[२] स्थापयेत् शीतलं कृतम्।
वातजे[३] कफजे कुष्ठे चार्व्वुदे मांसकीलके॥ ५॥
लोमान्युत्पाद्य दातव्यः क्षार एष[४] शलाकया। ६।

लौहदाहविधानम्।

वायौ प्रकुपिते[५]ऽत्यर्थमग्निं दद्याद्विचक्षणः।
यथाशास्त्रं भिषक् प्राज्ञो लौहकैर्मेदसापि वा॥ ७॥
शलाकाभिश्च फालैश्च तप्तैर्लौहेन कीर्त्तितः।
वर्त्तिभिर्विन्दुदाहेन[६] मेदसा समुदाहृतः॥ ८॥
अग्रकायं[७] दहेल्लोहैः पश्चात्-कायन्तु[८] मेदसा।
एवं यः कुरुते सम्यक् तस्य सिद्धिर्न दूरतः॥ ९॥

---

८। शलाकया वा फालेन वाग्नितप्तेन दाहो लौहदाहः कीर्त्तितः। तथा वर्त्तिभिर्दाहेन मेदसा दाहः समुदाहृतः॥

---

१। यावत्तु। गः।
२। तिक्ततुल्यन्तु। खः।
३। वाते कफे च कुष्ठे च। गः।
४।एवं। खः।
५। बहुप्रकुपितः। खः।
६। वर्त्तिभिश्चैव दाहेन। खः।
७। अग्रकाये। गः।
८। पश्चात्काये। गः।

## अथ चतुर्द्दशोऽध्यायः।

क्षारदाहविधानम्।

एकस्य वा द्वयोर्वापि समस्तानामथापि वा।
रम्भापामार्गभानूनां स्नुहीलाङ्गलिपुष्करान्॥ १ ॥
दग्ध्वा भस्म समादाय गोमूत्रेण तु गालयेत्[१]।
गालितानन्तरं तच्च ताम्रपात्रे निधापयेत्॥ २॥

२। क्षणनात् क्षरणाद्वा क्षारः। स च शस्त्रादिभ्यः प्रधानतमः त्रिदोषनाशित्वात्। स च गुणत उष्णस्तीक्ष्णः शोधनः पाचनः विलयनः रोपणः शोषणो लेखनश्च भवति। स च प्रतिसारणीयत्वात् पानीयत्वाच्च द्विविधः। तयोः प्रतिसारणीय एवास्मिन् ग्रन्थे विनियोज्य इति बोध्यं शोफार्ब्बुदादिदाहार्थम्। भानुः रक्तार्कः। लाङ्गली (ईषलाङ्गली)। पुष्करः कुष्ठ (कुड़)। एतेषां भस्मानि द्रोणपरिमितानि षड्भिर्गोमूत्रद्रोणैर्गालयित्वा दोलायन्त्रेण एकविंशतिवारं परिस्रावयेत्। ततो गालितं क्षारजलं स्वल्पदग्निना पाचयित्वा यदा दर्व्वीलेपत्वं गमिष्यति तदा हिङ्ग्वादीनां चूर्णं मिलित्वाष्टपलं प्रक्षिप्य चूर्णतामागतं सिद्धं भवति॥

१। गोमूत्रेणानुगालयेत्। गः॥

व्योषजीरकसिन्धूत्थविड़सौवर्च्चलानलैः।
हरिद्राद्वयपूतीकवीज[1]शिग्रुकुठेरकैः॥ ८८॥
गोमूत्रपिष्टैः पिण्डन्तु[2] प्रातर्वाजिषु दापयेत्।
मन्दाग्निदीपनं श्रेष्ठं वलतेजोविवर्द्धनम्॥ ८९॥
अथवा सुरया सार्द्ध प्रतिपानेषु[3] योजितः।
कायाग्निदीपनश्चाशु[4] पिण्डोऽयं मुनिभाषितः॥ ९०॥
सर्व्वदैव तुरङ्गाणां हितमेतत् प्रकीर्त्तितम्।
कण्डूयनं सुखं चाग्र्यं[5] तेषां प्रोक्तं मनीषिभिः॥ ९१॥
संग्रामादिषु कालेषु तं स्मरन्ति हयोत्तमाः[6]।
तस्मात् कार्य्यं[7] प्रयत्नेन तेषां कण्डूयनं[8] बुधैः॥ ९२॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे सर्व्वर्त्तूपचारे त्रयोदशोऽध्यायः॥ १३॥

---

वायुवर्जञ्च वाहस्य स्नेहपीतस्य वर्जितम्" इति वचनाद् एतत् सर्वं निषिद्धम्॥

८८—८९। व्योषादीनां मिलित्वा पादहीनं पलं ग्राह्यं। सिन्धूत्थं सैन्धवं। विडं कृष्णलवणं। अनलश्चित्रकमूलं। हरिद्राद्वयं हरिद्रा दारुहरिद्रा च। पूतीकः (नाटाकरञ्ज)। शिग्रुः शोभाञ्जनत्वक्। कुठेरकः श्वेततुलसी (वावुइतुलसी)।

---

१। भार्ङ्गी। खः॥
२। पिण्डीन्तु। खः॥
३। प्रतिपानेन। गः॥
४। कायाग्निदीपनोयश्च। गः॥
५। चाङ्गे। कः॥
६। हया यतः। खः॥
७। कार्ये। गः॥
८। कण्डूयते। गः॥

प्रियङ्गुपिप्पलीलोध्रमधुकं विश्वभेषजम् ।
निदाघे प्रतिपानं स्यात् सीधुना मधुना युतम् ॥ ८३ ॥

सर्व्वर्त्तुपोषणविधिः

देशे देशे च घासानां नामान्यत्वं प्रजायते ।
तेन घासा मया नैव नामभिः परिकीर्त्तिताः ॥ ८४ ॥
औदकं दापयेद्घासं ग्रीष्मे शरदि वाजिनाम् ।
कालेऽन्यस्मिन् हितो दृष्टः शुष्को रोगविवर्जितः ॥ ८५ ॥
सर्व्वेषु चैव रोगेषु तथा कालेषु षट्स्वपि ।
दूर्व्वा नित्यं हिता दृष्टा वाजिपुष्टिविवर्द्धिनी[1] ॥ ८६ ॥
साचावत्संप्रयुञ्जीत स्वस्थानां सर्व्वकालिकम्[2] ।
तैलं कालानुरूपोक्तं[3] पञ्चषड्दिवसान्तरे ॥ ८७ ॥

८३ । प्रियङ्ग्वादीनां चूर्णं मिलिला पलं । सीधुनः प्रस्थः । मधुनश्च कुडवः । उक्तञ्चाग्नेये,—"प्रियङ्गुपिप्पलीलोध्रयष्ट्याह्वैः समहौषधैः । निदाघे सगुड़ा देया मदिरा प्रतिपानके"—इति । अत्र नकुलः,—"घृतपानं विशेषेण सुच्छायासु निबन्धनम् । रक्तस्रावश्च गात्रेषु ग्रासं वा घृतसंयुतम् ॥ घृतं काशस्य मध्यग्रं सर्व्वदोषप्रशान्तये"—इति ॥

८७ । तैलमिति तैलस्य प्रस्थार्द्धं पञ्चषड्दिवसानन्तरं देयम् । परन्तु स्नेहपीतस्य "गुर्व्वभिष्यन्दिभक्तानि व्यायामं स्नानमातपम् ।

१ । वाजिनां पुष्टिवर्द्धिनी । गः॥
२ । स्वस्थाने सर्व्वकालिकान् । गः ॥
३ । तिलैः कालानुरूपोक्तैः । गः ॥

स्थानं छायान्वितं शस्तं ग्रीष्मे व्यायामवर्जिते[1]
त्रिःस्नानपानं घासश्च सान्द्रो यश्चापि वारिजः ॥ ७९ ॥
अतीव घर्म्मतप्तानां शारदं कारयेद्विधिम् ।
क्षीरयुक्तं शतावर्य्या मूलं पाने च शस्यते ॥ ८० ॥
दुर्व्वलानां प्रदातव्यं सार्द्धं माषरसेन तु[2] ।
यवभक्तं युतं दध्ना वाहानां स्वल्पसैन्धवम् ॥ ८१ ॥
कुक्कुटीमूलकल्कश्च क्षीरेणालोड़ितस्तथा ।
ग्रीष्मकाले हितो दृष्टो वाजिनां हितकांक्षिभिः ॥ ८२ ॥

---

७९ । नकुलोऽत्र दूर्व्वां ददाति । "ग्रीष्मकाले तु संप्राप्ते दूर्व्वा-भोज्यं प्रशस्यते । वाजिनामिह सर्व्वेषां घर्म्मतापोपशान्तये" इति ॥ ग्रीष्मे त्रिःस्नानपानं स्याच्चिरं तस्यावगाहनम्" । इत्यग्निपुराणम् ॥ घासस्य दश तुलेति अहोरात्रेण यवसस्य तुलादशेति ज्ञेयम् ।

८० । शतावर्य्या मूलकल्कपलं । चीरस्य प्रस्थः ॥

८१ । अत्र चतुराढ़कमितस्य यवस्य भक्तं देयम् । "निस्तुषाणां प्रदातव्या यवानां चतुराढ़की" इत्यग्निपुराणम् ॥ अत्र पानं सर्पिः-प्रभृति । माषरसेनेत्यत्र मांसरसेनेति साधुः ॥

८२ । कुक्कुटीमूलकल्कः शाल्मलीमूलकल्कः ॥

---

१ । व्यायामवर्जितं । गः ॥　　　　२ । सार्द्धं मांसरसेन तु ।

वसन्तपोषणविधिः।

वसन्ते वाहयेदश्वान् भोजनं नैव दापयेत्।
खादने भक्षितास्तेषां संस्कृताः केवला यवाः॥ ७५॥
त्र्यहाद् द्यहाच्च दातव्यं लवणञ्च सुमात्रया[१]।
घासः शुष्को जलं वारमेकं द्वौ वा हितं स्मृतम्॥ ७६॥
व्योषलोध्रविडङ्गैश्च सक्षौद्रैः सैन्धवान्वितैः।
प्रतिपानं हितं दृष्टं वसन्ते मदिरायुतम्॥ ७७॥
हेमन्ते शिशिरे विद्वान् वसन्ते च तुरङ्गमान्।
आतपे दिवसं सर्व्वं स्थापयेद्वाजिशास्त्रवित्॥ ७८॥

---

देयाः प्रयत्नतः॥ प्राप्तचीरा विशेषेण शिशिरे समुपस्थिते। शुष्का अपि यवा देयाः सर्व्वकालञ्च वाजिनाम्॥ प्राणदास्ते यतोऽज्ञेयाः सर्व्वव्याधिविनाशनाः। योऽन्योऽशनार्थं वाहानां प्रधानो यव इष्यते॥ तदभावे यवान् दद्यान्मकुष्ठान् तैलसंयुतान्। भोजने तुरगेन्द्राणां परां पुष्टिमभीप्सता॥ मकुष्ठभोजनाद्वाजी पुष्टिं गच्छति लौकिकीं॥ अप्राप्तौ तु मुकुष्ठानां मुद्गा देया विवेकिभिः। सतैलास्तेऽपि कुर्व्वन्ति पुष्टिं सत्वविवर्द्धिनीम्॥ अन्नाभावे प्रदातव्यं घृतं वा यदि वा पयः। शस्यं वा मांसमेवाथ पुष्ट्यर्थं वाजिनां सदा॥ शस्याभावे तु शुष्कं वा यवसं यस्य वाजिनः" इत्यादि। "भक्षिताः" स्थाने भर्जिता इति युक्तम्॥

---

१। वसुमात्रया। ख॥

आरम्भात् पञ्चरात्रन्तु पयःपानं न दापयेत् ।
ततः सक्तत् प्रदातव्यं यावद्द्वौ सप्तकौ गतौ ॥ ७२ ॥
तृतीये सप्तमे[१] चैव वाहयेच्च तुरङ्गमम् ।
चतुर्थे च यथाशक्यं[२] वाहयेच्च विचक्षणः ॥ ७३ ॥
पुष्पिताः फलिताश्चैव प्रशस्ताः सर्व्वदैव तु ।
ये च पुष्टिप्रदा[३] हृद्या बलारोग्यविवर्द्धनाः ॥ ७४ ॥

---

७४ । पुष्पिताः फलिताश्च माषा इत्यर्थः ॥ शिशिरपोषणे नकुलः—“ततः शिशिरमासाद्य दद्यात्तैलं हि वाजिनां । पलान्यष्टौ प्रमाणेन भवेद् यावद्द्विसप्तकं ॥ यवोत्थं यवसं पश्चात् दद्याद्विंश-त्यहानि च । यवाभावे च चणकान् दद्यादार्द्रान्वरान् सदा ॥ तदभावे मसूरांश्च शुष्कार्द्रान् तैलसंयुतान् । यवसञ्चापि यत् प्रोक्तं ब्रविष्ये तदहं यदा ॥ औषधानान्तु सर्वेषां काथ्यतां तस्य कर्म्मणां ॥ तैलानाञ्च घृतानाञ्च यवसं यवसं परम् ॥ पर्व्वतानां यथामेरुरायुधानाञ्च वज्रकम् । तथा सर्वोपचाराणां सप्तेः श्रेष्ठतमा यवाः । यथोदितः सहस्रांशुर्निःशेषं तिमिरं हरेत् । तथा शरीरजान् दोषान् यवाः सर्व्वान् हरन्ति च ॥ उपचारक्रियाः सर्व्वाः पञ्चर्त्तुजनिता हये । कृताः सर्व्वेण भोज्येन सप्तेस्तु सुकृताय वै । यद्यश्वाय यवा दत्ताः शिशिरे समुपस्थिते । क्रिया अपि कृताः सर्व्वाः पञ्चर्त्तुजनिता हये ॥ पञ्चर्त्तुजनिताश्वाय क्रिया व्यर्थास्तुरङ्गमे ॥ एवं ज्ञात्वा विदग्धेन यवा

---

१ । सप्तके । गः ॥　　३ । येवा पुष्टिप्रग्दह्यास्च । गः ॥
२ । यथाशक्त्या । खः ॥

शिशिरे तोयपानञ्च दद्यादेकं विचक्षणः ।
एवं श्लेष्मा तुरङ्गानां प्रकोपं नैव गच्छति ॥ ६७ ॥
भोजनं वाहनं चैव कुर्य्यादेकान्तरं भिषक्[1] ।
अनुपाने सुरा तेषां भोजितानां प्रकीर्त्तिता ॥ ६८ ॥
सव्योषेण विड़ङ्गेन हिङ्गुना वचया सह ।
यवानी[2]शतपुष्पाभ्यां पञ्चभिर्लवणैस्तथा ॥ ६९ ॥
वारुण्याः प्रतिपानन्तु शिशिरे संप्रदापयेत् ।
कायाग्निदीपनं तच्च श्लेष्मदोषनिवारणम् ॥ ७० ॥
शिशिरे गर्भिता देया यवाः स्वस्थाय वाजिने ।
सप्ताहं द्विगुणञ्चैव वाहयेन्नैव बुद्धिमान् ॥ ७१ ॥

---

श्चिकेन । तिलतैलसमेतैरित्यत्र तिलतैलस्य कुड़वत्रयं । लवणसंयुक्तैरिति लवणस्य कुड़वः । माषाणां प्रस्थत्रयं ॥

६७ । शिशिरे तोयपानमेकवारं दद्यात् । वारिदानस्य मात्रा तु चतुर्दश कुड़वाः । अनुपाने सुरायाः प्रस्थः ॥

६९—७० । प्रतिपानार्थं व्योषादीनां मिलित्वा चूर्णं पादोनं पलं सुराप्रस्थेन समालोड्य देयम् ॥ शतपुष्पा ( शुल्फा ) । "शतपुष्पा सितच्छत्राऽतिच्छत्रा मधुरा मिसिः" इत्यमरः । पञ्चलवणानीति सैन्धवसचलसामुद्रविट्सौवर्च्चलपुलाख्यानि ।

७१ । गर्भिताः (भिजन) ।

---

१ । वाहनैः कुर्य्यादेकान्तरे भिषग्वरः । खः ॥
२ । पर्वणी । गः

माषभक्षस्य वाहस्य यदि स्यात् शूलसम्भवः ।
शूलाध्यायोपदिष्टान्तु तदा कुर्य्याद्भिषक् क्रियाम् ॥६२॥
अप्राप्तौ पर्णमाषाणां दद्यान्माषेण भोजनम् ।
सतैललवणैर्माषैः शालिभिर्यवषष्टिकैः ॥ ६३ ॥
धान्यकं चित्रकं व्योषं लोध्रं लवणमेव च ।
एतानि सुरया सार्द्धं हेमन्ते प्रतिपाययेत् ॥ ६४ ॥

शिशिरपोषणविधिः ।

शिशिरप्रतिपानं तु त्र्यहं दद्याद्विचक्षणः ।
ततश्चाग्निबलं दृष्ट्वा तुरङ्गं भोजयेद्बुधः ॥ ६५ ॥
उत्खिन्नैः फलमाषैस्तु युक्तैः काञ्जिकमात्रया ।
तिलतैलसमेतैश्च तथा लवणसंयुतैः ॥ ६६ ॥

---

६३ । पर्णमाषाणामिति पत्रसहितमाषकलायानामित्यर्थः । माषेण सह सतैललवणैः शालिभिर्वा यवैः षष्टिकै र्वा भोजनं दद्यात् । अत्र माषेणेति प्रामादिकः पाठः । मांसेनेति युक्तं पाठं प्रतीमः । अत्र माषाणां ३ प्रस्थाः । तिलतैलं कुड़वत्रयं । लवणस्य च कुड़वः ।

६४ । अत्र प्रतिपानं सुराप्रस्थेन धान्यकादीनां मिलित्वा पादोनं पलं समालोड्य पाययेत् । प्रतिपाने तीक्ष्णद्रव्यपादहीनदानविधानात् ॥ व्योषं शुण्ठी पिप्पली मरिचञ्च । उक्तञ्च,—"विड़ङ्गपिप्पलीधान्यशताह्वालोध्रसैन्धवैः । सचित्रकैस्तुरङ्गानां प्रतिपानं हिमागमे" ॥

६६ । उत्खिन्नैर्भर्ज्जितैः । काञ्जिकमात्रया स्वल्पमात्रेण का-

दिनत्रयं न दातव्यं प्रारम्भे तूदकं[1] बुधैः ।
एकान्तरं ततो देयं यावत्पूर्णं दिनाष्टकम् ॥५६ ॥
ततः प्रतिदिनं देयमेकवारं यथेच्छया ।
सकले चैव हेमन्ते विधिरेष जलं प्रति ॥ ५७ ॥
पुष्पिते वारुणी शस्ता लवणेन समन्विता ।
सतैललवणा चापि फलिते संप्रकीर्त्तिता ॥ ५८ ॥
सुराया न प्रयोगस्तु सायाह्ने परिकीर्त्तितः ।
यामिनीप्रहरेऽतीते माषान् दद्यात् सकाञ्जिकान्[2]॥५९॥
तृतीये सप्तकेऽतीते ततोऽश्वान् दापयेद्बुधः ।
एकान्तरं यथा तेषां श्रमः स्वेदश्च जायते ॥ ६० ॥
यावन्नो पाकमायाति तावन्माषा हिताः स्मृताः ।
कठिना नैव दातव्या सर्व्वदैव विजानता ॥ ६१ ॥

---

हिमागमे आदौ सुखवस्तिना स्नेहमवचारयेत् । ततस्तालु-शिरावेधः । ततश्च धान्यकादिभिः प्रतिपानं दत्वा पुष्पितानि माष-तृणानि आहारार्थं दद्यात् । जलदाने तु प्रथमं दिनत्रयं जलदानस्य एकान्ततो निषेधः। ततो दिनाष्टकं एकदिनानन्तरं दत्वा ततः प्रति-दिनमेकवारस्य विधिः ।

---

१ । आरम्भादुदकम् । खः ।
२ । माषं दद्यात् सुकाञ्जिकम् । गः ।

तुल्यांशान् दापयेदेतान्[१] सीधुना मधुसंयुतान् ।
कल्कं कृत्वा तुरङ्गाय स्नाविताय विचक्षणः ॥ ५१ ॥
पञ्चतिक्तकषायेण[२] द्वितीयञ्च प्रदापयेत् ।
पिप्पलीत्रायमाणाभ्यां प्रतिपानं सगोक्षुरम् ॥ ५२ ॥

हेमन्ते अश्वपोषणविधानम् ।

सुखेन[३] वस्तिना चैव स्नेहं दद्याद्धिमागमे ।
विद्धा तालुशिरां प्राज्ञः प्रतिपानञ्च वाजिनाम्[४] ॥ ५३॥
यथर्त्तुं प्रतिपानेन[५] ततो माषान् प्रदापयेत् ।
पुष्पितान् रोगनिर्म्मुक्तान् कृमिभिश्चाप्यभक्षितान्॥५४
पुष्पिता रक्तजननाः फलिता मांसवर्द्धनाः ।
माषा भवन्ति दोषाय विना पुष्पैः फलैस्तथा ॥ ५५ ॥

---

५०-५१ । एषां द्रव्याणां प्रत्येकं पलिकान् भागान् गृहीत्वा कल्कीकृत्य च प्रस्थपरिमितसीधुना देयम् । त्रायमाणा (बलालता) ।

५२ । पञ्चतिक्तमिति वासापटोलभूनिम्बगुडूचीकण्टकारिकाः । त्रायमाणा बलालता ।

५५ । हिमागमे सपुष्पफलमाषयवसं पथ्य आहारः । नकुलेन आहारस्य एवमेव व्यवस्था कृता ।

---

१ । तुल्यांशंदापयेदेनां मांसानां । गः ।
२ । पञ्चतिक्तकषायायां । गः ।
३ । सुखेन । गः ।	४ । वाजिनम् । खः ।
५ । यथार्थप्रतिमानेन । खः ।

अग्रमाल्याग्रगन्धैश्च[1] भोजनाद्यै[2]स्तथैव च।
गृहागतेषु वाहेषु अर्घं दद्यान्नराधिपः॥ ४३॥
अर्चितेषु[3] ततो वैद्यः कर्णे जापमिदं जपेत्।
कीर्त्तितं मुनिभिः पूर्व्वं वाजिशास्त्रार्थवेदिभिः॥४४॥
पूर्व्वं देवमयो त्वं हि स्मर जातिं हयोत्तम।
सर्व्वे जना स्त्वया रक्ष्या रणे भर्त्तुश्च वाहक[4]॥ ४५॥
कर्णजापं भिषक्कृत्वा यथास्थानं ततो हयान्।
स्थापयेत् कृतमङ्गल्यान् हृष्टान् कल्मषवर्जितान्॥४६॥
नार्चये[5]ज्जलजैः पुष्पैर्वाहनार्घविधिं प्रति।
सौगन्धिकविशेषेण तेषां दद्याच्च[6] सर्व्वदा॥ ४७॥
दत्वा तिक्तं घृतं पूर्व्वं कार्त्तिके वेधयेच्छिराम्।
औरसीं पोचिकीं मन्यां कूर्च्चजां कोष्टजां ततः॥ ४८॥
आसां मध्ये यथायोगमेकां द्वे वापि वेधयेत्।
प्रतिपानं ततो दद्याद्दुत्तमं वक्ष्यमाणकम्॥ ४९॥
मञ्जिष्ठा मधुकं पुष्पं प्रियङ्गुस्त्रायमाणकम्।
एलाच पिप्पलीचैव तथा कटुकरोहिणी॥ ५०॥

---

४८। आश्विनोपचारमुक्त्वा कार्त्तिकोपचारमाह दत्वेति।

---

१। अग्रमाला। खः। २। भोजनानि। खः।
३। अर्घितेषु। खः।
४। सर्व्वेभ्यस्तु त्वयारक्ष्यो रणे भर्त्तुः सखा भव। खः।
५। अर्च्चयेत्। ग०। ६। दद्यान्न। खः।

घर्षणं भ्रामणञ्चैव तथाचैवापवर्त्तनम्[1] ।
निशाशेषे प्रकर्त्तव्यं यावद्दूरे दिवाकरः[2] ॥ ३७ ॥
एवं प्रतिदिनं कुर्य्यात् सप्तरात्रमतन्द्रितः ।
कारयेद्ब्राह्मणैश्चैव[3] शान्तिस्वस्त्ययनानि च ॥ ३८ ॥
सप्तरात्रे व्यतिक्रान्ते क्षौरितान्[4] स्नापयेत्तथा ।
अर्च्चितान् कुसुमैर्गन्धै[5]स्ततो नीराजयेद्बुधः ॥ ३९ ॥
ततो वादित्रनिर्घोषैः कर्त्तव्या ग्रामतो वहिः ।
दिशं पूर्व्वां तथोदीचीमश्वा विप्रैरधिष्ठिताः ॥ ४० ॥
अग्रे वदेद्द्विजो मन्त्रं वेदोद्दिष्टं यथाक्रमम् ।
अर्घशान्तिं[6] तुरङ्गानां ततो हृष्टः प्रदापयेत् ॥ ४१ ॥
प्रदक्षिणं ततो वह्नेः[7] कारयित्वा द्विजोत्तमैः ।
पुरमश्वाः[8] प्रवेश्यास्ते तोरणान्तरनिर्गताः ॥ ४२ ॥

---

३८। अश्वानामर्घशान्तौ कालमाह। "अश्वयुक्शुक्लपक्षस्य पञ्चदश्याञ्च शान्तिकं। ० ० ० तिलाक्षताज्यसिद्धार्थान् देवतानां शतं शतं। उपोषितेन कर्त्तव्यं कर्म्म चाश्वरुजापहम्" इति नः।

---

१। उदवर्त्तनम्। खः।
२। ऊदेत्। खः।
३। वैद्यः। खः।
४। चौरिस्नापितां तथा। खः।
५। आवर्त्तितान् कुशैर्गन्धैः। गः।
६। सर्व्वशान्तिं। गः।
७। वह्नौ। गः।
८। पुनरश्वाः। खः।

देयं शरदि चाश्वाय भोजनं क्षीरशालिभिः ।
मांसयूषैरनम्लैर्वा किञ्चित्-सैन्धवसंयुतैः ॥ ३३ ॥
शुक्लपक्षे द्वितीयायां शालां संवेश्य रक्षयेत् ।
आदित्यरश्मितो वाहान् कटैर्वस्त्रादिभिस्तथा ॥ ३४ ॥
अस्तं गते दिनकरे कटादीन्यपकर्षयेत् ।
प्रवातार्थं पुनर्दद्यात् यावत् सन्ध्या न जायते ॥ ३५ ॥
धूपो[१] निम्बदलैः कार्य्यो घृतगुग्गुलुसंयुतैः ।
शालाप्रवेशविहितान् रक्षकांश्चैव दापयेत्[२] ॥ ३६ ॥

---

३३ । अत्र क्षीरशालिपरिमाणं प्रत्येकं सप्त अष्टौ वा पलानि देयानि । "ततः शरदमासाद्य बहुखण्डसमन्वितम् । शस्तं क्षीरोदनं सप्तपलाष्टपरिसंख्यया" । तथा स एव रात्रौ केवलं दुग्धं मधुरञ्च ददाति । "दुग्धं वा केवलं रात्रौ क्वथितं संप्रशस्यते । तथान्यदपि यत्किञ्चिन्मधुरं संप्रजायते" इति नः । मांसयूषस्य पलद्वयं ।

३४ । "आश्विने शुक्लपक्षे या तृतीया स्वातियोगिनी । ऐशान्याञ्च पुनश्चैव गृह्णीयात् स्थानमुत्तमम् । नीराजनं ततः कुर्य्यात सम्प्राप्ते दिवसेऽष्टमे । नीराजनस्य कालास्तु पूर्व्वमुक्तास्तु ते मया" ॥ इति नकुलः । कटैः तृणनड़ादिनिर्म्मितासनैः (चेटा मादुर दड्मा) इति प्रसिद्धैः ।

३६ । निम्बदलघृतगुग्गुलूनां प्रत्येकं कर्षत्रयं ग्राह्यम् । परिभाषायां तावत् परिमाणस्य विधानात् ।

---

१ । धूमः । खः । २ । रक्षांश्चैव प्रदापयेत् । खः ।

ताड़ागं शस्यते तोयं पाने चैवावगाहने।
सन्तप्तस्य तु कर्त्तव्यं क्षीरवस्तिक्रमो बुधैः॥ २७॥
निस्तुषा जलकुम्भस्था यवास्तस्मै हिताः स्मृताः।
औदकाश्च यवाः प्रोक्ता रक्तपित्तप्रशामकाः॥ २८॥
काश्मर्य्याश्च फलं मुस्तं वदरं कटुरोहिणी।
ऊशीरं शर्कराञ्चैव प्रियङ्गुमधुके तथा॥ २९॥
पटोलं त्रायमाणाञ्च एकादश भवेन्मधु।
एकादशाङ्गमित्युक्तं[1] सीधुना संप्रदापयेत्॥ ३०॥
अत्यन्तश्वासतप्तानां प्रतिपानन्तु वाजिनाम्।
चन्दनोशीरकल्कैश्च सान्द्रं वा लेपनं हितम्॥ ३१॥
सुशीतञ्च प्रवातञ्च स्थानं तेषां प्रकीर्त्तितम्।
व्यजनन्तालवृन्तैश्च विस्तीर्णेऽम्भसि मज्जनम्॥ ३२॥

---

तदुक्तं "यवसं सुमनोहरं,—नीलवर्णमकुष्ठञ्च घृतं ग्रासेन संयुतम्"—इति। मकुष्ठो वनमुद्गः।

२७। जलपानव्यवस्था तुल्यैव। पानाय सारसं तोयमिति। अत्र क्षीरवस्तौ आढकमितं दुग्धं देयं परिभाषानियमात्।

२९। एतत्काश्मरीफलादिकं मध्वन्तमेकादशाङ्गं सीधुना संप्रदापयेत्। अस्य परिमाणं प्रत्येकं पलं सुरायाश्च प्रस्थो ग्राह्यः॥

३१। चन्दनं रक्तचन्दनम्।

---

१। पलं। गः।

दुर्द्दिने नोदकं देयं वाहेद्वा दापयेद्बुधः।
दिवसस्याष्टमे भागे भोजनस्य भवेद्विधिः॥ २४॥
तस्य पानं प्रयोगश्च पूर्व्वाह्णे चैव कीर्त्तितम्।
पिप्पलीशृङ्गवेरेण चित्रकेण समाह्वया॥ २५॥
लवणैः सुरया सार्द्धं प्रतिपानं घनागमे।

शरत्पोषणविवरणम्।

शरदाद्याश्विने मासेऽश्वान्नो कारयेच्च श्रमम्।
घासैर्यवैश्च तत्प्राज्ञः कैवलैः पोषयेद्भिषक्॥ २६॥

---

२४। दुर्द्दिने मेघावृतदिवसे कौपोदकमृते अन्यजलदाननिषेधः कर्त्तव्यः। "कूपोदकं सदा शस्तं पानाय जलदागमे"। इति नकुलवचनात्। एवञ्च कटुतैलाभ्यङ्गो निवातस्थानबन्धनं तथा एकदिनान्तरं लेहनार्थे पलद्वयपरिमितलवणदानञ्च कर्त्तव्यम्। इति नकुलोपदेशः। तदुक्तं,—"अभ्यङ्गः कटुतैलेन निवातस्थानबन्धनं। एकाह्वान्तरितं दद्याल्लवणञ्च विचक्षणः॥ पलद्वयप्रमाणेन सुखजापरिवृद्धये" इति॥

२५। अयं श्लोकः ख-पुस्तके नास्ति। समाह्वा गोजिह्वावृक्षः।

२६। शरदाद्याश्विने इति शरदश्चादिराश्विनो मासस्तस्मिन्। शरदादौ वाहननिषेधो नकुलेनापि कृतः,—"वाहनञ्च प्रयत्नेन सुस्वल्पमपि वर्जयेत्"—इति। अस्मिन् काले भोजनार्थं यवघासयोर्व्यवस्था। नकुलस्तु नीलमकुष्ठघासव्यवस्थां कृतवान् न यवस्य।

कल्पोक्तेन विधानेन यथामात्रं यथाबलम्।
रसोनं गुग्गुलुञ्चापि प्रदद्याद्वाजिनां ततः॥ २१॥
प्रथमे प्रहरे चैव वर्षाकाले न चारयेत्।
द्वितीये च तृतीये च चारयेन्नतु पश्चिमे॥ २२॥
प्रभाते निस्तुषा देया यवा मध्यदिने तथा।
सन्ध्याकाले भिषक् प्राज्ञः पुनश्चैवावचारयेत्॥ २३॥

---

२१। कल्पोक्तेन विधानेनेति रसोनादिकल्पोक्तव्यवस्थया। सा चेयम्। प्रथमे दिने रसोनरसं मातुलुङ्गरसञ्च समभागं मिलित्वा पलद्वयं। तत एकैकवृद्ध्या विंशतिपलपर्यन्तमुत्तमाश्वाय दद्यात्। मध्यमाय चतुर्दश अधमाय च पलाष्टकमिति। यथाबलमिति उत्तममध्यमाधमबलत्वं विविच्येत्यर्थः। एवं गुग्गुलोरपि पलपञ्चकं पलचतुष्टयं पलत्रयञ्च यथासङ्ख्यमुत्तममध्यमाधमेभ्य एकदिने पानाय भोजनाय वा देयम्॥ तथा वर्षासु पानार्थं नवोदकं वृष्ट्यम्बुसेकश्च विशेषेण निषिद्धः। तत्र दोषमाह,—"वृष्ट्यम्भोभिस्तु सिक्ताङ्गस्तेजसा त्यज्यते हयः। अशुद्धोदकजान् रोगान् प्राप्नोति शतशः परान्॥ नवोदकप्रधानेन बलहीनश्च जायते" इति नकुलः॥

२२। वर्षायामश्ववाहननिषेधोऽपि नकुलेन कृतः। "न प्रायो वाहयेदश्वं प्रावृट्काले कथञ्चन। य इच्छेद्वाजिनस्तस्य वाहनं दशमासिकम्"—इति॥

स्वस्थं बुद्ध्वा ततो वाहं दद्याद् गोमूत्रसंयुतम्।
हरीतकीपलं....कटुतैलेन मूर्च्छितम्॥ १७ ॥
आदौ पञ्च प्रदातव्या हरीतक्यो विजानता।
पञ्च पञ्च च वृद्धायां यावत् पूर्णं शतं भवेत्॥ १८ ॥
उत्तमाश्वे शतं प्रोक्तमशीतिर्मध्यमे तथा।
अधमे विहिता षष्टिरश्वज्ञानपरायणैः॥ १९ ॥
मासे भाद्रपदे विद्वान् समानीय हरीतकीम्।
दशाहं केवलं तस्मै घासं दद्यात् समाहितः॥ २० ॥

---

गृहीत्वा प्रस्थार्द्धेन तैलेन सह देयम्। योगोऽयं रुधिरोद्गमसंशमनः। नकुलस्तु,—अनेन योगेन सह गोमूत्रं ददाति। दशाह द्वादशाहस्थले एकविंशतिदिवसानाह। तदुक्तम्,—"दद्याद्गोमूत्रसंयुक्तां सतैलाञ्च हरितकीम्। दिनं त्रिसप्तकं यावत् पलपञ्चप्रमाणतः॥ ततः शुद्धिमवाप्नोति निःशेषाद्रुधिरोद्गमात्"—इति। ततःपरं एष निम्बयोगो देयः। शुण्ठीदीप्यकसैन्धवैः शृङ्गवेरजीरकनिम्बत्वचः समभागेन कल्कीकृत्य सप्ताहं देयाः॥

१७। स्वस्थवृत्ते हरितकीविधानमाह स्वस्थमिति। स्वस्थे अश्वे कटुतैलेन सार्षपतैलेन मूर्च्छितं पक्वमित्यर्थः। पञ्च हरितकी गोमूत्रेण पिष्ट्वा दद्यात्॥

२०। ततो द्वादशाहं केवलं घासं दद्यात्। "ततोनवतृणाहारं संप्राप्य सुमनोहरं। परां पुष्टिमवाप्नोति नीरोगश्च प्रजायते"—इति नकुलः॥

लौहञ्च निम्बपत्राणि गुग्गुलुं सर्षपान् घृतम् ।
चैलबद्धं वचां हिङ्गुं बध्नीयाद्वाजिलाङ्गुले ॥ १० ॥
समीपे वानरः कार्य्यः वाजिनां नित्यतो वहिः ।
सवत्सो वृषभश्चैव शुक्लो यश्चापि कुक्कुरः ॥ ११ ॥
शालापार्श्वे कुटीं कृत्वा स्थापयेत् सर्व्वभेषजम्[१] ।
घृततैलानि पक्वानि पुटकां नालिकां तथा ॥ १२ ॥
आलोकं कारयेत्प्राज्ञः प्रदीपैः सर्व्वरात्रिकैः ।
जाग्रतः पुरुषास्तत्र तिष्ठेयुः शस्त्रपाणयः ॥ १३ ॥
वालुकापूरितं कार्य्यं संस्कृतं चत्वरं तथा ।
लुठनाय च वाहानां भवेच्च क्रमणाय च ॥ १४ ॥

वर्षापोषणविवरणम् ।

शालाप्रविष्टमात्रस्य नैव कार्य्यः क्रियाक्रमः ।
दशाहं द्वादशाहं वा पथ्या तैलेन संयुता ॥ १५ ॥
ततो निम्बः प्रदातव्यो वर्षादौ पलपञ्चकः ।
सप्ताहमुत्तमाश्वाय शुण्ठीदीप्यकसैन्धवैः ॥ १६ ॥

---

यवसाः सप्रदीपाः सुरक्षिताः ॥ कृकवाकजकपयो धार्य्याश्चाश्वगृहे मृगाः"—इति ॥

१५ । शालाप्रविष्टेत्यारभ्य पोषयेद्भिषक् इत्यन्ता सार्द्धद्वादशश्लोकाः ग-पुस्तके न सन्ति ॥

१६ । वर्षादौ वर्षाप्रारम्भे उत्तमायाश्वाय दशाहं द्वादशाहं वा तैलेन कटुतैलेन संयुता पथ्या देयेति शेषः । पथ्यायास्तु पलपञ्चकं

शुष्का[१] शाला च कर्त्तव्या इष्टकाष्ठेन संस्थिता।
शिरसि स्थापयेद्देवं रैवन्तं पूजयेत् सदा ॥५॥
कार्य्या[२] चिहस्तविस्तीर्णा लाक्षायाः[३] पिण्डिका शुभा।
शालाप्रमाणदीर्घा च तस्यां[४] वासं प्रदापयेत् ॥६॥
द्वौ हस्तावुच्छ्रयेणास्या मानञ्चैव[५] प्रकीर्त्तितम्।
तर्ज्जकं काष्ठदण्डांश्च प्रान्तेऽस्याः स्थापयेद्बहिः ॥७॥
अग्निकार्य्यं ततः कृत्वा द्विजान् संभोज्य चादरात्।
कृत्वा पुण्याहवादित्रं ततो वाहान् निवेशयेत्[६] ॥८॥
सम्मुखान् स्थापयेत्तांस्तु[७] पुष्पगन्धादिपूजितान्।
रज्जुद्वयनिबद्धांश्च पश्चात्पाशेन संयुतान् ॥९॥

---

५। इष्टकाष्ठेन संस्थिता इष्टकेन काष्ठेन वा कुट्टमितेत्यर्थः: लाक्षायाः पिण्डिकेति जतुमयी पीठिकेत्यर्थः। वैरन्तपूजाविधिः पूर्व्वमुक्तः ॥

७। तर्ज्जकुः। अत्र तर्ज्जकुस्थाने तर्द्दक इति पाठोयुक्तः।

९। शालायामश्वबन्धनं कथं कार्यमित्यत्राग्निपुराणं,—"द्वौ रज्जुबन्धौ दुष्टानां पक्षयोरुभयोरपि। पश्चाद्बन्धश्च कर्त्तव्यो दूरकीलव्यपाश्रयः ॥ वासयेयुस्तथास्तृते स्थाने कृतधूपनभूमयः। यत्नोपन्यस्त-

---

१। सुशुष्का। खः।
२। कुर्य्यात्। ग०।
३। लाक्षायाः। ख०।
४। तदावासं। गः।
५। मानञ्चैवं। ख०।
६। प्रशान्तयेत्। खः।
७। सम्मुखं स्थापयेत्तावत्। गः।

## अथ त्रयोदशोऽध्यायः ।

ऋतुविभागविवरणम् ।

स्वस्थवृत्तं प्रवक्ष्यामि तुरगाणां समासतः ।
शालिहोत्रादिभिः प्रोक्तं यथा सम्यक् प्रकीर्त्तितम् ॥१॥
श्रावणश्च तथा भाद्रो द्वौ मासौ ऋतुवर्षकौ ।
आश्विनः कार्त्तिकश्चैव शरत्कालः प्रकीर्त्तितः ॥ २ ॥
मार्गपौषौ तु हेमन्तः शिशिरो माघफाल्गुनौ ।
वसन्तश्चैत्रवैशाखौ ग्रीष्मो ज्यैष्ठः शुचिस्तथा ॥ ३ ॥

शालानिर्म्माणविवरणम् ।

प्रागुदक्प्रणते देशे स्थाणुकण्टकवर्जिते ।
चिताचैत्यविहीने च शालां कुर्व्वीत पण्डितः[१] ॥ ४ ॥

---

१ । स्वस्थवृत्तमिति अरोगिणि यद् वृत्तम् ॥

२ । सुश्रुतमते तु नैवं ऋतुविभागः,—तद्यथा,—"भाद्रपदाश्वयुजौ वर्षा । कार्त्तिकमार्गशीर्षौ शरत् । पौषमाघौ हेमन्तः । फाल्गुनचैत्रौ वसन्तः । वैशाखज्यैष्ठौ ग्रीष्मः । आषाढ़श्रावणौ प्रावृट्" इति ॥

४ । प्रागुदक्प्रणते पूर्व्वोत्तरप्रवणे । स्थाणुः शङ्कुः । स्थाणु र्वा ना शङ्कुरित्यमरः । चैत्यमायतनं । चैत्यमायतनमित्यमरः । शाला वाजिशाला ॥

---

१ । कुर्व्वन्ति पण्डिताः । ग० ।

अनुवासनसंज्ञौ तु निरूहास्थापने स्मृतौ ।
वस्तिसंज्ञा समुद्दिष्टा एषामेव तपोधनैः ॥ ७५ ॥
घ्राणमार्गेण यच्चूर्णं प्रेर्य्यते मुखवायुना ।
प्रधमनं तद्विख्यातं धावनं क्षालनं स्मृतम् ॥ ७६ ॥
काष्ठाहारिकगोपालमालाकारवनेचरान् ।
दृष्ट्वा नामानि जानीयात् भेषजानां विचक्षणः ॥७७॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे निघण्टौ द्वादशोऽध्यायः ॥ १२ ॥

---

७५ । अनुवासनसंज्ञावित्यत्र अनुवासनसंज्ञे स्मृते इति पाठः साधीयान् ॥

७७ । दृष्ट्वास्थाने पृष्ट्वेति साधुः ॥

काश्मरी सर्व्वतोभद्रा श्रीपर्णी भद्रपर्णिका[1]।
श्रेलुः श्लेष्मान्तकः शीत उद्दालो बहुवारकः॥ ६८॥
विल्वकाश्मर्य्यश्योणाकपाटलागणिकारिकाः[2]।
पञ्चमूलं स्मृतं श्रेष्ठं शास्त्रमार्गानुसारिभिः॥ ६९॥
गोक्षुरो वृहती चैव शालपर्णी निदिग्धिका।
पञ्चमूलं भवेत् सूक्ष्मं पृश्निपर्णी समायुतम्॥ ७०॥
पञ्चमूलोभयञ्चैव दशमूलमिति स्मृतम्।
सन्निपातभवे रोगे हितमेतत् प्रकीर्त्तितम्॥ ७१॥
मरिचस्य च[3] शुण्ठ्याश्च पिप्पलीनां तथैव च।
एतत्त्रिकटुकं प्रोक्तं व्योषाख्यं व्यूषणं तथा॥ ७२॥
त्वगेलापत्रसंयोगे त्रिसुगन्धि त्रिजातकम्।
नागकेसरसंयुक्तं चातुर्जातकमुच्यते॥ ७३॥
लवणैः कटुचूर्णैश्च घृष्यते यद्व्रणं बुधैः।
प्रतिसारं[4] ततः प्रोक्तं वाजिशास्त्रविशारदैः॥ ७४॥

---

६८। काश्मर्य्यादि चतुष्कं (गामार)। एतत्पर्य्यायः,—"भद्रा गाम्भारी गोपभद्रिका कुमुदा कट्फला कृष्णवृन्तिका च"—इति॥ श्लेष्वादि पञ्चकम्। (चालता)॥

---

१। भद्रकर्णिका। ख०।　　३। मरिचं नागरञ्चैव। ग०।
२। गण्डकारिका। ग०।　　४। प्रतिसारणं तत्प्रोक्तं। ख०।

अपामार्गः शैखरिकः प्रत्यक्पुष्पी मयूरकः ।
पुनर्णवा तु वर्षाभूः शोतघ्नो प्रावृषायणी ॥ ६३ ॥
वृश्चिका श्वेतनामा स्याद् रक्तनामा कठिल्लिका ।
इन्द्राणी इन्द्रसुरसा[१] निर्गुण्डी सिन्धुवारिका ॥६४॥
शुकशिम्बात्मगुप्ता च कपिकच्छुर्महर्षभी ।
इक्ष्वाकुः कटुतुम्बी स्यात्तिक्तालावूर्न्टपात्मजा ॥ ६५ ॥
वैकङ्कतो मधुपर्णी स्निग्धा तु स्वादुकण्टकः ।
वञ्जुलो निचुलः शीतो जलकासश्च वेतसः ॥ ६६ ॥
वारिजो निजुलश्चैव हिज्जलः परिकीर्त्तितः ।
चिञ्चा[२] तिन्तिलिका प्रोक्ता फेनिलश्चाप्यरिष्टकः ॥६७॥

---

६३ । अपामार्गादि चतुष्कं । (आपाङ्) । पुनर्णवादि पञ्चकं । कठिल्लिका रक्तपुनर्णवा । अत्र कठिल्लक इति पाठोयुक्तः ॥

६४ । इन्द्राण्यादि चतुष्कं निर्गुण्ड्यां वर्त्तते (निशिन्दा) । इन्द्र-सुरिसोऽपि पाठः ।

६५ । शुकशिम्बादि त्रयम् । (आलाकुशी) । इक्ष्वाकादि चतुष्कं । (तित्लाउ) ।

६६ । वैकङ्कतादि चतुष्कं । (वंइची) । वञ्जुलादि पञ्चकम् (वेत्) ॥

६७ । वारिजादि त्रयं (हिजल्) ॥ चिञ्चादि द्वयं (तेँतुल) । फेनिलादि द्वयम् । (रीटा)॥

---

१ । इन्द्राणी इन्द्ररसा । गः । २ । विम्बा । ख० ।

मनःशिला तु वैगन्धि हरिता नटमण्डनम्[1] ।
सौवर्च्चलन्तु रुचकं गन्धाश्मा तु[2] वलीयसी ॥ ६० ॥
हरेणुर्ब्राह्मणी कौन्ती रोहिषं[3] रक्तचित्रकम् ।
शरणं क्रियते[4] कर्म्म चण्डलैर्येन सर्व्वदा ॥ ६१ ॥
तं प्राहुर्मुनयो गव्यं मधूच्छिष्टन्तु सिक्थकम् ।
अजस्तुमा रुद्रवंती[5] कलायस्तु हरेणुका ॥ ६२ ॥

---

६० । मनःशिला द्विका(मन्छाल) । मनःशिलायाः पर्य्यायो यथा,— "मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका । नैपाली कुनटी गोला मनोगुप्तोत्तमाशिला"—इत्यमरः । हरितालपर्य्यायशब्दाश्च यथा,— "पिञ्जरं पित्तलं तालमालं च हरितालकम् । कृत्राङ्गं काञ्चनरसं गोदन्तं नटमण्डनम्"—इति मुक्तावली ॥ सौवर्च्चलं द्विकं । (सौवर्चल-लवण) । कृष्णलवणं माचञ्चास्य पर्य्यायः ॥ गन्धोऽश्मा गन्धकम् । अस्य पर्य्यायः,—"गौरीवीजं वलिर्गन्धः पाषाणो गन्धकः स्मृतः"—इति मुक्तावली ॥

६१ । हरेण्वादि त्रयं (रेणुक) । भस्मगन्धिनी कपिला च तत्पर्य्यायः । रोहिषादि द्विकं । (रांचित्रे) ।

६२ । अतस्तुमा रुद्रवती इति पाठोयुक्तः ॥

---

१ । हरितालमलं नटम् । खः ।
२ । गङ्गामाखचवीयसा । खः ।
३ । रोहितं । गः ।
४ । सरणोक्रियते चर्म्म । गः ।
५ । मारुद्रघ्नी । खः ।

प्रसन्ना मदिरा कल्या गौड़ी शुण्डी सुधा सुरा।
अवन्ती सैव धान्याम्लः काञ्जिकश्चारणालकः ॥५७॥
उदश्विन्मथितं चैव तक्रं घोलं प्रकीर्त्तितम्।
दधिमण्डं स्मृतं मस्तु मनाग् जातन्तु मण्डकम् ॥ ५८ ॥
प्रपौण्डरीकं श्रीपुष्पं सैन्धवं लवणोत्तमम्।
कापोतः सर्ज्जिकाक्षारो यवक्षारो यवाग्रजः ॥ ५९ ॥

---

५७। प्रसन्नाद्यष्टकं सुरावाचकम्। धान्याम्लादि त्रिकं काञ्जिकबोधकम्।

५८। उदश्वित् अर्द्धजलयुक्ते घोले वर्त्तते। तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्द्धाम्बु निर्जलमित्युक्तः। तदुक्तं "किलाटं दधि दुग्धञ्च तक्रं पादजलान्वितम्। तक्रं गोरसजं घोलं कालसेयं विलोड़ितम्"—इति मुक्तावल्याम्॥ दधिमण्डं मस्तु (मात्)। मण्डं दधिभवं मस्त्विति कोषः। मण्डं (माड़्)॥

५९। प्रपौण्डरीकं श्रीपुष्पञ्च (पुण्डरीयाकाष्ठ)। श्रीपुष्पं पुण्डरीयाविशेषः। अस्य पर्य्याये मुक्तावली,—"प्रपौण्डरीकं पुण्ड्र्यं भूतघ्नी श्रवणारुणा"। अन्या,—"प्रपौण्डरीकं चक्षुष्यं शीतं श्रीपुष्पमुण्डरि" इति॥ कपोतद्वयं सर्जिक्षारे (साचिक्षार)। "कापोतं सर्जिका सर्जिः शूलघ्नी सुखवर्चसः"—इति मुक्तावली॥ यवक्षारो यवसम्भूतः क्षारः। "पाक्यक्षारो यावशूको यवक्षारो यवाग्रजः"—इति मुक्तावली।

गुटिको मिषरो मत्स्यो मत्स्यण्डी परिकीर्त्तितः[१]।
फाणितस्तद्‌द्रवश्चापि विहितो मुनिपुङ्गवैः॥५३॥
हरीतक्यभया पथ्या अमोघा चाव्यथा शिवा।
धात्री चामलकी प्रोक्ता विभीतोऽक्षः कलिद्रुमः॥५४॥
जन्तुकं रामठं हिङ्गु वेलनं परिपोषणम्[२]।
जरणो जीरकोऽजाजी कारवी कृष्णजीरकः॥५५॥
भद्रं श्रीचन्दनं श्वेतं कर्पूरं चन्द्रनामकम्।
किराततिक्तं भूनिम्बं क्षौद्रं पुष्परसो मधु॥५६॥

---

५३। गुटिकादि चतुष्कं मत्स्यण्डीपर्य्यायवाचकम्।

५४। हरीतक्यादि षट्कं हरीतकीवाचकम्। वयःस्था पूतना अमृता चेतकी श्रेयसी चेति तत्पर्य्यायः। धात्र्यादि द्विकं आमलकवाचकम्। तीर्था कर्षफलाच तत्पर्य्यायः। तथा विभीतकादि त्रिकम्। संवर्त्तः कल्पवृक्षश्च तत्पर्य्यायः।

५५। जन्तुकादि पञ्चकं हिङ्गुपर्य्यायबोधकम्। जरणादि त्रयं जीरके वर्त्तते।

५६। भद्रं श्रीचन्दनञ्च श्वेतचन्दनबोधकम्। चन्द्रनामकमिति चन्द्रपर्य्यायवाचकशब्दमात्रं कर्पूरवाचकम्। किराततिक्तादि द्विकं (चिरेता)। क्षौद्रादि त्रयं मधुवाचकम्।

---

१। चापि मत्स्यण्डी खण्डस्य परिकीर्त्तितः। गः।

२। परिचोषणम्। खः।

चित्रा गवाक्षी गोडुम्बी[१] सुषवी कारवेल्लिका[२] ।
मार्कवो भृङ्गराजः स्यात् सुनिषण्णं वितुन्नकम् ॥४९॥
काला गृध्रनखी हिंस्रा सर्पगन्धा तु नाकुली ।
कड्कम्बरा[३] प्रसारणी गोजिह्वा दर्व्विपत्रिका[४] ॥ ५०॥
महौषधं शृङ्गवेरं नागरं विश्वभेषजम् ।
मागधी चोपकुल्या च वैदेही पिप्पली कणा ॥५१॥
शितोपला शिता चापि शर्करा परिकीर्त्तिता ।
विशेषौ द्वौ तु खण्डस्य मत्स्यण्डी फाणितौ समौ ॥५२॥

---

४९ । चित्रादि त्रिकं । (गोमुक्) । "चित्रा गवाची गोदुग्धा गोडुम्बा नृपवल्लभा" । इति मुक्तावली । सुषवी द्विका । (करेलाउच्छे) । तोयवल्ली कटिल्लश्च । मार्कवो द्विकः (भीमराज) । सुनिषण्णं द्विकं (शुषणिशाक्) ।

५० । कालादि त्रयं कण्टकपालीति प्रसिद्धम् । कड्कम्बरा चतुष्का । (गन्धभादुले) । सरणा राजवला भद्रवलेति च तत्पर्य्यायः ।

५१ । महौषधादि चतुष्कं शुण्ठीवाचकम् । (शुँट्) । मागध्यादि चतुष्कं पिप्पलीवाचकम् । (पिपुल) ।

५२ । शितोपलादि त्रिकं शर्करावाचकम् । खण्डस्य द्वौ विशेषौ मत्स्यण्डीफाणितौ च । मत्स्यण्डी (मिछुरि) । फाणितः (फेणी) ।

---

१ । गोदग्धा । खः ।
२ । कारविल्वकः । गः ।
३ । कटंवरी ।
४ । दीर्घपत्रिका ।

कुठेरकोऽर्जकश्चैव[१] पर्णासः परिकीर्त्तितः ।
ब्रह्मपुष्पः[२] फणिज्झस्तु, तर्कारी वैजयन्तिका ॥ ४६ ॥
त्रायमाणा सहृचारणी[३] कोलवल्ली च पिप्पली ।
नीलिनी चैव नीली स्यात् सोमराजी च वाकुची ॥४७॥
रोहीतकः स्नीहशत्रुः, वातपोषस्तु किंशुकः ।
सर्पदंष्ट्रा वृश्चिकाली आस्फोता वनमालिका[४] ॥ ४८ ॥

४६ । कुठेरकादि त्रिकं श्वेततुलसीपर्य्यायवाचकम् । तथा कटिञ्जरः श्वेतपत्रश्च । फणिज्झको गन्धतुलसी । तर्कारी वैजयन्तिकेति द्वयं जयन्तीवाचकम् ।

४७ । त्रायमाणादिर्द्विको बलालतापर्य्यायः । कोलवल्ली गजपिप्पली । "श्रेयसी कोलवल्ली च गजाह्वा हस्तिपिप्पली" । इति मुक्तावली । नीलिनी नीलीचेति (नील) । तत्पर्य्यायः कला क्लीतकिका ग्रामीणा मधुपर्णिका रञ्जनी श्रीफली तुत्था द्रोणी दोला चेति ।

४८ । रोहीतकः स्नीहशत्रुरिति (रोढ़ा) वाचकः । एतत्पर्य्यायो वरतिक्तो रोहितश्च । वातपोषः किंशुकश्च पलाशे वर्त्तते । एतत्पर्य्यायो वानप्रस्थः । वातपोषस्थाने वातपोत इति मुक्तावली । सर्पदंष्ट्रा वृश्चिकाली (बिछाटी) । एतत्पर्य्यायः; महाकाली क्रोष्टुः धूम्रपत्रिका वृश्चिपत्री नागदन्तिका चेति । बिछत्रास्थाने वित्तन्नं पठ्यते क्वचित् । आस्फोता द्विका । (हापरमाली) ।

१ । कटहश्चैव । गः ॥　　३ । सुहृद्रोणी । गः ॥
२ । ब्रह्मपुष्पप्रपराजितः । खः ॥　　४ । वनमल्लिका । खः ।

सैरीयकः सहचरी वाणा दासी कुरण्टका ।
कुस्तुम्बुरुश्च धन्याको गोलोमी भूतकेशिका[1] ॥ ४३ ॥
श्रेयसी चैव चण्डा च रास्ना च परिकीर्त्तिता ।
अर्ज्जुनः ककुभः पार्थः क्षीरवृक्षो धनञ्जयः ॥ ४४ ॥
— — — — प्रियको जीवको मतः ।
ज्योतिष्मती हैमवती तेजोवत्यप्युदाहृता ॥ ४५ ॥

---

४३ । सैरीयको (झाँटी) । सहचरी कुरण्टकश्च (पीतझिण्टी) । वाणा दासी च 'नीलझिण्टी' । कुरुवको रक्तझिण्टी । कुस्तुम्बुरु धन्याकम् । वेषणा उग्रा वितानश्च तत्पर्य्यायः । गोलोमी क्षुद्रक्षुपविशेषः (गोधुमा, पाथुरी) इति भाषा । श्वेतदूर्व्वायाञ्च । गोलोमी भूतकेशश्च पठ्यते ।

४४ । श्रेयसी चिका (रास्ना) । श्रेयसी गजपिप्पली पाठा च । चण्डा, कपिकच्छुः शंखपुष्पी च । अर्ज्जुनादिः पञ्चकोऽर्जुनवृक्षपर्य्यायः ।

४५ । ज्योतिष्मत्यादि त्रयं वचापर्य्यायवाचकम् । "तीक्ष्णोग्रगन्धा जटिला मङ्गल्या विजया वचा । षड्ग्रन्थोग्राच रक्षोघ्नी सिता हैमवती च सा । मेध्या षड्ग्रन्थिका श्वेता वचा स्याद्दीर्घपत्रिका" । इति श्वेतवचा ॥ "कुलिञ्जो गन्धमूलश्च तीक्ष्णगन्धश्च वर्वरः" । इति भैरवी वचा ।

---

१ । सितकेशिका । खः ।

वक्रं नतञ्च तगरं जिम्भं कालानुशारिवा।
अभीरुर्बहुपुत्री च तथा मूला शतावरी ॥ ३९ ॥
दूर्व्वा सहस्रवीर्य्या स्याच्छतवीर्य्या तु सा मता।
छत्रा मधुरिका प्रोक्ता मिषिर्माङ्गलिका च सा ॥४०॥
भरद्वाजी च कार्पासी शृङ्गी कर्कटशृङ्गिका।
कुटन्नटञ्च धन्यञ्च प्लवञ्च परिपेलवम् ॥ ४१ ॥
गोकण्टको गोक्षुरकः खरदंष्ट्रा त्रिकण्टकः।
विम्बी रक्तफला प्रोक्ता तथा रक्तोष्ठका मता ॥ ४२ ॥

---

३९। वक्रादि पञ्चकं (शीउलिछोप्) तगरपादिक इत्यपि प्रसिद्धम्। अभीरुरित्यादिः शतमूलीपर्य्यायः—इन्दीवरी वरी ऋष्यप्रोक्ता भीरुपत्री नारायणी चेत्यपि तत्पर्य्यायः।

४०। दूर्व्वादि त्रिकं (दूर्व्वा)। शतपर्व्वा भार्गवी अनन्ताचापि दूर्व्वापर्य्याये वर्त्तते। छत्रादि चतुष्टयं मधुरिकापर्य्यायः (मौरी)। शालेयः मिश्रेयः शीतशिवोऽपि ॥

४१। भरद्वाजी द्वयी कार्पासे वर्त्तते। तुण्डिकेरी, समुद्रान्ता वदरेति च तत्पर्य्यायः। भरद्वाजी वनकार्पासी। शृङ्ग्यादि द्वयं कर्कटशृङ्ग्यां वर्त्तते। (काँकड़ाशृङ्गी)। कुटन्नटादि चतुष्टयं कैवर्त्त-मुस्तायां वर्त्तते। दाशपुरं वालेयं गोपुरं गोनर्द्दश्चापि तत्पर्य्यायः॥

४२। गोकण्टकादि चतुष्टयं गोक्षुरपर्य्यायवाचकम्। एत दतिरिक्तोऽपि पर्य्यायशब्दः पलंकषा इक्षुगन्धा स्वादुकण्टकः वन-शृङ्गाटश्चेति ॥

शालपर्ण्यंशुमती स्यात्तथा चापि स्थिरा ध्रुवा ।
पृश्निपर्णी पृथक्पर्णी कलशी धावनी गुहा ॥ ३४ ॥
वार्त्ताकी वृहती सिंही भाण्टाकी दुष्प्रधर्षणी ।
निदिग्धिका स्पृशा[१] व्याघ्री क्षुद्रिका कण्टकारिका ॥३५॥
राटं पिण्डीतकं गोलं श्वसनं मदनं फलम् ।
लामज्जको मृणालश्च सेव्यश्चोशीर उच्यते ॥ ३६ ॥
पलङ्कषा च चित्रांशुर्गुग्गुलुः कौशिकः पुरः ।
श्योणाको दीर्घवृन्तश्च कट्वङ्गश्चैव टुण्टुकः ॥ ३७ ॥
काकोदुम्बरिका फल्गुर्मलपूर्जघनेफला ।
हरिवालं सुगन्धञ्च ऐलेयं चैलवालुकम् ॥ ३८ ॥

---

३४ । शालपर्णी चतुष्का (शालपाणि) । विदारीगन्धापि शालपर्णी वर्त्तते । पृश्निपर्णी पञ्चका (चाकुले) ॥

३५ । वार्त्ताकी पञ्चका (वृहती) । निदिग्धिकादिपञ्चकः कण्टकारीपर्य्यायः ॥

३६ । राटादिर्मदनपर्य्यायः । मरुवकः करहाटः शल्यश्च मदनपर्य्यायः । लामज्जकश्चतुष्कः ( गन्धवेणा ) । अभयं नलदं जलाशयं लघुलयं अवदाहं इष्टकापथञ्चापि तत्पर्य्यायः ।

३७ । पलङ्कषा पञ्चका (गुग्गुल्) । श्योणाकश्चतुष्कः (शोणा) ॥

३८ । काकोदुम्बरिका चतुष्का (फेगुड़ा) इति पार्व्वतीयभाषा । हरिवालादिरेलवालुकपर्य्यायः ॥

---

१ । वृषो । गः ।

अपराजिता समुद्दिष्टा वेणुवंशश्च कीर्त्तितः ।
शंखिणी तिक्तला प्रोक्ता, सप्तला चर्म्मकारिका ॥ ३१ ॥
ऋषभः स्याद्वृषभको जीवकः कूर्चशीर्षकः ।
शीतपाकीच[1] काकोली माषपर्णी महासहा ॥ ३२ ॥
मुद्गपर्णी क्षुद्रसहा, पयस्यादित्यपुष्पिका ।
क्षीरिका राजवृक्षश्च[2] तथा वै पार्थिवादनी ॥ ३३ ॥

---

रोदनी कच्छुरा अनन्ता समुद्रान्ताचेत्यपि तत्पर्य्यायः । श्वेतभण्डादिपत्रकं (श्वेतापराजिता) । आस्फोता विष्णुक्रान्तापि तत्पर्य्यायः ॥

३१ । शंखिनी तिक्तला चोरपुष्पी । सप्तला चर्म्मकशाच नवमालिकायां (चामरकषा) । एतत्पर्य्यायः, विमला सातला भूरिफेना चेत्यपि ज्ञेयः ॥

३२ । ऋषभः स्वनामख्यातः । शृङ्गो वृषभो वृषश्च एतत्पर्य्यायः। जीवकः स्वनामख्यातः। एतत्पर्य्यायश्च मधुरकः शृङ्गो ह्रस्वाङ्गश्च । माषपर्णी (माषाणी) । एतत्पर्य्यायः—हयपुच्छी काम्बोजी चेति ॥

३३ । मुद्गपर्णी मुगानीति प्रसिद्धा । काकमुद्गा सहा चेत्यपि एतत्पर्य्यायः । पयस्या पञ्चका । पयस्यादित्यपुष्पिका चेति लोहितार्केऽपि वर्त्तते । (लालआकन्द) ।

---

१ । शीतापादी च । गः ।

२ । राजच्छवकः । ख० ।

मसूरविदला वापि चिवृत्प्रोक्ता चिकण्टका ।
यष्टिका चिदला रूपं क्लीतकं मधुयष्टिका ॥ २७ ॥
यष्ट्याह्वं[१] मधुकञ्चैव कीर्त्तितं शास्त्रशालिभिः ।
हैमवत्युग्रगन्धा च षड्ग्रन्था च वचा स्मृता ॥ २८ ॥
शकुलादन्यरिष्टा च कटुका कटुरोहिणी ।
फलिनी च प्रियङ्गुः स्यात् द्विषक्सेना च कीर्त्तिता ॥२९॥
यवासो धन्वयासश्च दुस्पर्शा च दुरालभा ।
श्वेतभण्डा च खुरिका शारदी गिरिकर्णिका ॥ ३० ॥

---

चिवा दन्तीवाचिकाऽपि । सर्व्वानुभूत्यादिस्त्रिवृत्पर्य्यायः । (श्वेत-तेउड़ी) । अस्याः पर्य्यायः चिपुटा विभण्डी रोचनी चेति । काल-मेषिका अरुणमूलाचिवृत् । अस्याः पर्य्यायः श्यामा पालिन्धी सुषेणिका काला अर्द्धचन्द्रा चेति ।

२७–२८ । यष्टिकाष्टकं (यष्टिमधु) ॥

२८ । हैमवत्यादिचतुष्को वचापर्य्यायः। (वच) । हैमवती शुक्ला वचा । गोलोमी शतपर्व्विका चेत्यपि वचापर्य्यायः ॥

२९ । शकुलादन्यादिः कटुकीपर्य्यायः । शकुलादनी कटुकी । मत्स्यपित्ता चक्राङ्गी कृष्णकटुकीपर्य्यायः। कटुः कटम्बरा अशोक-रोहिणी च कटुकीपर्य्यायः । फलिनीत्रयं (प्रियङ्गु) । महिला लता गोवन्दनी गुन्द्रा फली गन्धफली कारम्भा प्रियकञ्च प्रियङ्गुपर्य्यायः॥

३० । यवासादिचतुष्को दुरालभापर्य्यायः। यासः कुनाशः

---

१ । यष्ट्याङ्गं मधुरं । गः ।

पूतीकरञ्जः पूतीकः प्रकीर्य्यः कलिमारकः ।
कपित्थस्तु दधित्थः स्यान्मालूरो विल्व उच्यते ॥ २३ ॥
झाटलो मुष्ककः प्रोक्तस्तथा वै घण्टकः स्मृतः ।
वृक्षको वत्सकश्चैव कुटजो गिरिमल्लिका ॥ २४ ॥
वीजको वीजपूरश्च[1] मातुलुङ्गश्च पूरकः ।
कदली कीर्त्तिता रम्भा हरिद्रा राचिनामिका ॥ २५ ॥
द्रवन्ती चैव चित्रा च तथा मूषकपर्णिका[2] ।
सर्व्वानुभूतिः सरला वृद्दता कालमेषिका ॥ २६ ॥

२३ । पूतीकरञ्जादित्रिकं (नाटाकरञ्ज)। पूतीका कलिमाल्य-श्चास्य पर्य्यायः । कपित्थद्विकं (कयेत्) । कपित्थस्य पर्य्यायो ग्राही मन्मथः दधिफलः पुष्पफलः दन्तशठश्च । मालूरद्विकं (वेल्) ॥

२४ । झाटलादित्रिकः घण्टापारुलिपर्य्यायः । घण्टको नागवल्लायाञ्चापि वर्त्तते। अस्य पर्य्यायो मोचश्च । अयं वृक्षकादिचतुष्कः कुटजपर्य्यायः ॥

२५ । वीजकचतुष्को जम्बीरपर्य्यायः (टावालेवु) । फलपूरो रुचकश्चास्य पर्य्यायः। वारणवुसा मोचा, अंशुमत्फला काष्ठीला चेत्यपि कदलीपर्य्यायः ॥ पाटलोऽपि पाठः ।

२६ । द्रव्यन्तीत्रिका (उन्दुरकाणीपाना)। उपचित्रा न्यग्रोधी शङ्करी वृषा प्रत्यक्श्रेणी सुतश्रेणी रण्डा च एतत्पर्य्यायः । उप-

[1] । वीजजम्बुश्च । गः ।
[2] । मूषिका मूषपर्णिका । खः ॥

अर्कस्य रविनामानि विज्ञेयानि विचक्षणैः।
धत्तूरः काञ्चनः प्रोक्तस्तथा चोन्मत्तकः स्मृतः[1] ॥ १९ ॥
करवीरोऽश्वमारश्च चित्रको वह्निसंज्ञकः[2]।
कोषातकी महाजाली देवदाली च कीर्त्तिता ॥ २० ॥
धामार्गवश्च विख्यातो घोषा[3] चेतिच सूरिभिः।
आरग्वधः कृतमालो[4] व्याधिघ्नश्चतुरङ्गुलः ॥ २१ ॥
मार्जनस्तिल्वकश्चैव सावरो लोध्र उच्यते।
नक्तमालः करञ्जश्च चिरविल्वः प्रकीर्त्तितः ॥ २२ ॥

---

१९। अर्कपर्य्याये वसुकः आस्फोतः गणरूपः विकीरणः मन्दारः अर्कपर्णश्च। धत्तूरत्रिकं (धुतरा)। धुस्तूरपर्य्याये कितवो धूर्त्तश्च ॥

२०। करवीरद्विकं (करवी)। करवीरपर्य्याये प्रतिहासः शतप्रासः चण्डातश्च। चित्रकद्विकं (चिते)। कोषातकीत्रिकं (श्वेतघोषा)। महाजाली पीतघोषा ॥

२१। धामार्गवः पीतघोषा ॥

२२। मार्जनचतुष्कः (लोध्काष्ठ)। मार्जनतिल्वकौ रक्तलोध्रौ। एतत्पर्य्यायस्तिरीटस्तिन्दुजश्च। सावरः पाटियारोध्रः। महारोध्रः शावरश्च तत्पर्य्यायः। सम्पाको राजवृक्षश्च। लोध्रपर्य्याये गालवश्च। नक्तमालेत्यादित्रिकः करञ्जवर्गः ॥

---

१। स्वसः। खः।
२। घोषगः। खः।
३। विख्यातः। गः।
४। मार्जारः। खः।

कलिङ्गन्द्रयवाह्वन्तु वसुको वसुहट्टकः[१]।
त्रुटिर्वयस्था सूक्ष्मैला स्थूलैला तालकाफलम्[२] ॥ १५ ॥
अक्षीवश्चाक्षकश्चैव अजकः[३] परिकीर्त्तितः।
युग्मपत्रः कोविदारः कुरवः[४] कोकिलाक्षकः ॥१६॥
शिग्रुः शोभाञ्जनः प्रोक्त[५]स्तत्फलं मरिचं सितम्।
अतिपत्रा महापत्रा सूक्ष्मपत्रा वला स्मृता ॥ १७ ॥
समङ्गा वाधपुष्पीच वातला[६] वाथ कादली।
महाद्रुमश्च वज्रीच स्नुहाचैव[७] स्नुही स्मृता ॥ १८ ॥

---

१५। कलिङ्गद्विकं (इन्द्रयव)। वसुकद्विकं (वक्फुल)। त्रुटि-त्रिकं (छोटएलाच्)। स्थूलद्विकं (वड़एलाच्)। सूक्ष्मैलायां त्रिपुटा कोरङ्गी उपकुञ्चिकापि। स्थूलैलायां पृथ्वीका, चन्द्रवाला निष्कुटिः तथा वऊलापि॥

१६। अक्षीवत्रिकं (रुद्राक्ष)। युग्मपत्रद्विकं (रक्तकाञ्चन)। कुरव-द्विकं (झाँटी)। कोविदारे चमरिकः कुद्दालश्चापि।

१७। शिग्रुद्विकं (साज्ने)। शिग्रौ तीक्ष्णगन्धा चीरमोचकापि। शिग्रुफलं श्वेतमरिचमुच्यते। अतिपत्रचतुष्कं (वेलेड़ा)।

१८। समङ्गाचतुष्कं (समङ्गा)। स्नुह्यां सीऊण्डी वज्रद्रुः गुड़ा समस्तदुग्धा च॥

---

१। वसुहृट्टकः। गः।
२। तालकाफलकं तथा। खः।
३। कच्छुकः।
४। त्रुटिः। गः।
५। जरकः। खः।
६। वाधाला वाष्पकादनी। खः
७। स्नुहः। गः।

वृक्षादनी च वन्दाकी[१] सुरसा तुलसी स्मृता ।
राक्षसी चैव चण्डाच चोरपुष्पाभिधीयते[२] ॥ ११ ॥
अगुरुर्लौहसंज्ञस्तु राजार्हश्चापि[३] कीर्त्तितः ।
यवानिकातु भूतीका, खदिरं दन्तधावनम् ॥ १२ ॥
नलदा[४] चैव मांसीतु हेमाख्यं[५] नागकेशरम् ।
गोधावती च सुवहा, गुन्द्रस्तेजनकः शरः[६] ॥ १३ ॥
चूड़ाला चक्रला चैव उच्चटा परिकीर्त्तिता ।
वीजं कुटजवृक्षस्य कीर्त्तितं मुनिभिः पुरा ॥ १४ ॥

---

११। वृक्षादनीद्विकं (परगाछा)। सुरसाद्विकं (तुलसी)। राक्षसीत्रिकं (चोरकाँचकी)। वृक्षादन्यां वन्दा वृक्षरुहा जीवन्तिकापि च। चोरपुष्प्यां शंखिनी केशिन्यपि च ॥

१२। अगुरुत्रिकं (अगुरु)। अगुरौ वंशिकः जोंगकश्चापि। खदिरे गायत्री बालतनयश्चापि॥

१३। नलदाद्विकं (जटामांसी) जटामांस्यां तपस्विनी, जटिला लोमशा मिषिः किरातिनी चेति। हेमद्विकं (नागेश्वर) द्विपाङ्गः सर्पाङ्गश्चाम्येयश्च नागकेशरपर्य्यायः। गोधावतीद्विका (गोयालिया लता)। गुन्द्रस्त्रिकः (शर) ॥

१४। चूड़ालात्रिका (ओकड़ा)। इन्द्रयवे भद्रयवमपि ॥

---

१। गन्धाकी। खः।
२। तथा। गः।
३। योऽङ्गरखा प्रकीर्त्तितः। खः।
४। जलदा। गः।
५। मेदाख्यं। गः।
६। शरः। गः।

जिङ्गी च विकसा वापि मञ्जिष्ठा परिकीर्त्तिता ।
अनन्ता सारिवा गोपी सूक्का देवीलता लघुः ॥ ७ ॥
मृद्वीका गोस्तनी द्राक्षा कच्छुरा[1] च शठी स्मृता ।
श्रीवेष्टकं[2] दधिकं स्यात्सुरभी शल्लकी सुधा ॥ ८ ॥
कच्छुरा ताम्रपुष्पी च नादेयी भूमिजम्बुका ।
अश्वत्थः पिप्पलो बोधिर्न्यग्रोधो वहुपाद्वटः ॥ ९ ॥
उदुम्बरस्तु यज्ञाङ्गो गर्द्दभाण्डः[3] कपीतनः ।
पाषाणभेदो विख्यातः शिलाभेदोऽश्मभेदकः ॥ १० ॥

---

७। जिङ्गीत्रिकं (मञ्जिष्ठा)। मञ्जिष्ठायां समङ्गा कालमेषी मण्डूकपर्णी भण्डीरः योजनवल्ली योजनपर्णी च। अनन्ताषट्कं (श्यामालता)। श्यामलतायां उत्पलशारिवा च ॥

८। मृद्वीकात्रिकं (द्राक्षा)। कच्छुरादिकं (शठी)। श्रीवेष्टकपञ्चकं (शल्लकी)। द्राक्षायां स्वाद्वी मधुरसेति च ॥

९। कच्छुराचतुष्कं (नारङ्गा)। अश्वत्थत्रिकं (अश्वत्थ)। न्यग्रोधत्रिकं (वट)। अश्वत्थे चलदलः कुञ्जराशनोऽपि। वटे व्यामश्च, नागरङ्गे ऐरावतोऽपि ॥

१०। पाषाणादित्रिकं (पातरकुचा)। उदुम्बरद्विकं (यज्ञडुम्बुर)। गर्द्दभाण्डद्विकं (पाकुड़)। उडुम्बरे जन्तुफलः हेमदुग्धश्चापि। गर्द्दभाण्डः प्लक्षः, स च कन्दरालः सुपार्श्वकश्च। अयञ्च पत्रकाण्डफलादिभिरश्वत्थाकारः ॥

---

१। कच्छूरावापि। गः।
२। श्रवेष्टकं। खः।
३। गर्द्दभाङ्गः। खः।

कुरुविन्दं घनं मुस्तं मेघाख्यं नागकेशरम् ।
उदीच्यो जलनामा[1] च वह्निरिष्टश्च वालकः ॥ ३ ॥
उरुवूको व्याघ्रदलस्तथा गन्धर्व्वहस्तकः ।
एरण्डः कीर्त्तितो वैद्यै र्वातारिश्च विशेषतः ॥ ४ ॥
ब्रह्मदण्डी च भार्गी च तथा च द्विजयष्टिका ।
मकूलोदुम्बरदला[2] दन्ती प्रोक्ता निकुम्भिका ॥ ५ ॥
एकाष्ठीला स्मृता पाठा अम्बष्ठा च प्रकीर्त्तिता ।
उषणा चविका चव्या ; अजमोदा च दीप्यकः ॥ ६ ॥

---

३ । कुरुविन्दपञ्चकं (मुता) । एषु कुरुविन्दं कुरुविल्लं वा नागरमुस्तायां वर्त्तते । वालेयं परिपेलवमपि मुस्तावाचकं। गाङ्गेयं भद्रमस्तं कुटन्नटञ्च नागरमुस्तावाचकम् ॥ उदीच्यचतुष्कं (वाला) । ह्रीवेरं दिव्यं केशनाम च तद्वाचकम् ॥

४ । उरूवकपञ्चकं (एरण्ड) । एरण्डे—व्याघ्रपुच्छः रुचकः, चित्रकः, रुवुकः, पञ्चाङ्गुलः, चञ्चुः, मण्डः, वर्द्धमानः, व्यड़म्वकश्चापि ॥

५। ब्रह्मदण्डी-त्रिकं (वामनहाटी) । फञ्जिका, पद्मापि। मकूलादिचतुष्कं (दन्ती)। दन्त्यां प्रत्यक्श्रेणी चित्रा उपचित्रा अणुरेवती द्राक्षायणी विशल्या च पर्य्यायशब्दः ॥

६ । एकाष्ठीलात्रिकं (आकनादि) । पाठायां अविद्धकर्णी, स्थापनी श्रेयसी रसा पापचेली प्राचीना वनतिक्तिकापि। उषणात्रिकं (चइ) । अजमोदाद्विकं (राान्धनि) । यमान्यां उग्रगन्धा ॥

---

१ । अजनामा । खः ।
२ । मुकुलोदुम्बरा दन्ती प्रोक्ता च नवकुम्भिका । गः ।

क्वाथपानप्रलेपेषु[१] वाह्ये चापि तपोधनैः ।
अनिर्द्दिष्टे जलं प्रोक्तं लवणञ्चैव सैन्धवम् ॥ ४७ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे द्रव्यमाचाख्याने एकादशोऽध्यायः ॥

---

## अथ द्वादशोऽध्यायः ॥

निघण्टुः ।

निघण्टुं संप्रवक्ष्यामि पूर्व्वशास्त्रानुसारतः ।
द्रव्याणामवबोधस्तु येन सम्यक् प्रजायते ॥ १ ॥
वत्सादनी छिन्नरुहा गुडूची तन्त्रिकामृता ।
वृषो वासाटरूषश्च वासकः परिकीर्त्तितः ॥ २ ॥

---

४७। अनुक्ते द्रवकार्य्ये तु सर्व्वत्र सलिलं मतमिति चक्रपाणिः । लवणञ्चैवेति स्थाने लवणे चैवेति पाठो युक्तः ॥

१। निघण्टुर्नामसङ्ग्रहे इति हेमचन्द्रः। द्रव्याणामिति अस्मिन् शास्त्रे प्रयुक्तानां गुड़ूच्यादिचातुर्जातान्तानामौषधीनाम् ॥

२। वत्सादनीपञ्चकं (गुलञ्च)। मधुपर्णी कुण्डली चक्रलक्षणापि एतत्पर्य्यायः। वृषादिचतुष्कं (वाकस्)। वासायां सिंहास्यः वाजिदन्तश्च ॥

---

१। क्वाथे पाने प्रलेपेऽङ्गे। खः।

साधारणाः समुद्भूता ज्ञेयाः साधारणाः सदा ।
रसवीर्य्यविपाकाश्च[१] तेषां साधारणा मताः ॥ ४१ ॥
कल्काच्चतुर्गुणः स्नेहः स्नेहात् क्वाथश्चतुर्गुणः ।
स्नेहपाके विधिश्चायं समानः परिकीर्त्तितः ॥ ४२ ॥
स्नेहकल्को यदाङ्गुल्या वर्त्तितो वर्त्तिवद्भवेत् ।
वह्नौ क्षिप्ते च नोशब्दस्तदा सिद्धिं विनिर्द्दिशेत् ॥ ४३ ॥
व्रणे नस्ये तथा वस्तौ मृदुपाकः प्रकीर्त्तितः ।
अभ्यङ्गे मध्यपाकस्तु पाने किञ्चिद्दरो भवेत् ॥ ४४ ॥
मध्यमोत्तमहीनानामेवमेव विचक्षणः ।
वयोऽनुरूपद्रव्याणि[२] दापयेच्च शरीरतः ॥ ४५ ॥
वर्षजाते[३] भवेत्पादो द्वौ पादौ च द्विहायने ।
त्रयस्त्रिहायने देयाः पूर्णं दद्यात्ततः परम् ॥ ४६ ॥
कृशे चाल्पप्रमाणे च दद्यान्मात्रां कनीयसीम् ।
महाकाये तथास्थूले प्रयोज्या मध्यमोत्तमाः ॥ ४७ ॥

---

४२ । तैलपाकविधाने द्रव्यमानमाह कल्कादित्यादि ।
४३ । पाकसिद्धिलक्षणमाह । स्नेहेति ।

---

१ । विपाकेषु । खः ।
२ । अधातुरूपद्रव्याणां । गः ।
३ । द्वौ चैव । गः ।

जाङ्गलाः पशवः प्रोक्ता ये चान्ये स्थलवासिनः[१]।
शशोऽतिलघुरेतेषां गुरुश्चैवाविकस्तथा[२] ॥ ३४ ॥
जम्बूवेतसहिन्तालकदलीनलवेणुभिः।
युक्तो बहुजलो[३] निम्नो देशोऽनूप उदाहृतः ॥ ३५ ॥
कशेरुकशमीपीलु[४]करीरद्रुमशङ्करैः[५]।
खदिरैश्चापि संयुक्तस्तथा च वकुलैर्युतः ॥ ३६ ॥
जलहीनः स्थलीप्रायो देशो जाङ्गल उच्यते।
साधारणा द्विरूपस्था[६]स्तज्जाः साधारणा मृगाः ॥ ३७ ॥
तेषां मांसप्रयोगेतु मात्रा साधारणा स्मृता।
पशवः पक्षिणश्चापि ज्ञेया देशसमाः सदा ॥ ३८ ॥
वारिजा गुरवः स्निग्धा वातघ्नाः श्लेष्मशुक्रलाः।
आनूपा वारिजैस्तुल्या किञ्चिच्च लघवः स्मृताः ॥ ३९ ॥
त्रिदोषशमना वल्या जाङ्गला मृगपक्षिणः[७]।
अनभिष्यन्दिनो हृद्याः कायाग्नेश्चापि रोधिनः ॥ ४० ॥

---

त्रिषाणो मृगः। एणकः कृष्णवर्णमृगः। नीलाण्डो ऋष्यः। आविकः कम्बलकः। एड़को मेषो वनछगलो वा।

---

१। स्थलचारिणः। गः।
२। गुर्वीचैवाविका स्मृता। खः।
३। यद्विजलो। गः।
४। पीलू। गः।
५। सागरैः। खः।
६। द्विरूपस्य। खः।
७। मृगपक्षिणः। गः।

विंशतिस्त्रिगुणाश्चैव वारिमानं प्रकीर्त्तिताः।
अनुपानं तथाशीतिशतं जाङ्गलचारिणाम् ॥ २९ ॥
मांसानां दापयेत्[1] सम्यक् पलसङ्ख्यामिमां बुधः।
रसके भोजने देयं[2] वाजिनां हितकाम्यया ॥ ३० ॥
शिशुमारोद्रकुम्भीरगोधामण्डूककर्कटाः।
शङ्खकच्छपशुक्त्याद्याः कीर्त्तिता जलजन्तवः[3] ॥ ३१ ॥
गवयो गण्डको हस्ती शूकरो महिषो रुरुः।
आनूपाः कथिता ह्येते ये चान्येऽनूपवासिनः ॥ ३२ ॥
कृष्णसारशशद्वीपिच्छागसिंहतरक्षवः।
शम्बरैणकनीलाण्डवृषभोष्ट्राविकैड़काः ॥ ३३ ॥

---

३१। शिशुमारादयो जलजन्तवः। तेषु शिशुमारः शिशुघ्नः (शुशोक) इति प्रसिद्धः। उद्रो जलविड़ालः (उद्विड़ाल्) इति प्रसिद्धः। मांसमष्टधोक्तं वैद्यकेषु मृगविष्किरप्रतुदविलेशयप्रसहमहामृगजलचरमत्स्यभेदेन। इति।

३२। एतेऽनूपवासिनो महामृगमध्ये धृताः। गवयः सास्नाककुदरहितो गोसदृशः। गण्डकः खड्गी। महिषोऽश्वशत्रुः। रुरुो लोहितवर्णः।

३३। कृष्णसारः (कालसार्)। शशः शशकः। एष विलेशयः। द्वीपी चित्रकव्याघ्रः। तरक्षुः मृगादनः। शम्बरः विकटवङ्क-

---

१। कारयेत्। खः। ३। जलसम्भवाः। गः।
२। चैव। खः।

इक्षोरससमं[1] देयं पानार्थे च गुड़ोदकम् ।
प्रतिपाने[2] पलं देयं द्रव्याणां सुरया सह ॥ २३ ॥
स्नेहस्य कुड़वश्चैव नस्यार्थे परिकीर्त्तितः ।
भेदनीये च तीक्ष्णे[3] च पादोनं संप्रदापयेत् ॥ २४ ॥
कर्णयोः पूरणे स्नेहो भवेन्नावनसंमितः ।
शिरोविरेके दातव्यमर्द्धन्तु कुड़वस्य वै ॥ २५ ॥
औषधस्य पलं देयं हिङ्गोरेकश्च माषकः ।
नस्यप्रदाने चाश्वस्य[4] कर्षमेकं प्रदापयेत् ॥ २६ ॥
धूपे चूर्णे[5] त्रयः कर्षा घृतकर्षश्च सौरभः ।
अनिर्द्दिष्टकषायस्तु पादशेषः प्रकीर्त्तितः ॥ २७ ॥
निर्विशेषप्रमाणानां द्रव्याणां पलमादिशेत् ।
रुधिरस्याढ़को देयः पानार्थे यत्र युज्यते ॥ २८ ॥

---

२३ । इक्षोरससममिति अर्द्धाढ़कं गुड़ोदकं देयम्। तथा प्रतिपाने सुराप्रस्थेन सह द्रव्यपलं देयम् ।

२४ । पादोनमिति कुड़वांशविहीनं भेदनीयादि द्रव्यं देयम्।

२५ । नावनसंमित इति नस्यविहितस्नेहकुड़व एव देयः ।

२८ । यत्र यत्र द्रव्याणां परिमाणं न निर्द्दिष्टं तत्र तत्र द्रव्यपलं ग्राह्यम् ।

---

१ । सप्त । गः ।
२ । प्रतिमाने । खः ।
३ । भेदने दापयेत्तीक्ष्णे पादोनं । खः ।
४ । देयस्य । गः ।
५ । धूपे चूर्णे । खः ।

पेयार्थे तण्डुलप्रस्थो[१] यवागूर्द्विगुणेन तु ।
भोजितस्यानुपानाय सुराप्रस्थः प्रकीर्त्तितः ॥ २० ॥
दापयेत्तण्डुलप्रस्थं[२] तण्डुलोदककर्म्मणि ।
यवागूमण्डकल्केन दद्याद्वै तण्डुलोदकम् ॥ २१ ॥
द्वौ प्रस्थौ शक्तुकानान्तु शक्तुपाने प्रदापयेत् ।
गुड़स्य च पलान्यष्टौ आढ़कञ्चैव[३] वारिणः ॥ २२ ॥

---

२० । यत्र यत्र पेया व्यवस्था तत्र तत्र तण्डुलस्य प्रस्थो ग्राह्यः। पेया मण्डः । तथा यत्र यत्र यवागूव्यवस्था तत्र तत्र तण्डुलप्रस्थद्वयं ग्राह्यम् ॥ तथा पाकार्थं जलं पेयायां चतुर्द्दशगुणं दत्वा अर्द्धशृतं कर्त्तव्यम् । एवं यवाग्वां पाकार्थं जलं तण्डुलापेक्षया षड्गुणं देयमिति । पेयादिलक्षणमाह चक्रपाणिः,—"सिक्थकैरहितोमण्डः पेया सिक्थसमन्विता । यवागूर्वहुसिक्था स्याद्विलेपी विरलद्रवा" इति । एषां पाकेऽपि वारिव्यवस्थामाह स एव। "अन्नं पञ्चगुणे साध्यं विलेपीतु चतुर्गुणे । मण्डश्चतुर्द्दशगुणे यवागूः षड्गुणेऽम्भसि" इति ॥

२१ । तण्डुलोदककर्म्मणि तण्डुलप्रस्थं गृहीत्वा कुट्टयित्वा च तत्पञ्चगुणे वारिणि प्रक्षिप्य मर्द्दयित्वा गालयितव्यम् ।

२२ । प्रस्थमात्रे शक्तुनि जलाढ़कमात्रा ।

---

१ । तण्डुलः प्रस्थः । गः ।
२ । तण्डुलं प्रस्थं । गः ।
३ । इक्षोरसं समं । खः ।

अर्द्धप्रस्थन्तु तैलस्य पलान्यष्टौ गुड़स्य च।
प्रतिपाने[1] सुरायाश्च प्रस्थमेकं प्रदापयेत् ॥ १४ ॥
चूर्णं च लवणं पिण्डीं पलैकाञ्चैव[2] बुद्धिमान्।
चतुःपलं घृताद्द्यात्स्नेहे पाने च भोजने[3] ॥ १५ ॥
पलानि दश कल्कस्य निरूहे संप्रदापयेत्।
आढ़कञ्च कषायस्य दद्याद्बुद्धिमतां वरः ॥ १६ ॥
तावत्प्रमाणं क्षीरञ्च क्षीरवस्तौ प्रकीर्त्तितम्।
स्नेहप्रस्थः प्रदातव्यो निरूहे चैव वाजिनाम्[4] ॥ १७ ॥
अभ्यङ्गं कारयेत्तावत् यावद्बिन्दोश्च्युति[5] र्भवेत्।
कषायप्रतिपानार्थे[6] द्वौ प्रस्थौ परिकीर्त्तितौ ॥ १८ ॥
प्रतिपानात्पलं[7] यूषं द्विगुणञ्चैव दापयेत्।
अर्द्धाढ़कश्च दातव्यो रसश्चैषां[8] विचक्षणैः ॥ १९ ॥

---

१४-१५। प्रतिपाने सुराया इति पानं प्रति सुराया एकः प्रस्थो देयः।

१८। कषायपानं प्रति द्वौ प्रस्थौ स्नेहादीनां मात्रा।

१९। प्रतिपानार्थे यत्र यूषव्यवस्था वर्त्तते, तत्र यूषो द्विगुणो ग्राह्यः।

---

१। प्रतिमाने। गः।
२। चैव पिण्डिकाञ्चैव। खः।
३। घृतं दद्यात्स्नेहयेत्पानभोजने। गः।
४। वाजिनम्। खः।
५। श्रुतिः। खः।
६। कषायप्रतिपानार्थं। गः।
७। प्रतिमानात्। गः।
८। रसस्य। खः।

कनीयसोऽर्द्धहीनश्चेदिति मानं शरीरिणाम् ॥ ८ ।
चणकाश्चैव माषाश्च ये चान्ये ब्रीहयस्तथा ।
यवार्द्धेन प्रयोक्तव्या देशसात्म्येन खादने ॥ ९ ॥
मुद्गप्रस्थास्त्रयो योज्या[1] वाजिनां मुद्गभोजने ।
त्रयश्च स्नेहकुड़वा एकश्च लवणस्य तु ॥ १० ॥
तत्प्रमाणेन तैलेन लवणेन तथैव च ।
माषा मुद्गसमा देया भोजनाय च वाजिनाम् ॥ ११ ॥
सर्पिषश्चापि पानार्थं[2] प्रस्थं दद्याद्विचक्षणः ।
मधुनः कुड़वं चापि फाणितस्य तथैव च ॥ १२ ॥
शर्कराञ्चैव खण्डञ्च तथा मत्स्यण्डिकामपि ।
फाणितस्य प्रमाणेन दापयेन्मतिमान् भिषक् ॥ १३ ॥

---

९-११ । वाजिनां भोजनार्थं यवादीनामेवं मात्रा ;-एकदिने यवस्याढ़कचतुष्टयं । चणकमाषब्रीह्यादीनां आढ़कद्वयं मात्रा। मुद्गस्य च प्रस्थत्रयं । यत्रयत्र भोजने स्नेहव्यवस्था सर्वत्रैव स्नेहस्य कुड़वत्रयं लवणस्य च कुड़वो देयः । "चणकब्रीहिमौद्गानि कलायं वापि दापयेत् । अहोरात्रेण चार्द्धस्य यवस्य तुला दश ॥ अष्टौ शुष्कस्य दातव्याश्चतस्रोऽथ बुषस्य वा"—इति अग्निपुराणम् । एवं माषभोजनेऽपि माषस्य ३ प्रस्थाः । तैलस्य ३ कुड़वाः । लवणस्य च कुड़वः ॥

१२ । फाणितं (फेणी) इति प्रसिद्धम् ।

---

१ मुद्गप्रस्थो नियोज्यो हि । गः । २ । सर्पिषश्चापि पानेऽर्द्धप्रस्थं । गः ।

शुष्कद्रव्यस्य या मात्रा सा[१] द्रवे द्विगुणा भवेत्।
मूलादीनामशुष्काणां द्रव्यतुल्यो विधिः स्मृतः ॥ ५ ॥
एकस्मिन्नेव दातव्यं दिने वाहस्य निस्तुषैः ।
अविनष्टैर्यवैः पूर्णमाढ़कानां चतुष्टयम् ॥ ६ ॥
उत्तमाधमहीनानां पादहीनन्तु दापयेत् ।
पादो न आढ़को देयः सुसिद्धो भोजने तथा ॥७॥
शालेश्च तण्डुलानां तु अर्द्धञ्चैव प्रदापयेत् ।

५। मूलादीनामित्यादिपदेन गुडूचीकुटजवासाकुष्माण्डशतावर्य्यादीनां ग्रहणम्। एषामार्द्राणामपि सर्वकार्य्येषु द्विगुणं न ग्राह्यम्। उक्तञ्च शार्ङ्गधरे,—"नवान्येवहि योज्यानि द्रव्याण्यखिलकर्मसु। विना विड़ङ्गकृष्णाभ्यां गुड़धान्याज्यमाक्षिकैः ॥ गुडूची कुटजो वासा कुष्माण्डश्च शतावरी। अश्वगन्धा सहचरी शतपुष्पा प्रसारणी॥ प्रयोक्तव्या सदैवार्द्रा द्विगुणं नैव कारयेत्"—इति। विड़ङ्गादीनि नवानि न प्रशस्तानीति ज्ञेयम्। "शुष्कद्रव्ये तु या मात्रा चार्द्रस्य द्विगुणा हि सा। शुष्कस्य गुरुतीक्ष्णत्वात् तस्मादर्द्धं प्रकीर्त्तितम्"—इति परिभाषा॥

६। एकस्मिन्दिने यवाढ़कचतुष्टयस्य दाने अग्निपुराणम्,—"निस्तुषाणां प्रदातव्या यवानां चतुराढ़की"—इति।

७। उत्तमे पूर्णा मात्रा मध्यमाधमयोरुत्तरोत्तरं पादहीना कर्त्तव्या।

८। सार्द्धहीनन्तदिति पाठो युक्तः।

१। सार्द्रस्य द्विगुणा मता। खः।

# अथैकादशोऽध्यायः ।

द्रव्यमात्राज्ञानः ।

प्रधानमध्यहीनानां देशकालबलं प्रति ।
वाजिनामुपयोगाय द्रव्यमात्रा विधीयते ॥ १ ॥
पक्वगुञ्जाफलैर्माषो अष्टभिः परिकीर्त्तितः ।
माषैः षोड़शभिः कर्षस्तैश्चतुर्भिः पलं भवेत् ॥ २ ॥
चतुःपलैः स्यात् कुड़वः प्रस्थः षोड़शभिः पलैः ।
चतुःषष्ठ्या पलैरेक[1] आढ़कः परिकीर्त्तितः ॥ ३ ॥
शतद्वयं पलानान्तु[2] षट्पञ्चाशत्तथैव च ।
द्रोणस्य कीर्त्तिता संख्या प्रमाणज्ञानकोविदैः ॥ ४ ॥

१ । द्रव्यमात्रेति मात्राशब्देन सम्यग्योगो वक्तव्यः ।

२ । एष मानविधिः केवलं वाजिचिकित्सिताय, चरकादिमानविलक्षणएव। चरकादिमानविधिस्तु एवं प्रदर्शितश्चक्रपाणिना,—"द्वात्रिंशन्माषकैर्माषश्चरकस्य तु तैः पलम्। अष्टचत्वारिंशता स्यात् सुश्रुतस्य तु माषकः॥ द्वादशभिर्धान्यमाषैश्चतुःषष्ठ्या तु तैः पलम्। एतच्च तुलितं पञ्चरक्तिमाषात्मकं पलम् ॥ चरकार्द्धपलोन्मानं चरके दशरक्तिकैः। माषैः पलं चतुःषष्ठ्या यद्भवेत्तत् तथेरितम्॥ तस्मात् पलं चतुःषष्ठ्या माषकैर्दशरक्तिकैः। चरकानुमतं वैद्यैः चिकित्सासूपयुज्यते" इति । माषो अष्टभिरित्यत्र लुप्तोऽकारः साधुः ॥

१ । एव । गः ।            २ । च । खः ।

शरीरेन्द्रियधात्वग्नि[1]दोषाः प्रकृतयस्तथा ॥ २१ ॥
वलानाञ्च तुरङ्गानां तुल्यरूपा भवन्ति ते ।
तान्येव व्याधिरूपाणि तदेव तु चिकित्सितम् ॥ २२ ॥
सएव वातस्तत्पित्तं स श्लेष्मा तद्धि शोणितम् ।
विशेषः केवलस्तत्र मात्राया परिकीर्त्तितः ॥ २३ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे हृतिकोपचारे दशमोऽध्यायः।

---

१। शरीरेन्द्रियजास्त्वग्निदोषाः। खः।

गुड़तैलसमायुक्तां तीक्ष्णां वा पाययेत् सुराम्।
दुष्टस्य शोधना योगा क्षीरस्यैते विवर्द्धनाः ॥ १७॥

किशोरोपचारप्रकरणम् ।

क्षौद्रञ्च नवनीतञ्च मिश्रितं[1] लेहयेच्छिशुम् ।
मासमेकं किशोरन्तु ततो भोजनमाचरेत् ॥ १८॥
गोधूमान्नं यवान्नञ्च सुसिद्धं पयसान्वितम् ।
मधुसर्पिःसमायुक्तं किशोराणां प्रशस्यते ॥ १९ ॥
तक्रं[2] वा घृतसंयुक्तं मधुक्षीरविमिश्रितम्।
पाययेच्च किशोरांस्तु सद्योबलविवर्द्धनम् ॥ २० ॥
एवं किशोरा वर्द्धन्ते बलवन्तो भवन्ति च ।

---

१७ । गुड़ेति । इदं प्रतिपानं तीक्ष्णसुराप्रस्थेन गुड़तैलयोः प्रत्येकं यथाक्रमं प्रस्थार्द्धं पलाष्टकं च मिश्रयित्वा योजनीयमित्यर्थः। "स्तन्यरक्तक्षयहिता सुरा बृंहणदीपनी"—इति सुश्रुतम् ॥

१८। अत्र किशोरोपचारप्रकरणे अन्नपानादिकं सर्व्वमेव साधारणवत् केवलं मात्राया विशेषोऽस्तीति बोध्यम्॥ अत्र क्षौद्रं कुड़वांशं नवनीतञ्च पलं एकत्र शिशोर्लेहने देयम् । द्रव्यमात्राध्याये तेषां उत्तमेभ्यः सर्वद्रव्याणां पादव्यवस्थाया उक्तत्वात् तथा परिमाणं योज्यम् ॥

---

१ । मिश्रित्वा । गः ।
२ । तक्रो घृतसंयुक्ता मधुक्षीरविमिश्रिताः । गः ।

जम्बूकषायं क्षौद्रेण मिश्रितं पाययेद्वयीम् ।
पञ्चवल्कलमादाय क्षालितं जर्जरीकृतम् ॥ १३ ॥
वारिणा साधयेद्वैद्यो राव्युषितञ्च कारयेत् ।
प्रभाते[१] दापयेदस्यां शर्करामधुमिश्रितम् ॥ १४ ॥
अजाजी भद्रमुस्ता च शृङ्गवेरञ्च सर्षपम् ।
तुम्बुरूणि विड़ङ्गानि चित्रकं देवदारु च ॥ १५ ॥
पिप्पली च हरिद्रे द्वे पाठां शिग्रुञ्च पेषयेत्[२] ।
कल्कं सौवीरकेणैव सन्नीय प्रतिभोजयेत् ॥ १६ ॥

---

१३ । जम्बूकषायं चौद्रेणेति । अत्र जम्बूत्वक् पलपरिमिता । पाकार्थं जलं आढ़कपरिमितं । पादशेषं कृत्वा प्रस्थद्वयं मधुनः कुड़वं प्रक्षिप्य च पाययेत् ॥ तथा पञ्चवल्कलं न्यग्रोधोडुम्बराश्वत्थप्लक्षवेतसानां त्वचः पलपरिमिताः पूर्ववत् जलेन साधयित्वा दापयेत् । जर्जरीकृतं कुट्टितमित्यर्थः । "न्यग्रोधोडुम्बराश्वत्थप्लक्षवेतसवल्कलैः । सर्वैरेकत्र-संयुक्तैः पञ्चवल्कलमुच्यते"—इति निघण्टुः । तत्र प्रक्षेपश्च शर्करा मधु चेति तयोः प्रत्येकं कुड़वो देयः ॥ अजाजीत्यादि एषां समभागेन पलं गृहीत्वा दृषदि संपिष्य प्रस्थपरिमितकाञ्जिकेन गोलयित्वा दद्यात् । अजाजी जीरकं तुम्बरुः धन्याकं । हरिद्रे इति हरिद्रा दारुहरिद्रा च । पाठा अविद्धकर्णा (आक्नादि) इति यस्या भाषा । शिग्रुः शोभाञ्जनं । (साजने) ॥

---

१ । प्रस्रुतं । खः ।　　　　२ । एषां सर्व्वेषु । गः ।

चतुर्थे दिवसे प्राप्ते तोयं चैव शृतं पिबेत्।
तदा[1] न मुच्यते योन्या फेनं गर्भोदकन्तु वा॥ ९॥
यस्माद्विमुक्तगर्भायाः कोष्ठे वायुरुदीर्य्यते।
तस्माद् घृतं प्रदातव्यं प्रसूतायां विजानता॥ १०॥
यवाः[2] सर्व्वे हिता दूर्व्वा यावकं सर्पिषा सह।
दशमेऽहनि संप्राप्ते सवत्सां स्नपयेद्वयीम्॥ ११॥
गन्धाद्यैः पूजयेत् पुष्पैर्गन्धधूपैश्च धूपयेत्।

क्षीरशोधनम्॥

अथ दुष्टस्य वक्ष्यामि क्षीरस्य परिशोधनम्॥ १२॥

---

९। चतुर्थ इति। शृतं तोयं पक्वं जलम्।

१०। तस्मादिति। अत्र पानार्थं घृतं चतुःपलं देयम्। उक्तञ्च "चतुः पलः घृतं देयं लेहे पाने च भोजने"। इति।

११। यवा इति। यवदानपरिमाणं तावदेकदिने आढकचतुष्टयं। एतदुत्तमस्य। मध्यमादीनान्तु उत्तमपरिमाणात् पादहीनं कनीयसस्तु मार्द्धहीनं ज्ञेयम्। एवं द्रव्यमात्रायां जयदत्तेन वर्णितं द्रष्टव्यम्॥ यावकमित्यादि। सर्पिषा कुड़वत्रयमितेनेत्यर्थः। यावकं कुलत्थं आढकद्वयं दद्यात्।

---

१। यदा। खः। २। प्रसूतायाः। गः।
३। यव ार्थे हितां दूर्व्वाम्। खः।

एवं विमुच्यते गर्भो जरायूंषि पतन्ति च ।
प्रतिपानैस्ततः कोष्ठं शोधयेद्वक्ष्यमाणकैः ॥ ६ ॥
सीधुमधु[1] त्रिकटुकैः पूर्व्वाह्णे पाययेद्धयीम् ।
पैष्टिकीं वा सुरां दद्याद् गुड़तैलेन संयुताम् ॥ ७ ॥
अश्वायै दापयेद् ग्रासं सुजीर्णे प्रतिपानके ।
ततो न पाययेत् क्षीरमेकरात्रिं त्रिकोनिधिः ॥ ८ ॥

---

षष्टिपलमितेनेत्यर्थः । उक्तञ्च जयदत्तेन,—"विंशतिस्त्रिगुणाश्चैव वारिमानं प्रकीर्त्तितम्"—इति ॥

६ । प्रतिपानैरिति । ततो वक्ष्यमाणैः प्रतिपानैः पानयोगैः कोष्ठं शोधयेत् कोष्ठजाड्यमपनयेदित्यर्थः ॥

७ । प्रतिपानयुगलमाह । सीध्विति । अत्र त्रिकटुकं समभागं मिलित्वा पलं ग्राह्यम् । "मरिचस्य च शुण्ठ्याश्च पिप्पलीनां तथैव च । एतत्त्रिकटुकं प्रोक्तं व्योषाख्यं त्र्यूषणं तथा"—इति ॥ सीधुः मधूकपुष्पोत्थः सुराविशेषः । तदुक्तं सुश्रुते । "सीधुर्मधूकपुष्पोत्थो विदाह्यग्निबलप्रदः । रूक्षः कषायकफहृद् वातपित्तप्रकोपनः"—इति ॥ तस्य प्रस्थः । तथा मधुनश्च कुड़वः । सर्व्वमेकत्र मेलयित्वा पूर्व्वाह्णे पाययेदित्यर्थः । द्वितीयं योगं कथयति । पैष्टिकीमिति । गुड़तैलेन संयुक्तां पैष्टिकीं सुरां दद्यात् । अत्र पैष्टिक्याः प्रस्थः । गुड़स्य पलाष्टकं । तैलस्य च कुड़वः प्रस्थार्द्धं वा ॥

८ । त्रिकोनिधिरिति पाठो न लगति ॥

---

१ । सीधुना त्रिकटुकैश्च । गः ।

# अथ दशमोऽध्यायः ।

सूतिकोपचारः ।

गर्भन्तु निर्गतं ज्ञात्वा वारिणा परिषेचयेत् ।
ऋतुं[1] विज्ञाय मतिमान् शीतोष्णेन च वा पुनः ॥१॥
अथ मातुः स्तनौ धौतौ पाययेत् परिगृह्य तम्[2] ।
विलग्नेषु च गर्भेषु जरायुषु पतत्सु च ॥ २ ॥
समान्येतानि मेधावी भेषजान्युपकल्पयेत् ।
ज्योतिष्मती तेजवती शङ्खपुष्पी शतावरी ॥ ३ ॥
भार्गी वचा विशल्या च तथा लाङ्गलिकापि च ।
एतत् संहृत्य संभारं ग्रन्थयेत् सर्षपैः सह ॥ ४ ॥
ततः शिरसि कण्ठे च पुच्छे चाप्युपयोजयेत् ।
लाङ्गलीविल्वशुण्ठीनां चूर्णं तोयेन पाययेत् ॥ ५ ॥

---

३-४ । ज्योतिष्मती (मालकांगनी) । तेजवती गजपिप्पली । शंखपुष्पी चोरपुष्पी (चोरकाचकि) । शतावरी (शतमूली) । भार्गी (वामनहाटी) । वचा (वच्) । विशल्या दन्ती गुड़ची वा । लाङ्गलिका (ईषलाङ्ले) ।

५ । तत इति । लाङ्गली (ईषलाङ्ले) । विल्वः प्रसिद्धः । तथा शुण्ठी च । आसां द्रव्यत्रयाणां चूर्णं समभागेन मिलितं पलं तोयेन

---

१ । ज्ञातुं । खः । २ । परिगृह्यते । गः ।

गर्भोपलिप्तपार्श्वा च वड़वा गर्भिणी मता ।
शरीरोपचयः शोभानिर्वृत्ति र्गतिमन्दता[१] ॥ ६ ॥
श्वासः[२] स्वल्पाशनत्वञ्च शरीरस्य च पुष्टता ।
स्निग्धता चैव रोमाणां घनरन्ध्रत्वमेव[३] च ॥ ७ ॥
क्षान्ता दान्ता प्रशान्ता च वृषं नेक्षति गर्भिणी ।
प्रथमे च द्वितीये च मांसशोभा प्रजायते ॥ ८ ॥
तृतीये च चतुर्थे च पक्कमांसञ्च वर्द्धयेत् ।
पञ्चमे चैव षष्ठे च त्वचि रोमं प्रसीदति ॥ ९ ॥
सप्तमे वाष्टमे मासे योनिः सम्पद्यते पृथुः ।
पादाः शूयन्ति नवमे तस्याधश्चाति[४]वर्द्धते ॥ १० ॥
दशमे चैकादशे वा[५] द्वादशे वा प्रसूयते ।
एवं नानाविधैर्ज्ञेया गर्भिणी हयकोविदैः ॥ ११ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे गर्भज्ञाने नवमोऽध्यायः ।

---

१० । पादाः शूयन्ति स्फीता भवन्ति ।

---

१ । अतिमन्दता । गः ।
२ । श्वासाल्पं वामनत्वञ्च । गः ।
३ । घनता रन्ध्र एव च । गः ।
४ । मास्यधः । गः ।
५ । चैव । गः ।

## अथ नवमोऽध्यायः।

गर्भज्ञानः।

अथातः संप्रवक्ष्यामि सगर्भायास्तु लक्षणम्।
योन्यां[1] वीजग्रहे तृप्ति र्लोचनाविलता तथा ॥ १ ॥
सगर्भा ताड़येदश्वं गर्भस्य परिलक्षणम्[2]।
काचिन्मूका जड़ीभूता निर्विकारा त्यजेद्वृषम् ॥ २ ॥
काचित् कण्डूयमानाश्वा गर्भिण्यपि प्रहर्षते।
काचिद्रागवशाद्वापि समूचा ताड़येद्वृषम् ॥ ३ ॥
हण्डि परुषा[3] काचिदश्वा पुच्छेन[4] योनिकाम्।
विन्यस्तकर्णी[5] क्रोधाद्वा वृषं दृष्ट्वापसर्पिणी ॥ ४ ॥
शूनाधोयोनिभागा च सदा कान्तिविधारिणी[6]।
प्रशस्तरन्ध्रा[7] स्निग्धाङ्गी निविड़ोदरबन्धना[8] ॥ ५ ॥

---

२। वृषः शुक्रधारी। अत्र पुंघोटक इत्यर्थः।

३। विन्यस्तकर्णी पर्य्यस्तकर्णी।

४। शूनाधोयोनिभागा यस्या योन्या अधो भागः शुष्को भवति।

---

१। योन्या वीजग्रहे तृप्तिं। खः।

२। परिरक्षणात्। गः।

३। वड़वा। गः।

४। बद्धपुच्छेन। गः।

५। व्यत्यस्तकर्णी। गः।

६। कान्तिविदारिणी। गः।

७। प्रस्थरन्ध्रा च। गः।

८। अचिरोदरबन्धना। खः।

चूर्णयित्वा क्षिपेत्तत्र शनैर्मृदग्निना पचेत् ।
स्नेहानुवासनादेतद्[1] बन्ध्यायाः स्यात् फलप्रदम् ॥१३॥
क्वाथं रौहीतकं क्षीरं माक्षिकं रोहिणीद्वयम्[2] ।
विडङ्गेन समालोड्य पाययेन्मतिमान् भिषक् ॥ १४ ॥
एतैश्च पिण्डिकां कृत्वा योन्यां तस्याः प्रवेशयेत् ।
ततः संयोजयेदश्वं पश्चात्तोयावगाहनम्[3] ॥ १५ ॥
कारयेन्मस्तकं चास्या अम्बुभिः परिषेचयेत् ।
एवं गर्भं प्रगृह्णाति कर्त्तव्यो नात्र संशयः ॥ १६ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे बन्ध्योपचारेऽष्टमोऽध्यायः ।

---

१४। रौहीतकमिति रोहीतको दाड़िम्बपुष्पकः (रोढा) इति प्रसिद्धः। तेन रौहीतकं। रौहितकस्य पलं वारिणश्च प्रस्थः। एतस्य पादावशिष्टं क्वाथम ।

---

१। पानात् तैलं बन्ध्याफलप्रदम्। खः।
२। रोहिणीवचा। :।
३। तोयेऽवगाहयेत्। गः।

वस्तौ पानं[1] प्रदातव्यं तैलमेतद्विचक्षणैः।
यावकञ्च ततो देयमन्नं दधिसमन्वितम्॥ ९॥
एवंविधैः प्रयोगैश्च बन्ध्या भवति गर्भिणी।
शीतपाक्यौ च[2] मेदे च वृद्धे द्वे चिफलावचा॥१०॥
क्वाथयेन्मतिमांस्तोये द्रोणे पादावशेषितम्।
कृत्वा संस्राव्य वस्त्राच्च देयं तच्च घृताढ़कम्॥ ११॥
वला चातिवला मेदे तथा क्षीरविदारिका।
जीवकर्षभकौ चैव यष्टीमधुकशारिवे[3]॥ १२॥

---

९। यावकं यवसम्बन्धि अन्नं यवापेक्षया पञ्चगुणे तोये पक्वा दधिप्रस्थेन सह देयम्॥

१०। शीतपाक्यौ काकोलीक्षीरकाकोल्यौ। मेदे मेदमहामेदे। एतदभावे अश्वगन्धाशारिवे देये। वृद्धे ऋद्धिवृद्धी। एतदभावे वलामहावले ग्राह्ये। शीतपाक्यादीनां प्रत्येकं पलं। वारि ३२ प्रस्थमितं। वला वाट्यालकं। अतिवला पीतवाट्यालकं। क्षीरविदारी शुक्लभूमिकुष्माण्डी। जीवकर्षभकौ जीवकः ऋषभकश्चेति द्वौ। एतदभावे गुडूची वंशलोचना च देया। शारिवा श्यामालता। एषां प्रत्येकं पलं देयम्।

---

१। हस्तोपानं। खः।
२। शीतपाक्यौ च मेदे द्वे द्वे मेदे त्रिफलापि च। खः।
३। यष्टीमधु च शारिवा। गः।

महास्नेहस्य प्रस्थांशं[1] योन्यां वस्तिं प्रदापयेत्।
सर्व्वं प्रवेशयेन्नेत्रं सम्पूर्णं द्वादशाङ्गुलम्॥ ५॥
अपामार्गवचाविल्वशिग्रुवीजरसोनकैः।
त्रिफलापिप्पलीवाजि[2]गन्धासर्षपसंयुतम्॥ ६॥
सन्नीय भोजयेदश्वीं यावकं[3] लवणाम्भसा।
विल्वचूर्णयुतं दध्ना कृशरं पाययेत्ततः॥ ७॥
मागधीत्रिफलाशिग्रुवीजापामार्गमुस्तकैः।
सुचूर्णितैः पचत्तैलं वचामरिचसर्षपैः॥ ८॥

---

५। वस्तिदानमाह। प्रथमं द्वादशाङ्गुलं सर्व्वं नेत्रं नयनसाधनीं नाड़ीं सम्पूर्णं प्रवेशयेत् योनिमार्गे इत्यर्थः। अथ तेन नेत्रेण महास्नेहस्य घृतस्य कुड़वं योन्यां वस्तिं प्रदापयेत्।

६। अत्रापामार्गादीनां मिलित्वा पलं चूर्णं लवणवारिणा भोजयेत्। लवणस्य पलं वारि च प्रस्थमात्रं गृह्णीयात्। अपामार्गः (आपां)। विल्वं विल्वशलाटुः लग्वा। शिग्रुवीजं शोभाञ्जनवीजं (साजनेवीज)। वाजिगन्धा अश्वगन्धा। सर्षपः श्वेतसिद्धार्थकः। यावकं कुलत्थं।

७। कृसरः तुल्यतिलान्नं। "तिलतण्डुलसम्पक्वः कृसरः सोऽभिधीयते" इति परिभाषा। विल्वचूर्णस्य पलम्।

८। अत्र तैलस्य प्रस्थः। मागध्यादीनां मिलित्वा कुड़वः। पाकार्थं जलञ्चाढ़कं देयम्।

---

१। प्रस्थैकं। गः।　　　२। चैव गन्धसर्षपसंयुतैः। गः।
३। पावकं। खः।

## अथाष्टमोऽध्यायः।

वन्ध्योपचारः।

अथातः संप्रवक्ष्यामि बन्ध्याया गर्भधारणम्।
शालिहोत्रादिभिः प्रोक्तं यथापूर्व्वं तपोधनैः॥ १॥
घृतेन वड़वामादौ स्निग्धां पाणिन्तु[1] वेधयेत्।
ततोनिरूहयेदश्वां यथाशास्त्रं विचक्षणः॥ २॥
ततोऽनुवासयेत् प्राज्ञः सप्तरात्रन्तु वाहयेत्।
कुड़वं विल्वचूर्णस्य माक्षिकं कुड़वद्वयम्॥ ३॥
क्षीराढ़कं भिषग्दत्वा तैलप्रस्थं विपाचयेत्।
मधुना मूर्च्छितं कृत्वा वैद्यस्तत्पाययेद्धयीम्[2]॥ ४॥

---

२। निरूहयेत् निरूहवस्तिं दापयेत्।

३। अनुवासयेदनुवासनवस्तिं प्रयोजयेदित्यर्थः॥

४। माक्षिकं मधु क्षीराढ़कं दुग्धप्रस्थचतुष्टयं। कुड़वः प्रस्थचतुर्थांशः। पाकप्रक्रिया यथा—आदौ तिलतैलस्य प्रस्थं मधुना मूर्च्छयित्वा ततः कल्कभूतं विल्वत्वक्चूर्णं दत्वा क्षीराढ़केन सह क्षीरपाकविधानेन पचेत्॥ पानार्थं घृतप्रस्थांशो देयः।

---

१। पीद्यौ। गः।          २। वैद्यस्तद्वाहयेद्धयीम्। खः।

रुद्रस्य वरुणस्यैव पवनस्य बलेन च ॥ ६५ ॥
हुताशनस्य दीप्तस्य[१] स्मर जातिं तुरङ्गम ।
स्मर राजेन्द्रपुत्रस्त्वं सत्यवाक्यमनुस्मर ॥ ६६ ॥
स्मर त्वं वारुणीं कन्यां स्मर त्वं कौस्तुभं मणिम् ।
क्षीरोदसागरे चैवममवमथ्य[२] सुरासुरैः ॥ ६७ ॥
तत्र देवकुले जातः स्ववाक्यं परिपालय ।
कुले जातस्त्वमश्वानां मित्रं मे भव शाश्वतम् ॥ ६८ ॥
शृणु मित्र त्वमेतद्वै सिद्धो मे भव वाहनम् ।
विजयेऽहं[३] धराञ्चैव संग्रामे सिद्धिमावह ॥ ६९ ॥
तव[४] पृष्ठं समारुह्य हता दैत्याः सुरैः पुरा ।
अधुना त्वां समारुह्य जेष्यामि रिपुवाहिनीम् ॥ ७० ॥
मन्त्रजापं ततः कृत्वा मन्त्रेणानेन बुद्धिमान् ।
विसृज्य सर्व्वदेवांश्च ततः पर्य्याणयेद्धयम् ॥ ७१ ॥
वाह्यागमेषु[५] येऽभिज्ञाः कुर्व्वन्ति हरिवाहनम ।
सुहृदस्ते च वाह्यानामन्ये तु हरिशत्रवः[६] ॥ ७२ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे वाहनविधौ सप्तमोऽध्यायः ॥

---

१ । दोषाच्च । गः ।
२ । मथ्यमाने । गः ।
३ । विजयोमे । खः ।
४ । भवत्-पृष्ठं । गः ।
५ । वाहनेषु च ये वर्गाः । गः ।
६ । हरिशत्रुवत् । खः ।

सैन्धवं वड़वामूत्रं गोमूत्रं[१] कर्णजं मलम् ॥ ६० ॥
सुनिगुप्तानि[२] पिष्टानि कणायासवचानि[३] च ।
अञ्जनं सर्व्वदुष्टानां देयं पर्व्वणि पर्व्वणि ॥ ६१ ॥
अनेनाभ्यञ्जितो वाजी निर्व्वाणमधिगच्छति ।
कोपं मोहं भयं त्यक्त्वा वश्यः स्यात् सादिनो भृशम्॥६२॥

सादिकार्य्यविवरणम् ।

प्रातः[४] सादी शुचिः स्नातः शुक्लाम्बरधरस्तथा ।
उपोषितो यति[५]र्भूत्वा जपेत्कर्णे च दक्षिणे ॥ ६३ ॥
हय गन्धर्व्वराज त्वं[६] शृणुष्व वचनं मम ।
गन्धर्व्वकुलजातस्त्वं मा भूयाः कुलदूषणः ॥ ६४ ॥
द्विजानां सत्यवाक्यानां सोमस्य गरुड़स्य च ।

---

६०-६१ । कासीसादीनां समभागं गोवडवाजमूत्रेण निष्पिष्य अञ्जनं विधेयम् । कासीसं उपधातुविशेषः । (हिराकस्) इति भाषा । चन्दनं रक्तचन्दनं । कौन्ती रेणुकं । सिद्धार्थो गौरसर्षपः । कर्णजं मलं कर्णगूथं । (काणेर खल) । कणा पिप्पली । अत्र कणायासवचानि चेति पाठो भवितुं युक्तः । यासो दुरालभा ।

६२-६३ । अभ्यञ्जितः सर्व्वतः कृताभ्यञ्जन इत्यर्थः । निर्व्वाणं शान्तिम् ।

---

१ । कर्णजं मलमुत्तमम् । गः । ४ । स्नातः सादी सुचिः प्रान्तः । गः ।
२ । सुनिर्गुप्तानि दृष्टानि । गः । ५ । उपोषितः यतिः । खः ।
३ । सवसानि च । गः । ६ । गन्धर्व्वराजस्त्वं । गः ।

अस्थिभिर्दशनैश्चैव वृकाणाञ्च[1] तथा बुधैः ।
विषमकरदंष्ट्राभि र्धूपमुक्तं[2] हि सर्पिषा ॥ ५६ ॥
एलागुरुमदोशीरनागकेसरचन्दनैः ।
सर्जिकातैलसंयुक्तै र्धूपयेद्दुष्टवाजिनम् ॥ ५७ ॥
विषलोहगदैलाभिस्तैलाज्यदधिचन्दनैः ।
निःशेषदोषनाशाय धूपमुक्तं हि वाजिनाम् ॥ ५८ ॥
विलिप्ता[3] गोमयैः प्रातर्निशीथे सर्व्वसन्धिषु ।
अष्टम्याञ्च विशेषेण दुष्टाः सिध्यन्ति धूपिताः ॥ ५९ ॥
कासीसं चन्दनं कौन्तीसिद्धार्थमरिचानि च ।

---

५६ । अत्र वृकास्थिदशनविषमकरदंष्ट्रानां चूर्णं कर्षत्रयं घृतञ्च कर्षमात्रं ग्राह्यं। "धूपे चूर्णे त्रयः कर्षा घृतकर्षस्तु सौरभः" इति परिभाषास्मरणात् ॥ अत्र धूपस्य नपुंसकत्वमसाधु ।

५७। अत्रापि एलादीनां त्रयः कर्षा ग्राह्याः । तैलस्य च कर्षः। मदो मृगमदः॥ अयं द्वितीयो धूपः। एला क्षुद्रैला। उशीरं (गन्धवेणामूल)। नागकेशरं नागेश्वरपुष्पं। चन्दनं रक्तचन्दनं। सर्जिका शालनिर्यासः। सर्जिक्षारो वा।

५८। तृतीयमाह विषेति। विषं पद्मकेशरं। गदो विषम्।

५९। धूपिताः पूर्व्वोक्तै र्धूपैरित्यर्थः।

---

१। वृश्चिकानां। गः।
२। धूमसम्पदि। खः।
३। विलिख्या। खः।

मण्डलं चतुरस्रञ्च गोमूत्रं चार्द्धचन्द्रकम्।
नागपाशक्रमेणैव भ्रामयेत् कटपञ्चकम्॥ ४९॥
एवमन्येषु लोहेषु चिप्रेव भ्रामयेत्कटे।
य एवं वाहयेद्वाहं तस्य कष्टं न जायते॥ ५०॥
दद्याद्भयमभीतस्य भीतस्यापि हरेद्भयम्[१]।
रहस्यं सादिनामेतद्वाहनेऽस्मिन्निवेदितम्॥ ५१॥
पूर्व्वोक्तेषु च देशेषु[२] षट्सु दोषेषु ताड़येत्।
न जातु सादिनान्यस्मिन् काले दोषशतैरपि॥ ५२॥
दम्यमानस्य वाहस्य यो दोषः सादिदोषतः।
जायतेऽसौ निराकर्त्तुं सादिना नैव शक्यते॥ ५३॥
एवं शास्त्रविधानेन यः सादी वाहयेद्धयान्।
हरयस्तस्य सिध्यन्ति भवन्ति फलदायकाः॥ ५४॥
वाहनं सत्त्व दुष्टञ्च धूपालेपनमंचकैः।
तदहं संप्रवक्ष्यामि[३] मुनिभिः कीर्त्तितं यथा॥ ५५॥

---

४९। "धनुरष्टादशे योज्यं वाजिनां मण्डलं क्रमात्। सङ्को-चयेज्जवं तावद् यावत्कटकपञ्चकम्॥ तदूर्द्धं मण्डली योज्या गोमूत्रा तदनन्तरम्। ऋजुवर्त्मसुवर्त्तौ च गोमूत्रा सर्व्वकर्मसु॥ युज्यमाना न दृश्यन्ते प्रायशोहि विचक्षणैः"॥ इति नकुलः।

---

१। अपहरेद्भयम्। गः। २। स्थानेषु। गः।
३। साम्प्रतं वच्मि। गः।

एतन्मन्त्रं जपेत्प्राज्ञो हयस्य दक्षिणे श्रुतौ।
एकविंशतिवारांश्च ततः पर्य्याणयेद्धयम्॥ ४२॥
क्रोशमेकं तमारुह्य[1] नयेद्वीक्षां शनैः शनैः।
वल्गाग्रहश्च कर्त्तव्यः सव्यापसव्यमेव च॥ ४३॥
विक्रमा पुलका पूर्णकण्ठी च त्वरिता तथा।
खलीनादि प्रयोक्तव्यं[2] सादिना वाजिनां क्रमात्॥४४॥
नातिस्थूलं[3] कृशं नाति न स्तब्धं नातिकर्कशम्।
सप्ताङ्गुलप्रमाणन्तु खलीनं कारयेद्बुधः॥ ४५॥
खलीनादिषु लौहेषु धाराषु[4] विक्रमादिषु।
क्रमेणैव तुरङ्गाणां कटानि संप्रयोजयेत्॥ ४६॥
खलीनादौ च धारासु यदा सुशिक्षितो हयः।
तदा कटेषु तं सादी भ्रामयेद्विक्रमादिभिः॥ ४७॥
शतहस्तादिकां भूमिं सप्तहस्तावसानिकाम्।
भ्रामयेद्वाजिनं सादी सव्यं चैवापसव्यकम्[5]॥ ४८॥

---

४६। कटानीति अश्वचालनाय रचिता शतहस्तादिका मण्डलादयः पञ्चविधा भूमय इत्यर्थः॥

---

१। समारुह्य हयदीक्षा। गः।
२। खलीनादी प्रयोक्तव्या। खः।
३। अतिस्थूलं। गः।
४। धारयेद्विक्रमादिषु। खः।
५। सव्यापसव्यमेव च। गः।

पक्वान्नैः पञ्चशब्दैश्च प्रातःशुचिः[१] सुवाससः।
रक्ताम्बरधरो भूत्वा रक्तपुष्पधरस्तथा॥ ४०॥

ओं नमो रैवन्ताय अश्वहृदयाय ह्रीं क्लीं ओं नमोऽतिश्वेताय[२] सौम्यरूपाय इमं[३] मम अश्वं साधय साधय बन्धय बन्धय वश्यं कुरु कुरु महावीर्य्याय रैवन्ताय नमः॥ ४१॥

---

४०। पञ्चशब्दैरिति गवाजमेषगजाश्वैरित्यर्थः। तदुक्तं तिथ्यादितत्त्वे तस्य पूजाविधौ,—"द्वारोपान्ते सुदीप्तश्च संपूज्यो हव्यवाहनः। यवाज्यतघृतोपेतैः तण्डुलैश्च सुतर्पितः॥ संपूजितव्यः पूर्णेन्दुः पयसा पायसेन च। स्कन्दः सभार्य्यो रुद्रश्च तथा नन्दीश्वरो मुनिः। गोमद्भिः सुरभिः पूज्या छागवद्भिर्हुताशनः। उरभ्रवद्भिर्वरुणो गजवद्भिर्विनायकः। पूज्यश्चाश्वैश्च रैवन्तो यथाविभवविस्तरैः" इति॥

४२। पर्य्याणयेत् सन्नाहयेत्। जयदत्तेन पर्य्याणनात् पूर्व्वं ओं नम इत्यादि मन्त्रजपस्य एकविंशतिवारं विधिः कृतः। अग्निपुराणेतु'—एतन्मन्त्रेण सह "हयगन्धर्व्वराज त्वम्" इत्यादि कर्णजापस्य विधिः कृतः यथा,—"कर्णजापं ततः कृत्वा विमुह्य च तथाप्यरीन्। पर्य्याणयेद्धयं सादी वाहयेद्युद्धतोजयः" इति॥

---

१। स्नातः। गः।

२। श्वेताय। खः।

३। इममश्वं। गः।

**रङ्गभूमौ च रैवन्तं स्थापयेत् पूजयेत्ततः ।**
**पुष्पैर्धूपैः प्रदीपैश्च चन्दनैः पायसैस्तथा ॥ ३९ ॥**

—"अश्विनी श्रवणं हस्तं उत्तरात्रितयं तथा । नक्षत्राणि प्रशस्तानि हयानामादिवाहने" इति ॥

३९ । रङ्गभूमौ रणक्षेत्रे अश्वविनयनक्षेत्रे वा । रैवन्तमिति । रैवन्तः सूर्य्यतनयो गुह्यकाधिपतिः तम् । स्थापयेदिति प्रतिमया घटेन वेतिशेषः । तस्योत्पत्तौ वह्निपुराणं यथा,—"ततोऽसौ योगमास्थाय स्वां भार्य्यां वड़वां रविः । ददर्श नियमस्थां तामश्वरूपमथाकरोत् ॥ मैथुनायोपचक्राम सूर्य्योऽसौ च त्वरान्वितः । नेच्छन्ती तेन संयोगं परपुंसोऽभिशङ्कया ॥ सम्मुखात् सम्मुखी तेजो मुखनासिकया रवेः । देवौ यतः प्रजायेतामश्विनौ भिषगन्वयौ । नासत्यौ द्वौ तृतीयश्च रेवन्तोऽश्वप्रवाहकः" इति । .. गुह्यकाधिपतित्वे च रेवन्तो विनियोजितः ॥ इति मार्कण्डेयपुराणम् ॥ तथा रैवन्तस्य पूजाविधिश्च राज्ञा यथा विधेयस्तत्र कालिकापुराणम्,—"सप्तमे हि तु रेवन्तं पूजयेत्तोरणान्तरे । सूर्य्यपुत्रं महाबाहुं द्विभुजं कवचोज्ज्वलम् । ज्वलन्तं शुक्लवस्त्रेण केशान् वितत्य वाससा । कशां वामकरे बिभ्रद्दक्षिणे तु करे पुनः । खड्गं न्यस्य महातीक्ष्णं सितसैन्धवसंस्थितं । एवंविधन्तु रेवन्तं प्रतिमायां घटेऽपि वा । सूर्य्यपूजाविधानेन पूजयेत्तोरणान्तरे" इति ॥ पूर्व्वास्यमुपविष्टस्याश्वस्य वपुषि यथाक्रमं प्रणवादिनमोऽन्तेन स्ववीजेन देवादियोजनं कृत्वा पूजयेदिति शेषः । तदुक्तमग्निपुराणे,—"स्नातस्य प्राङ्मुखस्याथ देवान् वपुषि योजयेत् । प्रणवादि नमोऽन्तेन स्ववीजेन यथाक्रमम्" इति ॥

दक्षिणादितुरङ्गस्य[१] चासने तु दृढ़ः सदा ।
अश्ववाराः समाख्याताः शेषास्तु भयदायकाः[२] ॥ ३५ ॥
ग्रीष्मादिषु न कर्त्तव्यमृतुषु त्रिषु वाहनम् ।
हेमन्तादिषु कर्त्तव्यं सादिभिः शास्त्रवेदिभिः ॥ ३६ ॥
प्रतिपत्सु त्रयोदश्यां पञ्चम्यां[३] वा सिते दले ।
धृतिसिद्ध्यादियोगेषु वासरे चन्द्रसूर्य्ययोः ॥ ३७ ॥
मूलरोहिणिहस्तेषु पुष्ये चैवोत्तरासु च ।
एवंविधे दिने सादी वाहनं वाहयेत् शुभे ॥ ३८ ॥

---

३५। अश्ववारा अश्वसादिनः ।

३६। ग्रीष्मादिष्विति आदिपदेन वर्षाशरदोर्ग्रहणम् । हेमन्तादिषु हिमशिशिरवसन्तेषु। उक्तञ्च अग्निपुराणे,—"हेमन्तः शिशिरश्चैव वसन्तश्चाश्ववाहने । ग्रीष्मे शरदि वर्षासु निषिद्धं वाहनं हये" इति । ग्रीष्मादिषु ऋतुत्रयेषु—इत्यनेन ज्यैष्ठात्कार्त्तिकपर्य्यन्तं वाहननिषेधः, तस्मात् मार्गशीर्षाद्वैशाखपर्य्यन्तं वाहनविधिश्च सूचितो भवति द्विमासिकर्त्तुविभागात् ॥

३७-३८। अश्वानां आदिवाहने तिथिनक्षत्रादीन्याह । प्रतिपत्स्वित्यादि । सिते दले शुक्लपक्षे। उत्तरास्विति बहुवचनेन उत्तराषाढ़ायां उत्तरफल्गुन्यां उत्तरभाद्रपदे चेति ज्ञेयम्। उक्तञ्चाग्निपुराणे,

---

१। दक्षिणां दिशि तुरङ्गस्य । गः।
२। शेषाःस्युर्भारदायकाः। गः ।
३। द्वादश्यां वा । गः ।

वल्गाश्च संप्रवक्ष्यामि मुनिभिः परिकीर्त्तिताः[१] ।
पुष्पदन्ती च गोकर्णी तूलोलूला तुलोद्धृता ॥ ३० ॥
नागपीड़ी पुष्पधारी दुर्मुष्टी च रजस्तनी[२] ।
द्विहस्ती चैकहस्ती च शुभगा शोभना मता ॥ ३१ ॥
इत्येता द्वादश[३] वल्गा मुनिभिः परिकीर्त्तिताः ।
आरूढ़ः कर्णमध्ये तु मनो लक्षति वाजिनः ॥ ३२ ॥
शनैस्तु वाहयेत्पूर्व्वं पश्चात् पुलकमादिशेत् ।
न वक्रो न तथोत्तानो न कुब्जो नाप्यधोमुखः ॥ ३३ ॥
न भवेत् स्तब्धगात्रस्तु स भवेदश्ववाहकः ।
स्थिरोरुः स्थिरपार्श्वश्च त्रिकोन्नतः स्थिरासनः ॥ ३४ ॥

३० । वल्गाश्वमुखरज्जुः । सा च पुष्पदन्त्यादिभेदेन द्वादशधा । हयलीलावत्यान्तु उत्क्षिप्तादिभेदेन चतुर्दशविधा । तदुक्तं,—"उत्क्षिप्ता शिथिला तथोत्तरवती मन्दा च वैहायसी विचित्रैककराङ्कन्धरसमोत्कीर्णा विभक्ता तथा । अत्युत्क्षिप्तलोद्धृते खलु तथा व्यागूढ़गोकर्णिके वाह्यानां कथिताश्चतुर्दशविधा वल्गाप्रभेदाः समाः"—इति ॥

३३ । पूर्व्वं प्रथमम् ।

१ । याः प्रकीर्त्तिताः । गः ।

२ । दृढ़मुष्टिश्च कुश्वनी । गः ।

३ । द्वादशाः । गः ।

विक्रमा गतिधारा तु चतुःपादप्लुता स्मृता[१] ।
मुखपादसमायुक्ता पूर्णकण्ठी च या[२] भवेत् ॥ २६ ॥
स्वेच्छया त्वरिता धारा ताड़िता चैव पञ्चमी ।
षष्ठी चैव तु या धारा स्वर्गलोकेषु तिष्ठति[३] ॥ २७ ॥
या सङ्ख्या रोमकूपानां वाहकस्य हयस्य च ।
तावद्वर्षान् वसेत् स्वर्गे हयपृष्ठे हतो नरः ॥ २८ ॥
यल्लोकं वाजिपृष्ठेषु हता गच्छन्ति मानवाः ।
तं लोकं नाधिगच्छन्ति वड़वासु हताश्च ये ॥ २९ ॥

---

२६ । विक्रमाया लक्षणं जयदत्तेन स्वयमेव कृतं न पुलकाया इति तदेव कथ्यते । पुलानाम प्लुताद्यनेकापरनामा हयानां गतिविशेष इति मल्लिनाथः । पुलनालक्षणं हयलीलावत्यां । यथा,—"प्लुतां प्लवङ्गितामाङ्कर्या धारा पुलनाभिधा । क्षिपति समविशेषानुत्क्षिपत्यग्रपादान्॥ प्रसरति पुरतोऽश्वः साथ धारा पुलाख्या । तथा,—पार्ष्णिप्रधानं प्रविधाय रागाद् बल्गां श्लथीकृत्य वहेत्पुलाख्याम्"—इत्यादि । पुटः खुरः । पुटो लुटनवेल्लने ॥

२८-२९ । इदं श्लोकद्वयं ख-ग-पुस्तकयोर्नास्ति ।

---

१ । गतिधारा च चतुष्पादी पुटा । गः । चतुष्का पुलका मता । खः ।
२ । तु या । गः ।
३ । स्वर्गलोकेऽवतिष्ठति । गः । स्वर्गलोकेषु गीयते । खः ।

पञ्च धाराः प्रवक्ष्यामि ऋषिभिर्याः[1] प्रकीर्त्तिताः।
प्रथमा विक्रमा धारा द्वितीया पुलका स्मृता॥ २४॥
तृतीया पूर्णकण्ठी तु चतुर्थी त्वरिता स्मृता।
पञ्चमी चैव या धारा श्रूयते न च दृश्यते[2]।
षष्ठी चैव तु या धारा निरालम्बा प्रकीर्त्तिता[3]॥ २५॥

---

२४। पञ्च धारा इति धाराख्या वाजिनां पञ्च गतय इत्यर्थः। यथोक्तं शुक्रेण,—"गतयः षड्विधा, धाराः स्कन्दितं रेचितं प्लुतम्। धौरीतकं वल्गितञ्च तासां लक्ष्म पृथक् पृथक्" इति॥ "धौरितं वल्गितं प्लुत्युत्तेजितोत्तेजितानि च। गतयः पञ्च धाराख्यास्तुरङ्गानां क्रमादिमाः"॥ इति हेमचन्द्रः॥ "गतिः पुला चतुष्का च तद्वन्मध्यजवापरा। पूर्णवेगा तथा चान्या पञ्च धाराः प्रकीर्त्तिताः" —इति॥ "गतिरेका प्लुता चास्य चातुरीचा द्वितीयका। वेगसन्धिस्तृतीया च धारा वेगवती तुरी॥ धारा तु पञ्चमी प्रोक्ता न शृणोति न पश्यति। सर्व्वकर्म्मकृतो वाजी तस्मात्तां परिवर्जयेत्" —इति नकुलः,—"आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम्। गतयोऽमूः पञ्च धाराः"—इत्यमरः॥ पञ्चविधधारासंज्ञा ग्रन्थविशेषेषु विभिन्नाः कृता अपि फलतस्तुल्या एव ज्ञेयाः। अत्र षष्ठ्या निरालम्बायाः स्वर्गएव प्रसिद्धत्वान् मर्त्यलोके पञ्चैव धर्त्तव्याः।

---

१। मुनिभिः। गः।
२। रालम्बा प्रकीर्त्तिता। खः।
३। श्रूयते न च दृश्यते॥ खः।

क्रुद्धे उरसि[1] हन्तव्यो भ्रान्तचित्ते[2] तथोदरे ॥ १८ ॥
भीतञ्च ताड़येत् पश्चात् मुखे चोन्मार्गगामिनम्[3] ।
ज्ञात्वा दोषञ्च रूपञ्च स्थानेष्वेतेषु ताड़येत् ॥ १९ ॥
अस्थानताड़ितो वाजी यावज्जीवं न सिध्यति ।
नो जहाति च तद्दोषं यावज्जीवत्यसौ हयः ॥ २० ॥
कुपिते पुच्छसंस्थाने भ्रान्तौ जानुद्वये तथा ।
सर्व्वस्याप्राप्तदण्डस्य दण्डमेकं निपातयेत् ॥ २१ ॥
अस्थाने ताड़ितो वाजी बह्वन् दोषानवाप्नुयात् ।
तावद्भवन्ति ते दोषा यावज्जीवत्यसौ हयः ॥ २२ ॥
अवाहिता विनश्यन्ति सर्व्वकर्म्मक्षमा अपि ।
कृशा व्याधिपरीताङ्गा जायन्तेऽत्यन्तवाहनात् ॥ २३ ॥

---

प्रहेषिते स्कन्धवाङ्को; वड़वालोकिनं तथा। उपवेशे च निद्रायां कटिदेशे च ताड़येत्॥ दुश्चेष्टितं मुखे हन्यादुन्मार्गप्रस्थितं तथा। जघने स्खलिते हन्यात् नेत्रमार्गे दुरुत्थितम्। यः कुण्ठप्रकृतिर्वाजी तं सर्व्वत्रैव ताड़ये"दिति॥ अत्र नकुलोऽपि,—"हेषिते स्कन्धसंस्थानं भ्रान्ते जानुद्वयं तथा। सर्व्वस्य प्राप्तदण्डस्य दण्डमेकं निपातयेत्॥ ........समुद्दिष्टं स्खलने जघनान्तरे। भीते वक्षःस्थलं हन्यात् वक्त्रे-त्रोन्मार्गगामिनि। कुपिते पुच्छसंस्थानं भ्रान्ते जानुद्वयं तथा"—इति॥

---

१। कुपितोरसि। गः।　　३। उन्मार्गगामिनि। गः।
२। भ्रान्तचित्तम्। गः।

चित्तं यो नैव जानाति तुरङ्गस्य समासतः।
न वहन्ति हयास्तस्य दण्डपातेन[1] ताड़िताः॥ १६॥
ह्रेषिते वलिते[2] भीते तथाचोन्मार्गगामिनि।
कुपितोद्भ्रान्तचित्ते वा षट्सु दण्डं निपातयेत्॥ १७॥
ह्रेषिते ताड़येन्मूर्ध्नि जानुभ्यां वलिते[3] तथा।

---

निद्रो जिताशनः। हयकालबलप्राणहयकामास्त्रयोगवित्। शीतोपचारसारज्ञो रणक्रीड़ासु शिक्षितः। वाजिनां हृदयज्ञश्च स्थाने दन्तनिपातवित्॥ अदुष्टमनसो दक्षः सर्व्वक्लेशसहः शुचिः। ग्रासे धन्ये तु पानीये परव्यूहावलोकने। त्रिषु जङ्घानप्रदेशेषु निर्गमे कुशलोऽस्त्रवित्" इति॥

१७। ह्रेषितादिषु षट्सु कालेषु दन्तनिपातनमुक्तं। भोजस्तु द्वादशसु कालेषु कशादिताड़नमाह,—"तीक्ष्णं मध्यं पुनर्द्वाभ्यां जघन्यं निष्ठुरैस्त्रिभिः। उपवेशेऽथ निद्रायां स्खलिते दुष्टचेष्टिते। वड़वालोकनोत्सुक्ये बहुगर्व्वितह्रेषिते। सन्त्रासे च दुरुत्थाने विमार्गगमने भये॥ शिक्षात्यागस्य समये सन्धाने चित्तविभ्रमे। दण्डः प्रयोज्यो वाहानां कालेषु द्वादशस्वपि" इति।

१८। तेषु कस्मिन् कुत्र आहन्यात्तत् श्लोकद्वयेनाह ह्रेषिते इत्यादि॥ अत्र भोजोऽपि एवमाह,—"ग्रीवायां भीतमाहन्यात् त्रस्तञ्चैव च वाजिनम्। विभ्रान्तचित्तमधरे त्यक्तशिक्षञ्च ताड़येत्॥

---

१। दण्डेनैव निपातयेत्। गः। २। स्खलिते। गः।
३। स्खलिते। गः।

दोषगुणताड़नविवरणम्।

स्थूलः क्रोधी च मूर्खश्च चित्तोत्सुकचलासनः।
अस्थाने दण्डपाती च वाजी तस्य न सिध्यति ॥ १३ ॥
प्रचलति यस्य कटिरूर्द्धबाहुश्च दण्डवान्।
न तस्य वाहनं वाजी दुर्लक्ष्यं वाजिवाहितम्[1] ॥ १४ ॥
दृढ़ासनोऽथ तत्वज्ञो जितमुष्टि[2]र्निरालसः।
अविरागी[3] स्थिरश्चापि षड़ेते वाजिवाहकाः ॥ १५ ॥

---

१३। अतःपरं दोषगुणताड़नविवरणमाह,—

१४। दुर्लक्ष्यं वाजिवाहितमिति वाजिवाहितं दुःखेन लक्ष्यते दृश्यते इत्यर्थः ॥

१५। दृढ़ासनत्वादिगुणसम्पन्ना एते षट् प्रशस्ता अश्वसादिनः। उक्तञ्च नाकुले प्रशस्ताश्वसादिलक्षणम्। यथा,—"चलकिसलयपादः कर्णमध्यैकदृष्टि, र्न चलति कटिदेशो व्यापितोऽपि स्थितो यः। हयहृदयमभिज्ञः स्थानदण्डाभिपाती, स खलु तुरगयोक्ता पूज्यते पार्थिवेन्द्रैः॥ दार्ढ्यं मुष्टिगतं करेण लघुता क्रोधानिलैर्वाजिनः, सत्वैकस्थिरबुद्धिमध्यमनतिः शास्त्रार्थविद्धार्म्मिकः। काले दण्डनिपातविश्रमपरस्ताम्बूलपूर्णाननः, श्रीमाल्लक्ष्मयुतो महाहयपरो राजाधिपैः पूज्यते। उरः स्थिरं यस्य चलौच द ौ, त्रिकोन्नतः संहतमानसश्च। स वाजिवाहः प्रथितः पृथिव्यां, शेषा नरा भारकरा हयानाम्। प्राज्ञः सत्यबलोत्साही दृढ़सर्व्वाङ्गसौष्ठवः। जितशीतातपालस्यो जित-

---

१। वाजिवाहनम्। गः। ३। अवैराग्यः। गः।
२। जितमूर्त्तिः। गः।

शक्तिश्च द्विविधा प्रोक्ता वलदौर्व्वल्यसम्भवा।
वलिष्ठो दुर्व्वलत्वेन दुर्व्वलोऽपि वलेन वा[१] ॥१०॥

रङ्गभूमिविवरणम्।

छलेनौपाधिकायाश्च सत्वं ज्ञात्वा च वाहयेत्।
सान्द्रां सुकठिनाञ्चैव पाषाणोदकसंयुताम्॥ ११ ॥
तृणकाष्ठसमायुक्तां रङ्गभूमिन्तु वर्जयेत्।
समाञ्च विपुलाञ्चैव[२] किञ्चित्पांशुसमन्विताम् ॥
एकान्ते विजने रम्ये रङ्गभूमिन्तु कारयेत् ॥ १२ ॥

---

रूपमाह सहजे इति। अत्र सहजादिशब्दत्रयं प्रथमान्तं भवितुं युज्यते। अन्यथा पाठो न लगति॥

१०। शक्तिः वलसम्भवा दौर्व्वल्यसम्भवा चेति द्विविधा।

१२। समां नतु उन्नतानतां। विपुलां महतीं सुदीर्घप्रशस्तामित्यर्थः। किञ्चित्पांशुभिः अत्यल्पधूलिभिः समन्वितां युक्तां। इदं विशेषणं रङ्गभूमेरतिकाठिन्यं निवार्य्याश्वानां पादाघातेनाक्लेशकरत्वं सूचयति। अत्र नकुलः,—"समाञ्च विपुलाञ्चैव किञ्चित्पांशुसमन्वितां। एकान्ते विजने चैवं रङ्गभूमिं हयं नयेत्। सान्द्राञ्च कठिनाञ्चैव पाषाणोदकगर्त्तितां॥ तृणकाष्ठसमायुक्तां रङ्गभूमिं विवर्जयेत्" इति॥

---

१। वलिष्ठे दुर्व्वलत्वञ्च वलित्वं दुर्व्वलेन च। गः।
२। सुविपुलाम्। गः।

ब्राह्मणान् शक्तिदानेन[1] साम्ना चैव तु क्षत्रियान् ।
वैश्यं दण्डेन शब्देन शूद्रं दण्डेन वाहयेत् ॥ ६ ॥
प्रत्यूषे वाहयेद्विप्रं क्षत्रियं प्रहरे गते ।
वैश्यं सन्ध्यागते काले शूद्रं रात्रौ च वाहयेत् ॥ ७ ॥

सत्वशक्तितद्वाहनविवरणम् ।

सत्वञ्च त्रिविधं प्रोक्तमुत्तमाधममध्यमम्[2] ।
उत्तमञ्चोपशामेन[3] साम्ना दण्डेन मध्यमम् ॥ ८ ॥
शब्दाङ्गेन च दण्डेन वाहयेदधमं बुधः[4] ।
सहजे निर्म्मले वाहे तैलदुग्धस्य रूपवान्[5] ॥ ९ ॥

---

६ । शक्तिदानेन इति यथोक्तवचनोच्चारणपूर्व्वकमारोहणात् प्राक् द्विजेऽश्वे यथावश्यकं द्विविधशक्तिसञ्चारणं कृत्वेत्यर्थः । शक्तिसञ्चारणवचनानि च जयदत्त एवास्मिन् प्रकरणे स्वयमेवाग्नेयादुद्धृत्य वक्ष्यति । यथा,—"हय गन्धर्व्वपुत्र त्वं शृणुष्व वचनं मम"—इत्यादि । साम्ना चैव तु क्षत्रियानिति आरोहणात् प्राक् परतो वक्ष्यमाणैर्यथोक्तवचनैः क्षत्रियमश्वं सान्त्वयन्नित्यर्थः । एतदप्याग्नेयपुराणादुद्धृतं जयदत्तेन यथा,—"स्मर राजेन्द्रपुत्रस्त्वं सत्यवाक्यमनुस्मर" इत्यादि ॥

८ । सत्त्वशक्तितद्वाहनप्रकरणमाह । सत्त्वं पूर्व्वं व्याख्यातम् ॥

९ । शब्दाङ्गेन दण्डेन इति केवलं शब्दरूपेण ताड़नेनेत्यर्थः ।

---

१ । भक्तिदानेन । गः । ३ । उत्तमञ्चैव साम्येन । गः ।
२ । अधमोत्तममध्यमम् । गः । ४ । त्रिभिः । गः ।
५ । सहजा निर्म्मला वाहास्तैलदुग्धमधारवत् । गः ।

सत्वेन[१] ज्ञायते जाती रूपेण तु च वाहयेत्।
सामप्रधानं[२] दण्डञ्च त्रिविधं विनियोजयेत् ॥ ३ ॥
त्रासी लुब्धो दयालुश्च[३] विप्रः स परिकीर्त्तितः।
शूरश्च[४] दृढ़मन्युश्च क्षत्रियस्तुरगः स्मृतः ॥ ४ ॥
पापिनः कल्मषा रुक्षा[५] दुष्टा वैश्याः प्रकीर्त्तिताः।
विरूपा विषमाश्चैव शूद्राश्चण्डा उदाहृताः ॥ ५ ॥

३। अश्वानां क्षत्रियादिचतुर्व्विधजातीनामुत्पत्तिमाह नकुलः,—“वाजिनो जलजाः केचिद्वह्निजातास्तथापरे। समीरप्रभवाश्चान्ये उलूकमृगजास्तथा ॥ जलोद्भवा द्विजातीयाः क्षत्रिया वह्निसम्भवाः। समीरप्रभवा वैश्या एणोलूकाश्च शूद्रकाः”—इति। अपिच,—“विवेकी सदृशोविप्रः तेजस्वी क्षत्रियो बली। दुष्टभावस्तथा वैश्यः शूद्रो निःसत्वकारकः”—इति। एषां त्रिविधदण्डमप्याह नकुलः,—“ब्राह्मणः सामवाद्दी च भेदवाद्दी च क्षत्रियः। उपादानेन वैश्यः स्यात् शूद्रो दण्डेन ताड़ितः”—इति॥ त्रिविधं दण्डमिति उत्तममध्यमाधमत्वेन त्रिरूपं दण्डमित्यर्थः॥

४—५। क्षत्रियादीनां लक्षणमाह त्रासीत्यादिना श्लोकद्वयेन। पापिनोऽमङ्गलाः। विरूपाः कुत्सितरूपाः। विषमा विसदृशाङ्गा अङ्गसौष्ठवरहिता इत्यर्थः॥

१। साम्येन जायते जातिः जातिरूपेण वाह्येत्। खः।
२। समप्रदानदण्डैश्च विविधं। गः।
३। रसालुब्धः सुधातुश्च। गः।
४। शूराश्चैव दृढ़ा मान्याः। गः।
५। कल्परूपाश्च। खः।

## अथ सप्तमोऽध्यायः ॥

वाहनविधाने

विप्रादितद्वाहनविवरणम् ।

ब्रह्मणैव यथोद्दिष्टो वाहानां वाहने[1] विधिः ।
सारन्तस्य समुद्धृत्य सर्व्वं तत्कथयाम्यहम् ॥ १ ॥
तुरङ्गवाहकस्यापि दोषस्य च गुणस्य च ।
विशेषन्तु विधानेन तत्सर्व्वं कथयाम्यहम् ॥ २ ॥

२ । अश्वानां दोषगुणविषये नकुलेनैवमुक्तम् । तुरङ्गवाहकस्यापीति अपि शब्देन तुरङ्गस्यापि । दोषगुणौ वाहनादिशिक्षासम्भवा विति ज्ञेयौ ॥ दोषस्येति अनेन स्थूलत्वमूर्खत्वक्रोधित्वादिकं तथाऽस्थानदण्डपातित्वादिकं बोद्धव्यम् ॥ गुणस्य चेत्यनेन समनन्तरमेव वक्ष्यमाणं हयहृदयाभिज्ञत्वादिकं बोद्धव्यम् ॥ सत्वेन इति सत्वं नाम अश्वानां नैसर्गिकं तेजो दर्पो वा त्रिविधगुणेष्वाद्यः । यथाह भोजः,—
"तेजोनिसर्गजं सत्त्वं वाजिनां स्फुरणं रजः । क्रोधस्तम इति ज्ञेयास्त्रयोऽपि सहजा गुणाः"—इति । जातिरूपेण इति जातिस्वरूपानुसारेणेत्यर्थः ॥

१ । वाहनो विधिः । गः ।

शक्त्या[1] चैव जवेनापि रणसूरस्त्वजाघनः[2] ।
सादिभक्त्येच्छते याति[3] ताजिकादधिकस्तथा ॥ १४ ॥
परिमण्डलदेहास्तु तीक्ष्णकर्णमुखा हयाः ।
पञ्चदेशोद्भवा[4] दृष्टास्तथा सारस्वताश्च ये ॥ १५ ॥
लम्बकर्णाऽजटश्चैव[5] अकुलः परिकीर्त्तितः ।
साम्भलः श्लिष्टजानुश्च जटालश्चाकुलोपमः ॥ १६ ॥
वर्त्तुलश्चापि ह्रस्वश्च टङ्कणः परिकीर्त्तितः ।
दाक्षिणात्यो भवेद्गुण्ठो योऽधन्यः[6] सर्व्ववाजिनाम्॥१७॥
जवहीना महादुष्टाः पूर्व्वदेशसमुद्भवाः ।
वाजिवद्देशराणाञ्च देशं विन्द्याद्विचक्षणः ॥ १८॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे जन्म-
देशे षष्ठोऽध्यायः ॥

---

१७ । टङ्गणः टाङ्ण इति यस्य भाषा ॥

---

१ । भ्रान्त्या । खः ।
२ । रणसूरतयाध्वनः । गः ।
३ । जितेऽङ्गेऽपि । गः ।
४ । टव्क । गः ।
५ । लम्बकर्णजटस्चव । गः ।
६ । जघन्यः । गः ।

केकणादेशजातानां मध्यमानाञ्च वाजिनाम् ।
ताजिकैः सदृशं वक्तं बाहुल्येन विनिर्द्दिशेत् ॥ ९ ॥
सुवृत्तदेहस्तीक्ष्णश्च सप्रमाणेन मध्यमः ।
उरुजातः[१] समुद्दिष्टः किञ्चित् स्थूलो मनाग्जवः[२] ॥१०॥
अतिस्थूलोऽतितीक्ष्णश्च[३] ह्रस्वग्रीवस्तुरुस्तथा ।
तुरुष्कः कीर्त्तितो वाजी स्थूलवक्त्र[४]मुखश्च यः ॥ ११ ॥
केकनाकारदेहस्तु[५] भवेन्माण्डविको हयः ।
शान्त्याचैव[६] प्रमाणेन केवलं नैव तत्समः ॥ १२ ॥
सिन्धुदेशोद्भवो वाजी पृष्ठन्यश्चारुकोरकः[७] ।
आननञ्चापि दीर्घञ्च तस्य पृष्ठं प्रकीर्त्तितम्[८] ॥ १३ ॥

---

९ । केकणः कोङ्कणश्च तुल्य एव ॥

१० । मनाग्जव इत्यपेक्षया मनोजव इति पाठः साधीयान् मध्यमस्य मनाग्जवत्वस्यासङ्गतत्वात् ॥

---

१ । अत्युन्नतः । गः ।
२ । कीरस्थूलो मनोजवः । गः ।
३ । सूक्ष्मश्च ह्रस्वग्रीवस्तनुस्तथा । गः ।
४ । जंघ । गः ।
५ । केकाणकाहस्तु भवेन्माठविको हय । गः ।
६ । प्रान्तया नैव । गः ।
७ । प्रधानस्यानुकारकः । गः ।
८ । समादिशेत् । गः ।

सम्भलाश्वाः कुशाश्चैव[1] जटदेशोद्भवाश्च[2] ये ।
अधमाष्टगणैः सार्द्धं हये[3] प्राग्दक्षिणोद्भवाः ॥ ४ ॥
वृत्तदीर्घाञ्चितग्रीवा[4] ह्रस्वकर्णा महाजवाः ।
महाकाया महोरस्का निस्त्रासास्ताजिका मताः ॥ ५ ॥
अत्यन्तविनतं येषां निर्मांसञ्च मुखं भवेत् ।
पीनेन कटिदेशेन मुखराश्च भवन्ति ते ॥ ६ ॥
अधन्याश्च[5] महासाराः संग्रामे चैव पूजिताः ।
अपि शस्त्रहताङ्गाश्च नैव मुञ्चन्ति सादिनम् ॥ ७ ॥
पारसीकास्ताजिकाभा[6] कोङ्काणाः केचिदुन्नताः[7] ।
स्थूलाः श्लक्ष्णशरीराश्च[8] प्रधाना दीर्घपृष्ठकाः ॥ ८ ॥

---

४ । सम्भलाः सम्भलदेशजाताः । प्राग्दक्षिणोद्भवाः—इति पूर्व्वदक्षिणदेशजाता अश्वा अधमाः । नकुलेनतु गोङ्करादीनामधमत्वमुक्तम् । यथा "गोङ्कराः सवरासाश्च सिन्धुपाराः कनीयसः । अन्यदेशोद्भवा ये च नीचनीचाश्च ते स्मृताः" इति ॥

५ । महाजवा महावेगवन्तः । निस्त्रासा निर्भयाः ॥

८ । श्लक्ष्णशरीराः कृशकायाः । श्लक्ष्णं दभ्रं कृशं तन्वित्यमरः ॥

---

१ । कुलाः । खः ।
२ । जटादेशोद्भवाः । खः ।
३ । अधमानां गणाः । गः ।
४ । वृत्तदीर्घोन्नतग्रीवाः । गः ।
५ । अजात्याश्वा महाशूराः संग्रामे नैव पूजिताः । गः ।
६ । स्युरधिकाः । खः ।
७ । किंचिदूनकाः । खः ।
८ । स्थूलशरीराश्च । खः ।

## अथ षष्ठोऽध्यायः ।

जन्मदेशः ।

अश्वानां जन्मदेशांस्तु प्रवक्ष्याम्यनुपूर्व्वशः ।
उत्तमानाञ्च मध्यानां हीनानां यच्च[1] सम्भवः ॥ १ ॥
उत्तमास्ताजिकाः प्रोक्तास्तथा पारसिकाश्च ये ।
केक्काणाश्चैव ये वाहाः पृष्ठजा ये च कीर्त्तिताः ॥ २ ॥
तुरौ[2] जाताश्च कीराश्च भूरुष्टा भाण्डजाश्च ये ।
पार्व्वताः सैन्धवा मध्यास्तथा सारस्वता हयाः ॥ ३ ॥

---

१ । अश्वानां जन्मदेशभेदेन उत्तमत्वादिभेदोऽपि नकुलेन प्रदर्शितः,—"उत्तमा मध्यमा नीचाः कनीयांसस्तथापरे । चतुर्धा वाजिनो भूमौ जायन्ते देशसंश्रयादिति"—अत्र हेमचन्द्रः । "आजानेयः कुलीनः स्यात् तत्तद्देशास्तु सैन्धवाः । वनायुजाः पारसीकाः काम्बोजा वाह्लिकादयः" इति स स देशोऽश्वानां जन्मभूमिरिति ॥

२ । नकुलस्तु ताजिकखरशाणोत्तराणामुत्तमाश्वत्वमाह । "ताजिकाः खरशाणाश्च उत्तराश्चोत्तमा हयाः"—इति । तथा गोजिकाणकेकाणयोर्मध्यमाश्वत्वमाह यथा "गोजिकाणाश्च केकाणाः प्रौढाहाराश्च मध्यमाः" इति ॥

३ । "नकुलस्तु मध्यमाश्वं षड्विधमाह-तद्यथा "गोजिकाणाश्च केकाणाः प्रौढ़ाहाराश्च मध्यमाः । भाण्डजाश्चोत्तमांसाश्च राजशूलाश्च मध्यमाः"—इति ॥ तुरौ तुरुष्कदेशे ॥

---

१ । हीनानाञ्चैव सम्मतः । खः ।
२ । काश्मीरदेशजाताश्च सैन्धवा मध्यमाः स्मृताः । कः । उरौ । खः ।

## अथ पञ्चमोऽध्यायः ।

दशाक्षेत्रविवरणम् ।

दशादशकमश्वानां जीवितं परिकीर्त्तितम् ।
प्रवरं वाजिनामेतद् ब्रह्मणा सृजता प्रजाः ॥ १ ॥
वासराः सप्ततिर्द्वौ च वर्षाणाञ्च तथा त्रयम् ।
दशाप्रमाणं वाहानां शालिहोत्रेण कीर्त्तितम् ॥ २ ॥
प्रथमे प्रथमा चैवं द्वितीया च द्वितीयके ।
दशा एवं क्रमेणैव भवेत् क्षेत्रफलप्रदा ॥ ३ ॥
अपानादौ ललाटे तु प्रथमं क्षेत्रमुच्यते ।
ललाटान्मस्तकं यावद् द्वितीयं समुदाहृतम् ॥ ४ ॥
ग्रीवास्कन्धावधिच्छिन्नं तृतीयं परिकीर्त्तितम् ।
उरोजन्तु तथांशे च ककुदं काकसं तथा ॥ ५ ॥
चतुर्थं विहितं क्षेत्रं पञ्चमं चांसकं भवेत् ।
कटिं वदन्ति षष्ठञ्च सप्तमं स्फिगुदाहृतम् ॥ ६ ॥
स्थुरकौ चाष्टमं क्षेत्रं जंघा च नवमं स्मृतम् ।
कूर्चसन्धिः खुरं चैव दशमं परिकीर्त्तितम् ॥ ७ ॥
एवं बुद्धा भिषक् प्राज्ञः सदृशं फलमादिशेत् ।
क्षेत्रसाम्ये दशायास्तु वयोज्ञानपरायणः ॥ ८ ॥
ककुदावर्त्तिनोऽश्वस्य तथा शृङ्गान्वितस्य च ।
सर्वकालं फलं दुष्टं दशा तत्र निरर्थका ॥ ९ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे दशा-
क्षेत्रीये पञ्चमोऽध्यायः ।

खल्लाग्रा विपुला दन्ता भवन्ति पतितोत्थिताः ॥ २९ ॥
खल्लभागे विनापूर्णे[१] व्यञ्जनानां न सम्भवाः[२] ।
पूर्णेषु खल्लभागेषु जायन्ते कालिकादयः ॥ ३० ॥
निम्नं कृष्णञ्च दन्ताग्रं खल्लमित्यभिधीयते ।
पूर्णतां तस्य जानीयात् षष्ठात्[३] प्रभृति वत्सरात् ॥ ३१ ॥
खल्लेषु[४] कालिकाभावो नात्र कार्य्या विजानता ।
नियता कालिका रेखा सुपूर्णे दन्तमस्तके ॥ ३२ ॥
द्वयोर्भवति षष्ठेऽब्दे चतुर्णां सप्तमे तथा ।
षण्णामष्टासु[५] वर्षेषु दन्तानां कालिकाक्रमः[६] ॥ ३३ ॥
कालिकानुक्रमेणैव हरिण्यादिषु बुद्धिमान् ।
द्वौ द्वौ वर्षेण जानीयाद्वाजिनां व्यञ्जनं प्रति ॥ ३४ ॥

इति श्रीमहासामन्तजयदत्तकृतेऽश्वशास्त्रे आयुर्वयोज्ञाने चतुर्थोऽध्यायः ।

---

मेव लक्षणं परतः कृतम् । अखल्लं निम्नकृष्णत्वरहितं शिरो येषान्ते तथोक्ताः ॥

---

१ । विलादूर्द्धं । गः ।
२ । समुद्भवाः । कः ।
३ । षष्ठप्रभृतिवत्सरः । खः ।
४ । यान्तिनैव । खः ।
५ । खल्लमष्टासु । खः ।
६ । क्रमात् । खः ।

विंशत्यन्तेषु सर्वेषु वाजिनां दशनोद्भवः[१] ॥ २५ ॥
त्रयोविंशावसानेषु एकविंशादिषु त्रिषु ।
शङ्खरूपा[२] भवेच्छङ्खा पूर्वोक्त[३]स्थानमाश्रिता ॥ २६ ॥
छिद्रञ्च चलनं चैव तथा पातश्च यः स्मृतः ।
नवाब्दतः क्रमाद्विद्याद्यञ्जनं तुरगात्[४] स्मृतम् ॥ २७ ॥
अतिवद्धाः कषायाश्च तनवश्चैव ये द्विजाः[५] ।
ते भवन्ति द्विवर्षस्य शुक्लाश्चैवाब्दजन्मनः[६] ॥ २८ ॥
अखल्लशिरसः[७] स्लक्ष्णा भवन्त्यपतितोत्थिताः ।

---

२६ । शङ्खाभे शुक्रोऽपि एवमाह यथा,—"शङ्खाभौ चैकविंशाब्दाच्चतुर्विंशाब्दतः सदा" इति ॥

२७ । "छिद्रं सञ्चलनं पातो दन्तानाञ्च त्रिके त्रिके" इति शुक्रस्त्रिवर्षानन्तरमाह । व्यञ्जनं कालिकादिप्रकाशनमित्यर्थः ॥

२८ । दन्तोद्भेदपतनपुनरुत्थानादिकमुक्ता एकद्विवर्षजातानां लक्षणमाह "अतिवद्धाः" इति ॥

२९ । अपतितोत्यपतितोत्थानां परीक्षामाह अखल्लेत्यादि । अखल्लशिरस इति दन्तस्य निम्नक्षणाग्रत्वं खल्लत्वमिति जयदत्तेन व्याख्य-

---

१ । दशनोद्भवा । खः ।
२ । शङ्खाकारा । खः ।
३ । प्रयुक्त । खः ।
४ । तुराग्रतम् । खः ।
५ । त्रयः । खः ।
६ । युक्ता चैव द्विजाना । खः ।
७ । ईषच्च । खः ।

वक्रा तु[१] कालिका रेखा कृष्णा दन्ताग्रसंस्थिता ।
षष्ठे च सप्तमे वर्षे चाष्टमे च भवेत् क्रमात् ॥ २१ ॥
सा पीता हरिणी ज्ञेया कालिकास्थानमाश्रिता ।
नवमे दशमे वर्षे भवेदेकादशे तथा ॥ २२ ॥
कृष्णा चैव भवेच्छुक्ला दन्तमूर्ध्नि समुद्भवा ।
द्वादशाब्दं[२] समारभ्य[३] भवेद् यावच्चतुर्द्दश ॥ २३ ॥
सिता सिद्धार्थकाकारा काचेति परिकीर्त्तिता ।
पञ्चदशाब्दमारभ्य याचच्छप्तदशादितः[४] ॥ २४ ॥
माक्षिका माक्षिकाकारा[५] भवेदष्टादशादिषु[६] ।

---

२१ । कालिकारेखायाः स्थानाकारावाह । वक्रेति । कालिकायाः कालनिर्व्वाचनन्तु अत्र विशेषेण करोति षष्ठ इति ॥

२२ । हरिणीप्रभृतिरेखाणां स्थानकाललक्षणाण्याह । आपीतेत्यादि-पञ्चभिः श्लोकैः ॥

२४ । अत्र शुक्लस्तु पञ्चदशाब्दादाह "दशपञ्चाब्दतस्तौ तु काचाभौ क्रमतः स्मृतौ" इति ॥

२५ । शुक्लोऽपि माक्षिकायामष्टादशाद्याह,—"अष्टादशाब्दतस्तौ हि मध्वाभौ भवतः क्रमात्" इति ॥

---

१ । वक्रान्ते । गः ।
२ । द्वादशाब्दात् । खः ।
३ । मासवेदा । गः ।
४ । सप्तदशाधिका । गः ।
५ । मक्षिकाकारा । खः ।
६ । अष्टदशाधिका । गः ।

जातदन्तद्वयं बाल्ये पतत्यब्दे तृतीयके।
चतुरो दशनान् विन्द्याच्चतुर्थे पतितोत्थितान्॥ १८॥
पञ्चमे पतितोद्भूतान् षड्वदन्ति[1] मनीषिणः।
षष्ठाष्टासु च सर्व्वेषु[2] कालिकादिसमुद्भवः॥ १९॥
कालिका हरिणी शुक्रा[3] काचा चैव समाक्षिका।
शङ्खा चैव क्रमेणाश्ववयसः परिसूचिका॥ २०॥

१८। बाल्ये पञ्चवर्षात्मककाले। तस्य पञ्चवर्षात्मकत्वे शुक्रः,—"बाल्यमश्वदृषोष्ट्राणां पञ्चसंवत्सरं मतं। मध्यं यावत् षोड़शाब्दं वार्द्धकन्तु ततःपरम्" इति। अतएव वाजिनां बाल्यं पञ्चवर्षपर्य्यन्त-कालः। षष्ठादाषोड़शाब्दं यौवनम्। अत ऊर्द्ध्वं वार्द्धक्यम्। जातदन्तद्वयम् इति जातेषु दन्तेषु षट्सु मध्ये द्वयं। "अश्वस्य षट् सिता दन्ताः प्रथमाब्दे भवन्ति हि। कृष्णलोहितवर्णास्तु द्वितीयेऽब्दे ह्यधोगताः" इति शुक्रः। पतितोत्थितान् आदौ पतितान् पश्चाद् उत्थितान् द्वितीयवारप्ररूढ़ानित्यर्थः॥

१९। षष्ठाष्टास्विति। षष्ठाद् वर्षाद् अष्टासु षष्ठसप्तमाष्टमेषु। सर्व्वेषु दन्तेषु॥

२०। यदुक्तं कालिकादिसमुद्भव इति तदेव विवृणोति कालि-केति॥

१। दन्तांश्च। गः।   २। वर्षेषु। खः।   ३। मुक्ताः। गः।

व्यङ्गुला द्वादश द्वे[1] च वर्षाणां तस्य जीवितम् ।
त्रयोदशाब्दं जीवेद् यो रेखाः स्युश्चतुरङ्गुलाः ॥ १३ ॥
तिर्य्यग्गे चोर्द्धगे चैव रेखे द्वे यस्य वाजिनः[2] ।
प्रोथजे यस्य वाहस्य तस्य विद्याच्चतुर्दश ॥ १४ ॥
वामेन[3] वा दक्षिणेन शेते यश्चैव सर्व्वदा ।
बहुमूत्राल्पमूत्रश्च चिरं जीवति नो हयः ॥ १५ ॥
विनतः पूर्व्वकायेन स्थूलजानुश्च यो हयः ।
शूनाक्षिकूटस्तब्धाक्षः[4] स्वल्पायुः स प्रकीर्त्तितः ॥ १६ ॥

वयः ।

लक्षणेनापि संयुक्ता वयोवृद्धास्तु वाजिनः ।
नैव कार्य्यकरा[5] येन ज्ञेयं तेषामतो[6] वयः ॥ १७ ॥

---

१५ । अत्र बह्वाहारस्याल्पमूत्रपुरीषस्य शीघ्रविनाशित्वं नकुल आह । "बह्वाहारः सुखशीलस्त्यजेल्लालाञ्च यो भृशम् । अल्पमूत्रपुरीषश्च सोऽपि शीघ्रं विनश्यति" इति ॥

१६ । अस्मिन् विषये शुक्रः,—"दन्तानामुद्गमैर्वर्णैरायुर्ज्ञेयं वृषाश्वयोः" इति ॥

१७ । लक्षणेति । तेनेति येन हेतुना । अतो हेतोः बुधैः तेषां ज्ञेयं वय इति शेषः ॥

---

१ । अङ्गुलद्वादशद्वे च । गः । ४ । शूनाक्षिकूटपृष्ठश्च । गः ।
२ । जायते । गः । ५ । कार्य्यक्षमाः । गः ।
३ । दक्षिणेन च पार्श्वेन । खः । ६ । ज्ञेयं तेषामितोऽन्यथा । खः ।

कुष्टिकानां किणा येषां दृश्यन्ते वाजिनां स्फुटाः।
प्रतिस्रोतः पिवन्त्यम्भो ये च ते दीर्घजीविनः॥ ६॥
पद्मपत्रदलाकारं जिह्वाग्रं यदि वाजिनाम्।
दन्ताश्च मौक्तिकाकारा लिङ्गं येषाञ्च निर्म्मलम्॥ ७॥
शीत्कारञ्च भवेद् येषां[१] लाङ्गुलं क्षिपतां पुनः[२]।
प्रस्वेदः शुभगन्धस्तु नखा[३] वै दर्पणोपमाः॥ ८॥
येषाञ्च दृढ़रोमाणि ते सर्वे चिरजीविनः।
स्निग्धगम्भीरदीर्घाश्च प्रोथजा यस्य वाजिनः।
भवन्ति विपुला रेखास्तं विद्याद्दीर्घजीवितम्॥ ९॥
छत्रचामरभृङ्गारखड्गशंखाब्जसन्निभाः।
शुक्तिवज्रदलाकारा ध्वजभद्रासनोपमाः[४]॥
श्रीवृक्षस्वस्तिकाभासाः प्रोथरेखा[५]श्चिरायुषाम्॥१०॥
ऊर्द्ध्वं प्रोथे सिता रेखा यस्य वामेन चोन्नता[६]।
ह्रस्वा वा यस्य वाहस्य न चिरं तस्य जीवितम्॥ ११॥
ऊर्द्ध्वं प्रोथे[७] समा रेखा दृश्यन्ते यदि[८] वाजिनः।
तस्य मृत्युः समुद्दिष्टो दशमं प्राप्य वत्सरम्॥ १२॥

---

१। वाचि। कः।
२। लाङ्गूलं चालनं पुनः। गः।
३। नखाश्च। गः।
४। पद्मासनोपमाः। खः।
५। प्रोथोत्थिता। खः।
६। चोन्नताः।
७। प्रोथ। खः।
८। यस्य। खः।

# अथ चतुर्थोऽध्यायः ।

आयुः ।

आयुर्लक्षणमश्वानामत ऊर्द्ध्वं प्रचक्षते[१] ।
शालिहोत्रादिनिर्द्दिष्टं[२] यथापूर्व्वं तपोधनैः ॥ १ ॥
सुसंहितास्तु[३] ये वाहा ह्रस्वकर्णास्तथैव च ।
स्वरनेत्रस्वभावेषु न दीनाश्चिरजीविनः ॥ २ ॥
महाघोणा महाकाया ये चाश्वाः पृथुवक्षसः ।
तेषां दीर्घं भवेदायुः स्निग्धाङ्गा[४] ये च सर्वदा ॥ ३ ॥
कर्णाग्रे पीड़िते येषां सिन्दूराभस्य दर्शनम् ।
शोणितस्य भवेत् क्षिप्रं ते मताश्चिरजीविनः ॥ ४ ॥
न विष्किरन्ति ये वालं स्वग्रासाय तुरङ्गमाः ।
न वा जिघ्रन्ति ये चापि तेऽपि दीर्घायुषो मताः ॥ ५ ॥

---

२ । सुसंहिताः सुघठितकलेवरा इत्यर्थः ।

---

१ । प्रवक्ष्यते । कः ।
२ । शालिहोत्रादिभिर्दृष्टं । खः ।
३ । सुसंहृताः । खः ।
४ । स्निग्धाङ्गाश्चैव ये सदा । खः ।

षोड़शाङ्गुलदीर्घा तु जंघा चैवोत्तमा[२] स्मृता ॥ १९० ॥
चतुर्द्दश तथा मध्ये हीने[१] च द्वादशाङ्गुलः ।
एवंविधप्रमाणन्तु निर्द्दिष्टं शास्त्रशालिभिः ॥ १९१ ॥
अपाङ्गात् पुच्छमूलन्तु दैर्घ्येणाश्वं प्रमाणयेत् ।
खुरान्तात् ककुदं यावदूर्द्ध्वमानेन बुद्धिमान् ॥ १९२ ॥
वक्षोभागे तु संवेष्ट्य रज्वा वा सूत्रकेण वा ।
परिणाहं तुरङ्गस्य मापयेन्मतिमान् भिषक् ॥ १९३ ॥
एवं प्रमाणभागेन विभक्ताङ्गः शुभः स्मृतः ।
अतो हीनाधिकाङ्गाश्च हरयो नैव पूजिताः ॥ १९४ ॥

इति श्रीजयदत्तकृतेऽश्वशास्त्रे सर्व्वलक्षणे
तृतीयोऽध्यायः ।

---

चतुरङ्गुलम् । चत्वारिंशच्च सप्ताद्याः स्कन्धाः सम्यक् प्रकीर्त्तिताः । अतिसूक्ष्मं तथानिम्नं पुच्छं हस्तद्वयायतम् । लिङ्गं हस्तप्रमाणञ्च तथाण्डौ चतुरङ्गुलौ । मार्गस्थानं चतुर्विंशं । कटिकच्चान्तरं प्रोक्तं चत्वारिंशत् प्रमाणतः । मणिबन्धद्वयञ्चैव खुराश्च चतुरङ्गुलाः” इति ॥

१९२—१९३ । दैर्घ्यौन्नत्यपरिणाहमानोपायमाह अपाङ्गादिति ।

---

१ । मध्या हीना । कः ।

पृष्ठं वक्षः कटिश्चैव मुखतुल्यं समादिशेत्।
अङ्गुलद्वयहीनन्तु मुखादि मध्यमाधमम्॥ १८८॥
निर्द्दिशेन्मतिमांश्चैव[1] वाजिशास्त्रविशारदः।
सप्ताङ्गुलं खुरश्चैव उत्तमाश्वस्य कीर्त्तितम्॥ १८९॥
षड़ङ्गुलो भवेन्मध्यो जघन्यश्चतुरङ्गुलः।

---

सोत्तमः। सप्तविंशप्रमाणेन मुखमश्वस्य शस्यते" इति। नकुलमते च सप्तविंशत्यङ्गुलम्॥

१८८। पृष्ठवक्षःकटिमानन्तु द्वात्रिंशदङ्गुलमित्यर्थः। शुक्रमते तु "वाजिनां मुखमानेन सर्व्वावयवकल्पना" इति वचनात् पृष्ठादीनां मानमपि चत्वारिंशदङ्गुलं ज्ञेयम्। नकुलमते च पृष्ठं चतुर्विंशाङ्गुलं वक्षः षोड़शाङ्गुलं कटिश्च सप्तविंशाङ्गुलेति। तदुक्तं "पृष्ठवंशः चतुर्विंशः सप्तविंशा तथा कटी। हृदयं षोड़शाङ्गुल"मिति। अङ्गुलद्वयहीनमिति मध्यमस्य त्रिंशदङ्गुलम्। अधमस्य च अष्टाविंशाङ्गुला मुखाद्यवयवा इत्यर्थः। अत्र शुक्रः। "द्वात्रिंशदङ्गुलमुखो मध्यमः स उदाहृतः। अष्टाविंशदङ्गुलो यो मुखे नीचः प्रकीर्त्तितः" इति॥

१८९। नकुलमते खुरपरिमाणं चतुरङ्गुलम्। तदुक्तं-"खुराश्च चतुरङ्गुलाः" इति।

१९०। मध्यजघनादिपरिमाणं नकुलस्य मते चतुश्चतुरङ्गुलम्। कर्णताल्वादिपरिमाणमाह नकुलः—"कर्णौ षड़ङ्गुलौ प्रोक्तौ तालुकं

---

१। मतिमान् वैद्यः। खः। २। चोत्तमे हये। खः।

ऊर्द्धमानप्रमाणन्तु परिणाहं विनिर्द्दिशेत् ।
उत्तमानां[1] च मध्यमानां हीनानाञ्चैव वाजिनाम्॥१८५
अर्द्धसप्तमहस्तन्तु श्रेष्ठं दैर्घ्येण निर्द्दिशेत् ।
षड्भिर्मुष्टिविहीनैश्च मध्यमञ्च विचक्षणः ॥ १८६ ॥
पञ्चहस्तप्रमाणस्तु[1] जघन्यः समुदाहृतः ।
द्वात्रिंशदङ्गुलं वक्त्रमुत्तमाश्वस्य कीर्त्तितम् ॥ १८७ ॥

---

अधमस्य परिमाणं मुष्टिशून्येन हस्तेन हीनः त्रिहस्तः । शुक्राचार्य्यमते तु चतुरशीत्यङ्गुलोन्नतोऽधम इति ।

१८५ । परिणाहो विस्तारः । स च सर्व्वेषामेव वाजिनां स्वस्वोन्नत्येन समानः । उदरपरिणाहन्तु शुक्रः त्र्यङ्गुलाधिकं त्रिगुणं मुखपरिमाणादाह । "परिणाहस्तूदरस्य त्रिगुणस्त्र्यङ्गुलाधिकः" इति ॥ उत्तमानाञ्चेत्यादि—निर्द्दिशेदित्यन्तः पाठः क—पुस्तके नास्ति । मध्यमानां स्थाने मध्यानामिति पाठो युक्तः ।

१८६ । एतन्मते सार्द्धत्रियवाङ्गुलस्य चतुस्त्रिंशदङ्गुलहस्तपरिमाणस्य सार्द्धसप्तहस्तमुत्तमस्य दैर्घ्यम् । शुक्रमते तु पञ्चयवपरिमिताङ्गुलस्य द्वात्रिंशाधिकशताङ्गुलम् ।"शिरोमणिं समारभ्य पुच्छमूलान्तमेवहि । तृतीयांशाधिकं दैर्घ्यं मुखमानाच्चतुर्गुणम्" इति । दीर्घस्य द्व्यधिकं शतमिति च । अस्य श्लोकस्य प्रथमपादद्वयं ग-पुस्तके नास्ति ॥

१८७ । उत्तमाश्वमुखमानं द्वात्रिंशदङ्गुलम् । शुक्रमते तु चत्वारिंशाङ्गुलम् । तदुक्तम् "चत्वारिंशाङ्गुलमुखो वाजी यश्चोत्त-

---

१ । पञ्चहस्तप्रमाणन्तु । खः ।

देवसत्वः शुभो भर्त्तुः पैशाचश्चाशुभः स्मृतः ॥ १८१ ॥

प्रमाणम् ।

सार्द्धं[१] यवत्रयं प्रोक्तमङ्गुलस्य तपोधनैः ।
प्रमाणं शालिहोत्राद्यै र्वाजिशास्त्रविशारदैः ॥ १८२ ॥
हस्तोऽङ्गुलानां त्रिंशत्या चतुरुत्तरया स्मृतः ।
चतुर्हस्तैस्तु विख्यातः शास्त्रोक्तैरुत्तमो हयः ॥ १८३ ॥
अर्द्धहस्तेन हीनस्तु भवेन्मध्यस्तुरङ्गमः ।
मुष्टिशून्येन हस्तेन हीनश्चाप्यधमः स्मृतः ॥ १८४ ॥

---

१८१ । व्यत्ययेन देवसत्वगुणवैपरीत्येन कर्द्दमादौ घृणाराहित्य-रूपेणेत्यर्थः । देहसत्व इत्यादिपाठः पुस्तकान्तरे नास्ति ॥

१८२ । शुक्रस्तु वाजिमाने पञ्चयवात्मकमङ्गुलमाह—"पञ्च-यवाङ्गुलेनैव वाजिमानं पृथक् स्मृतम्" इति । सार्द्धमित्यादि मध्य-स्तुरङ्गम इत्यन्तः पाठः क-पुस्तके नास्ति ॥

१८३ । एतन्मते चतुर्व्विंशत्यङ्गुलपरिमितहस्तस्य हस्तचतुष्टयमौ-न्नत्यं । शुक्राचार्य्यमते तु औच्चन्तु मुखमानेन त्रिगुणमित्युक्तदिशा त्रिगुणचत्वारिंशाङ्गुलं विंशत्यधिकशताङ्गुलं वा भवति । नकुलमते तु अशीत्यङ्गुलं औन्नत्यं भवति । यथोक्तम्-"अशीत्यङ्गुल उत्सेधः"इति ॥

१८४ । सार्द्धत्रिहस्तपरिमितोमध्यम इति चतुरशीत्यङ्गुलो भवति । शुक्राचार्य्यमते तु पञ्चयवाङ्गुलपरिमाणस्य षण्णवत्यङ्गुलयः॥

---

१ । ऊर्द्धम् ।

अनिष्टे[1] चैव गन्धे च सर्व्वमेतदनिष्टकम् ।
तस्मात्[2] सर्व्वप्रयत्नेन सुगन्धोऽश्वः प्रपूजितः ॥ १७८ ॥
संग्राह्यो न तु दुर्गन्धो नायकेन विजानता ।
यथाशास्त्रं[3] समुद्दिष्टो गन्धस्तौरङ्गमो[4] मया ॥ १७९ ॥

सत्वानि ।

अमेध्ये कर्द्दमे चैव वस्तमूत्रे[5] विशेषतः ।
घृणा यस्यास्ति वाहस्य देवसत्वः[6] प्रकीर्त्तितः ॥ १८० ॥
पिशाचसत्वो मन्तव्यो व्यत्ययेन तुरङ्गमः ।

---

"शुभगन्धः सदा विप्रः क्षत्रियो गुरुगन्धकः । घृतगन्धः सदा वैश्यो मीनामोदीच शूद्रकः" इति ॥

१८० । सत्वं स्वभावधर्म्मः । स च कान्तप्रगल्भदीर्घग्रीवानतिक्रूरानतिमृदुत्वादिरूपः । देवसत्वस्य लक्षणमाह शुक्रः । "श्मश्रुहीनमुखः कान्तः प्रगल्भोत्तुङ्गनासिकः । दीर्घाद्भुतग्रीवमुखः ह्रस्वकुक्षिखुरश्रुतिः । तुरप्रचण्डवेगश्च हंसमेघसमस्वनः । नातिक्रूरो नातिमृदु र्देवसत्वो मनोरमः" इति ॥

---

१ । अनिष्टश्चैव गन्धे तु सर्व्वमेतत् प्रतीपकी । कः ।
२ । तस्य स्यात् स प्रयत्नेन सुगन्धोऽश्वस्य पूजितः । गः ।
३ । यथाशास्त्रोदितः । खः ।
४ । सौरभदेहजः । खः ।
५ । वत्समूत्रे । खः ।
६ । देहसत्वः । खः ।

सुस्निग्धा पार्थिवी[1] छाया नानाज्योतिःसमन्विता[2]।
पद्मरागारुणा चैवमाग्नेयी परिकीर्त्तिता ॥ १७२ ॥
शुद्धस्फटिकसंकाशा सुस्निग्धा चैव वारुणी।
रूक्षा दीना च वायव्या परुषा[3] चैव निन्दिता ॥ १७३ ॥
पार्थिवी च तथाग्नेयी वारुणी या च कीर्त्तिता।
तिस्रस्तु शुभदा[4]श्छाया वायवी त्वशुभप्रदा ॥ १७४ ॥
प्रस्विन्नानां[5] भवेद्गन्धो वाहानां गात्रसम्भवः।
मतिमद्भिः स निर्द्दिष्टः शुभाशुभनिवेदकः[6] ॥ १७५ ॥
मनसः कुरुते तुष्टिं[7] घ्राणमार्गगतस्तु यः।
स शुभो वाजिनां गन्धो विपरीतोऽतिकुत्सितः ॥ १७६ ॥
शुभगन्धो भवेद्वाजी धनपुत्रप्रदः[8] प्रभोः।
मित्रावाप्तिजयञ्चैव कल्याणञ्च नियच्छति ॥ १७७ ॥

---

१७५। प्रस्विन्नानां सञ्जातघर्म्माणामित्यर्थः।
१७७। शुभगन्धादेर्जातिसूचकत्वे,—नकुलः।

---

१। पृथिवी। खः।
२। नामायुति। खः।
३। पुरुषैस्त्वैव। खः।
४। शुभप्रदाः। खः।
५। प्रस्थितानां। खः।
६। निवेदिकः। कः।
७। मनसा कुरुते पुष्टिं। गः।
८। धनमायुःप्रदः। खः।

स्वयमेव यदा वक्तुं दृष्टो लोकयते[१] हयः।
एवं कृत्वा[२] प्रयाणे तु तदा विद्याज्जयं प्रभोः॥ १६६॥
सर्व्वदैव शिरोघ्नस्तु[३] सर्व्वेषां नैव पूजितः।
वामपादाभिघातस्तु प्रभोर्याचानिषेधकः॥ १६७॥
स्वामिन्यारूढ़मात्रे तु[४] दक्षिणं पार्श्वमात्मनः।
तुरङ्गमो यदा पश्येत्तदा भर्त्तुर्जयो भवेत्॥ १६८॥
पुच्छभागं[५] यदा वाहो वामतो विकिरेत्सदा।
तदा भर्त्तुः प्रवासः स्याद् दक्षिणे विजयस्तथा॥ १६९॥
प्रकिरन्ति[६] यदात्यर्थं सर्व्वं पुच्छं तुरङ्गमाः।
अकस्मादेव जाताश्च तेषां भीतिः प्रभोः स्मृता॥ १७०॥

छायाः।

छाया वाजिशरीरेषु शुभाशुभनिवेदिनी।
वाजिनश्च प्रभोश्चैव तां ब्रवीम्यनुपूर्व्वशः॥ १७१॥

---

१७१। छाया लावण्यविशेषः।
१७२। पद्मरागारुणेति पद्मरागो मरकतः।

---

१। ढौकयते॥ गः।
२। कालिकायाः। गः।
३। विरोधस्तु। गः।
४। स्वामिना रूढमात्रेण। खः।
५। पुच्छं वाहं। खः।
६। प्रकिरन्ते। खः।

उत्पाताः।

अतःपरं प्रवक्ष्यामि तुरगाणां विभागतः।
ज्वलितेन यथाङ्गेन फलं वाच्यं शुभाशुभम्॥ १६०॥
यदा ज्वलति वाहस्य सर्व्वगात्रे हुताशनः।
तदा विन्द्यादनावृष्टिमब्दमेकं न संशयः॥ १६१॥
अन्तःपुरविनाशस्तु मेहने ज्वलिते भवेत्।
उदरे वित्तनाशस्तु[१] पायौ पुच्छे पराजयः॥ १६२॥
उत्तमाङ्गे च वक्त्रे च स्कन्धे चैवासने तथा।
भर्त्तुर्जयाय वाहानां ज्वलनं यच्च नेत्रजम्॥ १६३॥
धूमं ललाटे वाह्योश्च तथा वक्षसि निन्दितम्।
तत्रैव[२] ज्वलनं शस्तं यथा नासासमुद्भवम्॥ १६४॥
यदा व्याधिं विना वाजी ग्रासं त्यजति दुर्म्मनाः।
अश्रुपातञ्च कुरुते तदा भर्त्तुरशोभनम्॥ १६५॥

---

१६१। नकुलस्त्वत्र स्फुलिङ्गदर्शनस्य पराजयसूचकत्वमाह। यथा- "स्फुलिङ्गा यस्य दृश्यन्ते पुच्छदेशे च वह्निजाः। परचक्रागमाशंसी विज्ञेयो हयपण्डितैः" इति॥

१६५। अत्र नकुलोऽप्येवमाह। यदाव्याधिं विनेत्यादि॥

---

१। वित्तनाशाय। गः। २। तथैव। गः।

अथ चेद्वड़वायान्तु[1] विरोधमधिगच्छति ॥ १५५ ॥
निगूढ़वृषणश्चाश्वः[2] स धन्यः सर्व्वकामदः ।
द्विवर्षात्तु[3] समारभ्य यावता पञ्चवार्षिकः ॥ १५६ ॥
दन्तानां मुष्कयोश्चैव सम्भवो वाजिनः स्मृतः ।
अत ऊर्द्ध्वं न जायन्ते मुष्कौ दन्ताश्च वाजिषु ॥ १५७ ॥
अशुभन्तु फलं वाच्यमभावेन शुभाशुभम्[4] ।
सुरथस्य गतं राज्यं ककुदस्यैव दूषणात् ॥ १५८ ॥
हृतकम्बलवैकर्णपशुदन्ताच्च पाण्डुरात् ।
शृङ्गिणी स्तनदोषेण स्तनी च सगरे क्षयम् ।
जान्वावर्त्तश्चदोषेण पञ्चत्वं रावणो गतः ॥ १५९ ॥

---

१५८-१५९ । इदं श्लोकद्वयं ग-पुस्तके नास्ति । अस्य चैतिहासिकी वार्त्ता तत्वतः कुत्रापि नाधिगम्यते । केवलमेव सुरथस्य राज्यनाशोऽश्वार्थं युध्यमानस्य जैमिनीयेऽश्वमेधे, मार्कण्डेये च वैरहेतुको दृश्यते । सगरस्य चाश्वकारणेन वंशक्षयो महाभारते प्रसिद्धः । अश्वदोषेणेति न प्राप्यते प्रमाणम् । रावणस्य विनाशे अश्वदोषहेतुत्वं नैव दृश्यते ॥

---

१ । वड़वाजातु । खः ।
२ । निगूढ़वृषणाद्वाश्च । कः ।
३ । द्विवर्षन्तु । खः ।
४ । ततस्तथा । तद्वयोः । कः ।

वृषणाभ्यां सजाताभ्यां सञ्जातवृषणो भवेत् ।
तद्वद्वृषणसञ्जातस्तनाभ्यां विद्यते[१] स्तनी ॥ १५१ ॥
त्रिभिः कर्णैस्त्रिकर्णो च व्याघ्राभो व्याघ्रवर्णकः[२] ।
एकेनाङ्गेन हीनेन भिन्नेन[३] च विशेषतः ॥ १५२ ॥
यमजं वाजिनं[४] विन्द्याद् वामनं वामनाकृतिम् ।
वर्णादेकेन पादेन अन्यवर्णेन यो हयः ॥ १५३ ॥
मुषलीति समाख्यातो वाजिशास्त्रविशारदैः[५] ।
विरोधं नैव यो याति दृष्ट्वाश्वां मुष्कवर्जितः[६] ॥ १५४ ॥
इन्द्रवृद्धः स विख्यातो भर्त्तुश्च कुलनाशनः ।

---

१५१ । सजाताभ्यां सहस्तनेनेति शेषः । जाताभ्यां वृषणाभ्यां कोषाभ्यां । अस्य श्लोकस्य द्वितीयतृतीयपादौ ख-ग-पुस्तकयोर्नस्तः ॥

१५२ । भिन्नेन भग्नेन विसदृशेन वा एकाङ्गहीनो भिन्नाङ्गश्चेति द्विविधो यमजः ॥

१५३ । यो हयः वर्णात् स्ववर्णादित्यर्थः । अन्यवर्णेन भिन्नवर्णेन पदेन उपलक्षित इति शेषः ।

---

१ । विद्धितः । गः ।
२ । व्याघ्रचर्मकः । कः ।
३ । निम्नेन । गः ।
४ । वासनं । कः ।
५ । भर्तुः कुलविनाशनः । खः ।
६ । मुष्कवर्जितान् । कः ।

एकेन[१] लम्बमानेन मुष्केणैकाण्डसंज्ञकः ।
अत्यन्तरोमशाभ्यान्तु ताभ्यां जाताण्ड[२] उच्यते ॥१४६॥
स्कन्धे वक्षसि वाह्वोश्च अंसदेशे तथैव च ।
अन्यवर्णो भवेद्वाजी कञ्चुकी स प्रकीर्त्तितः ॥१४७॥
यस्यान्यवर्णा रेखा स्यात्[३] पादे कूर्चे च वाजिनः ।
मार्जारपादः प्रोक्तोऽसौ न धन्यः[४] कुलनाशनः ॥१४८॥
अन्यवर्णस्य वाहस्य शिरः कृष्णं यदा भवेत् ।
त्रिसरी नाम सः[५] प्रोक्तो भर्त्तुः कुलविनाशनः ॥१४९॥
द्विखुरं गोखुराकारं खुरैर्विन्द्याद्विचक्षणः ।
अथवा सीवनीयुक्तै[६] र्निम्नमध्यैस्तु निर्द्दिशेत् ॥१५०॥

---

१४६ । ताभ्यां मुष्काभ्याम् ॥

१४८ । अन्यवर्णा रेखा स्ववर्णभिन्नवर्णा रेखा ॥

१४९ । अन्यवर्णस्य कृष्णभिन्नवर्णस्येत्यर्थः ॥

१५० । खुरैः गोखुराकारं गोखुरवत् द्विधाविभक्तखुरमित्यर्थः । त्रिवलीयुक्तैरिति पाठे भङ्गीयुक्तैः ॥

---

१ । एकतः । खः ।
२ । जात्यण्डमुच्यते । कः ।
३ । यस्यान्यवर्णा रेखाः स्युः । कः ।
४ । सधनं कुलनाशनः । कः ।
५ । तामसः । कः ।
६ । त्रिवलीयुक्तैः । खः ।

चतुर्भिः पञ्चभिश्चैव हीनदन्तः प्रकीर्त्तितः ॥ १४१ ॥
सप्तभिश्चाष्टभिर्दन्तैः ख्यातश्चाधिकदन्तकः ।
अङ्गुष्ठपर्वसङ्काशः छागशृङ्गोपमस्तथा ॥ १४२ ॥
जम्बूवदररूपश्च तथा चामलकोपमः ।
आम्रास्थिसदृशश्चापि हरीतक्याः फलोपमः ॥ १४३ ॥
दग्धचर्म्मनिभश्चापि वालुसंस्थान एव च ।
कीलः[१] कर्णान्तरे यस्य केशान्ते चापि दृश्यते ॥ १४४ ॥
धौरेयः सर्वपापानां शृङ्गी वाहः स कीर्त्तितः ।
एवंविधेन शृङ्गेन शृङ्गी राष्ट्रे न वासयेत् ॥ १४५ ॥

---

"करालो दन्तुरे तुङ्गे" इत्यमरः। यस्य अधरे नीचे उत्तरा वा ऊर्द्ध्वे देशे इति यावत्। दन्त एक एवेत्यर्थः। जायते स करालीति प्रकीर्त्तितः। चतुर्भिः पञ्चभिरित्यनेन षड्भिर्न्यूनैरिति अभिप्रेतम्। एवं सप्तभिरष्टाभिरित्यनेनापि षड्भिरधिकैरिति बोध्यम्। यद्वा करालो दन्तरोगविशेषः स यस्यास्तीति कराली तदुक्तं,—"शनैः शनैः प्रकुरुते वायुर्दन्तसमाश्रितः। करालान् विकृतान् दन्तान् करालो न स सिध्यति"—इति ॥

१४२-१४५। शृङ्गीलक्षणमाह अङ्गुष्ठेत्यादि ॥

१४४। कीलः शङ्कुवत् चिह्नमित्यर्थः ॥

१४५। धौरेयः अग्रवर्त्ती प्रधानमित्यर्थः।

---

१। कालः। खः।

एकाण्डश्चैव जाताण्डः[1] कञ्चुकी त्रिसरी[2] तथा ।
मार्जारपादो व्याघ्राभस्त्रिकर्णो द्विखुरी स्तनी ॥ १३६ ॥
यमजो वामनश्चैव कुब्जस्तित्तिरसन्निभः[3] ।
वानराक्षो विड़ालाक्षो मुषली चेन्द्रवृद्धकः ॥ १३७ ॥
येषां पृष्ठे हतो भर्त्ता जातदन्तस्तथैव च ।
एते दोषान्विता वाहा न ग्राह्या भूतिमिच्छता ॥ १३८ ॥
धनप्राणहरा ह्येते बन्धुविग्रहकारकाः ।
एषां चिह्नं प्रवक्ष्यामि येन जानन्ति सादिनः ॥ १३९ ॥
पूर्वशास्त्रानुसारेण मुनीनां वचनं यथा ।
आवर्त्तो यस्य ककुदि[4] काकुदी स उदाहृतः ॥ १४० ॥
कराली वाधरे दन्तो जायते यस्य चोत्तरा[5] ।

---

मूकश्च यश्च तित्तिरसन्निभः । विषमश्वेतपादश्च भ्रुवावर्त्तविवर्जितः ॥ अशुभावर्त्तसंयुक्तो वर्जनीयस्तुरङ्गमः” इति । उक्तञ्च शुक्रनीतौ । “कृष्ण-तालुः कृष्णजिह्वः कृष्णौष्ठश्च विनिन्दितः । सर्व्वतः कृष्णवर्णो यः पुच्छे श्वेतः स निन्दितः” इत्यादि ॥

१४० । काकुदीलक्षणं स्पष्टम् ॥

१४१ । करालो दन्तुरः तुङ्गो वा दन्तो विद्यते यस्य स कराली

---

१ । एकाण्डो जन्मतोऽण्डश्च । गः ।　　३ । काकतित्तिरसन्निभः । खः ।
२ । त्रिसरिः । गः ।　　४ । ककुदे । गः ।
५ । कराली चाधरे दन्ते जायते यस्य चोत्तरम् । खः ।

**अतोऽश्वानां न वेगः स्यात् स्थिराणां न च जृम्भणा।**
**तासामधोमुखत्वाच्च न भवेद् वड़वास्वपि॥ १३४॥**

मल्लदोषाः।

**काकुदी कृष्णजिह्वश्च कृष्णशेफाण्डतालुकः।**
**कराली हीनदन्तश्च शृङ्गी चाधिकदन्तकः॥ १३५॥**

---

इत्यर्थः। जृम्भणा शाखासु प्रसर्पणञ्च वायोरिति शेषः। न भवेत्। वड़वास्वपि तासां शाखानामधोमुखत्वात् न भवेत् स्रुत इति शेषः॥ अपिशब्दश्चार्थः॥

१३५। एते काकुद्यादिजातदन्तान्ताः सप्तविंशति र्वाहा दोषान्विता न ग्राह्या इति जयदत्तः। एतदारोहणे स्वामिनो विनाशात्। नकुलस्तु चतुर्दशविधान् दोषान्वितानाह,—"हीनदन्तोऽधिकश्चैव कराली कृष्णतालुकः। मुषली च तथा शृङ्गी षड़ेते स्वामिघातकाः॥ एकाण्डजातश्चैकाण्डो हीनाङ्गोऽप्यधिकाङ्गकः। परित्याज्यः स वाञ्छद्भिरन्विष्य परमं यशः॥ घण्टी वदनको वाली शृङ्गीचैव चतुर्थकः। वर्जनीयः प्रयत्नेन सर्व्वे ते पापकृत्तमाः॥ घण्टी च स्वामिनं हन्ति कराली धनसङ्क्षयम्। अतःपरं तथा वाली शृङ्गी राष्ट्रविनाशनः" इति॥ एवमाग्नेयेऽप्युक्ताः सप्तविंशतिः संज्ञान्तरेण,—"हीनदन्तो विदन्तश्च कराली कृष्णतालुकः। कृष्णजिह्वश्च यमजो जातमुष्कश्च यस्तथा॥ द्विशफश्च तथा शृङ्गी त्रिकर्णी व्याघ्रवर्णकः। खरवर्णो भस्मवर्णो जातवर्णश्च काकुदी॥ श्वित्री च काकसादी च खरसारस्तथैव च। वानराक्षः कृष्णशठः कृष्णगुह्यस्तथैव च॥ कृष्णप्रोथश्च

ईदृशं ह्रेषितं[1] नेष्टं हयानाञ्च तपोधनैः ।
वाजिशास्त्रार्थतत्त्वज्ञैः कीर्त्तितं मुनिसत्तमैः ॥ १३० ॥
बाले रोगिणि वृद्धे[2] च क्षुधिते च पिपासिते[3] ।
श्रान्ते भीते कृशे[4] वाहे न ग्राह्यं स्वरलक्षणम् ॥ १३१ ॥
अथ यः पुलतो[5]ऽश्वस्य शनैरविशदो[6] ध्वनिः ।
अन्तरुत्पद्यते कश्चित्तदश्वप्लुत उच्यते ॥ १३२ ॥
तत्र कूजत्यधो नाभे र्गुदवस्त्यण्डमाश्रितः ।
चतसृष्वन्तशाखासु वायुरेवोर्द्धमुच्छलन् ॥ १३३ ॥

---

१३२। अथेति। पुलतः तन्नामकगतिधाराविशेषेण धावत इत्यर्थः। अश्वस्य यः कश्चिदविशदोऽपरिस्फुटो ध्वनिः अन्तरभ्यन्तरे उत्पद्यते सोऽश्वप्लुत उच्यते। पुच्छत इति पाठे पुच्छात् वालधेः॥

१३३-१३४। प्लुतोत्पत्तौ कारणमाह। तत्रेति। तत्र ध्वन्युत्पत्तौ नाभेरधः गुदवस्त्यण्डमाश्रितः पायुवस्तिकोषप्रदेशतः वायुरेव ऊर्द्धं उच्छलन् विसर्पन् विस्तृतिं गच्छन्निति यावत्। चतसृषु गुदवस्त्यण्डद्वयाश्रयेष्वित्यर्थः। अन्तशाखासु आभ्यन्तरधमनीष्वित्यर्थः। कूजति शब्दं करोति। अतोहेतोः स्थिराणामश्वानां वेग ऊर्द्धवेग

---

१। दृष्टं सहेषितम्। गः।
२। बाले च निर्गते। खः।
३। चापिवासिते। खः।
४। तथा। कः।
५। पुच्छतः।
६। निर्व्विशते। खः।

अन्यवर्णं शिरो यस्य पुच्छं वा यस्य वाजिनः।
पुच्छेन शिरसा वापि नानावर्णेन निन्दितः॥१२३॥
अव्यक्तवर्णो[1] यो वाहस्तथा तित्तिरसन्निभः।
कुत्सितो वानराक्षश्च यो वा व्याघ्रावलीढ़कः॥१२४॥

स्वराः।

ह्रेषितं मधुरञ्चैव तुरङ्गस्य प्रशस्यते।
अविच्छिन्नमदीनञ्च गम्भीरं सानुनासिकम्॥१२५॥
दृष्ट्वाग्निपूर्णपात्रञ्च[2] ब्राह्मणं कुसुमानि च।
दधि चापि समालोक्य वाहानां ह्रेषितं शुभम्॥१२६॥
वादित्रध्वनिमाकर्ण्य ह्रेषन्ते[3] यदि वाजिनः।
ग्रासपूर्णमुखाश्चैव तदा भर्त्तुर्जयो भवेत्॥१२७॥
ध्वजाग्रञ्चैव[4] सूर्य्यञ्च पश्यन्तो वाजिनो यदा।
ह्रेषन्तो वहवो हृष्टा स्तदा विद्याज्जयं विभोः॥१२८॥
अतो यद्विपरीतन्तु ह्रेषितं कुत्सितन्तु तत्[5]।
मिन्मिनं गद्गदं मूकं विरूक्षं कासजर्जरम्॥१२९॥

---

१२५। अदीनमिति अकातरम्॥

१२९। मिन्मिनं (तोत्ला) इति प्रसिद्धं। गद्गदं अस्फुटं। विरूक्षम् अतिकर्कशम्॥

---

१। अव्यक्तवर्णः। कः।
२। दृष्ट्वा हि पूर्णपात्रञ्च। खः।
३। ह्रेषितं यदि वाजिनः। गः।
४। ध्वजां सविम्बं। कः।
५। यत्। खः।

हरिताः किल जायन्ते वाजिनः पुण्यदर्शनाः ।
ते हिताय नरेन्द्राणां[१] जयारोग्यधनप्रदाः ॥ ११८ ॥
रक्तास्यमेहनः शस्तः श्यामकर्णश्च यः सितः ।
कपोतसमवर्णस्तु[२] यो वाहः शुक्लकेशरः[३] ॥ ११९ ॥
शुक्लपादमुखो[४] वाजी प्रशस्तः परिकीर्त्तितः ।
चतुर्णाञ्चैव वर्णानां शुक्लता यस्य वाजिनः ॥ १२० ॥
मुखे सिततरश्चैव पञ्चभद्रः स उच्यते ।
श्वेतमण्डलचित्रश्च भर्त्तुः सर्व्वार्थसाधकः ॥ १२१ ॥
पाण्डुरा[५] यस्य रेखा स्यात् पृष्ठवंशानुगामिनी ।
श्वेतकृष्णशिरा यश्च[६] नैव धन्यः प्रकीर्त्तितः ॥ १२२ ॥

---

११८ । श्यामकर्णस्य लक्षणं शुक्रः । "कर्णश्यामः श्यामकर्णः सर्वतस्त्वेकवर्णभाक्" इति ॥

१२० । पञ्चभद्रः पञ्चकल्याणोऽपि कथ्यते नकुलशुक्राभ्याम् । तथा च "यस्य पादाः सिताः सर्व्वे तथा वक्त्रञ्च मध्यतः । कल्याण-पञ्चकः प्रोक्तः सर्व्वकल्याणकृच्च सः ॥ मुखे पत्सु सिताः पञ्चकल्याणोऽश्वः सदा मतः" इति ॥

---

१ । यतोऽहिता नरेन्द्राणां । खः ।
२ । कपोतेन च वर्णेन । खः ।
३ । शुक्लकेशकः । गः ।
४ । शुक्लपाण्डुमुखो वाजी । कः ।
५ । पांशुरः । कः ।
६ । श्वेतकृष्णशिरो यस्य नैव यस्य प्रकाङ्क्षितः । गः ।

प्रभूतासिततारास्च[1] प्रशस्ता मुनिभिः स्मृताः।
रक्तपीतासितसितैरधन्यः कीर्त्तितो हयः॥ ११४॥
प्रशस्तकृष्णतारस्तु मल्लिकाक्षः प्रकीर्त्तितः।
श्वेतया वेष्टितं[2] कृष्णं रेखया तारकं[3] भवेत्॥ ११५॥
मल्लिकाक्षः स विज्ञेयः स्वामिनः सुखवर्द्धनः।
सिततारोऽप्रशस्तश्च स्वामिनः क्लेशवर्द्धनः॥ ११६॥
सर्वश्वेतश्च[4] कृष्णश्च रक्तः पीतस्तथैव च।
एते सांग्रामिकाः प्रोक्ताः तुरङ्गा मुनिसत्तमैः॥ ११७॥

---

११४। रक्तपीतासितसितैरिति रक्तादिवर्णचतुष्टयशबलैः तारकैरित्यर्थः॥

११५। यस्य वाजिनः नेत्रे तारकं कृष्णं श्वेतरेखया वेष्टितं च। मल्लिकाक्षस्य लक्षणन्तु नकुलो नैवमाह "मुखे चन्द्रकसंवीतो जम्बूफलसमाकृतिः। श्वेतपादः सविज्ञेयो मल्लिकाक्षः स पूजितः" इति॥

११७। सर्व्वश्वेत इत्यत्र सर्व्वशब्दः कृष्णादिभिः सह प्रत्येकं सम्बध्यते। "तत्रापि सर्व्वतः श्वेतो मध्यः पूज्यः सदैव हि" इति शुक्रः॥

---

१। प्रभूताः सिततारास्च प्रशस्ता मुनिभिः स्मृताः। कः।
२। श्वेतजावेष्टितं। खः।
३। तारकस्च यत्। खः।
४। सर्व्वाङ्गश्वेतकृष्णस्य। गः।

दुकुलाहो[1] दुरूराहः पुण्ड्रकेणैव कीर्त्तितः ।
त्रियूहस्त्रियुराहश्च चित्रलाङ्गश्च[2] यो भवेत् ॥ ११० ॥

अतऊर्द्ध्वं प्रवक्ष्यामि शुभाशुभविनिश्चयम् ।
वाजिदेहगतानां हि वर्णानां पूर्व्वशास्त्रतः ॥ १११ ॥
यस्य गौराणि[3] पीतानि गात्ररोमाणि वाजिनः ।
स भर्त्तुः श्रियमाधत्ते यस्य रक्तसितानि च[4] ॥ ११२ ॥
यस्य पादाः सिताः सर्व्वे पुच्छं वक्षो मुखं तथा ।
मूर्द्धजाश्च सिता[5] यस्य तं विद्यादष्टमङ्गलम् ॥११३ ॥

---

११२। सम्प्रति अङ्गविशेषेषु रोमवर्णविशेषेण वाजिनां संज्ञाविशेषानाह। यस्येत्यादि। चित्राणीति पाठे चित्राणि नानावर्णानि॥

११३। अष्टमङ्गललक्षणं नकुलः। "यस्य पादाः सिताः सर्व्वे पुच्छं वक्षोमुखन्तथा। मूर्द्धजाश्च सिता यस्य तं विद्यादष्टमङ्गलम्" इति। "पुच्छोरःखुरकेशाद्यैः सितः स्यादष्टमङ्गलः" इति हेमचन्द्रः। "स एव हृदये स्कन्धे पुच्छे श्वेतोऽष्टमङ्गलः" इति शुकः। "मूर्द्धजाश्च सिताः" इति पाठ एव साधीयान्। तस्य नकुलादिभिर्धृतत्वात् ॥

---

१। दुकुलानः। कः।
२। विचित्राङ्गः। कः।
३। चित्राणि गौराणि। कः।
४। शुक्लासितानि च। खः।
५। मूर्द्धजाश्चासिताः। कः।

कोकाहः पुण्ड्रकेणाश्वः कोकुराहः प्रकीर्त्तितः॥ १०७॥
खरराहश्च[1] खङ्गाहो हरिको हरिरोहकः[2]।
कलाहश्चैव[3] वोल्लाहः सेराहः सरुराहकः॥ १०८॥
कुलाहः कुलराहस्तु सुराहः सुरराहकः[4]।
वोरुराहो[5] भवेदश्वो वीरुराहस्तु यः स्मृतः॥ १०९॥

---

नामविशेषैः ख्याप्यन्ते इति तानेव क्रमेणाह कोकाह इत्यादिना। पूर्वोक्तलक्षणः कोकाहः पुण्ड्रकेण मुखपुण्ड्रकेण युक्त इत्यर्थः। कोकुराहः प्रकीर्त्तितः।

१०८। तथा खङ्गाहोऽपि मुखपुण्ड्रकेण युक्तः खरराह इत्युच्यत इत्यर्थः। एवं हरिकोऽपि मुखपुण्ड्रकेण हरिरोहकः। कुलाहश्चैवेति। कुलाहो वोल्लाहश्च वाजी मुखपुण्ड्रकयुक्तो यथाक्रमं सुराहः सूरुराहश्च स्मृत इत्यर्थः॥ अयं पाठः क-पुस्तके नास्ति॥

१०९। कुलाहकुलराहौ तु यथाक्रमं सुराहसूरुराहकलक्षणयुक्तावेव ज्ञेयौ। तथा वीरुराहो मुखपुण्ड्रकेण युक्तो वोरुराहः स्मृत इत्यर्थः। दुष्कुलाह उकलाहो वा पुण्ड्रकेण युक्तो दुरुराहः कीर्त्तितः। तथा त्रियूह एव चित्रिताङ्गः सन् त्रियुराह इति॥

---

१। परुषाहः। खः।
२। हरिराहकः। खः।
३। कुलाहः कुलराहः। सुराहः सूरराहः। कः।
४। कुलीहो दुरुलाहश्च। कः।
५। वोकराहः। कः।

कृष्णा चास्ये भवेल्लेखा पृष्ठवंशानुगामिनी।
उराहः[१] कृष्णजानुस्तु मनाक् पाण्डुस्तु यो भवेत्॥१०४॥
वेरुहानः[२] स्मृतो वाजी पाटलो यः प्रकीर्त्तितः।
रक्तपीतकषायोत्थवर्णजो यस्य दृश्यते[३]॥१०५॥
उकनाहः[४] स विख्यातो वर्णो वाहस्य देहजः।
पूर्वोक्तानाञ्च वर्णानां मुखपुण्ड्रण वाजिनाम्॥१०६॥
ये भवन्त्यपरे भेदा स्तान् ब्रवीम्यनुपूर्वशः[५]।

१०४। उराहलक्षणे हेमचन्द्रः जंघायाः कृष्णत्वमाह। "उराहस्तु मनाक्पाण्डुः कृष्णजङ्घो भवेद् यदि" इति। अयं उराह उकनाह एव॥

१०५। वेरुहाण इत्यत्र वोरुखानएव पाठ्यः। "वोरुखानस्तु पाटलः" इति हेमचन्द्रस्मरणात्। क्वचिद्वीरुहाणः पठ्यते॥

१०६। उकनाहलक्षणं हेमचन्द्र आह। "उकनाहः पीतरक्तच्छायः सएव तु क्वचित्" इति। अत्र दुकुलाहः दुष्कुलाह इत्यपि पाठद्वयं लिपिकरप्रमादाद् भ्रान्तमेव प्रतीमः। उकनाहस्य साधुत्वे हेमचन्द्र एव प्रमाणम्॥

१०७। पूर्वोक्ताः कयाहादयो मुखपुण्ड्रकेण युक्ताः कोकुराहादि-

१। उदहः। कः।
२। वीरुहणः। कः।
३। रक्तपीतकषायो वा वर्णो यो यस्य दृश्यते। कः।
४। दुकूलाहः। गः। दुष्कलाहः। कः।
५। अनुपूर्व्वतः। कः।

खिल्लाहः[1] कपिलो वाजी पाण्डुकेशरबालधिः[2] ॥ १०२ ॥
हलाहश्चित्रलश्चैव खङ्गाहः[3] श्वेतपीतकः।
ईषत्पीतः कुलाहस्तु यो भवेत् कृष्णजानुकः[4] ॥ १०३ ॥

---

त्रियूहः स्मृतः। नीलकत्रियूहयो र्नकुलहेमचन्द्रौ। "नीलो दूर्वा-भ्रसन्निभः। आनीलस्तु नीलकोऽथ त्रियूहः कपिलो हयः" इति। कपिलः पिङ्गलवर्णः। अयं त्रियूहो वोल्लाह एव कथ्यते। खिल्लाहो वाजी कपिलः पिङ्गलवर्णः किन्तु केशरपुच्छयोः पाण्डुवर्णः। अत्र हेमचन्द्रः। "वोल्लाहस्त्वयमेव स्यात् पाण्डुकेशरबालधिः" इति। अयं खिल्लाहः वोल्लाह स्त्रियूह एवचेति हेमचन्द्रटीकायाम् ॥

१०३। हलाहः चित्रलः चित्रितः। "हलाहश्चित्रितोहयः" इति अभिधानचिन्तामणिः। खङ्गाहः श्वेतपीतकः श्वेतपीतवर्णः। श्वेतपिच्चट इत्यपि पाठः। तस्यायमर्थः। श्वेतः शुभ्रवर्णः पिच्चटः पिच्चटवर्णश्च। (पिच्चट पिचुटी)। अत्र हेमचन्द्र एवं लक्षणमाह। "खङ्गाहः श्वेत-पिङ्गलः" इति। खोङ्गाह इत्यपि क्वचित्पाठः। कुलाह ईषत्पीतवर्णः कृष्णपादजानुर्घोटकः। "कुलाहस्तु मनाक्पीतः कृष्णः स्यात् पाद-जानुनि" इति हेमचन्द्रः ॥

---

१। खिल्लहः। खः।
२। पाण्डुकेशस्तु बालधिः। खः।
३। खङ्गाहः श्वेतपिच्चटः। गः।
४। तालुकः। कः।

श्वेतः कोकाह इत्युक्तः कृष्णः खुङ्गाह[१] उच्यते ।
पीतको हरितः प्रोक्तः कषायो रक्तकः स्मृतः ॥ १०० ॥
पक्वतालनिभो वाजी कयाहः परिकीर्त्तितः ।
पीयूषवर्णः सेराहो गर्द्दभाभः सुरूहकः[२] ॥ १०१ ॥
नीलो नीलक[३] एवाश्व स्त्रियूहः कपिलः स्मृतः ।

---

स्मृतः ॥ पिङ्गः कपिलकाकारो नीलो दूर्वाभ्रसन्निभः । कृष्णो जम्बूफलाकारः शास्त्रज्ञैः समुदाहृतः ॥ पीताभः श्वेतपादो यस्तथा स्यात्सितलोचनः । चक्रवाकः स विज्ञेयो राजार्हो वाजिसत्तमः" इति ॥

१०० । कोकाहः । अयं कर्कोऽपि उच्यते । "सिते तु कर्ककोकाहौ" इति हेमचन्द्रः । खुङ्गाहः कृष्णघोटकः । "कृष्णवर्णे तु खुङ्गाहः" इति च हेमचन्द्रः । पीतको हरितः कथ्यते । "हरिद्रासदृशः पीतोरक्तः कुम्कुमसन्निभः" इति च कषाये नकुलः । काकाहोऽपि क्वचित्पाठः ॥

१०१ । पक्वतालसदृशवर्णो वाजी कयाहः रक्ताश्वः । कियाहोऽपि क्वचित्पाठः । यथाह हेमचन्द्रः,—"कियाहो लोहितो हयः" इति । यः सेराहो वाजी सोऽमृतवर्ण इत्यर्थः । सुरूहकस्तु वाजी गर्द्दभवर्णः गर्द्दभवत् धूसरवर्ण इत्यर्थः । "सुरूहको गर्द्दभाभः" इति हेमचन्द्रः ॥

१०२ । नीलो दूर्वाभ्रवर्णो वाजी नीलकः स्मृतः । तथा कपिलः

---

१ । पिङ्गाहः । कः ।
२ । सरूहकः । कः ।
३ । नीलो नीलयको वाश्वः । सनीलो नील एवासौ । कः । गः ।

स शीघ्रगतिरित्युक्तो वाजी धन्यस्तपोधनैः।
दशहीना भवन्त्येते मध्यमाधमगा हयाः॥ ९७॥

वर्णाः।

चक्रवाकादिभिर्वर्णैः[१] शालिहोत्रादिभिः स्मृतैः।
पाटलाद्यैश्च लोकस्य व्यवहारो न सांप्रतम्॥ ९८॥
तस्मात् प्रसिद्धकान्[२] वर्णान् वाजिनां देहसम्भवान्।
समासेन यथायोगं कथयाम्यनुपूर्वशः[३]॥ ९९॥

---

वेष्टयित्वेत्यर्थः। यद्वा करवेष्टितगामिभिः करं वेष्टयित्वा गच्छद्भिरित्यर्थः॥

९७। दशहीना इति दशभिर्हस्तैः हीना इत्यर्थः॥

९८-९९। यद्यपि चक्रवाकादिवर्णाः शालिहोत्रादिभिः स्मृताः, तथापि साम्प्रतं तेषां लोके अव्यवहारात् तान् परित्यज्य लोकप्रसिद्धानेव वर्णान् कथयति। ते च प्रसिद्धा वर्णाः नकुलेनोक्ता न तु वर्णविशेषेण सर्वेषां संज्ञाविशेषोऽकारि। "सितो रक्तस्तथा पीतः सारङ्गः पिङ्ग एव च। नीलः कृष्णोऽथ सर्वेषां श्वेतः श्रेष्ठतमः स्मृतः॥ पट्टार्हो भूपतेर्वाजी सर्वश्वेतः प्रशस्यते"। तथा,—"श्वेतः प्रालेयसङ्काशो रक्तः कुङ्कुमसन्निभः। हरिद्रासदृशः पीतः सारङ्गः कर्वुरः

---

१। चक्रवाकादिनिर्म्माणैः। गः।

२। तस्मात् प्रसिद्धिगं वर्णं वाजिनां देहसम्भवम्। गः।

३। अनुपूर्व्वतः। खः।

अतोऽन्यगतयो[1] नेष्टाः सर्वदैव[2] तुरङ्गमाः ॥ ९४ ॥
सङ्कीर्णा विकटभ्रष्टा[3] वक्रा सौष्ठववर्जिता ।
अत्युर्द्धवलिता[4] चैव वाजिनां निन्दिता गतिः ॥ ९५ ॥
षोड़शच्छोटिकाभिस्तु[5] करवेष्टितजानुभिः[6] ।
शतं द्विगुणितं गत्वा[7] हस्तानां पुनरेति यः ॥ ९६ ॥

---

द्विपव्याघ्रगतिश्च यः। मयूरहंसतित्तीरपारावतगतिश्च यः॥ मृगोष्ट्र-वानरगतिः पूज्यो वृषगतिर्हयः" इत्यादि ॥

९५। गतिनिन्दितत्वमाह सङ्कीर्णेति। सङ्कीर्णा सङ्कुचिता। विकट-भ्रष्टेति विकटं विषमं यथा तथा भ्रष्टा स्खलिता दुरुत्क्षिप्ताधःपा-तेत्यर्थः। वक्रा न तु सरला। सौष्ठववर्जिता रामणीयकविरहिता इत्यर्थः। अत्यूर्द्धा अत्युन्नता। वलिता भङ्गीयुक्ता ॥

९६। उत्तममध्यमाधमगतौ परिमाणमाह। षोड़शेति। षोड़श-च्छोटिकाभिरिति षोड़शपरिमिताङ्गुलिस्फोटदानं यावता समयेन भवति तावता कालेनेत्यर्थः। करवेष्टितजानुभिरिति जानुनी कराभ्यां

---

१। अतोऽग्रगतयो नेष्टाः। कः।
२। सर्व्वंशुद्धतुरङ्गमाः। खः।
३। वकजभ्रष्टा। खः।
४। अत्यूर्द्धं चैव वक्रा च। खः।
५। षोड़शाच्छोटिकायास्तु। खः। न्नेयाः। कः।
६। करवेष्टितगामिभिः। गः।
७। दत्त्वा। कः।

ग्रीवायाञ्च वहे चैव[1] सृक्कणोः स्थूरके स्फिचि[2]।
पायौ क्रोड़े च पुष्पाणि निन्दितानीति निश्चयः॥ ८९ ॥
रक्तं पीतं तथा कृष्णं पुष्पं सर्वत्र[4] नेष्यते।
शुभप्रदेशसञ्जातं[3] भवेत् साधारणं ततः॥ ९० ॥
पुत्रलाभं धनप्राप्तिमारोग्यं विजयं तथा।
विन्द्यात् पुष्पैः शुभैर्भर्त्तुरशुभैश्च विपर्य्ययम्॥ ९१ ॥
सर्वाङ्गपुष्पितो वाजी परित्याज्यो न संशयः॥ ९२ ॥

गतयः।

दूरमुत्क्षिप्य यः पादांस्तप्ताङ्गारान् स्पृशन्निव।
प्लुतं याति[5] सुसंहृष्टो वाजी भद्रगतिस्तु सः॥ ९३ ॥
पूजिता वृषमातङ्गसिंहशार्दूलगामिनः।

---

८९। स्थूरके मन्दिरोपरिस्थप्रदेशे। स्फिचि कटिप्रोथे। स्त्रियां स्फिचौ कटिप्रोथे। इत्यमरः॥

९३-९४। अश्वानां गतिपूज्यत्वे शुक्रः,—"उच्चैः पदन्यासगतिः

---

१। ग्रीवायाश्चैव वाहे च। खः।
२। स्फिजि। खः।
३। शुभप्रदेशे। खः।
४। सर्व्वत्र। कः।
५। प्लुतया याति संहृष्टः। गः।

तेषां प्रदेशभेदेन[1] लक्षणं यद् व्यवस्थितम् ।
तत्तथैव समासेन विस्पष्टं कीर्त्त्यतेऽधुना ॥ ८३ ॥
अपाने च ललाटे च भ्रुवोर्मूर्द्धनि[2] कर्णयोः ।
निगाले चैव केशान्ते पुष्पं धन्यतमं स्मृतम् ॥ ८४ ॥
स्कन्धे वक्षसि कक्षे[3] च मुष्कयोर्बाहुकेशयोः[4] ।
हन्वोः पृष्ठे च वाहानां पुष्पं स्वामिहितप्रदम् ॥ ८५ ॥
नाभौ केशे[5] तथा कण्ठे दन्ते चैव हि वाजिनाम् ।
पुष्पं धन्यतमं प्रोक्तं भर्त्तुः सर्व्वार्थसाधकम् ॥ ८६ ॥
अप्रशस्तानि दृष्टानि मुनिभिर्यानि वाजिनाम्[6] ।
तानि सम्यक् प्रवक्ष्यामि पुष्पाण्यागमदर्शनात्[7] ॥ ८७ ॥
अधरौष्ठे कटे[8] प्रोथे उत्तरौष्ठे तथैव च ।
घोणायां गण्डयोश्चैव शङ्खयोश्च तथा भ्रुवोः ॥ ८८ ॥

---

८३ । प्रदेशभेदेन अपानादिस्थानविशेषेण ॥

८८ । भ्रुवोरिति द्विवचनेन भ्रूद्वयस्थस्य प्रशस्तत्वं एकस्थस्य चाप्रशस्तत्वमिति गम्यते । एवं गण्डशङ्खयोरपि ज्ञेयम् ॥

---

१ । प्रदेशदेशे च । खः ।
२ । कचे मूर्द्धनि । खः । स्तुवे । कः ।
३ । कक्षायां । कः ।
४ । मुष्के वा केवले भ्रुवि । गः । बाहुके मुखे । खः ।
५ । नाभिदेशे । कः । नाभौ देशे । गः ।
६ । शाश्वतः । खः ।
७ । पुष्पाण्यन्यानि दर्शनात् । खः ।  ८ । कटौ । गः ।

जिह्वाकल्मषरूक्षाणि[१] भस्मवर्णनिभानि[२] च।
पुण्ड्रकाणि[३] न शस्यन्ते भिन्नवर्णानि[४] वाजिनः॥ ८१॥

पुष्पाणि।

आगन्तवस्तुरङ्गस्य ये भवन्त्यन्यवर्णगाः।
विन्दवः पुष्पसंज्ञास्तु ते हिताहितसंज्ञकाः[५]॥ ८२॥

---

८१। जिह्वेत्यादि। जिह्वायां कल्मषरूक्षाणि, तथा भस्मवर्णनिभानि भस्मवर्णतुल्यानि भिन्नवर्णानि स्ववर्णभिन्नवर्णानीत्यर्थः। वाजिनः पुण्ड्रकाणि न शस्यन्ते न प्रशस्तानि भवन्ति॥ जिह्मकल्मषरूक्षाणीति पाठे जिह्मानि वक्रानि कल्मषाणि कृष्णपीतानि रूक्षाणि च। तथा भस्मचूर्णनिभानि दग्धचूर्णसदृशानि। तथा यानि च भिन्नवर्णानि मिश्रवर्णानि पुण्ड्रकाणां तानि न शस्यन्ते॥ जिह्वाकृष्णेति पाठो न सङ्गतः॥

८२। आगन्तवो न तु सहजाः। अन्यवर्णाः स्ववर्णभिन्नवर्णा इत्यर्थः। विन्दूनां पुष्पसंज्ञत्वे नकुलः,—"यस्य रोमविभेदेन जायन्ते रोमविन्दवः। पुष्पाख्यः स परित्याज्यः सर्ववाजिभयावहः" इति॥ शुभाशुभप्रदेशविशेषाश्रयेणैव हिताहितसंज्ञा तेषां भवतीत्यर्थः॥

---

१। जिह्वाकृष्णाच्चितरूक्षाणि। खः।
२। भस्मचूर्णनिभानि। गः।
३। पुण्ड्रकाणां विनश्यन्ति। खः।
४। भिन्नवर्णानि यानि च। गः। कः।
५। हिताहितकारकाः। खः।

शिरोललाटवदनं यः पुण्ड्रो व्याप्य तिष्ठति।
स धन्यः पूजितो नित्यं ऋजुकश्चैव[1] यो भवेत्॥ ७६॥
पर्व्वतेन्दुपताकाभा ये च स्रग्दामसन्निभाः।
ते सर्व्वे पूजिताः पुण्ड्रा धनधान्यफलप्रदाः॥ ७७॥
इति पुण्ड्राः शुभाः प्रोक्ताः पूर्व्वशास्त्रानुसारतः।
अशुभांश्चैव वक्ष्यामि यथायोगं समासतः॥ ७८॥
काककङ्ककबन्धाहि[2]गृध्रगोमायुसन्निभाः।
असिताः पीतका रक्ताः पुण्ड्रका नैव पूजिताः॥ ७९॥
तिर्य्यग्गाश्चैव विच्छिन्नाः शृङ्खलापाशसन्निभाः[3]।
शूलाग्रा वामदेहस्थाः पुण्ड्रका न शुभाः स्मृताः॥ ८०॥

---

७६। ऋजुगः सरल इत्यर्थः॥

७९। काकेत्यादि। काकः प्रसिद्धः। कङ्कः पक्षिविशेषः (काँक) इति प्रसिद्धः। कबन्धः अमस्तककलेवरः। अहिः सर्पः। गृध्रः (शकुनि) इति प्रसिद्धः। गोमायुः शृगालः। तैः सन्निभाः सदृशाः॥

८०। शृङ्खलापाशसन्निभाः शृङ्खलरज्वाकाराः। तिर्य्यग्गा इति ये शरीरे तिर्य्यग्भावेन स्थिता इत्यर्थः। विच्छिन्ना विच्छेदं प्राप्ताः। शूलाग्राः शूलाग्रवत् सूक्ष्माग्रभागाः। एवम्भूता वामपार्श्वस्थाः पुण्ड्रका न शुभाः॥

---

१। ऋजुगः। गः। मृदुकः। खः।　३। पाशशोभिताः। खः।
२। गोधाहि। खः।

पुण्ड्रकाः।

अत ऊर्द्धं प्रवक्ष्यामि पुण्ड्राणां लक्षणं शुभम्।
आनुपूर्व्या[१] यथादृष्टं मुनिभिस्त्वर्थवेदिभिः[२]॥ ७३॥
शुक्तिशङ्खगदाखड्गपद्मचक्राङ्कुशोपमाः।
शरासनसमाकाराः प्रशस्ताः पुण्ड्रकाः स्मृताः॥ ७४॥
मत्स्यभृङ्गारप्रासादस्रग्वेदीयूपसन्निभाः।
श्रीवृक्षदर्पणाकाराः[३] शुभदाः परिकीर्त्तिताः॥ ७५॥

वर्णयति। "ललाटे यस्य चावर्त्तद्वितयस्य समुद्भवः। मस्तके च तृतीयस्य पूर्णहर्षोऽयमुत्तमः॥ आवर्त्तौ सान्तरौ भाले चन्द्रसूर्यौ शुभप्रदौ। मिलितौ तौ मध्यफलौ अतिलग्नौ तु दुःफलौ" इति॥ "तेषां प्रपाण एको ललाटे केशेषु च भ्रुवावर्त्तः। रन्ध्रोपरन्ध्रमूर्द्धनि वक्षसि चेति स्मृतौ द्वौ द्वौ"। वृहत्संहिता॥

७३। पुण्ड्राणामिति शुक्त्याद्याकाराः भिन्नाकारा वा अश्वशरीरेषु चिह्नविशेषाः तेषाम्॥

७४। शुक्त्याद्याकाराः प्रशस्ताः। एतदतिरिक्ता अप्रशस्तत्वाद्वर्ज्या इति भावः। ते च काकाद्याकाराः इति वक्ष्यति॥

७५। अश्वानां हृदयस्थः श्वेतरोमावर्त्तविशेषः श्रीवृक्षः। "तथा वक्षसि वाहस्य श्रीवृक्षक उदाहृत" इति हारावली। श्रीवृक्ष-दर्शनाकारा इति पाठे श्रीवृक्षवद्दर्शनीय आकारो येषां ते तथोक्ताः। इदं श्लोकद्वयं ख-पुस्तके नास्ति। "श्रीवत्सदर्पणाकाराः" इति पाठे श्रीवत्सनामकरोमजावर्त्तवत् दर्पणवच्च आकारो येषां ते॥

---

१। अनुपूर्व्वाद् यथोद्दिष्टम्।खः।यथादृष्टि।कः। २।शास्त्रज्ञानिभिः।कः।
३। श्रीवत्सदर्पणाकाराः। कः। दर्शनाकाराः। गः।

एको[1] हेम्ना दद्देत्पापं तेन दोषो[2] न दुष्यति।
अथवा द्विजमुख्याय वेगादिगुणवान्[3] हयः ॥ ६८॥
दत्त्वा ग्राह्यः क्रयेणैव दुरावर्त्तस्तु काकुदी।
श्रीवृक्षो[4] रोमजश्चैव रोचमानस्तथैव च ॥ ६९॥
अङ्गदी मुषली चैव राज्यरत्नप्रदः सदा।
प्रपाणे[5] मारुतं विन्द्याल्ललाटे च हुताशनम् ॥ ७०॥
उरसि चाश्विनौ देवौ चन्द्रसूर्य्यौ च मूर्द्धनि।
रन्ध्रे स्कन्दविशाखौ च उपरन्ध्रे हरो हरिः[6] ॥ ७१॥
इत्येवं पूजिता ह्येते दशावर्त्तास्तु वाजिनः।
अप्येकेन विहीनाश्चेद्[7] भवेयुरशुभास्तदा ॥ ७२॥

७०-७१। इत्येते मारुतादयो दशविधावर्त्ताः पूजिताः। उक्तञ्च अग्निपुराणे,—"रन्ध्रोपरन्ध्रयो द्वौ द्वौ द्वौ द्वौ मस्तकवक्षसोः। प्रपाणे च ललाटे च कण्ठावर्त्ताः शुभा दश" इति॥ नकुलस्तु ललाटस्यैकावर्त्तस्य सूर्य्यसंज्ञत्वं प्राह। यथा,—"ललाटे यस्य चावर्त्तो यस्यैकः सम्प्रजायते। स करोत्यश्वसंघातान् स्वामिनः सूर्य्यसंज्ञक" इति॥ "भाले चोर्द्धमुखः शुभः" इति शुक्रः॥ अत्र नकुलः। "ललाटे युगलावर्त्तौ चन्द्रार्कौ सम्प्रकीर्त्तितौ। वाजिनो यदि तौ स्यातां राष्ट्रवृद्धिकरौ परौ" इति॥ अत्र शुक्रोऽपि किञ्चिद्विशेषं

१। एवं। खः।
२। दोषेण।
३। ये वेगादिगुणाधिकाः। खः।
४। श्रीवत्सः। कः।
५। अपाने। खः।
६। हरिहरौ। खः।
७। विहीना ये। खः।

वाजिदेहगतः सम्यक् शुभाशुभनिवेदकः।
शतपादीसमाकारः शतपादीति कीर्त्तितः॥ ६२॥
जातीमुकुलसङ्काशो मुकुलः समुदाहृतः।
आवर्त्तो भ्रमितैर्बालैः[१] संघातो रोमपुञ्जकैः[२]॥६३॥
शुक्तिश्च शुक्तिसंस्थानैः रोमभिर्व्यक्तलक्षणैः।
वत्सावलीढ़काकारोऽवलीढ़ः[३] परिकीर्त्तितः॥ ६४॥
पादुकः पादुकाकारस्तथा चैवार्द्धपादुकः।
वाले विशेषसंस्थाने निर्द्दिशेन्मतिमान् भिषक्॥६५॥
शास्त्रमार्गानुसारेण यथाप्रोक्तं विचक्षणैः।
एतेषामेव सर्वेषामावर्त्तानां तपोधनैः॥ ६६॥
रोमजेति कृता संज्ञा वाजिलक्षणवेदिभिः।
शुभाशुभौ तु यत्र द्वौ तत्रैको न फलप्रदः॥६७॥

---

६२। शतपादी (कान्डाइ इति भाषा)। तत्तुल्याकारः शतपादी। तथा जातीकोरकसदृशाकारो य आवर्त्तः स मुकुलः कथितः॥

६४। व्यक्तलक्षणैः प्रकटचिह्नैः। शुक्तिसंस्थानैः शुक्त्याकारै रित्यर्थः। शुक्त्यावर्त्ते नकुलः। "शुक्त्याख्यौ तालुकान्तस्थावावर्त्तौ कीर्त्तिवृद्धिदौ। हयस्य स्वामियुक्तस्य सदैव सुसुखावहौ" इति॥

६६। वत्सस्य अवलीढ़काकारः जिह्वासदृश इत्यर्थः॥

---

१। भ्रमितः। खः।
२। रोमपुञ्जकः। खः।
३। एतेषामेव लीढ़स्त। खः।

अधन्यस्तत्र वाहस्य जंघयोर्जानुनोश्च[1] यः ।
नाभिजो मुष्कजश्चैव त्रिकजश्च विशेषतः ॥ ५७ ॥
पुच्छमूलस्थितश्चापि नैव धन्यः प्रकीर्त्तितः ।
कुक्षौ व्याधिं[2] नियच्छन्ति रोमजाः कुक्षिसम्भवाः ॥४८॥
पायुसीवनिमध्यस्था[3] नैव धन्यास्तु कीर्त्तिताः ।
स्फिक्पिण्डे[4] स्थूरके चैव यस्यावर्त्तो हि वाजिनः ॥५९॥
लिङ्गावर्त्तः स विख्यातो भर्तुः सर्वार्थनाशकः ।
शतपादीति विख्यातस्तथा वै मुकुलोऽपरः ॥ ६० ॥
आवर्त्तश्चैव संघातः पादुकश्चार्द्धपादुकः ।
शुक्तिश्चैवावलीढ़श्च आवर्त्तः कीर्त्तितोऽष्टधा ॥ ६१ ॥

---

५७। त्रिकजस्य फलमाह शुक्रः। "त्रिकजश्च यदावर्त्तः स्त्रीगणस्य विनाशनः" इति ॥

५८। पुच्छमूलावर्त्तफलं शुक्राचार्य्य आह। "पुच्छमूले यदावर्त्तो धूमकेतुरनर्थकृद्" इति। एवं नकुलोऽपि आह। "पुच्छदेशे यदावर्त्तो वाजिनः संप्रदृश्यते। धूमकेतुरिति ख्यातः स त्याज्यो दूरतो नृपैः" इति ॥

६०। अत्र शुक्रः। "मध्यदन्तात् पार्श्वगतात् सैव शतपदी कचैः। न चैवात्यशुभा पृष्ठमुखी शतपदी मता" इति ॥

---

१। जंघतो जानुतश्च। खः।
२। व्याधिः त्त्वयं याति। खः।
३। पायुसीवनमध्ये स्युः। खः।
४। स्फिचिजे खुरजे। खः।

तत्रावर्त्तः स्मृतो भर्तुः संग्रामे जीवितान्तकृत्।
कूर्चादष्टाङ्गुलं चोर्द्ध्वं पार्श्वयोस्तु कला स्मृता ॥ ५० ॥
तत्र भर्तुः शराघातै र्जीवितान्तश्च रोमजः।
ककुदं वृषभस्येव सुव्यक्तमुपलक्षयेत्[1] ॥ ५१ ॥
वाजिनो यस्य तत्र स्यादावर्त्तः[2] स्वामिनाशनः।
ककुदस्य पुरोभागे समीपे वह उच्यते ॥ ५२ ॥
भर्तुः सुतसमेतस्य तस्मिन्नाशाय रोमजः।
काकसेतु[3] च यस्य स्यादावर्त्तस्तस्य दारुणः ॥ ५३ ॥
रणे हतः समं भर्त्रा क्रव्याद्भिः स विलुप्यते।
क्रोड़े चैवासने चापि हृदये चैव जानुनि ॥ ५४ ॥
आवर्त्ताः स्वामिघाताय भवन्त्येव न संशयः।
पार्श्वयो रोमजो यस्य स चाश्वो नयति क्षयम् ॥५५॥
सपक्षञ्चाशु भर्त्तारं नीहाराम्बु यथा रविः।
कूर्चस्याधः प्रदेशस्तु कुष्ठिकः[4] परिकीर्तितः ॥ ५६ ॥

---

पार्श्वे यदावर्त्तः स भवेत् पद्मलक्षणः। करोति विविधान् पद्मान् स्वामिनः सततं सुखम्” इति ॥

५४। जान्वावर्त्तस्य फलमाह नकुलः। “जानुदेशे यदावर्त्तो वाजिनः संप्रदृश्यते। प्रवासं सततं ब्रूते स भर्तुः क्लेशसंयुतम्” इति। “जानुसंस्था यदावर्त्ताः प्रवासक्लेशकारकाः” इति शुक्रः ॥

---

१। उपलक्ष्यते। खः।
२। आवर्त्तस्तु विनाशकृत्। खः।
३। काकुदेशे। खः।
४। कुष्ठिस्य। खः।

कक्षयोश्चापि संग्रामे स्वामिनञ्चाशु घातयेत्।
चिबुकस्य समीपस्थो वामदक्षिणभागतः ॥ ४६ ॥
प्रदेशस्तु हनुर्नाम तत्रावर्त्तो हि दारुणः।
अधरौष्ठस्य वाधस्ताच्चिवुकं हि प्रसिद्धकम् ॥ ४७ ॥
तस्मिन् पापो भवेद्भर्तुः कर्णयोश्चापि रोमजः।
कण्ठस्याथ निगालस्य मध्ये गलक उच्यते ॥ ४८ ॥
तत्रावर्त्त स्मृतः[१] पापः स्कन्धसन्धिगतश्च यः।
अधस्ताज्जंघयोश्चैव ग्रन्थिः कूर्च इति स्मृतः ॥ ४९ ॥

---

प्रकारेण त्रयो ग्रीवां समाश्रिताः। त्रयावर्त्तः स वाजीशो जायते नृपमन्दिरे" इति ॥

४६। कक्षावर्त्तस्याशुभत्वे नकुलः। "एकावर्त्तो भवेद्यस्य कक्षान्ते वाजिनो यदा। स रणे मृत्युमाप्नोति द्वौ च स्वामिविनाशनौ" इति ॥ एवं शुक्रोऽपि, यथा,—"यस्यावर्त्तो वक्षगतौ कुक्ष्यन्ते वाजिनो यदि। स नूनं मृत्युमाप्नोति कुर्य्याद्वा स्वामिनाशनम्" इति ॥

४८। कर्णसमीपस्थस्य निन्दितत्वमाह शुक्रः। "भ्रमः कर्ण-समीपे तु शृङ्गी चैकः स निन्दितः" इति ॥

४९। शुक्रस्तु गलावर्त्तस्य शुभत्वमाह। "गलमध्ये शुभस्त्वेक सर्वाशुभनिवारणः" इति॥ स्कन्धपार्श्वयोश्चापि शुभत्वे शुक्रः। "स्कन्ध-

---

१। स्थितः। खः।

अश्रुपातः समुद्दिष्टः प्रदेशश्चक्षुषोरधः ॥ ४२ ॥
तत्रावर्त्तो भवेद्भीमः स्वामिनः कुलनाशनः।
अपाङ्गाद्‌द्व्यङ्गुले चैव प्रदेशः शङ्ख उच्यते ॥ ४३ ॥
तस्मिन् भर्त्तुर्विनाशाय भवेद्वाहस्य रोमजः।
भ्रूप्रदेशसमुद्भूत[१] आवर्त्तो नैव पूजितः ॥ ४४ ॥
सुहृद्वियोगकृत् सः स्याद्भर्त्तुरर्थावसादकः।
मन्यां ग्रीवां शिरो विन्द्यात्तत्रावर्त्तस्तु कुत्सितः ॥ ४५ ॥

---

स इच्छेत् स्वामिनाशनम्॥ गण्डावर्त्तो भवेद्यस्य वाजिनो दक्षिणा-श्रयः। स करोति महासौख्यं स्वामिनः शिवसंज्ञकः॥ तद्वद्वामाश्रयः क्रूरः प्रकरोति धनक्षयम्" इति। एवं शुक्रोऽप्याह। "कपोलस्थौ यदावर्त्तौ दृश्येते यस्य वाजिनः। यशोवृद्धिकरौ प्रोक्तौ राज्यवृद्धिकरौ मतौ॥ एकोऽथवा कपोलस्थो यस्यावर्त्तः प्रदृश्यते। शर्वीनाम स विख्यातः स इच्छेत् स्वामिनाशनम्॥ गण्डसंस्थो यदावर्त्तो वाजिनो दक्षिणाश्रितः। स करोति महासौख्यं स्वामिनां शिवसंज्ञकः॥ तद्वद् वामाश्रितः क्रूरः प्रकरोति धनक्षयम्। इन्द्राभौ तावुभौ शस्तौ नृपराज्य विवृद्धिदौ" इति॥

४३। अपाङ्गात् नेत्रपार्श्वाद् द्व्यङ्गुले ऊर्द्ध्वे इति शेषः।

४५। ग्रीवायामावर्त्तत्रयस्य तु शुभत्वमाह शुक्रः। "एवमेव

---

१। भ्रुवोर्देशे। खः।

विशेषेण शुभाः प्रोक्ता रोमजाः शुभदेशजाः ।
अतऊर्द्धं प्रवक्ष्यामि रोमजानतिनिन्दितान्[१] ॥३९॥
भर्तुः क्लेशावहान् सर्वान् धनप्राणापहारकान् ।
नासिकापुटयोर्मध्ये प्रदेशः प्रोथ उच्यते ॥ ४० ॥
तत्र भर्तुर्विनाशाय रोमजश्च[२] प्रकीर्त्तितः ।
ऊर्द्धञ्च नासिकाच्छिद्रात् स्वामिनः क्लेशकारकः ॥४१॥
गण्डयोश्चैव[३] भर्तारं हन्त्यावर्त्तो दुरासदः ।

---

३९ । अथाशुभावर्त्तस्थानानि क्रमेणोच्यन्ते । तत्र शुक्रः "अश्रुपातहनूगण्डहृद्गलप्रोथवस्तिषु । कटिशङ्खजानुमुष्ककुन्नाभिगुदेषु च ॥ दक्षकुक्षौ दक्षपादे त्वशुभो भ्रमरः सदा" । तथा,—"पादोर्द्धमुखो भ्रमरो ह्येको वापि स निन्दितः । अशुभञ्चातिसंलग्नमावर्त्तद्वितयं तथा ॥ त्रिकोणत्रितयं भाले आवर्त्तानान्तु दुःखदम्"—इत्यादि ॥ "अश्रुपातहनुगण्डहृद्गलप्रोथशङ्खकटिवस्तिजानुनि । मुष्कनाभिककुदे तथा गुदे सव्यकुक्षिचरणेषु चाशुभाः" इति वृहत्संहिता ॥ "कक्षायां जानुसेद्रे च त्रिवर्णा पुच्छसन्निधौ । पुच्छे गुह्ये वलावष्ट आवर्त्ता अधमा हये" इति नकुलः ॥

४२ । गण्डस्थलावर्त्तस्थाश्रयभेदेन शुभाशुभत्वमाह नकुलः । "एकोऽथवा कपोलस्थो यस्यावर्त्तः प्रदृश्यते । वर्त्तमानः स विज्ञेयः

---

१ । अशुभेहितान् । खः ।　　　　३ । गण्डजश्चैव । खः ।
२ । रोमजोऽश्वस्य कीर्त्तितः । खः ।

आवर्त्ताः पूजिता नित्यं विशेषेण तु मस्तके।
आवर्त्ता यस्य चत्वारो वाजिनो वक्षसि स्थिताः ॥३६॥
एकः कण्ठे भवेत् स्पष्टः स धन्यः सर्वकामदः।
रन्ध्रे चैव यदा भर्त्तुरीप्सितार्थप्रदो भवेत् ॥३७॥
उपरन्ध्रे भवेच्चैव रोमजश्चातिपूजितः।
शङ्खचक्रगदावज्रशुक्तिपद्मोपमाश्च ये ॥३८॥

---

३६। अत्र कर्णमूलबाहुकेशान्तेभ्यो मस्तकावर्त्तस्य विशेषपूजितत्वं गम्यते कर्णमूलावर्त्तस्य शुभत्वं नकुलशुक्रावाहतुः। "कर्णमूले यदावर्त्तस्तन्मध्येच तथा परः। विजयाख्यावुभौ ज्ञेयौ युद्धकाले जयप्रदौ" इति॥ कण्ठजावर्त्तस्य च नकुलशुक्रौ चिन्तामणिरिति नाम ददतुः।

३७। "कण्ठे यस्य महावर्त्त एकोऽस्य प्रजायते। चिन्तामणिः स विज्ञेयश्चिन्तितार्थविवृद्धिदः" इति॥ रन्ध्रे कुक्षिविवरे। उपरन्ध्रे रन्ध्रोर्द्धस्थे प्रदेशे इत्यर्थः। एते प्रपाणस्कन्धललाटकर्णनिगालबाहुकेशान्तमस्तकवक्षःकण्ठरन्ध्रोपरन्ध्रेषु आवर्त्ताः प्रशस्ताः कथिताः॥

३८। शङ्खेत्यादि। अत्र शुभदेशजानां विशेषशुभत्वनिर्द्देशात् तेषां शङ्खाद्यानां स्वभावशुभत्वं गम्यते॥ "शङ्खचक्रगदापद्मवेदिस्वस्तिकसन्निभः। प्रासादतोरणधनुःसुपूर्णकलसाकृतिः॥ स्वस्तिकस्रग्मीनखड्गश्रीवत्साभः शुभो भ्रमः" इति शुक्रः॥

---

१। प्रांसितार्थप्रदः। खः। ३। पद्म। खः।
२। उपरन्ध्रोद्भवश्चैव। खः। ४। वज्र। खः।

द्वौ वा ललाटजौ[1] यस्य सतु धन्यतमः स्मृतः।
आनुपूर्व्या स्थिता[2] चोर्द्ध्वं ललाटे रोमजास्त्रयः॥ ३२॥
निःश्रेणी नाम सा ख्याता भर्त्तुः सर्वार्थसाधिनी।
शिरःकेशान्तयोर्मध्ये श्रवो नामाभिधीयते॥ ३३॥
तत्रावर्त्तः स्मृतोऽश्वस्य भर्त्तुर्जयविवर्द्धनः।
घण्टाबन्धसमीपस्थो निगालः कीर्त्तितो बुधैः॥ ३४॥
तस्मिन् देवमणिर्नाम रोमजः शुभकृत् स्मृतः।
कर्णमूले तथा बाह्वोः केशान्ते मस्तके तथा॥ ३५॥

---

आवर्त्ताः सन्तीतिशेषः। ते सर्वकामफलप्रदाः प्रोक्ताः उक्तञ्च अग्नि-पुराणे। "सृक्कण्याञ्च ललाटे च कर्णमूले निगालके। बाहुमूले गले श्रेष्ठा आवर्त्ताः" इति॥

३३। ललाटे आनुपूर्व्या त्रयो रोमजाः निःश्रेणी नाम्ना कथ्यन्ते इति फलितार्थः। अत्र शुक्र एवमाह। "आवर्त्तत्रितयं भाले शुभ-ञ्चोर्द्धन्तु सान्तरं। अशुभञ्चातिसंलग्नमावर्त्तत्रितयं तथा॥ त्रिकोण-त्रितयं भाले आवर्त्तानान्तु दुःखदम्"—इति। अत्र नकुलो ललाटस्था-वर्त्तत्रयस्य त्रिकूट इति नाम ददौ। "त्रयो यस्य ललाटस्था आवर्त्ता अधरोत्तराः। त्रिकूटः स परिज्ञेयः वाजिवृद्धिकरः परः"—इति॥

३४-३५। घण्टाबन्धेति। निगालस्थावर्त्तस्य देवमणित्वं नकुलोऽप्याह यथा। निगालस्थो य आवर्त्तः सहि देवमणिः स्मृत इति॥

---

१। ललाटतः। गः। २। स्थितः। ख।

आवर्त्ताः।

अथातः संप्रवक्ष्यामि आवर्त्तानां विनिश्चयम्।
शुभाशुभविवेकाय यथा शास्त्रे[१] व्यवस्थितम्॥ २९॥
विंशतिस्तु शुभाः प्रोक्ताः षट्सप्तत्यधिकाः स्मृताः।
उत्तरौष्ठं प्रपाणं स्यात्तत्रावर्त्ताः शुभावहाः॥ ३०॥
सृक्कणोश्च तथा प्रोक्ताः सर्वकामफलप्रदाः।
त्रयश्चैवाथ चत्वारो वाजिनो यस्य रोमजाः॥ ३१॥

---

३०। आवर्त्ताः शुभाशुभभेदेन साकल्येन षण्णवतिप्रकाराः। तेषु विंशतिः शुभाः। प्रथमं प्रपाणादिषु शुभप्रदेशेषु तानेव वर्णयति। उत्तरौष्ठमित्यादिभिः। शुभावर्त्तस्थानानि तु नकुलस्त्रयोदशविधान्याह। "ललाटे मस्तके चैव ग्रीवायां हृदये तथा। पादे पक्षे मणीबन्धे नाभिदेशे विशेषतः॥ स्कन्धे पार्श्वे गले वक्त्रे कुक्षौ रन्ध्रे त्रिके तथा। आद्यास्त्रयोदशावर्त्ता विज्ञेया वाजिपण्डितैः" इति॥ अत्र शुक्राचार्य्यः "गलमध्ये पृष्ठमध्ये उत्तरौष्ठेऽधरे तथा। कर्णनेत्रान्तरे वामकुक्षौ चैवतु पार्श्वयोः। ऊरुषु च शुभावर्त्तौ वाजिनामग्रपादयोः। आवर्त्तौ सान्तरौ भाले सूर्य्यचन्द्रौ शुभप्रदौ" इति। ये प्रपाणगलकर्णसंस्थिताः पृष्ठमध्यनयनोपरिस्थिताः। ओष्ठसक्थिभुजकुक्षिपार्श्वगास्ते ललाटसहिताः सुशोभना इति बृहत्संहितायाम्॥ एवमशुभदेशाश्च अनन्तरं अशुभावर्त्तकथनप्रस्तावे कथयिष्यति॥

३१। अथ यस्य वाजिनः सृक्कणोः त्रयश्चत्वारो वा रोमजा

---

१। शास्त्र। कः।

अवक्रा मांसहीना च वाजिजंघा शुभा स्मृता ।
सुवृत्तं सुसमञ्चैव नातिस्तब्धं नचोन्नतम्[1] ॥ २२ ॥
कूर्चमेवंविधं विद्यात् ग्रन्थिव्रण[2]विवर्जितम् ।
दृढ़मण्डूकिकायुक्तो वर्तुलः श्लिष्टसन्धिकः ॥ २३ ॥
खुरः खरखुराकारः प्रशस्तः समुदाहृतः ।
पार्श्वे चैव समे वृत्ते ऊर्द्धं मांसोपशोभिते ॥ २४ ॥
अविलम्बि सुवृत्तञ्च उदरञ्चातिपूजितम् ।
नातिदीर्घं समं पृष्ठं किञ्चिच्च विनतं शुभम् ॥ २५ ॥
सुवृत्ता चैव पीना च कटिर्धन्या प्रकीर्त्तिता ।
मृदुस्निग्धायतैर्युक्तं बालैः पुच्छं प्रशस्यते ॥ २६ ॥
वृषणौ च समौ वृत्तौ ईषल्लम्बावलोमशौ ।
कृष्णवर्णविहीनन्तु ह्रस्वं मेहनमीष्यते ॥ २७ ॥
आनुपूर्व्यायतं पीनं शोभितञ्चोरुकद्वयम् ।
पूर्वजंघेव जंघादि खुरान्तञ्चापि पश्चिमम् ।
शालिहोत्रादिभिः प्रोक्तं मुनिभिः सर्ववेदिभिः ॥ २८ ॥

---

२५ । न लम्बमानम् ॥

२६ । पीना मांसला ॥

२८ । पूर्वजंघेव पश्चिमजंघादि खुरान्तमपि लक्षणयुक्तं प्रोक्तम् ॥

---

१ । शुभं स्मृतं सुवृत्तञ्च समञ्चैव नतोन्नतम् । खः ।
२ । ग्रन्थिवर्णविवर्जितम् । कः . खः ।

प्रशस्ते वाजिनां नेत्रे मद्याभेऽमलतारके।
स्निग्धायते विशाले च श्लिष्टे मधुनिभेक्षणे ॥ १५ ॥
स्वर्णप्रभे विशाले च शस्ते वाहस्य लोचने।
सावर्त्तञ्चाप्यनिम्नञ्च विशालञ्चैव वाजिनाम् ॥ १६ ॥
ललाटं पूजितं प्राहुर्मुनयः शास्त्रकोविदः।
शिरः समं तथा वृत्तमावर्त्तद्वयभूषितम् ॥ १७ ॥
केशाश्च मृदवः स्निग्धा वहवश्चैव पूजिताः।
ह्रस्वता[1] कर्णयोश्चैव तीक्ष्णता तनुता तथा ॥ १८ ॥
अदीर्घरोमता चैव प्रशस्तेति[2] प्रकीर्त्तिता।
सुवृत्तां कुञ्चिताञ्चैव धन्यां ग्रीवां विदुर्बुधाः ॥ १९ ॥
केशरश्च जटाहीनो मृदुश्चैव प्रशस्यते।
सुबद्धः सुदृढ़श्चैव स्कन्धो वाहस्य पूजितः ॥ २० ॥
प्रशस्तं विपुलं वक्षो निर्गतं विशिरञ्च यत्[3]।
ऋजुवृक्षसमौ[4] वाहू गूढ़ं जानु प्रशस्यते ॥ २१ ॥

---

१८। स्निग्धाश्चिक्कणाः ॥ ह्रस्वता आकारतः तीक्ष्णता सूच्यग्र-भावः दैर्घ्येण। तनुता वेधेन चेत्यर्थः ॥

२०। सुबद्धः सुघटितः।

२१। प्रशस्तं कवाटविस्तृतं। निर्गतं वहिःस्फीतमिव स्थित-मित्यर्थः ॥

---

१। ऋजुता। खः।
२। प्रशस्तो विप्रकीर्त्तितः। खः।
३। तत्। खः।
४। उरुवृत्तसमौ। खः।

अतश्चान्यद्धि[1] दोषाय तन्वी दीर्घा च सा शुभा ।
घनाः[2] स्निग्धाः सुबद्धाश्च समा दन्ताः सुशोभनाः ॥ ११ ॥
षट्संख्येष्वधरौष्ठे च तेषु व्यञ्जनसम्भवः ।
आननं तुङ्गघोणञ्च[3] निर्मांसं प्रियदर्शनम् ॥ १२ ॥
सुगन्धि पूजितं वक्त्रं विपरीतं विगर्हितम् ।
तालु रक्तं प्रशस्तञ्च सुपुटे चैव नासिके ॥ १३ ॥
नात्युल्वणौ समौ गण्डौ[4] वाहानां कीर्त्तितौ शुभौ ।
अत्यन्तं निर्गते चैव सुबद्धे नैव चाविले ॥ १४ ॥

---

११ । घनाः सान्द्राः । स्निग्धा नतु रुक्षा इत्यर्थः । सुबद्धाः सुघटिताः ॥

१२ । तेषु दन्तेषु । अधरौष्ठे नीचौष्ठे षट्संख्येषु षट्स्वित्यर्थः । व्यजनसम्भवः प्रकाशसम्भावनेत्यर्थः । अङ्कुरोत्पत्तिर्वा ॥ प्रियदर्शनं प्रशंसनीयमित्यर्थः ॥ तुङ्गघोणं उच्चनासिकम् । निर्मांसं नातिमांसलमित्यर्थः ॥

१३ । वक्त्रं मुखगह्वर इत्यर्थः । सुपुटे इति सुशोभनावरणयुक्ते इत्यर्थः । त्रिषु पात्रो पुटो वाटीत्यमरः ॥

१४ । उल्वणौ उन्नतौ नात्युल्वणौ ईषदुन्नतोन्नतिभावावित्यर्थः ॥

---

१ । अतोऽन्यत्वंच । २ । कः ।

२ । धन्याः । २ । गः ।

३ । आयतं तुङ्गघोणञ्च निर्मांसं परिकीर्त्तितम् । २ । खः ।

४ । नातितनू समौ गण्डौ । खः ।

पार्श्वयोः पृष्ठभागे च कुक्षौ कव्याञ्च बालधौ[१] ।
मेहने मुष्कयोश्चापि तथा चैवोरुकद्वयोः ॥ ६ ॥
आवर्त्ते पुण्ड्रके पुष्पे[२] गतौ वर्णे स्वरे तथा ।
महादोषे तथोत्पाते[३] छायायां गन्धसत्वयोः[४] ॥ ७ ॥
प्रमाणे चैव[५] वाह्यानां लक्षणं यत्प्रतिष्ठितम् ।
शुभाशुभविवेकाय तद्विन्द्याद्[६] बुद्धिमान् भिषक् ॥ ८ ॥
शालिहोत्रादिभिर्ज्ञातं[७] त्रिकालज्ञानकोविदैः ।
आतान्नौ पूजितावोष्ठौ बालहीनौ मृदुत्वचौ ॥ ९ ॥
सुप्रोथस्तून्नतः शस्तो[८] विपरीतं विवर्जयेत् ।
सृक्कणोर्मृदुता शस्ता जिह्वायां रक्तता तथा ॥ १० ॥

---

६ । बालधौ पुच्छे । कुक्षौ उदरे ॥

७ । आवर्त्तादिषु प्रमाणान्तेषु द्वादशसु लक्षणानि आवर्त्ताद्यध्यायेषु क्रमेण वर्णयिष्यतीति द्रष्टव्यम् ॥

८ । प्रमाणस्यैवेति पाठात् प्रामाणे चैवेति पाठः साधीयानिति मन्यामहे ॥

---

१ । सबालधौ । २ । खः ।
२ । आवर्त्ते च खुरे पुच्छे । २ । खः ।
३ । महादोषे त्यजेत्प्राज्ञः । २ । खः ।
४ । गन्धतस्तयोः । २ । कः ।
५ । प्रमाणस्यैव वाह्यानाम् । २ । खः ।
६ । तं विन्द्यात् । २ । गः ।
७ । शालिहोत्रादिभिः सम्यक् । २ । कः ।
८ । सुप्रोथोत्तरसंस्थश्च । २ । कः ।

## अथ

## तृतीयोऽध्यायः ।

### सर्व्वलक्षणः ।

अङ्गलक्षणानि ।

अतःपरं प्रवक्ष्यामि वाहानां लक्षणं स्मृतम् ।
लक्षणं शृणु वाहानां मुनिना यत्तु भाषितम् ॥ १ ॥
सर्वदोषहरं नित्यं नृपाणां जयवर्द्धनम् ।
अशुभैर्लक्षणैर्युक्ता हया न ग्रहणोचिताः ॥ २ ॥
अतो लक्षणमेवादो तेषां वक्ष्यामि देहजम् ।
ओाष्ठयोः सृक्कणोश्चैव जिह्वायां दशनेषु च ॥ ३ ॥
वक्त्रे तालुनि नासायां गण्डयोर्नेत्रयोस्तथा ।
ललाटे मस्तके चैव केशे कर्णपुटे तथा ॥ ४ ॥
ग्रीवायां केशरे चापि स्कन्धे वक्षसि वाहुके ।
जंघायां जानुनोश्चाधः[1] कूर्चे पादे तथैव च ॥ ५ ॥

---

१ । अशुभैर्लक्षणैर्वक्ष्यमाणैरित्यर्थः ॥

३ । लक्षणं शुभाशुभलक्षणं ओष्ठादीनामित्यर्थः ॥

---

१ । जानुनोस्वापि । २ । कः ।

पूर्वकायः[१] समुद्दिष्टः पृष्ठदेशस्तु मध्यमः।
आकटेः पश्चिमोभागः[२] खुरान्तश्चापरोऽमतः।
इति प्रदेशा विख्याताः पूर्वशास्त्रानुसारतः॥ ३३॥

इति प्रदेशाध्यायः।

---

१। पूर्व्वकायात्। २। खः।
२। पश्चिमे भागे। २। खः।

मुष्कौ च कटिसन्धिञ्च ततो विन्द्यात् परं बुधः।
अधस्तात् कटिसन्धेस्तु ऊरुसन्धिरुदाहृतः॥ २९॥
सक्थिनो फलसन्धिस्तु ऊरूपान्ताभिधानकः[1]।
ततः स्थुरं[2] विजानीयात् तस्याधो मन्दिरं भवेत्॥३०।
किणञ्चैव ततो विन्द्यात् मन्दिराभ्याससंस्थितम्।
ततःपरं विजानीयात् कलां कूर्चञ्च कुष्ठिकम्॥ ३१॥
खुरान्तसञ्ज्ञं[3] मण्डूकं ततो विन्द्याद्विचक्षणः।
अङ्कजङ्घादयञ्चैव[4] वक्षोग्रीवाशिरोमुखम्॥ ३२॥

---

३०। फलसन्धिः कोषसन्धिप्रदेशः, ऊर्व्वोः उपान्ताभिधानकः उपान्तनामकः यः प्रदेश इति यावत्। ते सक्थिनी॥ ततः सक्थ्यनन्तरं यः प्रदेशस्तं स्थुरं विजानीयात्॥

३२। अङ्केति। अत्र अङ्कात् मुखान्ताः प्रदेशाः सम्भूय पूर्वकायः कथित इत्यर्थः। केवलं पृष्ठदेशो मध्यमकायः, तथा कटिदेशात् खुरान्तः अपरो भागः पश्चिमः पश्चात्कयो मतः॥

---

१। ऊरुपादाभिधायकः। २। खः।

२। खुरम्। २। खः।

३। खुरस्तलं च। २। खः।

४। अंशकच्चादयम्। २। गः; अग्रेजङ्घादयम्। २। खः।

किणं तत्रैव[1] मध्यस्थमधोभागे च कुष्ठिकम्[2] ॥ २३ ॥
खुरसन्धिं ततो विन्द्यादधोभागे ततः खुरम्।
खुरस्य पार्श्वे पार्ष्णिः स्यादग्रभागे नखोभवेत् ॥ २४ ॥
खुरस्याधस्तलं चैव मण्डूकी तलमध्यतः[3]।
खुरमासं विजानीयात् क्षीरिकाख्यं विचक्षणः ॥ २५ ॥
हृदयात् परतः कुक्षी पार्श्वतश्च विभागतः।
कुक्षिमध्ये भवेद्रन्ध्रमुपरन्ध्रं तदूर्द्धगम् ॥ २६ ॥
जठरं पार्श्वमध्यस्थं तस्य नाभिश्च मध्यतः।
रोमराजीं ततो विन्द्यात् मूत्रकोशमतःपरम्[4]।
आकव्याः पश्चिमे भागे पुटौ स्फिचौ च कीर्तिते ॥२७॥
पुच्छमूलन्तु[5] वाहानां मांसलं पुच्छमूलतः।
तस्याधः कीर्तितः पायुः सीवनी च ततःपरम् ॥ २८ ॥

---

२४। ततः खुरसन्धेः अधोभागे खुरम्।

२६। कुक्षी उदरः। रन्ध्रं उदरगह्वरः। तदूर्द्धगं तस्मात् हृदयगह्वरादूर्द्धभागस्थम् ॥

२७। स्फिचौ कटिप्रोथौ। अत्र छन्दोभङ्गः जातः।

---

१। किंकणाश्च। २। खः।
२। कुष्ठकी। २। खः।
३। मध्यगा। २। खः।
४। मूत्रकोषस्ततःपरम्। २। गः।
५। भाषते पुच्छमूलतः। २। खः।

वाहस्योपरिजन्तु स्यात्[१] काकसं ककुदश्च तत्[२] ।
ततः पृष्ठं विजानीयादासनं पृष्ठमध्यगम्[३] ॥ १८ ॥
अंसके ककुदश्चैव[४] निबन्धे परिकीर्तिते ॥ १९ ॥
स्यातामंसादधो बाहू तयोर्बाह्ये षडङ्गुले ।
बाह्वोरभ्यन्तरे विन्द्यात् किणञ्चातिप्रसिद्धकम् ॥२०॥
अधरे च ततोजानु निर्दिष्टं शास्त्रकोविदैः ।
मन्दिरं पश्चिमोभागः कलाची जानुनोऽग्रिमः[५] ॥२१॥
जानुनोश्चाप्यधोभागे[६] जङ्घां विन्द्याद्विचक्षणः ।
जङ्घापार्श्वे कलां विन्द्यात् सन्ध्यञ्चैषिकसंज्ञकम् ॥ २२ ॥
अग्रतः पलिहस्तस्याः[७] पश्चात् कूर्च उदाहृतः ।

---

१८। ककुदं वृषस्कन्धः। अत्र काकसस्थाने कीकस एव भवितुं युक्तः॥

२१। मन्दिरं जानुपश्चाद्भागः। कलापीस्थले कलाचीति सङ्गतं मन्ये। कलाची जानुनोऽङ्गुलिपर्य्यन्तोभागः ॥

२२। गुल्फावधिजानुपर्य्यन्तः प्रदेशः जङ्घा ॥

---

१ । वाहस्योपरि यत्तत्स्यात् । २ । खः । जन्तुः स्यात् । गः ।
२ । ककुदं क्रमात् । २ । कः ।　　३ । पृष्ठमध्यतः । २ । कः ।
४ । ककुदस्यैव । २ गः ।　　५ । जानुनोऽग्रतः । २ । गः ।
६ । जानुनश्चाधरे भागे । २ । खः ।　　७ । पलिहस्तः स्यात् । गः ।

अपाङ्गाद्द्यङ्गुले चैव शङ्खं विद्याद्विचक्षणः[१]।
शङ्खकर्णान्तरे चैव कटाक्षः समुदाहृतः ॥ १३ ॥
विदुर्मर्मविदश्चैव कर्णस्याधः षड़ङ्गुले।
घण्टाबन्धसमीपस्थो निगालः परिकीर्तितः ॥ १४ ॥
अधस्ताच्च[२] निगालस्य गलमाहुर्मनीषिणः।
ततः कण्ठं विजानीयादधोभागे विचक्षणः[३] ॥ १५ ॥
वक्षः क्रोड़ं तथा चैव हृदयं कुक्षिमेव[४] च।
अनुपूर्वं[५] विजानीयादधोभागगतं बुधः ॥ १६ ॥
ग्रीवा लोकप्रसिद्धा तु तस्याश्चोपरि केसरः।
ग्रीवास्कन्धान्तरे चैव वाहं प्राहुर्मनीषिणः ॥ १७ ॥

---

१३। शङ्खं ललाटास्थि ॥

१४। कर्णस्य अधः अधस्तात् षड़ङ्गुले अन्तर इति शेषः। विदुर्नाम मर्मविदुः। तयोर्मध्ये विदुः पुमानित्यमरः ॥

१६। पूर्वानुक्रमेण।

---

१। चाघोड़शाङ्गुले। कः।
२। अधस्तले। २। खः।
३। अधोभागे नतं वुधः। २। खः।
४। कद्दमेव च। २। खः।
५। आनुपूर्व्या। २। खः।

कर्णान्ते चैव नेत्रान्तमपाङ्गं ब्रुवते बुधाः[१]।
कनीनिकाक्ष्णोर्विज्ञेया यस्य नासासमीपगः[२] ॥९॥
सितासितञ्च तन्मध्ये[३] नेत्रयोर्मण्डलं हि तत्।
प्रच्छादनं भवेद्वर्त्म चाक्षिकूटमतःपरम् ॥१०॥
तस्मादूर्द्धं भ्रुवो लेखा ललाटञ्च तदुत्तरम्।
ऊर्द्धं ललाटदेशात्तु केशान्तञ्च ततः श्रवः ॥११॥
ततः शिरो विजानीयात् श्रवादूर्द्धगतं बुधः।
शिरःपार्श्वगतौ कर्णौ तयोर्मूलन्तु शष्कुली[४] ॥१२॥

---

९। कनीनिका तारका। तारकाक्ष्णः कनीनिकेत्यमरः। यस्य अपाङ्गस्य। नासासमीपगः यः प्रदेशः सा कनीनिका इत्यर्थः॥

१०। वर्त्म नेत्रच्छदं प्रच्छादनं प्रच्छादनापरनामकं भवेत्। वर्त्म नेत्रच्छदेऽध्वनीत्यमरः। अक्षिकूटमीषिका चक्षुर्गोलको वा। ईषिकालचिकूटकमित्यमरः॥

११। तस्मादक्षिकूटात्। ललाटं अवग्रहप्रदेशम्। अवग्रहो ललाटं स्यादित्यमरः। Forehead. ॥

१२। शष्कुली चूलिका कर्णच्छिद्रं वा। कर्णमूलन्तु चूलिकेत्यमरः॥

---

१। कर्णपार्श्वे च नेत्रान्तमपाङ्गः प्रोच्यते बुधैः। २। कः।

२। कनीनिकाख्योविज्ञेयः यस्य नासासमीपगः। कः।

३। यन्मध्ये। कः। खः। ४। सकुन्तलम्। २। खः।

ततो दन्ताः[१] समुद्दिष्टा ऊर्द्ध्वं दन्ता भवन्त्यधः।
चिवुकञ्चाधरोभाग[२] स्तेषां प्रोक्तं विचक्षणैः ॥ ४ ॥
चिवुकस्योपरिष्टात्तु अधरौष्ठः प्रकीर्त्तितः।
चिवुकात् पार्श्वभागे तु हनुर्नामाभिधीयते ॥ ५ ॥
सृक्कद्वयं विजानीयाद्वक्त्रपार्श्वगतं बुधः।
उत्तरौष्ठः प्रपाणाख्यः[३] तदूर्द्ध्वं प्रोथ उच्यते[४] ॥ ६ ॥
नासाच्छिद्रे तथा पार्श्वे प्रोथस्यैव व्यवस्थिते।
नासाच्छिद्राक्षिमध्ये तु घोणाख्यः[५] समुदाहृतः ॥ ७ ॥
घोणापार्श्वगतौ गण्डौ क्षीरिके च ततःपरम्।
नेत्रयोरधरे भागे[६] अश्रुपात उदाहृतः ॥ ८ ॥

---

तदग्रे तालोरग्रे। दन्तपीठकमिति दन्तानां पीठकं आसनं दन्तवेष्ट इत्यर्थः। तेषां दन्तानाम् अधरोभागः चिवुकम्।

५। कपोलौ तत्परो हनुरित्यमरः। (चोयाल) Jaw।

६। सृक्कद्वयं ओष्ठपार्श्वद्वयम्। Corner of the mouth.।

८। अश्रुपातः अश्रुपातनामकः प्रदेश इत्यर्थः॥

---

१। अग्रेदन्ताः। २। कः।　　२। चिवुकः स्वाधरे भागे।२।
३। प्रयाणाख्यं। २। खः।　　४। प्रोथञ्च समुदाहृतम्। २। गः।
५। घोणाख्यं समुदाहृतम्।२। खः।　　६। नेत्रयोरन्तरे भागे। २। खः।

# अथ द्वितीयोऽध्यायः ।

प्रदेशः ।

प्रदेशान् वाजिदेहस्थान् यो न वेत्ति विभागतः ।
न[1] स जानाति मूढ़ात्मा लक्षणं न चिकित्सितम् ॥१॥
अतएव[2] प्रदेशानां ज्ञानमादौ प्रकीर्त्तितम् ।
एतद् यत्नेन बोद्धव्यं वाजिनां हितकाम्यया ॥ २ ॥
अतिप्रसिद्धा जिह्वा या[3] तस्याः स्थूना भवेदधः ।
ऊर्द्ध्व[4] तालु भवेत्तस्याः तदग्रे[5] दन्तपीठकम् ॥ ३ ॥

---

१ । प्रदेशान् जिह्वादिमण्डूक्यन्तानित्यर्थः । लक्षणं प्रदेशरोगाणामित्यर्थः ॥

२ । अस्मिन्नध्याये आदौ प्रदेशज्ञानस्य प्रयोजनं प्रदेशानित्यादि श्लोकद्वयेन प्रतिपाद्य पश्चात् प्रदेशानां लक्षणानि क्रमेण एकत्रिंशश्लोकैर्निर्दिशन्नाह । अतिप्रसिद्धेत्यादि ॥ सूना अधोजिह्विका स्थूनाधोजीह्विकापि च । इत्यमरः ॥ तस्या इति स्थूनायाः ।

---

१ । नैव जानाति । २ । गः ।  २ । अतःपरमिति । २ । खः ।
३ । जिह्वातु । २ । कः ।  ४ । ऊर्द्धं । २ । खः ।
५ । ततोऽग्रे दन्तपष्ठिका । २ । कः ।

साध्यासाध्यविवेकञ्च कृच्छ्रसाध्ये विनिश्चयम्।
प्रकृतिञ्च तुरङ्गानां कथयाम्यनुपूर्व्वशः[1] ॥
रसोनादींस्तथा कल्पान्[2] मुनिभिः पूर्व्वनोदितान्॥
॥१५॥

इत्युद्देशाध्यायः[3] ॥

---

शिष्टानां व्याधीनां निदानं कारणं चिह्नं लक्षणं चिकित्सितञ्च। कथयामीति क्रिया प्रदेशादिभिः कर्म्मभूतैःसह प्रत्येकं संवध्यते ॥

१५। प्रकृतिमिति वातादिप्रकृतिमित्यर्थः। रसोनादीनिति आदिपदेन गुग्गुलुरसायनादीनां ग्रहणम्। कल्काः दृषदि पेषितं वस्तु ॥

---

१। अनुपूर्व्वतः। कः।
२। रसोनादि तथा कल्पम्। गः।
३। क—नामकपुस्तके उपदेशाध्याय इति नामकृतमस्याध्यायस्य।

मुञ्जजालं ततश्चेति नेत्ररोगास्तथैव च ।
वातात् पित्तात् कफाच्चेति सन्निपातात्तथा पुनः ॥ १३ ॥
रक्ताभिघाताद् ये जाताः शिरोरोगाश्च दारुणाः ।
निदानञ्चैव चिह्नञ्च रोगाणाञ्च चिकित्सितम् ॥ १४ ॥

---

वातबलासकान्तानामित्यर्थः । निर्द्देशः निर्व्वाचनम् । मुखरुगित्यनेन वक्ष्यमाणमुखरोगचिकित्साध्याये उक्ता उपकुशादिगलशालूकान्ताश्चतुर्द्दश रोगाः । नेत्ररोगेत्यनेन मुञ्जजालमुञ्जकपटलबुद्बुदपूयस्रावकाचतोयस्रावप्रसन्नान्धनक्तान्धतिमिररक्तस्रावाभिष्यन्दचिपिटवर्त्माख्याः चतुर्द्दशनेत्ररोगाः । तेषां विधिमनुष्ठानम् । एषां विस्तरं नेत्ररोगाध्याये वर्णयिष्यति । पटलमेव पाटलम् । पटलं नाम श्लैष्मिकाक्षिरोगविशेषः । काचमिति पैत्तिकमक्षिरोगविशेषम् । रक्तमपि पैत्तिकाक्षिरोगमाह । प्रचारः श्लैष्मिकाक्षिरोगः तम् । रक्तमिति रक्तस्रावनामको रक्ताभिष्यन्दजो नेत्ररोगविशेषः तम् ॥

१३ । मुञ्जजालमिति मुञ्जं मुञ्जजालञ्चेति द्विविधोऽक्षिरोगः क्रमसम्भवो ज्ञेयः । एषां विशेषः चिकित्सितञ्च परतो वर्णनीयम् ॥

१४ । शिरोरोगाः वातजपित्तजश्लेष्मजसन्निपातजरक्तजाः पञ्च शिरोरोगाः । एषां लक्षणादिकं वक्ष्यमाणशिरोरोगाध्याये वक्ष्यति । साध्यासाध्यविवेकमिति । रोगेषु के साध्याः के वा असाध्यास्तद्विवेकमित्यर्थः । रोगाणाञ्च चिकित्सितमिति लिङ्गितादिविषान्तानामत्र-

श्रमोपचारं[1] वाहानां तथारिष्टचयं[2] पुनः।
वेधारिष्टं पुनश्चैव कटिवेधं तथैव च ॥ १० ॥
मृगरोगचिकित्साञ्च[3] चिह्नपूर्व्वं समासतः।
वातादीनाञ्च[4] दोषाणां कोपहेतुं तथैव च ॥ ११ ॥
व्याधिनिर्द्देशमुखरुङ्नेत्ररोगविधिं क्रमात्।
काचं प्रचारं विख्यातं रक्तं विख्यातपाटलम्[5] ॥ १२ ॥

---

१०। श्रमोपचारमिति। अतिवाहनादेः श्वासादिरोगजनको यः परिश्रमः खेदापनयनानन्तरं मदिरादिदानेन तत्प्रतीकाररूपोवा य उपचारः। अरिष्टचयं खस्यारिष्टं वेधारिष्टं कीटारिष्टञ्चेति। इदञ्चारिष्टाध्याये एषणीयम् ॥

११। मृगरोगेति भूरि उपद्रवजनकः सांघातिको रोगविशेषः। अस्य लक्षणादिकं मृगरोगचिकित्सायां द्रष्टव्यम्। चिह्नपूर्वं लक्षणज्ञानपूर्वकमित्यर्थः। वातादीनामिति वातपित्तकफसंज्ञकदोषत्रयाणां कोपे वृद्धौ हेतुः कारणम्। हेतुश्च तिक्तादि-कट्वम्लादि-मधुरादि-द्रव्योपयोगजः। एतानि च प्रकोपकारणानि दोषप्रकोपोपशमनाध्याये वक्ष्यन्ते ॥

१२। व्याधिनिर्द्देशेति। व्याधीनां वक्ष्यमाणमुखरोगादि-

---

१। श्रान्तोपचारम्। कः। २। तथारिष्टस्य लक्षणम्। कः।
३। मृगरोगविधिञ्चैव। कः। ४। वातादीनां प्रकोपनम्। कः।
५। विख्यातं। कः।

नस्ये स्वेदे[१] विधिञ्चैव स्नेहपाने विधिं क्रमात् ।
तैलपाकविधानञ्च घृतपाकविधिन्तथा ॥ ९ ॥

प्रयोज्यः ॥ एषां विशेषः तत्तदध्यायेषु परतो वर्णनीयः ॥ शिरावेधविधिमिति शिराणां वेधो वेधनं सूच्यादिभिरित्यर्थः । अस्य विशेषः शिरावेधाध्याये वक्ष्यते ॥ निरूहे इति निरूहः सिद्धवस्तिः द्विविधवस्तिकर्म्मणोरन्यतरः संशमनाद्यर्थं कषायक्षीरतैलपूरितनेत्रादिसाध्य इत्यर्थः । तस्मिन् । तथा अनुवासनं नाम द्वयोरन्यतरः केवलस्नेहसाध्यो वस्तिविशेषः । "अनुवसन्नपि न दुष्यति अनुदिनं वा दीयते" इत्यनुवासनम् । इति सुश्रुतम् । उक्तञ्च सारकौमुद्यां "वस्तिर्द्विधानुवासाख्यो निरूहश्चेति सञ्ज्ञितः । यः स्नेहैर्दीयते स स्यादनुवासननामकः । कषायक्षीरतैलैर्यो: निरूहः स निगद्यत" इति ॥अयञ्चोपक्रमो निरूहानुवासनाध्याये द्रष्टव्यः ॥

९ । नस्य इति । ऊर्द्धजत्रुगतरोगशान्त्यर्थं प्रयोज्ये शिरोविरेचन इत्यर्थः ॥ स्वेदे तापादिचतुर्विधे यं विना शोधनादिकं नैव प्रयुज्यते । उक्तञ्च सुश्रुते—"येषां नस्यं विधातव्यं वस्तिश्चैवहि देहिनाम् । शोधनीयाश्च ये केचित् पूर्वं स्वेद्याहि ते मताः" इति । अस्य विशेषस्तदध्याये वर्णनीयः ॥ स्नेहपान इत्यनेन घृततैलोभयग्रहणम् । तयोः पाने पानपरिमाणादिविषय इत्यर्थः । तैलपाकविधानं प्रसारण्यादितैलपाकानुष्ठानमित्यर्थः । घृतपाकविधिमिति घृतं पञ्चतिक्तादिकमित्यर्थः ॥

१ । नस्यस्वेदविधिं । कः गः ।

बन्ध्याक्रमं[१] प्रसूतायाः शिशोश्च[२] प्रतिपालनम्[३]।
द्रव्यमात्राविधिश्चैव[४] निघण्टं पोषणक्रमम् ॥ ७ ॥
विधिं क्षाराग्निशस्त्राणां शिरावेधविधिन्तथा।
निरूहे च विधिश्चैव[५] विधिश्चैवानुवासने[६] ॥ ८ ॥

---

७। बन्ध्याक्रममिति बन्ध्योपचाराध्याये वर्णनीयं बन्ध्याया गर्भ-धारणाद्युपायमित्यर्थः ॥ प्रसूतायाः शिशोश्च प्रतिपालनमिति किशोरोपचाराध्याये सूतिकोपचाराध्याये च वक्ष्यमाणं प्रसूतेः शिशोश्च पोषणोपचारप्रणालीमित्यर्थः। द्रव्यमात्राविधिमिति द्रव्यशब्देनात्र भेषजं ज्ञेयम्। द्रव्यस्य भेषजस्य मात्राविधिं प्रधानमध्यहीनेषु देश-कालबलमपेक्ष्य उपयोगार्थं भेषजादिपरिमाणनिर्णयमित्यर्थः। तस्य च विशेषं द्रव्यमात्राध्याये चतुर्व्विंशे वर्णयिष्यति ॥ निघण्टमिति तन्नामकाध्यायः पञ्चविंशः। यत्राश्वानां भेषजोपयोगिमुस्तकादिद्रव्याणां पर्य्यायो वर्णितः तम्। पोषणक्रममिति वक्ष्यमाणस्वस्थवृत्ताध्यायोक्तां शिशिरादिषु ऋतुषु वाजिनामुपचारप्रणालीमित्यर्थः ॥

८। विधिं क्षाराग्निशस्त्राणामिति। क्षारविधिम् अग्निविधिं शस्त्रविधिञ्चेति। अयं त्रिविधोपक्रमः शोफार्शोवातादिषु रोगेषु

---

१। बन्ध्याकर्म्म प्रसूतानाम्। कः। २। पशोश्च। कः।
३। परिपालनम्। खः। ४। द्रव्यमात्राधिकम्। कः।
५। आरोहे च। कः। ६। वस्तिश्चैवानुवासने। गः।

प्रदेशलक्षणञ्चैव जीवितञ्च वयस्तथा।
दशाविभागं क्षेत्रञ्च देशज्ञानञ्च वाहनम्॥ ६

६। प्रदेशलक्षणमिति द्वितीयाध्याये वक्ष्यमाणं जिह्वादिप्रदेशानां लक्षणं शुभाशुभात्मकमित्यर्थः। यद्वा प्रदेशं लक्षणञ्चेति असमस्तम्। लक्षणमिति तृतीये वक्ष्यमाणमङ्गलक्षणमित्यर्थः॥ अत्र प्रदेशाज्ञस्य चिकित्साकरणासम्भवादादौ प्रदेशलक्षणकथनम्। जीवितमिति आयुर्ज्ञानाध्याये वक्ष्यमाणं ह्रस्वकर्णत्वादिलक्षणेन निरूपितं दीर्घादीर्घजीवितत्वमित्यर्थः। यद्वा दशादशकात्मकोऽश्वस्य जीवितकालस्तम्। दशापरिमाणं चाश्वस्य त्रयोवर्षाः द्विसप्ततिदिनानि चेति। वय इति वयोज्ञानाध्याये वर्णनीयं दन्तोद्भेदादिदर्शनेन वयोनिरूपणमित्यर्थः। दशाविभागमिति। दशा दशविधाः तासां विभागः पृथक्करणं तम्। स च दशाविभागो दशाक्षेत्रीयाध्याये द्रष्टव्यः। क्षेत्रमिति क्षेत्रमत्र वाजिनामपानललाटाद्याश्रयं प्रथमादि दशविधम्। एतदपि दशाक्षेत्रीयाध्याये द्रष्टव्यम्। यद्वा क्षेत्रमुत्पत्तिस्थानम्। तच्च सप्तविधं यथा—"अमृताद्वाष्पतो वह्नेः वेदेभ्योऽण्डाच्च गर्त्ततः। साम्नो हयानामुत्पत्तिः सप्तधा परिकीर्त्तिता"। इति पुराणात् मल्लिनाथः। तथा देशज्ञानमिति वक्ष्यमाणजन्मदेशाध्याये वर्णनीया ये देशाः पारसीककाश्मीरादयः तेषां ज्ञानमित्यर्थः॥ वाहनमित्यनेन परतो वक्ष्यमाणवाहनविध्यध्याये वर्णनीयम् अश्वानां सत्वजातिवल्गाविभागरङ्गभूमिचालनधारादिविधानं ज्ञेयम्॥

चिकित्सा[१] च समासेन सिद्धौषधसमन्विता।
मुनिप्रोक्तानि शास्त्राणि सम्यगालोच्य वाजिनाम्॥३॥
श्रीमद्विजयदत्तस्य पुत्रेण क्रियतेऽधुना।
श्रीमता जयदत्तेन वाहानां हितकाम्यया[२]॥४॥
अध्यायानां यथायोगं षष्ठ्याष्टाधिकसंख्यया[३]।
श्लोकानाञ्च सहस्रेण शताष्टसंयुतेन च[४]॥५॥

---

ग्रन्थविस्तरवर्जितं ग्रन्थबाहुल्यरहितं संक्षिप्तमित्यर्थः। ग्रन्थविस्तारवर्जितमिति यः पुस्तकान्तरे दृश्यते पाठः स न सम्यक् तथाविधप्रयोगादर्शनात्॥ यथाक्रममिति मुनिप्रदिष्टक्रमानुसारेणेत्यर्थः॥

३। सिद्धौषधसमन्वितेति। सिद्धानि निश्चितानि प्रयोगेण भूरिशो दृष्टफलानीत्यर्थः। यानि औषधानि तैः समन्विता युक्ता। मुनिप्रोक्तानि शालिहोत्राश्ववैद्यप्रणीतानीत्यर्थः। अत्र शास्त्रशब्दस्य बहुवचनेन नकुलादिकृतशास्त्राणि विवक्षितानि॥ वाजः पक्षो वेगो वा अस्ति यस्य स वाजी। इन्प्रत्ययः। वाजति गच्छति वा वाजीति॥

५। अष्टाधिकसङ्ख्यया षष्ट्या अष्टषष्ट्येत्यर्थः। श्लोकानामित्यादिर्द्विविध एव पाठो न सङ्गच्छते अस्य ग्रन्थस्य साकल्येन सार्द्धसहस्रश्लोकात्मकत्वात्॥

---

१। चिकित्साञ्च। कः। २। हितमिच्छता। गः।
३। द्विसहस्रेण। गः। ४। शताष्टकयुतेन। खः।

श्रीगणेशाय नमः ।

श्रीशालिहोत्राय नमः ॥

# अथ

# अश्ववैद्यकम् ।

## प्रथमोऽध्यायः ।

उद्देशः ।

प्रणम्य शङ्करं भक्त्या शङ्करं सर्व्वदेहिनाम् ।
शिवाय जगतो जातां शिवाञ्चापि विशेषतः ॥ १ ॥
सुखावबोधशब्दार्थं[१] ग्रन्थविस्तरवर्जितम् ।
लक्षणं वाजिदेहस्थं[२] संक्षेपेण यथाक्रमम् ॥ २ ॥

---

२ । सुखावबोधशब्दार्थं सुखावबोधौ सुबोधौ शब्दार्थौ यस्मिन् तत् तथोक्तम् अतिप्राञ्जलमित्यर्थः । शिष्यावबोधशब्दार्थमित्यपि पाठो ग-पुस्तके दृश्यते । तस्यायमर्थः । शिष्यान् अवबोधयतः यौ तौ शिष्यावबोधौ शब्दार्थौ यस्मिन् तत् शिष्यसुखबोधमित्यर्थः ।

---

१ । शिष्यावबोधशब्दार्थम् । गः ।
२ । वाजिदेहस्य । कः ।

# अश्ववैद्यकम् ।

श्रीमज्जयदत्तसूरिविरचितम् ।

श्रीनकुलकृताश्वचिकित्सितसमेतम् ।

---

श्रीलश्री—

वङ्गदेशीयासिआटिक्-समाजानुज्ञया

गवर्णमेण्ट-संस्कृतविद्यालयस्थ-

पुस्तकाध्यक्षेण

**श्रीउमेशचन्द्र गुप्त कविरत्नेन**

परिशोधितं व्याख्यातञ्च ।

---

**कलिकाताराजधान्यां**

व्याप्तिस्त-मिशन्-यन्त्रे मुद्रितञ्च ।

---

संवत् १९४२-४४ ॥

# BIBLIOTHECA INDICA

A

# COLLECTION OF ORIENTAL WORKS

PUBLISHED BY

## THE ASIATIC SOCIETY OF BENGAL.

NEW SERIES, NOS. 574, 582, 587, 597 AND 598.

---

THE

# AS'VA-VAIDYAKA,

## A TREATISE ON THE VETERINARY ART.

BY

JAYADATTA SU'RI,

WITH AN APPENDIX CONTAINING THE TEXT OF NAKULA'S AS'VA-CHIKI'TSITA.

EDITED WITH SHORT NOTES BY

UMES'ACHANDRA GUPTA, KAVIRATNA,

LIBRARIAN, GOVERNMENT SANSKRIT COLLEGE,

CALCUTTA.

CALCUTTA:

PRINTED BY J. W. THOMAS, AT THE BAPTIST MISSION PRESS.

1887.

REFERENCE

GLASGOW UNIVERSITY LIBRARY

VIA VERITAS VITA

6248. - 1886

30114013926145

Oriental series